End. वीजस्य कोषः पत्रं वीजकोषः कोषोऽस्त्री …… पात्रे इति मेदिनी । ब्रियते इञ् वरणे गाङ्गलकादटेन वरं दलानां दीप्तिं वटति इत्यपि सन्ध्यार्या वराटः । (?) इयं पद्मवीजाधारे । पद्मवीज इति केचित् ॥ इह काण्डे यदुक्तं तत् श्लोकेन संहरति उक्तमिति । तत्र स्वर्गवर्गः सप्तधा उक्तः पातालस्चतुर्धा शब्दादीत्यादिशब्देन रूपरसादीनां ग्रहणं एषाञ्च सङ्गतमिति तत्र स्वःसङ्गतं देवादि असुरादि च व्योमसङ्गतं मेघादि नक्षत्रादि च दिक्सङ्गतं दिग्गजादि कालसङ्गतं दिनपक्षादि धा (?) सङ्गतं विचारणादि शब्देन रूपरसादिगन्धादिक …… यशोनिन्दादि च नाट्यधर्मादि-पातालसङ्गतं … … … … … … … … … … … … …

Colophon. इति श्रीवन्द्यघटीय-श्रीरमानाथशर्म्मात्मज-श्रीरत्नेश्वरशर्म्मविरचितामरकोष-टीका समाप्ता ॥

अत्र यल्लिखितं भ्रान्त्या चाज्ञानाल्लिखितञ्च यत् ।
तत्सर्व्वं पण्डितैः शोध्यं प्रार्थना प्राञ्जलिर्मम ॥
यो मत्कृतिं समालोक्य स्वपौरुषसमीहया ।
मन्दमाच्छादनं कुर्व्वन् सुकृतं तस्य नश्यतु ॥
नत्वा नारायणं देवं भवानीचरणान्ततः ।
गुरुपादं नमस्कृत्य चक्रे टीकेयमुत्तमा ॥
यत्नेन लिखिता पुस्ती छलेन नीयते यदि ।
पिता वै गर्द्दभस्तस्य माता च शूकरी भवेत् ॥
श्रीहरिः शरणं मुदा ॥

विषयः । अमरसिंहकृतस्य कोषस्य व्याख्यानम् ।

No. 8. अवयवटीका. By गदाधरभट्टाचार्य्यः. Substance, country-made paper, 18 × 4½ inches. Folia, 46. Lines, 9 on a page. Extent, 2,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Khaḍār grāma Kurān, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose. Correct.

Beginning. श्रीहरिः । कालिकेऽनुकूला भव । अनुमानं निरूप्य न्यायतदवयवनिरूपणं प्रतिजानीते । सूत्रे तथेति निरुक्तमनुमानं परार्थं विचारदशायां मध्यस्थस्य विवादविषयसाध्यनिश्चयरूपप्रयोजनसाधनं न्यायसाध्यं न्यायप्रयोज्यमित्यर्थः वादिप्रयुक्तन्यायजन्यशाब्दबोधेन मध्यस्थस्य लिङ्गपरामर्शरूपानुमानजननादिति भावः । ज्ञायमानलिङ्गस्यानुमानत्वे विशेषणस्य परामर्शस्य न्यायाधीनत्वेन तद्विशिष्टस्य तथात्वमित्यवधेयम् । अथवा अनुमानमनुमितिः परार्थं मध्यस्थस्य साध्यसंशयनिवृत्तिरूपप्रयोजनसाधनं परः प्रतिवादी अर्थो निवृत्तिर्यस्मात् तादृशमिति वा । एतेन निरूपणप्रयोजनमुपदर्शितम् । इत्यादि ॥

End. एतन्मतं दूषयति वीप्सयापीति । अयम्भावः महानसत्वादिनोपलक्षितेष्वधिकरणेषु साध्यवत्त्वप्रतीतावपि धूमवत्त्वावच्छेदेन वह्निमत्त्वाप्रत्ययात् तत्तद्रूपसामानाधिकरण्यांशेष्वेवाधिकरणेषु साध्याभावावगाहित्वात् व्यभिचारबुद्धौ बाधकाभावस्तस्माच्छाब्दतो व्याप्तिप्रत्ययार्थमेव व्याप्तिं प्रतीच्छारूपा वीप्सा । द्वित्वकयत्पदसमभिव्याहारस्थले तत्पदार्थांशे विधेयबोधकपदस्य यत्पदार्थविधेयव्यापकताविशिष्टस्वार्थलक्षणाया निरूढत्वात् व्याप्तिबोधानुपगमे धूमव ... ...
अधिकरणानामेव यत्र बुद्धिस्थता तत्र तत्र यो यो धूमवान् स वह्निमानिति प्रयोगस्यापि प्रामाण्यापत्तेः तादृशयत्तत्पदार्थेषु सर्व्वेषु वह्निमत्त्व धूमवत्त्वबोधात् वह्निधूमशून्याधिकरणस्याबुद्धिस्थत्वेन तदर्थविरहादिति ॥ ० ॥

Colophon. श्रीकाली जयतितरां । समाप्तश्चायं ग्रन्थः ॥

विषयः । तत्त्वचिन्तामणीयानुमानखण्डान्तर्गतस्य अवयवग्रन्थस्य शिरोमणिकृतदीधित्याख्य टीकायाः व्याख्यानम् ।

No. 9. अष्टोत्तरसहस्रमहावाक्यरत्नावली. By रामचन्द्रेन्द्रः. Substance, country-made paper, 12×5 inches. Folia, 42. Lines, 8 on a page. Extent, 600 çlokas. Character, Nāgara. Date, ? Place of deposit, Hātuyā Mahārāja's Library. Appearance, fresh. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीमद्विद्याधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः ।
ईशाद्युपनिषत् प्रोक्तमहावाक्यकलेवरम् ।
विकलेवरकैवल्यं रामचन्द्रपदं भजे ॥
विद्याधिष्ठानसन्नाववासुदेवेन्द्रमूर्त्तये ।

श्रीदेशिकस्वरूपाय परस्मै ब्रह्मणे नमः ॥
नत्वा श्रीदेशिकं ब्रह्म × × सिच्छताम् ।
महावाक्यरत्नराजिकिरणावलिरीर्य्यते ॥ इत्यादि ।

End. फलभूतमहावाक्यफलो वै देहमस्तकः ।
एवंविध्यादिदेहान्तमहावाक्यकलेवरः ॥
वस्तुतो निर्व्विशेषात्मा चिपाश्नारायणोऽस्माद्यम् ।
यन्महावाक्यसिद्धान्तमुक्तचित्तैकगोचरम् ॥
वासुदेवेन्द्रसंज्ञं तं नौमि नारायणं महः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दहृष्टान्त-रामचन्द्रेन्द्रयतिविरचिताष्टोत्तरशतोपनिषत्सारसंग्रहभूताष्टोत्तरसहस्रमहावाक्यरत्नावली परिपूर्णा । ॐ तत्सत् ॥

विषय । अत्र प्रथमं ऋगादिक्रमेण वेदविभागनिरूपणं तेषां शाखाप्रशाखाकीर्त्तनञ्च । ततो महावाक्यरत्नावल्यधिकारिनिरूपणं, अष्टोत्तरशतोपनिषदां शाखाभेदनिरूपणं, ईशाद्यष्टोत्तरशतोपनिषदां सारसंग्रहश्चेति ।

No. 10. असाधारण्यसिद्धान्तरहस्यम् . By मथुरानाथतर्कवागीशः . Substance, country-made paper, $16\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 16. Lines, 8 on a page. Extent, 700 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Khaḍār grāma Kurān, Paṇḍita Ambikā Caraṇa Vidyasāgara. Appearance, new. Prose. Correct.

Beginning. श्रीदक्षिणकालिका स्फुरतु मम चित्ते ॥ सर्व्वमनित्यं प्रमेयत्वादित्यादेः स्वमते साधारणत्वात् नचातिव्याप्तिप्रदर्शनासङ्गतेराह सम्प्रदायेति । तन्मते निश्चितसाध्यतदभाववद्वृत्तिरेव साधारणतया उक्तहेत्वोरनुपसंहार्य्यत्वा-साधारणत्वद्शायामलक्ष्यत्वमेवेति भावः । ननु मणिकारमते वास्तवसाध्या-भाववद्वृत्तिरेव साधारण इत्येव कुतोऽवधारितमित्यत आह एतएवेति स्वमते तस्य लक्ष्यत्वादेवेत्यर्थः । अग्रे सिद्धान्तग्रन्थे निश्चितसाध्यवत्तदन्य-वृत्तित्वमित्यत्र तत्पदस्य प्रक्रान्तनिश्चितसाध्यवत्परामर्शकत्वे साध्यसंशय-विषयीभूतपक्षे स्वपक्षे च वर्त्तमानस्यैतावतिप्रसङ्ग इत्यतस्तस्य साध्यवन्मात्र-परतां स्पष्टयितुं व्याचष्टे निश्चित इति । इत्यादि ।

End. तथाच प्रतिहेतुपरामर्शेऽप्रामाण्यज्ञानमिति पर्य्यवसितार्थः । एतेनाव्याप्य-त्वादिज्ञानस्यानुमितिविरोधिव्याप्यवत्ताज्ञानसत्त्वेऽकिञ्चित्करता व्याप्यवत्ता-

परामर्शप्रतिबन्धात् दुर्घटता वेत्यसङ्गतिरिति परास्तं अप्रामाण्यज्ञानेऽव्याप्यत्वादेर्धर्म्मितावच्छेदकानवच्छेदकानवच्छिन्न एव चेतौ भानात् तस्य व्याप्तिनिश्चयाप्रतिबध्यतया विरोधिनिश्चयोऽजनकीभूततत्त्वमवधाने प्रकृतसाध्यानुमितिसम्भवात् ॥

Colophon. ॐ काली जयति । इत्यसाधारणसिद्धान्तरहस्यम् ।
श्रीकालीचरणाम्भोजे धर्म्मकामार्थमुक्तिदे ।
मनो धावतु मे नित्यं द्विरेफ इव पङ्कजे ॥

विषयः । तत्त्वचिन्तामणीयानुमानखण्डान्तर्गतासाधारणग्रन्थस्य व्याख्यानम् ।

No. 11. आख्यातवादविवरणम्. Substance, country-made paper, 18×5 inches. Folia, 6. Lines, 9 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Vardhamāna, Kājoḍāgrāma, Post Office Aṇḍāl, Yatīndranātha Nāyek. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ श्रीकृष्णः शरणम् । नन्वाख्यातस्य यत्नवाचकत्वं शक्तिपाचकं विना कथमवधारितमतमाह पचतीति ॥ इत्यादि ।

End. संयोगानुकूलस्य व्यापारस्य तरोरपि सत्वात् त्यजति वृक्ष इत्यपि स्यादित्यर्थः । गुणमतमाह नवेति घटं जानातीत्यसङ्गतेराह क्वचिदिति ॥ ० ॥

Colophon. इत्याख्यातवादविवरणं सम्पूर्णम् ॥ * ॥

विषयः । आख्यातवादाख्यग्रन्थस्य व्याख्यानम् ॥

No. 12. आख्यातव्याख्यानम्. By विश्वेश्वरतर्काचार्य्यः. Substance, palm-leaf, 17×1 inches. Folia, 101. Lines, 3 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura Vidgā, Paṇḍita Içānacandra Smṛtipañcānana. Appearance, old. Prose. Generally correct.

Beginning. ॐ परमदेवतायै नमः । द्विर्वचनम् । अधिकारसूत्रमिदं वक्ष्यमाणानां संक्षेपाय कार्य्याकार्य्यनिमित्तानां यदुदीरणं सोऽधिकारः ॥ इत्यादि ।

End. अन्तस्यैव निमित्तमित्यनेन समवायलक्षणः सम्बन्धः प्रतिपादितः । अधिकारमतेस्तथा दर्शनादाद्य सपरस्वराया इति ॥ * ॥

Colophon. इति महामहोपाध्यायविल्वेश्वरतर्काचार्य्यविरचिताख्यातव्याख्यानं समाप्तम् ॥

विषयः । कातन्त्रीयाख्यातपादस्य व्याख्यानम् ॥

No. 13. आचारोल्लासः. (परशुरामप्रकाशीयः) By खण्डोरायपण्डितः. Substance, country-made paper, 19 × 4 inches. Folia, 103. Lines, 7 on a page. Extent, 3,600 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta Çyāmapukura, Bābu Nagendranātha Vasu. Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

निर्यातन्मदगण्डमण्डलमिलद्भृङ्गावलीमञ्जुल-
ध्यानाकर्णनिमीलिताक्षयुगलव्याजृम्भगजास्यप्रभुः ।
श्रीविश्वनाथनगरी जयति त्रिलोक्यां
वाराणसीति सुलभा किल यत्र मुक्तिः ।
तत्र श्रुतिस्मृतिपुराणविवादविज्ञो
धर्म्माधिकार्य्यथ महीपतिपण्डितोऽभूत् ॥
तस्मादभूत् श्रीमदनन्तपण्डितो
यः सर्व्वशास्त्राभिनिवेशमण्डितः ।
तस्यापि सूनुः किल कृष्णपण्डितः
काश्यां मे धर्म्मं सदि येन खण्डितम् ॥ (?)
तदीयसूनुः सकलार्थवेत्ता
निरन्तराभ्योचितधर्म्मशास्त्रः ।
ततः स नारायणपण्डितोऽपि
समादिशद्ग्रन्थमिमं विधातुम् ॥
तं धर्म्मशास्त्रार्थविवादनिष्ठं
पुत्रं कनिष्ठं हि गुणैर्गरिष्ठम् ॥
श्रीनारायणपण्डितस्य तनयः श्रीनीलकण्ठानुजः
खण्डोराय इति श्रुतिस्मृतिपुराणार्थं समुद्धृत्य च ।
नत्वा देवमभीष्टदं स्वपितरौ विद्वज्जनप्रीतये
+ + कुरुते निबन्धमखिलग्रन्थार्थसाराश्रयम् ॥

मन्वाद्याश्च स्मृतीः सर्व्वाः पुराणान्यखिलानि च ।
नारायणं भारतञ्च विष्णुधर्म्मोत्तरं तथा ॥
शाम्बपुराणञ्च तथा भविष्यञ्च विशेषतः ।
वैखानसाद्यागमांश्च तथा शैवागमादिकान् ॥
मेधातिथिं कल्पतरुं कालादर्शं मिताक्षराम् ।
हेमाद्रिञ्च पराशरमाधवं स्मृतिचन्द्रिकाम् ॥
स्मृत्यर्थसारं मदनरत्नञ्च स्मृतिदर्पणम् ।
प्रयोगपारिजातञ्च तथा सिद्धान्तशेखरम् ॥
न्यायपाणिनिमीमांसा आगमाः परिशीलिताः ।
तथापि बालिशत्वाच्च धार्ष्ट्यमालम्ब्य यन्मया ॥
नाम्ना हि परशुरामप्रकाश इति विश्रुतो ग्रन्थः ।
प्रकटयतु धर्म्मतत्त्वं तमसावृतमर्थतत्त्वमिव । इत्यादि ।

End. वामनं चक्रिनञ्चैव दुःस्वप्नेषु सदा स्मरेत् ।
एवमन्योऽपि सप्तशतीजपादिविधिर्ज्ञेयः । अत्र दुःस्वप्नतारतम्येन शक्तिभेदेन च व्यवस्था ज्ञेया । इति स्वप्नप्रकरणम् ।

Colophon. इति परशुरामप्रकाशे निद्रामयूखः । इति शाकद्वीपीय कुलावतंसखोखिल-मिश्रात्मजपण्डितमण्डलीमण्डनायमान—सार्व्वभौमसत्खवाणी-रसालरायपदवी-विराजमानमानोन्नत-श्रीमत्परशुराममिश्रकारिते वाराणसीस्थधर्म्माधिकारि-नारायणपण्डितात्मज-खण्डोराय-पण्डितविरचिते परशुरामप्रकाशे आचारोल्लासः समाप्तः ॥ * ॥

विषयः । आदौ प्रबोधमयूखः । तत्र आचारादिकथनम् । आह्निकरूपणम् । वारप्रशंसा । प्रबोधकालनिरूपणम् । प्रातर्जप्यादिकथनम् । माङ्गल्यदर्शनादिनिरूपणञ्च । २ य मयूखे, मृत्तिकाग्रहणे कालादिनियमः । मूत्रपुरीषत्यागविध्यादिः । शौचविधिः । गण्डूष-विध्यादिश्च । ३ ये स्नानमयूखे, दन्तकाष्ठप्रमाणकथनम् । निषिद्धदन्तकाष्ठादिकथनम् । दन्तधावनकालादिकथनम् । केशप्रसाधनादिकथनञ्च । ४ र्थे मयूखे, स्नानभेदादिकथनम् । स्नानमहिमकथनम् । प्रातःस्नानविधिः । नैमित्तिकस्नानादिविधिश्च । ५ मे वस्त्रमयूखे, परि-धेयवस्त्रादिकथनम् । परिधानविध्यादिकथनञ्च । ६ ष्ठे मयूखे, ऊर्द्ध्वपुण्ड्रप्रशंसादिः । तुलसी-काष्ठमालाधारणविध्यादिः । विभूतिमाहात्म्यकथनम् । भस्मधारणनिन्दादिकथनम् । विभूति-धारणाधिकारिकथनम् । रुद्राक्षधारणादिनियमश्च । ७ मे मयूखे, सन्ध्याकर्म्मप्रशंसादिकथनम् । सन्ध्याशब्दार्थकथनम् । सन्ध्यानुष्ठानविध्यादिः । प्राणायाममाहात्म्यादिकथनम् । मार्जनादि-

विधिः। अर्घ्यदानविध्यादिः। गायत्रीमहिमकथनम्। गायत्रीजपविध्यादिः। जपयोग्यप्रदेशादिकथनम्। जपमालालक्षणादिकथनम्। सन्ध्याक्रमकथनम्। सन्ध्याविधिनिषेधादिश्च। ८ मे मयूखे, होमप्रशंसादिः। होमकालादिनिरूपणम्। होमविधिश्च। ९ मे मयूखे, दानप्रशंसा। नित्यदानविध्यादिश्च। १० मे मयूखे, अभिवादनविधिः। प्रत्यभिवादनविध्यादिश्च। ११ शे मयूखे, वेदाभ्यासप्रशंसा। वेदाध्ययनविध्यादिः। विद्यादानफलम्। अनध्यायदिनादिनिरूपणञ्च। १२ शे मयूखे, कुशग्रहणकालादिकथनम्। कुशप्रतिनिधिकथनञ्च। १३ शे मयूखे, धनार्जनप्रशंसा। ब्राह्मणादीनां वृत्तिकथनम्। स्वदत्त्यनुष्ठानफलादिकथनञ्च। १४ शे मयूखे, माध्याह्निकस्नानादिविधिः। उष्णस्नानविधिश्च। १५ शे मयूखे, ब्रह्मयज्ञप्रशंसादिः। तत्कालनियमादिः। तर्पणविधिश्च। १६ शे मयूखे, देवपूजाप्रशंसा। देवपूजाकालनिरूपणम्। अधिकारिनिरूपणम्। पूजास्थानादिनिरूपणम्। शालग्राममाहात्म्यादिकथनम्। शालग्रामलक्षणनिरूपणम्। दामोदरादीनां लक्षणनिरूपणम्। उपचारद्रव्यादिनिवेदनविधिः। पुष्पमाहात्म्यञ्च। चयनविध्यादिः। विष्णुपूजायां निषिद्धपुष्पादिकथनम्। पञ्चायतनक्रमकथनम्। पार्थिवपूजाविध्यादिः। गुरुपूजादिः। निर्माल्यादिधारणविधिः। देवार्चनाकरणे प्रायश्चित्तादिकथनञ्च। १७ शे मयूखे, पञ्चयज्ञप्रशंसामुखेन तदकरणे दोषकीर्त्तनम्। वैश्वदेवविध्यादिः। नित्यश्राद्धविधिः। अन्नदानफलादिकथनञ्च। १८ शे मयूखे, भोज्याभोज्यनिरूपणम्। भोजनकालादिकथनम्। भोजनोत्तरकर्म्मादिनिरूपणम्। ताम्बूलभक्षणविध्यादिश्च। १९ शे मयूखे, विश्रामनियमादिकथनम्। सायंसन्ध्याविध्यादिश्च। २० शे मयूखे, निद्राविधिः। भार्य्यागमनविध्यादिः। स्वप्नानां शुभाशुभत्वकथनञ्च। २१ शे मयूखे, श्राद्धस्वरूपकथनम्। श्राद्धाकरणे दोषकथनम्। अनुकल्पविधिश्च। २२ शे मयूखे, श्राद्धाद्यधिकारिनिरूपणम्। २३ शे मयूखे, श्राद्धकालादिनिरूपणम्। षोडशश्राद्धकालादिनिरूपणम्। सपिण्डीकरणव्यवस्थादिः। वृद्धिश्राद्धव्यवस्थादिश्च। २४ शे मयूखे, श्राद्धयोग्यप्रदेशादिकथनम्। २५ शे मयूखे, श्राद्धार्हब्राह्मणपरीक्षा। शाकद्वीपिब्राह्मणानां शाकद्वीपस्य च निरूपणम्। शाकद्वीपिलोकानां स्वरूपकथनम्। तथा शाकद्वीपिब्राह्मणानां स्वरूपकथनम्। शाकद्वीपिब्राह्मणानां उत्पत्तिकथनम्। श्राद्धीयब्राह्मणनिमन्त्रणविध्यादिश्च। २६ शे मयूखे, श्राद्धपाकार्हमन्त्रादिकथनम्। श्राद्धयोग्यधान्यादिनिरूपणम्। श्राद्धविहितभोजनपात्रादिनिरूपणञ्च। २७ शे मयूखे, श्राद्धपरिभाषा। २८ शे मयूखे, अग्नौकरणहोमविध्यादिः। श्राद्धभोजनकालादिनिरूपणम्। विकिरविध्यादिः। पिण्डप्रमाणादिकथनम्। पिण्डदानविध्यादिश्च। २९ शे मयूखे, वैश्वदेवश्राद्धशेषभोजनविध्यादिः। ३० शे मयूखे, श्राद्धाङ्गतर्पणविध्यादिः। पार्व्वणश्राद्धानुक्रमश्चेति।

No. 14. आचार्य्यानुमानटिप्पनी. By गदाधरभट्टाचार्य्यः. Substance, country-made paper, 18×4½ inches. Folia, 14. Lines, 9 on a page. Extent, 650 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office, Khaḍār, grāma Karāna, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose. Correct.

Beginning. श्रीकालीचरणाम्भोज हृदि तिष्ठ सदा मम ।
उपलक्षणस्यैव परिचायकत्वेन प्रसिद्धतया परिचायकत्वप्रतिक्षेपेण भिन्नमेव विशेषकमिति विशेषणत्वापगमो मूलेऽसङ्गतः । न च परिचायकत्वप्रतिक्षेपपर एवायं ग्रन्थः । वह्निमत्त्वेन्द्रियसंयोगपरिचायकत्वाभिधानस्यासङ्गतेरत उपलक्षणविशेषणसाधारणपरिचायकत्वपरतां प्रकृतेदर्शयति परिचायकत्वमिति । इत्यादि ।

End. अयत्वाभ्युपगमवादः तत्तत्पक्षतावच्छेदकावच्छिन्नविशेष्यकतत्तद्व्याद्यनुमितित्वरूपविशेषकार्य्यकारणतावच्छेदकगर्भे तत्तदनुमितित्वादिनिवेशादेवोपपत्तेस्तदवच्छिन्नं प्रति हेतुत्वान्तरस्य निर्युक्तिकत्वात् सुखादिसाधारणात्मगुणत्वावच्छिन्नं प्रति मनस्त्वेन कारणताकल्पनात् तत एवानुमितेः सकरणकत्वनिर्व्वाहे अनुमितित्वावच्छिन्नं प्रति ज्ञानत्वादिना हेतुत्वमपि निर्युक्तिकमित्यस्वरसबीजमत्र बोद्धव्यम् ।

Colophon. इति आचार्य्यानुमानगदाधरीयटिप्पनी समाप्ता । श्रीकाली मम चेतसि स्फुरतु । श्रीरामः ।

विषयः । तत्त्वचिन्तामणिदीधितेरनुमानखण्डीयानुमितिग्रन्थस्य आचार्य्यानुमानांशस्य व्याख्येयम् ।

No. 15. आत्ममन्दिरस्तोत्रम्. By यामुनाचार्य्यः. Substance, country-made paper, 12×4 inches. Folia, 7. Lines, 7 on a page. Extent, 150 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Mahānta Bharata Rāmānuja Dāsa. Appearance, new. Verse. Incorrect.

Beginning. श्रीमते रामानुजाय नमः ।
ॐ स्वादयन्निह सर्व्वेषां × × × × सदुर्पचम् ।
स्रोचयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥

नमो नमो यामुनाय यामुनाय नमो नमः ।
नमो नमो यामुनाय यामुनाय नमो नमः ॥
नमो यामुनपादाब्ज रेणुभिः पावितात्मने ।
विदिताखिलवेद्याय गुरवे विदितात्मने ॥
+ + + + × +
नमो नमो मधुजिदङ्घ्रिसरोजतत्त्व-
ज्ञानानुरागमहिमातिशयान्तसीम्ने ।
नाथाय नाथमुनये + + + + + +
नित्यं यदि + चरणौ शरणं मदीयम् ॥
भूयो नमः परिमिताच्युतभक्तितत्त्व-
ज्ञानामृताब्धिपरिवाहशुभैर्वचोभिः ।
लोकेऽवतीर्णपरमार्थसमग्रभक्तिं
+ + + नाथमुनये यमिनां वराय ॥ इत्यादि

End. ननु प्रपन्नः सकृदेव नाथ
तवाहमस्मीति च याचमानः ।
तवानुकम्प्यः स्मरतः प्रतिज्ञां
मदेकवर्ज्जं किमिदं व्रतं ते ॥
(?) प्रकृतिमत् त्वच्चरणारविन्दे
प्रेमप्रकर्षावधिमात्मवन्तम् ।
पितामहं नाथमुनिं विलोक्य
प्रसीद मद्वृत्तमचिन्तयित्वा ॥
यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोऽहं यामुनेयं नमामि तम् ॥

Colophon. इति श्रीयामुनाचार्य्यविरचितायां (?) आत्मनिन्दिरस्तोत्रं सम्पूर्णम् ॥

विषयः । यामुनाचार्य्यस्य स्तुतिः ।

No. 16. आनन्दलहरीटीका. By रामप्रसन्नचूडामणिः. Substance, country-made paper, 19 × 3½ inches. Folia, 25. Lines, 6 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, ? Place of deposit, District Hugli, Khānākul Kṛṣṇanagara, Paṇḍita Bramhanārāyaṇa Vidyālaŋkāra. Appearance, tolerable. Prose and verse. Correct.

Beginning.

नत्वा श्रीरामपितरौ रामशङ्करशर्म्मणा ।
आनन्दलहरीव्याख्या तन्यते रामतुष्टये ॥
अद्वैतवक्तुः कृतिनो ... ... व्याख्या कृताऽस्या बहुधा पुरा या ।
दोषैरभुक्तोक्तिरथैर्निरस्ता शृङ्खलिता मे रघुनाथ धीराः ॥

अत्र धीरपरम्परापरिप्राप्ततयाद्वैतवादविमुखः शङ्कर इव श्रीशङ्कराचार्य्यैः शिव इति मङ्गलप्रतिपादकं निर्दिशन् स्वेष्टदेवं श्रीरामचन्द्रं स्तोतुमारभमाणः परमात्मनस्तस्यातिपुण्यवतां ब्रह्मादीनामेवाराध्यतया अहमकृतपुण्यः सन् किं स्तौमीत्याह शिव इत्यादि — शिवशब्दोऽत्र श्रीरामपरः नित्ये परे ब्रह्मणि शिवे इत्यध्यात्मरामायणात् सर्व्वदेवात्मकः शिवः ॐ तत्सत् इत्येतद्राम-चन्द्रस्य नामाष्टोत्तरं शतमिति पद्मपुराणाच्च ... ...
... ...
देवो दीप्तिमान् पुरुषस्तेजोरूपश्चेद् यदि शक्तियुक्तो भवति तदा खलु निश्चितं स्पन्दितुमपि न कुशलः न समर्थः शिरश्चालनभेदसुतश्च ...
... ... अतो हे हरिहरविरिञ्च्यादिभि-रप्याराध्य विष्णुशिवब्रह्मेन्द्रप्रभृतिभिरप्याराधनीय सकलकार्य्यनिर्व्वाहाया-भ्यर्थनीय ... ... अं अक्षराणामकारोऽस्मीति अकारः स्यात् परं ब्रह्मेति चोक्ताकारलक्षणं त्वां प्रणन्तुं प्रकृष्टेन भक्त्यतिशयादिना नमस्कर्त्तुं स्तोतुं वा ... ... अकृतपुण्यः नास्ति कृतपुण्यं यस्य स जनस्तथा च कृत-पुण्याभाववान् जनः अथवा न कृतं पुण्यं येन सः ... ... कथं प्रभवति समर्थो भवति ॥ इत्यादि ।

End.

अथ भक्त्या पुनरप्याह कठिने इत्यादि — हे सीतापते अचरोऽपि त्वं यथा आदेवि किरातकन्यकाभिः सम्यग्दीप्तिमत्किरातबालाभिर्युतेऽपि किञ्च निश्चितं तव विष्णुशैले विन्ध्यपर्व्वते कृपय तत्कृपां विना तासां तत्-पर्व्वतस्य च प्रकाशयत्वाभावात् । न च कथं चित्रकूटादिं विहाय विन्ध्यो-पादानमिति वाच्यं तद्भक्ताया निवासतस्तदुक्तं धन्यासि कृतपुण्यासि विष्णुभक्तासि पार्व्वतीति विन्ध्याचलनिवासिनीत्यादीति ध्येयम् । तथा मम मानसे कठिने काठिन्येऽपि निर्जितशारदारविन्दौ अनेनातिकोमलावपि तव चरणौ निधत्स्व निधापयेत्यर्थः ॥ १०५ ॥ (अतःपरं खण्डितम्)

विषयः । शङ्कराचार्य्यकृतानन्दलहरीस्तोत्रस्य श्रीरामचन्द्रपक्षे व्याख्यानम् ।

No. 17. आनन्दलहरीटीका . (हरिभक्तिसुधोदया) By हरिनारायणः. Substance, country-made paper, 14×4 inches. Folia, 37. Lines, 12 on a page. Extent, 1,400 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Āḍāihājār, Paṇḍita Candrakānta Vidyālaṇkāra. Appearance, old. Prose. Correct.

Beginning.

ॐ नमः परमदेवतायै ।

हरिनारायणः श्रीमान् विश्वामित्रकुलोद्भवः ।
तनोत्यानन्दलहरीहरिभक्तिसुधोदयाम् ॥

अथ खलु दुस्तरदुःखसंघातघोरतरसंसारसागरान्तरुद्दामशोकसन्तापप्रबल-वडवानलज्वालाजालकवलनविकलान् सकललोकानालोक्यात्मतत्त्वज्ञाननि-दानजगदुपादानकारण-परदेवतासमाराधनोपाय-मन्त्रयन्त्रध्यानाविधानप्रस-न्नान्तःकरणो भगवान् शङ्कराचार्य्यो विधाय्यानिरवद्यतन्त्राण्यनेकशो जन्म-मरणाद्यनेकक्लेशरूपामङ्गलरहितां मन्त्रयन्त्रध्यानार्चनभजनप्रकारं प्रकाशयन् भवानीस्तुतिमारभते । शिव इत्यादि । शिवः शक्त्येति शिवोऽविद्या तत्कार्य्योपार्जितजन्ममरणाद्यनेकक्लेशरूपा मङ्गलरहितत्वात् कल्याणरूपः सदाशिवः केवलनिर्गुणं ब्रह्म वा शक्त्या कर्त्तुमकर्त्तुमन्यथा कर्त्तुं शक्त्या त्रिगुणात्मिकया अघटनघटनपटीयस्या प्रकृत्या यदि युक्तः परिच्छिन्नो भवति तदा प्रभवितुं प्रभुतां विधातुं शक्तः समर्थो भवति । तथाहीच्छाज्ञान-क्रियात्मकशक्तिसम्बन्धादेव गुणातीतस्यापीश्वरत्वात् सृष्ट्यादिकार्य्ये प्रवृत्ति-रिति भावः । इत्यादि ॥

End.

प्रकारान्तरेणापि पुनस्तद्यानमाह पवित्रीकर्त्तुमिति ।

पवित्रीकर्त्तुं नः पशुपतिपराधीनहृदये
दयामित्रैर्नेत्रैररुणधवलश्यामरुचिभिः ।
नदः शोणो गङ्गा तपनतनयेति ध्रुवममुं
त्रयाणां तीर्थानामुपनयसि सम्भेदमनघे ॥

हे पशुपतिपराधीनहृदये महादेवायत्तचित्ते अनघे निष्पापे ध्रुवं निश्चितं नोऽस्मान् पवित्रीकर्त्तुं अरुणधवलश्यामरुचिभी रक्तशुक्लकृष्णकान्तिभिर्नेत्रैः शोणो नदः गङ्गा शुक्ला तपनतनया कालिन्दी च कृष्णा इत्येतन्नामकानां त्रयाणां तीर्थानां अमुं सम्भेदं सङ्गमं उपनयसि प्रापयसि कीदृशैर्नेत्रैर्दया-मित्रैर्दयैव मित्रं येषां तैः ... ...
विष्णुपक्षेऽपि अये इति सम्बोधनं पशुपतिपराधीनहृदिति गङ्गाविशेषणं

अथवा पशुपतिपराधीनहृदये इति समुदितमेव गङ्गाविशेषणं दं कामं ददातीति ददः कृष्णत्वं कृष्णवर्णत्वात् तत्सादृश्यं वा सतीति ददया यमुना अनघे स्थाने पूर्व्ववन्निमित्तसप्तमी वा अनघे निष्पापे जने दयाभिर्वेरिति वान्वयः शेषं समानमिति ।

Colophon. (अतःपरं खण्डितम्)

विषयः । शङ्कराचार्य्यकृताया आनन्दलहर्य्याः शक्तिपक्षे विष्णुपक्षे च व्याख्यानम् ।

No. 18. आनन्दलहरीटीका. By श्रीकान्तभट्टः. Substance, country-made paper, 8 × 3½ inches. Folia, 63. Lines, 11–14 on a page. Extent, 1,520 çlokas. Character, Nāgara. Date, Sm. 1851. Place of deposit, Benares city, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः । श्रीगुरुचरणकमलेभ्यो नमः ।

अमलकमलनेत्रा पूर्णशीतांशुवक्त्रा
दनुजमनुजदेवैर्वन्दिता सिद्धसंघैः ।
उदिततरणितेजोमण्डलारक्तकान्ति-
र्दिशतु सकलसिद्धिं सुन्दरी साधकेभ्यः ॥
श्रीरामजीगुरुपदाम्बुजभक्तिपूतः
श्रीकान्तभट्टकरुणात्तसमस्तविद्यः ।
गङ्गाधरेण गुरुणोदितशास्त्रमूर्द्धा
टीकां करोति विबुधः कविराजशर्म्मा ॥ इत्यादि ।

End. हे वाचां जननि वाचां मातर्मदीयाभि र्वाग्भि र्मम वाणीभिस्तवेयं स्तुतिः । यतस्त्वं वाचां जननी मम मूढस्यायमभिमानः ॥ ० ॥

Colophon. इति श्रीकान्तभट्टविरचितं सौन्दर्य्यलहरीटिप्पनं सम्पूर्णम् ॥ सम्वत् १८५१ ॥

विषयः । शङ्कराचार्य्यकृतानन्दलहर्य्या व्याख्यानम् ।

No. 19. आपस्तम्बसूत्रे गृह्यप्रश्नः. Substance, country-made paper, 10 × 3 inches. Folia, 12. Lines, 9 on a page. Extent, 756 Sūtras. Character, Bengali. Date, ? Place of deposit, Benaras city, Govinda Bhaṭṭa Solāpurkār. Appearance, fresh. Prose. Correct.

Beginning. श्रीगणेशाय नमः। अथ कर्म्माण्याचाराद्यानि गृह्यन्ते उदगयन-पूर्व्व-पक्षाहः-पुण्याहेषु कार्य्याणि यज्ञोपवीतिना प्रदक्षिणम्। पुरस्तादुदग्वोपक्रमः तथापवर्गः। इत्यादि।

End. ऋच्छन्दः समवेतान्मन्त्रयतः ॥ मन्त्राभिगीयो गृह्यन्ते। येन जुहोति तदग्नौ प्रतितप्य। अथ कर्म्माण्याचाराद्यानि गृह्यन्ते। इत्यादि ॥

Colophon. इत्यापस्तम्बसूत्रे गृह्यप्रश्नः समाप्तः ॥ * ॥

विषयः। कृष्णयजुर्वेदीयानां गृह्यकर्मकथनम्।

No. 20. आयप्रकरणम्. Substance, country-made paper, 7 × 2½ inches. Folia, 4. Lines, 9 on a page. Extent, 80 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares city, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः। आयप्रकरणम्। दीर्घत्वेन विस्तारं गुणयित्वा वसुभि-र्भाजयित्वा शेषं आयः स्यात्। अष्टौ आयाः।
ध्वजधूमोऽथ सिंहः श्वा वृषभश्च खरो गजः।
ध्वांक्षश्चैव क्रमोक्तै रायाष्टकमुदाहृतम् ॥
एतत् फलमुक्तं गर्गेण ॥ इत्यादि।

End. सेव्यसेवकयोश्चैव गृह-तत्स्वामिनोरपि।
परस्परं मित्रयोश्च एकनाडी प्रशस्यते ॥ इति।

Colophon. अतःपरं खण्डितम्।

विषयः। ज्योतिषोक्तायभागगृहभवनसंग्रहः ॥

No. 21. आह्निककारिका. Substance, country-made paper, 10 × 3½ inches. Folia, 8. Lines, 13 on a page. Extent, 208 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares city, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः।
ब्राह्मे मुहूर्त्ते चोत्थाय चिन्तयेदात्मनो हितम्।
गुरुं विष्णुं नमस्कृत्य मातापित्रोस्तथैव च ॥

अस्तं गच्छति तिग्मांशौ यथाधिगत एव यः । (?)
स्थपेत वाग्यतः स्थित्वा समस्तामपि तां निशाम् ॥ इत्यादि ॥

End. महादेवं समाराध्य त्र्यम्बकमन्त्रं जपेत् ।
सर्व्वान् कामानवाप्नोति शम्भोस्तस्य प्रसादतः ॥

Colophon. इति शौनकीयत्र्यम्बककल्पः ॥ * ॥

विषयः । सूर्य्योदयमारभ्य अस्तं यावत् विप्राणां नित्यकर्म्मकथनम् ।

No. 22. उत्पलारण्यमाहात्म्यम् . (ब्रह्मसंहितान्तर्गतम्). Substance, country-made paper, 12 × 5 inches. Folia, 20. Lines, 18 on a page. Extent, 1,200 çlokas. Character, Nāgara. Date, Sм. 1933. Place of deposit, Hātuā Mahārājā's Library. Appearance, new. Verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीगुरुचरणकमलेभ्यो नमः ।
श्रीगङ्गाभागीरथ्यै नमः ।
कृष्णं कृष्णाग्रजं राधां ललितां ललितेक्षणाम् ।
वन्दे यशोदां गोपीश्च वन्दे मूर्द्ध्ना निरन्तरम् ॥
व्यासं वैयासकिं सूतं शौनकादीन् मुनीश्वरान् ।
गिरिजां गिरिजाकान्तं प्रणमामि सदैव हि ॥

मुनय ऊचुः ।

अरण्यानां नवानां यन्माहात्म्यं गदितं त्वया ।
कुतस्तत्रोत्पलारण्यमाधिक्येन निरूपितम् ॥
अतो येन निदानेन तत् प्रश्नस्समभूद् यतः ।
तन्नः कथय सर्व्वज्ञ श्रद्धया समुपस्थितान् ॥
कथामृतं नैव वयं त्वन्मुखाम्भोजनिःसृतम् ।
कदापि न विरंस्यामः पिबन्तोऽपि मुहुर्मुहुः ॥

सूत उवाच ।

आकर्णयध्वं तत्सर्व्वं यन्मां पृच्छथ सत्तमाः ।
छिनोमि युष्मत्सन्देहानुमाप्रश्नानुसारतः ॥ इत्यादि ।

End.

न चोत्पलानां माहात्म्यं भवानि भूतनायकः ।
अवर्णयद्यथेदानीं तद्यूयं श्रोतुमर्हथ ॥
यः करोत्यूर्जितां बुद्धिं हृदयस्थः सदा मम ।
तस्मै कृष्णाय महते नमः कारुण्यवार्द्धये ॥
या इमाः कथिता रम्याः कथाः क्षेत्रस्य वेधसः ।
सदैव देवदेवेशस्ताभिः कृष्णः प्रसीदतु ॥

Colophon. इति श्रीब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये पार्व्वतीश्वरसंवादे भवान्याः पञ्चमूर्त्तिकथनं नामैकविंशोऽध्यायः । ॐ तत्सत् । शुभम् । संवत् । १९२२ ।

विषयः । इति श्रीब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ब्रह्मस्तुतिर्नाम प्रथमोऽध्यायः । इति श्रीब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये द्वितीयोऽध्यायः । इति श्रीब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ब्रह्मयज्ञवर्णनं नाम तृतीयोऽध्यायः । इति श्रीब्र० सं० उत्पलारण्यमाहात्म्ये वह्निस्थतीर्थवर्णनं नाम चतुर्थोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये गङ्गावतरणं नाम पञ्चमोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये ब्रह्मावर्त्तक्षेत्रमाहात्म्यं नाम षष्ठोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ब्रह्मावर्त्तमहिमा नाम सप्तमोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ब्रह्मावर्त्तक्षेत्रयात्रावर्णनं नामाष्टमोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ब्रह्मावर्त्तक्षेत्रयात्रादिफलकथनं नाम नवमोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये ज्ञानतीर्थवर्णनं नाम दशमोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये कपिलेश्वरवर्णनं नामैकादशोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये सीतातीर्थवर्णनं नाम द्वादशोऽध्यायः । इति ब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये लक्ष्मणतीर्थकथनं नाम त्रयोदशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये ध्रुवक्षेत्रमाहात्म्यकथनं नाम चतुर्दशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये शुकतीर्थमाहात्म्यकथनं नाम पञ्चदशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये रामतीर्थवर्णनं नाम षोडशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये दशाश्वमेधतीर्थमाहात्म्यं नाम सप्तदशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये गोचरणतीर्थमाहात्म्यं नामाष्टादशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये अष्टतीर्थयात्राविधिः नामैकोनविंशोऽध्यायः । इति ब्र० सं० उत्पलारण्यमाहात्म्ये अष्टतीर्थयात्राकथनं नाम विंशोऽध्यायः । इति श्रीब्रह्मसंहितायामुत्पलारण्यमाहात्म्ये पार्व्वतीश्वरसंवादे भवान्याः पञ्चमूर्त्तिकथनं नामैकविंशोऽध्यायः ॥

No. 23. उपसर्गवृत्तिः. By भरतसेनः. Substance, country-made paper, 13 × 3 inches. Folia, 6. Lines, 5 on a page. Extent, 150 çlokas. Character, Bengali. Date, ? Place of deposit, Dhātrigrāma, District Bardhamāna, Paṇḍita Ṣaṣṭhidāsa Bhaṭṭācāryya. Appearance, tolerable. Verse. Correct.

Beginning. श्रीहरिः शरणम् ।

पार्व्वतीशङ्करौ नत्वा बालानामुपकारिका ।

भरतेनोपसर्गाणां वृत्तिः स्वल्पा विधीयते ॥ इत्यादि ॥

End. प्रसिद्धा गदिता ह्यर्थाः शेषा ज्ञेयाः प्रयोगतः ।

Colophon. इति वैद्य-गौराङ्गमल्लिकात्मज-श्रीभरतसेनविरचितोपसर्गवृत्तिः समाप्ता ॥०॥

विषयः । प्रपराद्युपसर्गाणामर्थादिनिरूपणम् ।

No. 24. उपासनविनोदः. Substance, country-made paper, 12½ × 5 inches. Folia, 17. Lines, 13 on a page. Extent, 500 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Bharata Rāmānuja Dāsa. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीरामचन्द्राय नमः ।

नत्वा रामं परं ब्रह्म सच्चिदानन्दविग्रहम् ।

उपासनविनोदोऽयं क्रियते ज्ञानसिद्धये ॥

इह खलु प्रथमं तावत् स्वाध्यायोऽध्येतव्य इत्यध्ययनशब्दवाच्यवेदाक्षरराशेग्रहणं विधीयते । तच्चाध्ययनं किंरूपं कथञ्च कर्त्तव्यमित्यपेक्षायां अष्टवर्षं ब्राह्मणमुपनीतमध्यापयेत् ।

श्रावण्यां प्रोष्ठपद्यां वा उपाकृत्य यथाविधि ।

युक्तश्छन्दांस्यधीयेत मासान् विप्रोऽर्द्धपञ्चमान् ॥

इत्यादि व्रतनियमविशेषोपदेशे ... ... विधीयन्ते ॥ इत्यादि ॥

End. अतो जन्मादिवाक्ये च जगत्कर्त्तृत्वोपादानत्वयोर्ब्रह्मलक्षणतया विवक्षितत्वात् लक्ष्यस्य ब्रह्मपदार्थस्य दुरपह्नवमेवेति । उक्तन्यायेन ब्रह्मशब्दस्य मुख्यार्थः सिद्धः । उक्तञ्च गारुडे ।

वेदे भूरिप्रयोगाच्च गुणयोगाच्च शार्ङ्गिणि ।

तस्मिन्नेव ब्रह्मशब्दो मुख्यार्थश्च महामुने ॥

यस्मिन् प्रयुज्यमाने तु गुणयोगः सुपुष्कलः ।
तत्रैव मुख्यवृत्तोऽयमन्यत्रेत्युपचारतः ॥ इति ।
ब्रह्मशब्दस्य परमात्मन्येव मुख्यवृत्तिर्नान्यत्रेति ॥

Colophon. (अतःपरं खण्डितम्)

विषयः । अत्र प्रथमं भक्तिस्वरूपनिरूपणम् । ततः श्रीरामोपासनाप्रकरणम् । सविशेष-ब्रह्मनिरूपणम् । अद्वैतनिरूपणञ्च ॥

No. 25. ऋग्वेदप्रातिशाख्यम् . By भगवान् शौनकः . Substance, country-made paper, 8 × 3 inches. Folia, 51. Lines, 7 on a page. Extent, 710 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares. city, Paṇḍita Vāmanācāryya Çāstrī. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः । हरिः ॐ ।
परावरे ब्रह्मणि यं सदाऽऽहुर्वेदात्मानं वेदनिधिं मुनीन्द्राः ।
तं पद्मगर्भं परमं त्वादिदेवं प्रणम्यर्चां लक्षणमाह शौनकः ॥
माण्डूकेयः संहितां वायुमाह तथाकाशं चास्य माक्षव्य एव ।
समानतामनिलाम्बरे च मलागस्त्यो विपरिहारं तदाह ॥ इत्यादि ।

End. अघोष ऊष्मणो घोषात् स्पर्शोऽन्तःस्थाच्च घोषिणः ।
अपूर्व्वं ऊष्मासंयुक्तो मकारो स्यातिहाम्बितान् ॥ (?)
यकारश्च वकारश्च पैतूष्मापूर्वविन्विता ॥ (?)

Colophon. इति भगवत् शौनकप्रणीत ऋग्वेदप्रातिशाख्यं समाप्तम् ॥ * ॥

विषयः । वर्णानामुच्चारणस्थाननिरूपणम् । उदात्तादिस्वरभेदेनोच्चारणनिरूपणम् । तेषां गुरुलघुत्वादिकथनम् । ऋग्वेदोक्तप्रयोगशिक्षादिकथनञ्च ॥

No. 26. एवकारविचारः . Substance, country-made paper, 14 × 2½ inches. Folia, 6. Lines, 8 on a page. Extent, 185 çlokas. Character, Bengali. Date, Sk. 1601. Place of deposit, District Ḍhākā, Dhānakoḍā Paṇḍita Pitāmbara Bhaṭṭāçāryya, Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । एवकारस्यात्यन्तायोगायोगान्ययोगानाञ्च प्रत्येकं व्यवच्छेदोऽर्थः । इत्यादि ।

End. न तु तद्विशिष्टान्यस्वरूपसम्बन्धावच्छिन्नाधिकरणतासम्बन्धेन इति न काप्यनुपपत्तिरिति ॥

Colophon. इति एवकारविचारः समाप्तः ॥ श्रीहरिः ।
इन्दुबिन्दुरसेन्द्वब्दे शुचौ भार्गववासरे ।
स्वार्थं श्रीकृष्णदेवो हि अलिखत् पुस्तकं त्विमम् ॥

विषयः । एवकारस्य विचारमुखेन व्याख्यानम् ।

No. 27. कतिपयकारकव्याख्यानम् . By विद्यासागरः . Substance, country-made paper, 17 × 4 inches. Folia, 57. Lines, 9 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Medinīmaṇḍala, Paṇḍita Vāmanadāsa Vidyāratna. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । समासघटकपदोपस्थाप्येन समासाघटकपदार्थस्य नान्वयः । आकाङ्क्षाविरहात् । इत्यादि ।

End. प्रकृतविभक्तेरपादानान्वितत्वाभावेनाव्यवहितस्यैवौपक्रमस्यैवौचित्यात् ननु देवदत्तसंप्रदादि । ... ...

Colophon. इति श्रीविद्यासागरकृतायां दुर्गटीकाटतौ कतिपयकारकव्याख्यानं सम्पूर्णम् ॥

विषयः । दुर्गसिंहकृतटत्तेः कारकपादस्य व्याख्यानम् ।

No. 28. कविप्रिया . By वामनमिश्रः . Substance, country-made paper, 12 × 3 inches. Folia, 52. Lines, 6 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, ? Place of deposit, Kājoḍā grāma, Post Office Aṇḍāl, Akhilanātha Nāyek. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य परमं ज्योतिर्वामनेन कविप्रिया ।
काव्यालङ्कारसूत्राणां तेषां वृत्तिर्विधीयते ॥
काव्यं ग्राह्यमलङ्कारात् । काव्यं खलु ग्राह्यमुपादेयं भवत्यलङ्कारात् । काव्यशब्दोऽयं गुणालङ्कारसंस्कृतयोः शब्दार्थयोर्वर्त्तते । इत्यादि ।

End. कुधेन नागेन्द्रमिवेन्द्रवाहनमित्यत्र इन्द्रवाहनशब्दे वाहनमाहितादिति णत्वं न भवति स्वस्वामिमात्रं विवक्षितं तेनेन्द्रवाहनमिति ।
सदसन्तो मया शब्दा विविच्यास्येन दर्शिताः ।
अनयैव दिशा कार्य्यं शेषाणामप्यवेक्षणम् ॥

Colophon. इति वामनमिश्रविरचिता कविप्रिया समाप्ता ॥ ० ॥

विषयः। प्रथमाधिकरणे,— १ माध्याये प्रयोजनस्थाननिरूपणम् । २ याध्याये अधिकारिचिन्तारीतिनिरूपणम् । ३ याध्याये काव्यशरीरादिनिरूपणञ्च । द्वितीयाधिकरणे,— १ माध्याये दोषनिरूपणम् । २ याध्याये वाक्यार्थदोषदर्शनञ्च । तृतीयाधिकरणे, — गुणादिविवेचनम् । चतुर्थाधिकरणे,— १ माध्याये शब्दालङ्कारविचारः । २ याध्याये उपमाविचारः । ततः अलङ्कारविवेचनञ्च । पञ्चमाधिकरणे,— १ माध्याये प्रयोगादिनिरूपणम् । २ याध्याये शब्दशुद्ध्यादिनिरूपणञ्चेति ॥

No. 29. काण्डानुक्रमणिकाविवरणम्. Substance, country-made paper, 8 × 3 inches. Folia, 11. Lines, 12 on a page. Extent, 258 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, fresh. Prose. Correct.

Beginning. श्रीगणेशाय नमः । अथ काण्डानुक्रमो विस्तरतो व्याख्यायते अथ काण्डानुक्रम इत्यादि काण्डशेषान् यथा काण्डं विद्यात् विचक्षण इति वचनात् काण्डशेषसंयुक्तानि पुरोडाशीयादीनि क्रमेण निर्दिश्यन्ते ॥ इत्यादि ।

End. यः वेदवित् यजुर्वेदं पठन् एतान् उक्तान् ऋषीन् वेद जानाति सः ऋषीणां सायुज्यं ब्रह्मणः सालोक्यं एति प्राप्नोति इत्यर्थः ॥

Colophon. इति काण्डानुक्रमणिकाविवरणे चतुर्थोऽध्यायः ॥ * ॥

विषयः। काण्डानुक्रमणिकाव्याख्या ।

No. 30. कातन्त्रपरिशिष्टटीका. By गोविन्दपण्डितः. Substance, palm-leaf, 13 × 1 inches. Folia, 94. Lines, 3 on a page. Extent, 1,150 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Āḍāihāzār, Paṇḍita Candrakānta Vidyālaṇkāra. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

शिष्टाचारपरिप्राप्तं प्रारब्धविघ्ननाशकम् हरिनमस्कारं कुर्व्वन् शिष्यशिक्षार्थं-मादौ निबध्नाति संसारेति । अस्यार्थः हरिं नत्वा कातन्त्रपरिशिष्टं ब्रूमः ॥ परिशिष्टं यद्वृत्त्यादिसुपचारान्नन्तद्विधायकं सूत्रमिति यथा कृतिना न कृताः कृत इति लक्षणे न कृतमित्यर्थः । संसारतिमिरमिहिरमिति विशेषणेन नमस्कारोपयुक्तत्वं दर्शितम् । नमस्यत्वं प्रतिपादयति महेशमिति तथाहि सर्व्वनियोजकत्वमिति संसारोत्कृष्टत्वेन नमस्यत्वमिति । इत्यादि ।

End. तच्छब्देन प्रकृतं कर्म्म उच्यते तस्य प्रत्ययस्तत्प्रत्ययः अवगतमिति न विद्यते संज्ञा यस्येति विग्रहः । ननु कथमेतदुपपन्नं मासादीनामपि कालादि-संज्ञायाः सत्वात् नैवमित्याद्यपादानादिसंज्ञानामविषय इति प्रस्तुतत्वादिति भावः कालादिशब्देन किमन्तोऽभिधीयन्ते इति विशिष्टप्रतिपत्तिसिद्धये श्लोकेन कालादिकं प्रतिपादयति कालस्येति कालस्य कालशब्दवाच्यस्येत्यर्थः कालभेदानां मासपक्षादीनां अध्वमानस्य क्रोशादेः अपादानादेरविषय इति परत्र निगदितं कथमिदानीं तद्विधाधिकरणे दर्शितमित्याह अधिकरणविधिरयमित्यादि यत्र स्वपदेन सह कालादेः सम्बन्धत्वेनोपस्थिति-स्तत्रैवायं विधिः । शेत्यस्येति किमिति रात्रावपानं पठतीति पाठोऽशुद्ध एव अधिकरणसंज्ञाविषयत्वेन कर्म्मत्वं सिद्धमिति दुर्गमतस्वीकारेऽप्यदोषात् तद्युक्तमित्याह इत्येत्यादि कर्म्मणि विशेषः ... ... ।

Colophon. इति गोविन्दपण्डितविरचितकातन्त्रपरिशिष्टे सन्धिप्रकरणम् ॥

No. 31. कात्यायनीतन्त्रम् . Substance, country-made paper, 10 × $4\frac{1}{2}$ inches. Folia, 18. Lines, 9 on a page. Extent, 588 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, fresh. Verse. Correct.

Beginning. श्री पार्व्वत्युवाच ।

हे देव जगदानन्द सृष्टिस्थित्यन्तकारक ।
त्वयोक्ताखिलतन्त्रेषु देवी कात्यायनी पुरा ॥
कात्यायनीति विख्याता सा कथं तद्वद प्रभो ॥ इत्यादि ॥

End. श्रीशिव उवाच ।

इति ते कथितं देवि संक्षेपेण तवाग्रतः ।

महादुर्गा-जगद्धात्री-विद्योत्पत्तिं सुदुर्लभाम् ॥

Colophon. इति कात्यायनीतन्त्रेऽष्टषष्टितमः पटलः ।

विषयः । कात्यायन्युत्पत्तिकथनम् । तस्याः पूजादिकथनञ्च । महादुर्गाजगद्धात्र्युत्पत्ति-कथनम् । तस्याः पूजादिकथनञ्च ।

No. 32. कापिलसूत्रवृत्तिः. (संक्षिप्ता) Substance, country-made paper, 8 × 3 inches. Folia, 9. Lines, 7 on a page. Extent, 126 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

यद्दाशिवभूतिरसनाखिलतत्त्वजाता

नानार्थतत्त्वममलं परिबोधयन्ती ।

श्रेयः करोति जगतां भगवन्तमाद्यं

तं श्रीमहर्षिकपिलं प्रभुमानतोऽस्मि ॥ इत्यादि ।

End. इत्येवं परिसूचयन्मतिमते मोक्षापदं कापिलम् ।

सूत्राणाममलं द्विकद्वयमिदं भीयाच्चिरं चेतसि ॥

Colophon. इति संक्षिप्तसांख्यशास्त्रे कापिलसूत्रवृत्तिः समाप्ता ॥ ० ॥

विषयः । सांख्यसूत्रस्य संक्षेपेण व्याख्यानम् ।

No. 33. कामाख्यातीर्थविधिः. Substance, country-made paper, $14 \times 2\frac{1}{2}$ inches. Folia, 9. Lines, 6 on a page. Extent, 200 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Roāil, Bābu Yogīndramohana Rāya. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. ॐ नमः कामाख्यायै । अथ कामाख्यातीर्थविधिः । तत्र पथक्रमः ।

पूर्व्वे तु धनकामः स्यात् राज्यकामस्तु पश्चिमे ।

उत्तरे मुक्तिकामस्तु ऐशान्ये रिपुनाशनम् ॥ इत्यादि ।

End. तस्याः स्वर्गमार्गेण पुन इति कामाख्यासंक्षेपपूजा अत्र पीठस्थानानि लिख्यन्ते ॥ ० ॥

Colophon. लिपिरियं आषाढ़स्य त्रिंशद्दिवसीया ॥ • ॥

विषयः । कामाख्यापूजाप्रयोगादिः ।

No. 34. कारकचक्रटीका. Substance, country-made paper, 13×3 inches. Folia, 18. Lines, 10 on a page. Extent, 950 çlokas. Character, Bengali. Date, Sk. 1746. Place of deposit, District Vãkuḍā, Post Office Sālatāḍā, Vākule, Paṇḍita Caṇḍicaraṇa Cattopādhyāya. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः । क्रियानिमित्तत्वमिति क्रिया धात्वर्थः तन्निमित्तं तत्प्रयोजकं ग्रामं गच्छति इत्यादौ गमधात्वर्थः । इत्यादि ।

End. इत्यत आह नौकापदद्देति । ननु काष्ठलौहप्रचयरूपा मानहरचारम्भ-कारम्भ (?) इत्यत आह नौकाया इति ॥ * ॥

Colophon. समाप्तेयं कारकचक्रटीका । शकाब्दाः १७४६ ।

विषयः । कारकचक्रस्य व्याख्यानम् ।

No 35. काव्यकौमुदी. By रत्नभूषणः. Substance, country-made paper, 16×3 inches. Folia, 130. Lines, 7 on a page. Extent 3,200 çlokas. Character, Bengali. Date, Sk. 1731. Place of deposit, District Barisāl Mānapāçā, Paṇḍita Govindacandra Çiromaṇi. Appearance, tolerable. Prose and verse. Correct.

Beginning. नमो गणेशाय ।

विद्धात्यपूर्व्वमखिलं पुष्णाति स्वेच्छयाथ संहरति ।
ब्रह्माच्युतहरजयिनी जयति कवेर्भारती देवी ॥
स्वरूपमिति शब्दानां तदर्थश्च निगद्यते ।
प्रागेव बालबोधार्थं ततः काव्यं निरूप्यते ॥
श्रीरत्नभूषणेनैषा तथापि च यथामति ।
विविच्य शब्दानर्थादीन् क्रियते काव्यकौमुदी ॥ इत्यादि ।

End. दोषाणामेवमन्येषामौचित्येन क्वचिद्बुधैः ।
अदोषता गुणत्वञ्चानुभयत्वञ्च गम्यताम् ॥

अनुभयत्वं दोषगुणाभाववत्त्वं ... ... ।
अन्येऽत्र काव्यकौमुद्यां विदन्तु सुधियः सुखम् ॥ ० ॥

Colophon. इति वैद्य-श्रीयुतरत्नभूषणकृतायां काव्यकौमुद्यां दोषनिर्णयो नाम दशमः परिच्छेदः । शाके सोमकृशानुशैलशशिनि लग्ने गते कार्मुके ॥ * ॥

विषय: । १ म परिच्छेदे नामकाण्डम् । २ य परि० लिङ्गादिनिरूपणम् । ३ य परि० धातुप्रत्ययादिकथनम् । ४ र्थं परि० काव्यस्य प्रयोजन-कारण-स्वरूपादिनिरूपणम् । ५ म परि० ध्वनिनिर्णयः । ६ ष्ठ परि० गुणीभूतव्यङ्ग्यशब्दार्थचित्रनिर्णयः । ७ म परि० गुणविवेकः । ८ म परि० अलङ्कारनिर्णयः । ९ म परि० अर्थालङ्कारविवेकः । १० म परि० दोषनिर्णयश्चेति ॥

No. 36. काशीकल्पलतिका. Substance, country-made paper, 16×4 inches. Folia, 20. Lines, 6 on a page. Extent, 450 çlokas. Character, Bengali. Date, ? Place of deposit, Gā̃ḍuriā, District Barisāl, Paṇḍita Durgācaraṇa Nyāyaratna. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमः काश्यै ।

देवाश्च प्रणमामि स्वर्न न च यत्ते मुक्तिदानक्षमाः
ज्ञानाधीनतया स्वतस्त्र विदुषां कीटादिकानामपि ।
तत्त्वज्ञानकरं कस्तौ जड़मतिः सन्दे न षड्दर्शनं
श्रीकाशीं प्रणमामि यान्तसमये निर्व्वाणमुक्तिप्रदा ॥ इत्यादि ।

End. शेषो न दृष्टः ।

विषय: । काशीत्ववादिकथनं तन्माहात्म्यकथनञ्च ।

No. 37. कुलपूजनचन्द्रिका. By चन्द्रशेखरशर्म्मा. Substance country-made paper, 14×3 inches. Folia, 12. Lines, 6 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Vidgā̃, Paṇḍita Ānandacandra Vidyālaṇkāra. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

नत्वा गुरुपदद्वन्द्वं चन्द्रशेखरशर्म्मणा ।
क्रियते कौलिकप्रीत्यै कुलपूजनचन्द्रिका ॥

नन्वत्र केषामधिकार इति जिज्ञासायां काल्हीयामले भैरवं प्रति देवीवाक्यं।
सर्व्वेषामधिकारोऽत्र नैव कार्य्या विचारणा ।
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं न संशयः ॥ इत्यादि ।

End. न्युब्जीकृत्य ततः पात्रं पुष्पं तत्र क्षिपेद्बुधः ॥

Colophon. अतःपरं खण्डितम् ।

विषयः। कौल्हिकानां पूजाविध्यादिः ।

No. 38. कृतार्थमाधवः. By राममाणिक्यकविराजः. Substance, palm-leaf, 13 × 1½ inches. Folia, 36. Lines, 3 on a page. Extent, 650 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Mattagrāma, Bābu Amṛtānanda Kavirāja. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
सृष्टा सृष्टिविधौ कृता निरुपमा नैपुण्यसीमेव या
सा श्रेयांसि सुलोचना दिशतु वो गोपाङ्गनानां वरा इत्यादि ।

End. माध । निश्वस्य। सर्व्वे गता अहमपि अभिन्याल्लये गच्छामीति निष्क्रान्तः।

Colophon. इति निष्क्रान्ताः सर्व्वे । तृतीयोऽङ्कः । अतःपरं खण्डितम् ।

विषयः। माधवसुलोचनोपाख्यानात्मकं नाटकम् ।

No. 39. कृत्पादविवरणम् (सारावलीयम्). By रघुवीरवन्द्योपाध्यायः. Substance, country-made paper, 15½ × 3 inches. Folia, 51. Lines, 6 on a page, Extent, 1,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Huglī, Khānākul, Kṛṣṇanagara, Paṇḍita Pūrṇacandra Tarkavāgīça. Appearance, old. Prose. Correct.

Beginning. श्रीरामः ।
अनाथनाथं रघुनाथमद्वयं चैतन्यमानन्दमनादिमादरात् ।
प्रणम्य टीका रघुवीरशर्म्मणा कृता कृतः कोविदमोदहृदये ॥
अथ नामपदसाधनमारभते तद्धि प्रथमादिसप्तविभक्त्यधीनं सा च विभक्ति-
र्नामोत्तरविधेया प्रायो नाम-कृत्प्रत्ययाधीनसाधनमिति नामोत्तरविद्धितात्
तद्धितादपि प्राक् नामोत्पादककृत्प्रत्ययविधायकं पादमातनुते तत्र च

शब्दशासनयोर्द्दशलकारेषु पुरस्कृतलड्धर्म्मातिदेशव्हिक्रचयविधेयत्वाच्च तत्-सूत्रमादौ विदधाति । लट् । धातोः कृत्पर्य्यन्तमधिकार इति धातोरिति व्याख्यातम् । इत्यादि ।

End. एवं प्रकृतिप्रत्ययागमादिभिरन्यानि साधनीयानि । तथाचोक्तमाचार्य्यैः । वर्णागमो वर्णविपर्य्ययश्च द्वौ चापरौ वर्णविकारनाशौ ॥

Colophon. इति श्रीरघुवीरवन्द्योपाध्यायकृतौ सारावल्यां कृतीयकृत्पादविवरणं समाप्तम् ।

विषयः । नारायणकृतसारावलीव्याकरणान्तर्गतकृदन्तपादस्य व्याख्यानम् ।

No. 40. कृदन्तटीका. By वंशीवदनः. Substance, country-made paper, 17 × 3 inches. Folia, 29. Lines, 7 on a page. Extent, 900 çlokas. Character, Bengali. Date, Sana 1270. Place of deposit, Kājoḍā, Post Office Aṇḍāl, Paṇḍita Yādu Bhaṭṭācāryya. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

श्रीरामं जलदश्यामं जितकामं तनुश्रिया ।
रत्नसिंहासनासीनं ज्ञानमुद्राकरं भजे ॥
लट् ॥ तिङ्प्रत्ययानन्तरं कृत्प्रत्ययविधानं इति तिङ्धर्म्मिप्रत्ययद्वयमाह ।
इत्यादि ।

End. ऋत्वादिति स्वभावेत्यादि ददित्यादौ यथा तुक् तद्व्याख्यानमेव ॥
श्रीवंशीवदनं विशिष्टविनयं विद्वज्जनप्रीणनं
सूते रायमती सती मतिमती श्रीमान् विशिष्टः स्वः यत् । (?)
व्याकारे क्रमदीश्वरेण चरिते श्रीनन्दिना शोधिते
गोयीचन्द्रकृते तु तद्विरचिते पादस्तृतीयो गतः ॥ ० ॥

Colophon. इति कृदन्तटिप्पनी समाप्ता । सन १२७० साल ।

विषयः । संक्षिप्तसारीयकृदन्तपादस्य व्याख्यानम् ।

No. 41. कृष्णकेलीनामकाव्यम् . By कृष्णमोहनः . Substance, country-made paper, 14×2 inches. Folia, 45. Lines, 4 on a page. Extent, 550 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Roāil Raghunāthapura, Paṇḍita Ramaṇīmohana Smṛtiratna. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
अनन्तब्रह्माण्डं भ्रमति सद्काण्डं तनुधर्त्ता
विज्ञेयस्याधारस्त्वणुपरिमितं मानसमहो ।
जगद्रूपं मायागुणत इति सोऽपि प्रथमितो
ब्रजौकः प्रेमाब्धिरवतु गुणसुब्धिः स निखिलम् ॥ इत्यादि ।

End. काण्डं नीतिशतं तथाष्टतशतं श्रोत्रस्रजां यष्टिका
पूर्व्वं चाप्यष्टतोद्यनु चतुरो हस्तादिकं संप्रदान् ।

Colophon. इति श्रीकृष्णमोहनकृतश्रीकृष्णकेलिनामकाव्ये सप्तमः सर्गः । समाप्तश्चायं ग्रन्थः ॥ • ॥

विषय: । कृष्णलीलावर्णनम् ।

No. 42. कृष्णाभिषेकविधिः . Substance, country-made paper, 12×3 inches. Folia, 6. Lines, 7 on a page. Extent, 110 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Post Office Caukidāṅgā, Nandigrāma, Rājapura, Paṇḍita Aṭalavihāri Bhaṭṭācāryya. Appearance, old. Prose. Generally incorrect.

Beginning. ॐ श्रीदुर्गा । अथ कृष्णाभिषेकविधिः । स्नातः शुचिः कृतनित्यक्रियः कुशहस्तश्चाचान्त आसनशुद्ध्यादिकं विधाय । इत्यादि ।

End. इति पुरुषसूक्तेन मन्त्रेण षोड़शकलसस्नानम् । ततस्तद्वस्त्रं परिवर्त्य गृहमानीय षोड़शोपचारैः पञ्चोपचारैर्वा पूजयेत् ।

Colophon. इति कृष्णाभिषेकविधिः ॥ * ॥

विषय: । श्रीकृष्णस्याभिषेकविधिस्तत्प्रयोगादिश्च ।

No 43. कौलगजमर्दनम् . By श्रीकृष्णानन्दाचलः . Substance, country-made paper, 11 x 5 inches. Folia, 29. Lines, 9 on a page. Extent, 600 çlokas. Character, Nāgara. Date, Sm. 1941. Place of deposit, Hātuā Mahārājā's Library. Appearance, new. Verse. Correct.

Beginning. गणपतये नमः ।

नत्वा श्रीगणनाथपादकमलं प्रत्यूहकक्षानलं
मार्त्तण्डं भव मे स्वपादयुगलं दैवज्ञिपद्माचलम् । (?)
लब्धं यत्पदसेवनेन सकलं वेदान्तवाचां फलं
तं कैलासपदादिसज्जमचलं संस्मृत्य लब्ध्वा बलम् ॥
विप्राणां रक्षणार्थाय विदुषां तोषहेतवे ।
स्मृत्यागमादिभिः कुर्व्वे दुष्कौलगजमर्दनम् ॥ इत्यादि ।

End. येषां बुद्धिस्तु नो धर्म्मे यथेष्टं सञ्चरन्ति ते ।
यथेष्टाचारतस्तेषां नो हृदिनै च वै रतिः ॥
रन्ध्रचन्द्राङ्कचन्द्रेऽब्दे भाषाख्ये विक्रमाङ्कते ।
आषाढ़ासितपक्षत्यां काशिकायामिदं कृतम् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीमत्कैलासाचलयतिवर्य्यशिष्य-श्रीकृष्णानन्दाचलनिर्मितं कौलगजमर्द्दनं समाप्तम् । सम्वत् १९४१ ।

विषयः । तान्त्रिकसम्प्रदायमतविरुद्धमतस्थापनम् ।

No. 44. क्तावादः . Substance, country-made paper, 18 x 4 inches. Folia, 2. Lines, 8 on a page. Extent, 64 çlokas. Character, Bengali. Date, ? Place of deposit, District Barisāl, Gāḍuriā, Paṇḍita Durgācaraṇa Nyāyaratna. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो भगवते वासुदेवाय ।

क्ताप्रत्ययस्य लाघवात् प्रागभावे शक्तिः ॥ इत्यादि ।

End. असङ्कोचेनैवोपपत्तौ सङ्कोचस्यान्याय्यत्वात् इति समासः ॥

Colophon. इति क्तावादः समाप्तः ॥

विषयः । क्ताप्रत्ययस्य विचारः ।

No. 45. क्रमकौमुदी. By धनञ्जयः. Substance, palm-leaf, 14 × 1½ inches. Folia, 29. Lines, 3 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Rājasāhī, Baidyabelghariyā, Bābu Çaçibhūṣaṇa Cakravarttī. Appearance, old. Verse. Incorrect.

Beginning. नमः शिवाय ।
विबुधमुनिफणीन्द्रश्रीदसीमन्तिनीना-
सुरभि सुभगसम्पन्नं पद्मायोद्यतानाम् ।
गङ्गविलसदहीन्द्रस्फुल्लतैराद्रवेद्यः
श्रितमवतु पुरारेः प्रच्छदच्छन्नमूर्त्तिः ॥
... ...
... ...
शुभिशोः क्रमकौमुदीं प्रतिपद्याभोगवत्यै सुख-
प्रश्नैश्च धनञ्जयः प्रतनुते सम्भोऽनुग्रहञ्चिमाम् ॥
येऽङ्काद्यो धातुसम्बन्धास्तेऽनुबन्धाः प्रकीर्त्तिताः ।
क्वाप्यवर्णः प्रयुक्तोऽत्र सुखोच्चारणसिद्धये ।
भू सत्तायां तथोत्पत्तौ चितौ संज्ञानके तथा ॥ इत्यादि ।

End. भूचुराद्योर्निविष्टाः स्युर्येऽन्येऽनुक्तास्तु धातवः ।
तयोर्वृन्करणाभावादसमाप्तसमुच्चये ॥

Colophon. नानामतानुबन्धेयं धनंञ्जयविनिर्म्मिता ।
(?) धराब्धा १०० शाकेषु समाप्ता क्रियाकौमुदी ॥ • ॥ श्रीहरये नमः ॥

विषयः । भुवादिचुरादिधात्वर्थानां निरूपणम् ।

No. 46. गङ्गालहरीटीका. By सदाशिवभट्टः. Substance, country-made paper, 12 × 5 inches. Folia, 20. Lines, 16 on a page. Extent, 912 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः । ॐ नमो गङ्गादेव्यै ॥
पितुः स्कन्धे स्थित्वा विमलशुकराशोकनधिया
हिमांशुं व्याकर्षन्नभिभयविदूनेन मनसा ।

विधुं हित्वा वक्रिं सरसमथिबुद्धा गिरिभुवा
प्रभं भीतो नीतो दिशतु बक्र वः शम्भुतनयः ॥ इत्यादि ।

End. इमां पीयूषलहरीं जगन्नाथेन निर्म्मिताम् ।
यः पठेत् तस्य सर्व्वत्र जायन्ते सर्व्वसम्पदः ॥
स्वकाव्यपठनफलमाह इमामिति पीयूषस्य अमृतस्य लहरीं त्वां यथा इत्यादि ॥

Colophon. शाके कीलकसंज्ञके न्वसुखके सन्मासके चैत्रके
वारे भार्गवके तिथौ करणके सर्पस्य सम्बालके ।
मूले भे विबुधौघचित्तसुखदा टीका समाप्ता नरा-
न्तेषां पातु समस्तपापहरणी गङ्गा महेशाङ्गगा ॥
नारायणो यस्य पितामहोऽभूत्नारायणभट्टश्च पिता यदीयः ।
गोपी यदीया जननी सुशीला टीका कृता तेन सदाशिवेन ॥
इति सदाशिवविरचिता जगन्नाथनिर्म्मितगङ्गालहर्य्या व्याख्या समाप्ता ॥

विषयः । गङ्गालहरीनामकस्य जगन्नाथकृतस्य स्तोत्रस्य व्याख्या ।

No. 47. गणपाठः. By भरतसेनः. Substance, country-made paper, 10×3½ inches. Folia, 17. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna Dhātrigrāma, Paṇḍita Ṣaṣṭhīdāsa Bhaṭṭācāryya. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीहरिः शरणं ।
स्मरहन्ता तन्वकान्तः सम्पद्लीनोऽपि सम्पदान्दाता ।
पीतविषो जितमृत्युश्चित्रचरित्रो हरो जयति ॥
समेतः कतिचिद्धातून् गृह्णीतानादिना तथा ।
नद्यादींश्च सुपद्येन ब्रवीति भरतो भिषक् ॥ इत्यादि ।

End. देवता वन्दे देवं वन्दे देवता भक्तिरस्तु देवे भक्तिरस्तु ॥ देवादिः ॥

Colophon. इति वैद्य—हरिहरखानवंशसम्भूत—गौराङ्गमल्लिकात्मज—श्रीभरतसेनकृतगण-पाठः समाप्तः ॥ * ॥

विषयः । मुग्धबोधमतेन धात्वर्थादिनिरूपणम् ।

No. 48. गणेशपञ्चाङ्गम्. Substance, country-made paper, 7×4 inches. Folia, 85. Lines, 5 on a page. Extent, 400 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः ।
ॐ श्रीभैरव उवाच । (?) देव्युवाच ।
ॐ भगवन् भूतभव्येश कुलधर्म्मप्रकाशक ।
कुलेश श्रोतुमिच्छामि तन्त्रस्यास्योत्तरार्द्धकम् ॥
श्रीभैरव उवाच ।
अधुना देवि कौलेशि कौलिकानां हितेच्छया ।
तन्त्रोत्तरार्द्धं वक्ष्यामि ... ... ॥
गणेशस्य च पञ्चाङ्गं ... ... ।
... ... ॥
देवि वक्ष्ये रहस्यं वै प्रश्नोत्तरमिमं महत् ।
अवक्तव्यमभक्तेभ्यो भक्तेभ्यो मुक्तिसाधनम् ॥ इत्यादि ।

End. पञ्चाङ्गस्य गणेशस्य रहस्यं मम पार्व्वति ।
विना शिष्याय नो दद्यात् साधकाय विना तथा ॥
पटलं पद्धति ... ... मन्त्रनामसहस्रकम् ।
स्तोत्रं पञ्चाङ्गमनिशं गोपनीयं स्वयोनिवत् ॥

Colophon. इति श्रीदेवीरहस्ये महागणपतिस्तोत्राख्यानं नाम शताधिकत्रिंशः पटलः ।

विषयः । श्रीमहागणपतेर्देवीरहस्यान्तर्गत-पूजापद्धति-सहस्रनाम-कवच-स्तोत्रात्मकपञ्चाङ्गस्य कथनम् ॥

No. 49. गयामाहात्म्यम्. (वायुपुराणीयम्). Substance, country-made paper, 11×6 inches. Folia, 25. Lines, 12 on a page. Extent, 500 çlokas. Character, Nāgara. Date, Sm. 1932. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
सूत उवाच ।
सनकाद्यैर्महाभागैर्देवर्षिः सह नारदः ।
सनत्कुमारं पप्रच्छ प्रणम्य विधिपूर्व्वकम् ॥

नारद उवाच ।
सनत्कुमार मे ब्रूहि तीर्थं तीर्थोत्तमोत्तमम् ।
तारकं सर्व्वभूतानां पठतां शृण्वतां तथा ॥
सनत्कुमार उवाच ।
वच्मे तीर्थवरं पुण्यं श्राद्धादौ सर्व्वतारकम् ।
गयातीर्थं सर्व्वदेशे तीर्थेभ्योऽप्यधिकं शृणु ॥ इत्यादि ।

End. उपाख्यानमिदं पुण्यं गृहे तिष्ठति पुस्तकम् ।
सर्पाग्निचौरजनितं भयं तत्र न विद्यते ॥
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् ।
तस्य गेहे स्थिरा लक्ष्मीः सुप्रसन्ना भविष्यति ॥
सूत उवाच ।
सनत्कुमारो मुनिपुङ्गवाय
पुण्यां कथां तत्र निवेद्य भक्त्या ।
समाश्रमं पुण्यवनैरुपेतं
विसृज्य सन्नीलगुहं जगाम ॥

Colophon. इति श्रीवायुपुराणे श्वेतवराहकल्पे गयामाहात्म्येऽष्टमोऽध्यायः । श्रीरामो-जयतितरां । सम्वत् १९१? चैत्र कृष्ण अमावास्यायामिदं पुस्तकं सम्पूर्णम् ॥

विषयः । वायुपुराणान्तर्गतम् गयातीर्थस्य माहात्म्यम् ।

No. 50. गर्गसंहिता. Substance, country-made paper, 13 × 6 inches. Folia, 302. Lines, 11 on a page. Extent, 5,600 çlokas. Character, Nāgara. Date, Sm. 1931. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
ॐ नमो भगवते तुभ्यं वासुदेवाय साक्षिणे ।
प्रद्युम्नायानिरुद्धाय नमः सङ्कर्षणाय च ॥
श्रीगर्ग उवाच ।
इत्थं श्रीकृष्णचरितं मया ते कथितं मुने ।
चतुःपदार्थदं नृणां किं भूयः श्रोतुमिच्छसि ॥

श्रीशौनक उवाच ।

बहुलाश्वो मैथिलेन्द्रः श्रीकृष्णोऽस्त्वदरिप्रियः ।
किं पप्रच्छाथ देवर्षिं तन्मे ब्रूहि तपोधन ॥ इत्यादि ।

End. नवसर्गविसर्गाढ्यां सर्गभङ्गर्गसंहितां ।
चतुर्वर्गप्रदामुक्ता गर्गो गर्गाचलं ययौ ॥
शरद्विकचपङ्कजश्रियमतीव विद्वेषक-
मलिन्दमुनिलेहितं कुलिशकञ्जचिह्नाञ्चितम् ।
स्फुरत्कनकनूपुरं दलितभक्ततापत्रयं
चलद्युतिपदद्वयं हृदि दधामि राधापतेः ॥

Colophon. इति श्रीमद्गर्गाचार्य्यसंहितायां विज्ञानखण्डे नारदबहुलाश्वसंवादे भक्ति-निरूपणं नाम दशमोऽध्यायः ॥ संवत् १९३१ ॥ ... ...

विषयः। अत्र नवखण्डाः सन्ति । आदौ विश्वजित्खण्डस्तत्र श्रीमद्गर्गाचार्य्यसंहितायां विश्वजित्खण्डे नारदबहुलाश्वसंवादे महतोपाख्यानं नाम १ अध्यायः । २ ग० सं० वि० ख० ना० ब० संवादे प्रद्युम्नविजयाभिषेको नाम २ अः । ३ ग० सं० वि० खण्डे यादवसैन्यनिर्गमनं नाम ३ अः । ४ ग० सं० वि० खण्डे प्रद्युम्नदिग्विजयार्थगमनं नाम ४ अः । ५ ग० सं० वि० ख० ना० ब० संवादे कलिङ्गदेशविजयो नाम ५ अः । ६ ग० सं० वि० ख० ना० ब० संवादे मरुधन्वमाल्लवमाहिष्मतीदेशविजयो नाम ६ अः । ७ ग० सं० वि० ख० ना० ब० सं० गुर्जराटविजयचेदिदेशगमनं नाम ७ अः । ८ ग० सं० वि० खण्डे ना० ब० सं० धुमच्छत्रवधो नाम ८ अः । ९ ग० सं० वि० खण्डे ना० ब० संवादे रङ्गपिङ्गवधे शिशुपालयुद्धे चेदिदेश-विजयो नाम ९ अः । १० ग० सं० वि० खण्डे ना० ब० संवादे कोंकण-कुटक त्रिगर्त्त केरल-तैलङ्ग-महाराष्ट्र-कर्णाटविजयकारूषदेशगमनं नाम १० अः । ११ ग० सं० वि० खण्डे ना० ब० सं० दन्तवक्त्रयुद्धे करूषदेशविजयो नाम ११ अः । १२ ग० सं० वि० खण्डे ना० ब० सं० उशीनर-विदर्भ-कुन्त-दरददेशविजयेऽगस्त्यकार्ष्णिज्ञानप्रस्तावो नाम १२ अः । १३ ग० सं० वि० खण्डे ना० ब० सं० शाल्वमल्लारलङ्काविजयो नाम १३ अः । १४ ग० सं० वि० वेङ्कटाद्रिद्राविड़देशविजयो नाम १४ अः । १५ ग० सं० वि० ख० ना० ब० सं० ऋष्यशृङ्गमत्स्यसौवीराभीरकामरूपकेकयविजयो नाम १५ अः । १६ ग० सं० वि० ख० ना० ब० संवादे १७ अः । १८ ग० सं० वि० ख० ना० काशी-कोशलोत्तरमरपालमैथिलकारूषपञ्चालकान्यकुब्जकापिस्थविन्दुनिषधभद्रमधुपूरसेनदेशविजयो नाम १८ अः । १९ ग० सं० वि० ख० ना० ब० सं० कुरुदेशगमने यदुकौरवोपाख्यानं नामैकोनविंशो-ऽध्यायः । २० ग० सं० वि० ख० ना० ब० सं० कौरवयुद्धवर्णनं नाम २० अः । २१ ग० सं० वि० ख० ना० ब० सं० यादवकुरुविग्रहे २१ अः । २२ ग० सं० वि० ख० ना० ब० सं० इन्द्रप्रस्थविगर्त-

वैराटकुरुजाङ्गलकौशाम्बम्लेच्छगौराङ्गविजये भरतखण्डदिग्विजयो नाम २२ अः। २३ ग० सं० वि० ना० ब० सं० करवीरदेशविजयपञ्चदेशप्रयाणं २३ अः। २४ ग० सं० वि० ना० ब० सं० यदुपक्षे युद्धे (गज) युद्धवर्णनं नाम २४ अः। २५ ग० सं० वि० ख० ना० ब० सं० यक्षदेशप्राग्ज्योतिषपुरविजये २५ अः। २६ ग० सं० वि० ख० ना० ब० सं० रत्नयक्षीचैनदेशविजये किम्पुरुषखण्डविजये २६ अः। २७ ग० सं० वि० ख० ना० ब० सं० दशार्णदेशविजये हरिवर्षखण्डविजयो नाम २७ अः। २८ ग० सं० वि० ना० ब० सं० उत्तरखण्डविजयो नाम २८ अः। २९ ग० सं० वि० ना० ब० सं० मकरडिण्डिमसिंहक्रौञ्चदेशविप्रद्वविजये हिरण्मयखण्डविजये २९ अः। ३० ग० सं० वि० ना० ब० सं० कलङ्कदेशमानवदेशविजये रम्यकखण्डविजये ३० अः। ३१ ग० सं० वि० ख० मन्मथदेशविजये केतुमालखण्डविजयो ३१ अः। ३२ ग० सं० वि० ख० भद्रदेशविजये भद्राश्वखण्डे चन्द्रावत्युपाख्याने कूटदैत्यवधो नाम ३२ अः। ३३ ग० सं० वि० ख० भद्राश्वखण्डगमने चन्द्रावत्युपाख्याने दैत्ययुद्धे भूतसन्तापनदैत्यवधो नाम ३३ अः। ३४ ग० सं० वि० ख० चन्द्रावत्युपाख्याने शकदैत्यवधो नाम ३४ अः। ३५ ग० सं० वि० च० कालनाभवधो नाम ३५ अः। ३६ ग० सं० वि० च० महानाभदैत्यवधो नाम ३६ अः। ३७ गर्गाचार्य्यसंहितायां चन्द्रावत्युपाख्याने हरिश्मश्रुदैत्यवधो नाम सप्तत्रिंशोऽध्यायः ३८ ग० सं० वि० ख० च शकुनियुद्धवर्णनं नाम ३८ अः। ३९ ग० सं० वि० ख० कृष्णागमनं नाम ३९ अः। ४० ग० सं० वि० चन्द्रावतीयुद्धोपाख्याने गरुडागमनं नाम ४० अः। ४१ ग० सं० वि० च० युद्धोपाख्याने शकुनिदैत्यवधो नाम ४१ अः। ४२ ग० सं० वि० च० यु० शकुनिवधोनाम भद्राश्वखण्डविजयो ४२ अः। ४३ ग० सं० वि० ख० इलावृतखण्डगमने सुतपोदेशविजये वेदनगरवर्णनं नाम ४३ अः। ४४ ग० सं० वि० इलावृतखण्डगमने वेदादिस्तुतिवर्णनं नाम ४४ अः। ४५ ग० सं० वि० इला रागकृत श्रीकृष्णान्तर्ध्यानवर्णनं नाम ४५ अः। ४६ ग० सं० वि० इला० गन्धर्व्वदेशविजये वसन्तमासलीवर्णनं नाम ४६ अः। ४७ ग० सं० वि० इला देवदेशविजये शक्रसंयुद्धं नाम ४७ अः। ४८ ग० सं० वि० इलावृतखण्डविजये प्रद्युम्नद्वारागमनं नाम ४८ अः। ४९ ग० सं० वि० यज्ञारम्भे स्वजननिमन्त्रणं नाम ४९ अः। ५० गर्गाचार्य्यसंहितायां विश्वजित्खण्डे नारदबहुलाश्वसंवादे उग्रसेनमहोदये राजसूययज्ञोत्सववर्णनं नाम पञ्चाशत्तमोऽध्यायः॥ समाप्तश्चायं विश्वजित्खण्डः॥ ० ॥ द्वितीयो गोलोकखण्डस्तत्र। १ गर्गाचार्य्यसंहितायां गोलोकखण्डे जनकनारदसंवादे श्रीकृष्णमाहात्म्यवर्णनं नाम १ अध्यायः। २ ग० सं० गो० ख० वैदेहनारदसं गोलोकवर्णनं नाम २ अः। ३ ग० सं० गो० ख० नारदबहुलाश्वसंवादे आगमोद्योगवर्णनं नाम ३ अः। ४ ग० सं० गो० ख० ना० ब० सं० उद्योगप्रश्नवर्णनं नाम ४ अः। ५ ग० सं० गो० ना० ब० सं० भगवद्ब्रह्मसंवादे भगवदागमोद्योगवर्णनं नाम ५ अः। ६ ग० सं० गो० ख० ना० ब० सं० कंसबलवर्णनं नाम ६ अः। ७ ग० सं० गो० ना० ब० सं० कंसदिग्विजयवर्णनं नाम ७ अः। ८ ग० सं० गो० ख० ना० ब० सं० श्रीराधाजन्मवर्णनं नाम ८ अः। ९ ग० सं० गो० ख० ना० ब० सं० वसुदेवविवाह-

वर्णनं नाम ९ अः। १० ग० सं० गो० ख० ना० ब० सं० बलभद्रजन्मवर्णनं नाम १० अः। ११ ग० सं० गो० ख० ना० ब० सं० श्रीकृष्णचन्द्रजन्मवर्णनं नाम ११ अः। १२ ग० सं० गो० ख० ना० ब० सं० नन्दमहोत्सववर्णनं नाम १२ अः। १३ ग० सं० गो० ख० ना० ब० सं० पूतनामोचो नाम १३ अः। १४ ग० सं० गो० ख० ना० ब० संवादे शकटासुरतृणावर्तमोचवर्णनं नाम १४ अः। १५ ग० सं० गो० ख० ना० ब० सं० विश्वदर्शन नन्दप्रभाव श्रीकृष्णनामकरणं नाम १५ अः। १६ ग० सं० गो० ख० ना० ब० सं० श्रीराधाविवाहवर्णनं नाम १६ अः। १७ ग० सं० गो० ख० ना० ब० सं० श्रीकृष्णबालचरित्रे दधिस्तेयवर्णनं नाम १७ अः। १८ ग० सं० गो० ख० ना० ब० सं० यशोदाब्रह्माण्डदर्शनं नाम १८ अः। १९ ग० सं० गो० ख० ना० ब० सं० यमलार्जुनभङ्गो नाम १९ अः। २० ग० सं० गो० ख० ना० ब० सं० भगवद्वैभववर्णने दुर्वासमो मायादर्शने नन्दनन्दनस्तोत्रवर्णनं नाम २० अध्यायः॥ समाप्तश्चायं गोलोकखण्डः॥०॥ तृतीयो वृन्दावनखण्डस्तत्र। १ श्रीगर्गाचार्य्यसंहितायां श्रीवृन्दावनखण्डे श्रीनन्दसुनन्दसंवादे वृन्दावनोद्योगवर्णनं नाम १ अः। २ ग० सं० वृ० ख० गिरिराजोत्पत्तिकथनं नाम २ अः। ३ ग० सं० वृ० ख० नन्दसुनन्दसंवादे कालिन्द्यागमनवर्णनं नाम ३ अः। ४ ग० सं० वृ० ख० नारदबहुलाश्वसंवादे वत्सासुरमोचो नाम ४ अः। ५ ग० सं० वृ० ख० ना० ब० सं० बकासुरमोचो नाम ५ अः। ६ ग० सं० वृ० ख० ना० ब० सं० अघासुरमोचो नाम ६ अः। ७ ग० सं० वृ० ख० श्रीकृष्णगोचारणवर्णनं नाम ७ अः। ८ ग० सं० वृ० ख० ना० ब० सं० धेनुकासुरमोचो नाम ८ अः। ९ ग० सं० वृ० ख० कालियदमनदावाग्निपानं नाम ९ अः। १० ग० सं० वृ० ख० ना० ब० सं० शेषोपाख्यानवर्णनं नाम १० अः। ११ ग० सं० वृ० ख० ना० ब० सं० कालियोपाख्यानवर्णनं नाम ११ अः। १२ ग० सं० वृ० ख० ना० ब० सं० राधाकृष्णप्रेमप्रकाशवर्णनं नाम १२ अः। १३ ग० सं० वृ० ख० ना० ब० सं० तुलसीमाहात्म्य-तुलसीपूजनं नाम १३ अः। १४ ग० सं० वृ० ख० ना० ब० सं० प्रीतिपरीक्षणं नाम १४ अः। १५ ग० सं० वृ० ख० ना० ब० सं० कृष्णदर्शनं नाम १५ अः। १६ ग० सं० वृ० ख० ना० ब० सं० रासक्रीडायां वृन्दावनविहारो नाम १६ अः। १७ ग० सं० वृ० ख० ना० ब० सं० रासक्रीडायां गोवर्द्धनबाहुलता-कुमुदन (?) मधुवनविहारो नाम १७ अः। १८ ग० सं० वृ० ख० ना० ब० सं० रा० क्री० कामवन-कोकिलवनविहारे तानलीलावर्णनं नाम १८ अः। १९ ग० सं० वृ० ख० ना० ब० सं० रा० क्री० शेषशायिलता-भाण्डीरवनविहारो नाम १९ अः। २० ग० सं० वृ० ख० ना० ब० सं० रा० क्री० लोहजङ्घमहावनविहारे शङ्खचूडवधो नाम २० अः। २१ ग० सं० वृ० ख० ना० ब० सं० रा० क्री० वृन्दावनविहारे शिवासुर्य्युपाख्यानं नाम २१ अः। २२ ग० सं० वृ० ख० ना० ब० सं० रा० क्री० वृन्दावनविहारे शिवासुरिमुनिवरप्राप्तिर्नाम २२ अः। २३ ग० सं० वृ० ख० ना० ब० सं० शङ्खचूडवधोपाख्याने विरजानदीसमुद्रोत्पत्ति श्रीदामशापप्रस्तावो नाम २३ अध्यायः। समाप्तश्चायं वृन्दावनखण्डः॥०॥ चतुर्थो गिरिराजखण्डस्तत्र। १ गर्गाचार्य्यसंहितायां गिरिराजखण्डे नारद-

बहुलाश्वसंवादे गिरिराजपूजाविधिवर्णनं नाम १ अः। २ ग० सं० गि० ख० गिरिराजमहोत्सववर्णनं नाम २ अः। ३ ग० सं० गि० ख० ना० ब० सं० गोवर्द्धनोद्धरणं नाम ३ अः। ४ ग० सं० गि० ख० ना० ब० सं० कृष्णाभिषेको नाम ४ अः। ५ ग० सं० गि० ख० ना० ब० सं० गोपविवादो नाम ५ अः। ६ गर्गाचार्य्यसंहितायां गिरिराजखण्डे नारदबहुलाश्वसंवादे ६ अध्यायः। ७ ग० सं० गि० ख० ना० ब० सं० गिरिराजवर्णनं नाम ७ अः। ८ ग० सं० गि० ख० ना० ब० सं० गिरिराजविभूतिवर्णनं नाम ८ अः। ९ ग० सं० गि० खण्डे गिरिराजोत्पत्तिवर्णनं नाम ९ अः। १० ग० सं० गि० ख० ना० ब० सं० गिरिराजमाहात्म्यं नाम १० अः। ११ ग० सं० गि० ख० ना० ब० सं० गिरिराजखण्डप्रभावस्तववर्णने सिद्धमोक्षो नाम ११ अः। समाप्तश्चायं गिरिराजखण्डः ॥ ० ॥ पञ्चमो माधुर्य्यखण्डस्तत्र। १ गर्गाचार्य्यसंहितायां श्रीमाधुर्य्यखण्डे नारदबहुलाश्वसंवादे श्रुतिरूपाख्यानं नाम १ अध्यायः। २ ग० सं० मा० खण्डे ऋषिरूपाख्यानं नाम २ अः। ३ ग० सं० मा० ख० ना० ब० सं० मैथिलोपाख्यानं नाम ३ अः। ४ ग० सं० मा० ख० ना० ब० सं० कोशलोपाख्यानं नाम ४ अः। ५ ग० सं० मा० ख० ना० ब० सं० अयोध्यापुरनिवासिन्युपाख्यानं नाम ५ अः। ६ ग० सं० मा० ख० ना० ब० सं० अयोध्यापुरनिवासिन्युपाख्यानं नाम ६ अः। ७ ग० सं० मा० ख० ना० ब० सं० अयोध्यापुरनिवासिन्युपाख्यानं नाम ७ अः। ८ ग० सं० मा० ख० ना० ब० सं० यज्ञसीतोपाख्याने एकादशीव्रतफलं नाम ८ अः। ९ ग० सं० मा० ख० ना० ब० सं० एकादशीमाहात्म्ये यज्ञसीतोपाख्यानं नाम ९ अः। १० ग० सं० मा० ख० ना० ब० सं० पुलिन्दकोपाख्यानं नाम १० अः। ११ ग० सं० मा० ख० ना० ब० सं० रमावैकुण्ठ-श्वेतद्वीपोर्द्ध-वैकुण्ठाजितश्रीलोकाचलवासिनी-श्रीसखीनामुपाख्याने ११ अः। १२ ग० सं० मा० ख० ना० ब० सं० होलिकोत्सवे दिव्यादिव्यत्रिगुणवृत्तिभूमिगोप्युपाख्यानं नाम १२ अः। १३ ग० सं० मा० ना० ब० सं० देवजनस्त्र्युपाख्यानं नाम १३ अः। १४ ग० सं० मा० ना० ब० सं० जालन्धर्य्युपाख्यानं नाम १४ अः। १५ ग० सं० मा० ख० ना० ब० सं० बर्हिष्मतीपुरन्ध्र्यटरसातलवासिनी नागेन्द्रोपाख्यानं नाम १५ अः। १६ ग० सं० मा० ख० ना० ब० सं० यमुनाकवचं नाम १६ अः। १७ ग० सं० मा० ना० ब० यमुनास्तवो नाम १७ अः। १८ ग० सं० मा० ख० श्रीसौभरिमान्धातृसम्वादे पटलपद्धतिवर्णनं नाम १८ अः। १९ ग० सं० मा० ख० सौभरिमान्धातृसम्वादे यमुनासहस्रनामकथनं १९ अः। २० ग० सं० मा० ख० नारदबहुलाश्वसम्वादे प्रलम्बवधो नाम २० अः। २१ ग० सं० मा० ना० ब० सं० दावाग्निमोचविप्रपत्नीदर्शनं नाम २१ अः। २२ ग० सं० मा० ना० ब० सं० नन्दादिवैकुण्ठदर्शनं नाम २२ अः। २३ ग० सं० मा० ना० ब० सं० सुदर्शनोपाख्यानं नाम २३ अः। २४ ग० सं० मा० ख० ना० ब० सं० व्योमासुरारिष्टासुरवधो नाम २४ अः। समाप्तश्चायं माधुर्य्यखण्डः ॥ ० ॥ षष्ठो बलभद्रखण्डस्तत्र। १ गर्गाचार्य्यसंहितायां बलभद्रखण्डे दुर्य्योधनप्राड्विपाकसंवादे अवतारकारणं नाम १ अध्यायः। २ ग० सं० ब० दु० प्रा० सं० सङ्कर्षणागमनसंमन्त्रो नाम २ अः। ३ ग० सं ब०

ख० ज्योतिष्मत्युपाख्यानं नाम ३ अः। ४ ग० सं० ब० ख० ज्योतिष्मत्युपाख्याने रैवत्युपाख्यानं नाम ४ अः। ५ ग० सं० ब० दु० प्रा० सं० श्रीकृष्णजन्मोत्सवो नाम ५ अः। ६ ग० ब० दु० प्रा० सं० रामकृष्णव्रजक्रीडावर्णनं नाम ६ अः। ७ ग० ब० दु० प्रा० सं० मथुराक्रीडावर्णनं नाम ७ अः। ८ ग० ब० दु० प्रा० सं० द्वारकाक्रीडावर्णनं नाम ८ अः। ९ ग० ब० दु० प्रा० सं० रामरासक्रीडावर्णनं नाम ९ अः। १० ग० ब० दु० प्रा० सं० पद्धतिपटलवर्णनं नाम १० अः। ११ ग० ब० दु० प्रा० सं० स्तोत्रकवचवर्मवर्णनं नाम ११ अः। १२ ग० ब० दु० प्रा० सं० बलभद्रसहस्रनामवर्णनं १२ अः। समाप्तश्चायं बलभद्रखण्डः ॥ ०॥ सप्तमो मथुराखण्डः। तत्र — १ गर्गाचार्य्यसंहितायां मथुराखण्डे नारदबहुलाश्वसंवादे कंसमन्त्रो नाम १ अध्यायः। २ ग० म० ना० ब० सं० केशिवधो नाम २ अः। ३ ग० म० ना० ब० सं० अक्रूरागमनं नाम ३ अः। ४ ग० म० ना० ब० सं० मथुराप्रयाणं नाम ४ अः। ५ ग० म० श्रीकृष्णप्रवेशो नाम ५ अः। ६ ग० म० मथुरादर्शनं नाम ६ अः। ७ ग० म० नारदबहुलाश्वसंवादे ७ अः। ८ ग० म० ना० ब० सं० कंसवधो नाम ८ अः। ९ ग० म० ना० ब० सं० यदुसौख्यं नाम ९ अः। १० ग० म० ना० ब० सं० रजकवायकसुदामोपाख्यानं नाम १० अः। ११ ग० म० ना० ब० सं० कुब्जाकुवलया-पीडवर्णनं नाम ११ अः। ११ ग० म० ना० ब० सं० चानूरकंसधात्वपत्न (न्य) पूर्व्वाख्यानं नाम १२ अः। १३ ग० म० ना० ब० सं० उद्धवागमनं नाम १३ अः। १४ ग० म० ना० ब० सं० नन्दराजोद्धवमेलनं नाम १४ अः। १५ ग० मं० ना० ब० सं० राधादर्शनं नाम १५ अः। १६ ग० म० राधागोप्याश्वसनं नाम १६ अः। १७ ग० म० कृष्णस्मरणे गोपीवाक्यं नाम १७ अः। १८ ग० म० गोपीवाक्ये उद्धवागमनं नाम १८ अः। १९ ग० म० ना० ब० सं० कृष्णागमनोत्सवो नाम १९ अः। २० ग० म० ना० ब० सं० रासोत्सव-श्वभुमोक्षो नाम २० अः। २१ ग० म० ना० ब० सं० राधामाधवसंवादे २१ अः। २२ ग० म० ना० ब० सं० नारदोपाख्यानं नाम २२ अः २३ ग० म० कृष्णागमनं नाम २३ अः। २४ ग० म० कौशदैत्यवधो नाम २४ अः। २५ ग० म० ख० ना० ब० संवादे मथुरामाहात्म्यं नाम २५ अध्यायः॥ समाप्तश्चायं मथुराखण्डः॥ ०॥ द्वारकाखण्डोऽष्टमः। तत्र — १ गर्गाचार्य्यसंहितायां द्वारकाखण्डे नारदबहुलाश्वसंवादे जरासन्ध-पराजयो नाम १ अध्यायः। २ श्रीग० द्वा० द्वारिकावासकरणं नाम २ अः। ३ श्रीग० द्वा० बलभद्रविवाहोत्सवो नाम ३ अः। ४ श्रीग० द्वा० कुण्डनपुरयानं नाम ४ अः। ५ ग० द्वा० रुक्मिणीनिर्गमनं नाम ५ अः। ६ ग० द्वा० रुक्मिणीहरण यदुविजयो नाम ६ अः। ७ ग० द्वा० रुक्मिणीविवाहो नाम ७ अः। ८ ग० द्वा० सर्व्वमहिष्युद्वाहो नाम ८ अः। ९ ग० द्वा० द्वारकागमनकरणं नाम ९ अः। १० ग० द्वा० चक्रतीर्थमाहात्म्यं नाम १० अः। ११ ग० द्वा० तीर्थोत्पत्तौ गजग्राहमोक्षो नाम ११ अः। १२ ग० द्वा० शङ्खोद्धारमाहात्म्यं नाम १२ अः। १३ ग० द्वा० प्रभास-सरस्वती-बोधपिप्पल-गोमती-सिन्धुसङ्गममाहात्म्यं नाम १३ अः। १४ ग० द्वा०

रत्नदेवतकाचलमाहात्म्यं नाम १४ अः । १५ ग० द्वा० कपिलकुण्डगकूपगोपीभूमिमाहात्म्यं नाम १५ अः । १६ ग० द्वा० सिद्धाश्रममाहात्म्ये राधादर्शनं नाम १६ अः । १७ ग० द्वा० सिद्धाश्रम-राधाकृष्णसमागमे राधाप्रेमप्रकाशः १७ अः । १८ ग० द्वा० सिद्धाश्रममाहात्म्ये १८ अः । १९ ग० द्वा० प्रथमसर्गे लीलासरोवर-हरिमन्दिर-ज्ञानतीर्थ-कृष्णकुण्ड-बलभद्रसरोवर-गणेशतीर्थ-दानस्थल-मायातीर्थमाहात्म्यं नाम १९ अः । २० ग० द्वा० द्वितीयसर्गे इन्द्रतीर्थ-सूर्य्यकुण्ड-ब्रह्मतीर्थ-नील-लोहित-सप्तसमुद्रकमाहात्म्यं नाम २० अः । २१ श्रीगर्गाचार्य्यसंहितायां श्रीद्वारकाखण्डे तृतीय-सर्गे पिण्डारकमाहात्म्ये यात्रामाहात्म्ये २१ अध्यायः ॥ समाप्तश्चायं द्वारकाखण्डः ॥ ० ॥ नवमो विज्ञानखण्डश्च । १ इति श्रीगर्गाचार्य्यसंहितायां विज्ञानखण्डे व्यासागमनं नाम १ अध्यायः ॥ २ ग० वि० व्यासोग्रसेनसंवादे लोकगतिनिरूपणं नाम २ अः । ३ ग० वि० व्या० सं० निर्गुणभक्ति-वर्णनं नाम ३ अः । ४ ग० वि० व्या० सं० भक्तमाहात्म्यं नाम ४ अः । ५ ग० वि० व्या० सं० भक्त्युत्कर्षवर्णनं नाम ५ अः । ६ ग० वि० व्या० सं० मन्दिरप्रतिष्ठावर्णनं नाम ६ अः । ७ ग० वि० खण्डे ८ अः । ९ ग० वि० व्या० सम्वादे ९ अः । १० इति गर्गाचार्य्यसंहितायां विज्ञानखण्डे नारदबहुलाश्वसंवादे ब्रह्मनिरूपणं नाम १० अध्यायः ॥ समाप्तश्चायं विज्ञानखण्डः ॥ ० ॥

No. 51. गायत्रीपञ्चाङ्गम् . Substance, country-made paper, 7×4 inches. Folia, 136. Lines, 5 on a page. Extent, 510 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārāja's Library, Hātuā. Appearance, new. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

नमस्कृत्य भगवान् याज्ञवल्क्यः स्वयम्भुवम् ।

परिपृच्छति+ब्रूहि ब्रह्मन् गायत्र्या उत्पत्तिं श्रोतुमिच्छामि ब्रह्मज्ञानोत्पत्तिं

प्रकृतिं परिपृच्छामि ॥ इत्यादि ।

End. विश्वामित्रसमुद्भवं हितकरं सर्व्वार्थसिद्धिप्रदं

स्तोत्राणां परमं प्रभातसमये पारायणं नित्यशः ।

वेदानां विधिवेदमन्त्रसकलं सिद्धिप्रदं सर्व्वदा

संप्राप्नोति परत्र सर्व्वसुखदं आयुष्यमारोग्यदम् ॥

Colophon. इति श्रीविश्वामित्रकृतो गायत्रीस्तवराजः सम्पूर्णः ।

विषयः । गायत्रीहृदय—रुद्रयामल-तन्त्रोक्तगायत्रीरहस्यान्तर्गतगायत्रीनित्यपूजापद्धति-रुद्रयामलीयगायत्रीरहस्यान्तर्निहितगायत्रीसहस्रनाम-विश्वामित्रसंहितान्तर्गतगायत्रीकवच-विश्वामित्रकृतगायत्रीस्तवराजरूप-पञ्चाङ्गस्य कथनम् ।

No 52. गीतगोविन्दटीका. By चैतन्यदासः. Substance, country-made paper, 12 × 4½ inches. Folia, 53. Lines, 9 on a page. Extent, 1,800 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Dāsarā, Paṇḍita Guruprasāda Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीचैतन्यकृपासीधुकणोन्मत्तेन केनचित् ।
टीका संरच्यते गीतगोविन्दस्य समासतः ॥ इत्यादि ।

End. ततः श्रीकृष्णप्रार्थना । प्रत्यूहयद्दुःखवान् मुग्धे यक्रौ पिता प्रीतिमवाप्यते । (?)
तद्वत् श्रीकृष्णचैतन्यः प्रीयतामत्र जल्पिते ॥

Colophon. इति श्रीकृष्णचैतन्यपूजक-श्रीचैतन्यदासगोस्वामिविरचितायां श्रीगीतगोविन्दटीकायां द्वादशसर्गविवृतिः सम्पूर्णा ॥ ० ॥

विषयः । जयदेवकविकृतस्य श्रीकृष्णलीलात्मकस्य गीतगोविन्दाख्यकाव्यस्य व्याख्यानम् ।

No. 53. गीतराघवः. By हरिशङ्करः. Substance, country-made paper, 13 × 3 inches. Folia, 17. Lines, 8 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Post Office, Aṇḍāl. Kājoḍā, Paṇḍita Kārtikacandra Bhaṭṭācāryya. Appearance, fresh. Verse. Incorrect.

Beginning. ॐ श्रीरामचन्द्राय नमः ।
श्रीरामचरणसरोजध्यायमज्ञानधीरो (?)
दशरथशरदभाजं विश्वराजं स्वराजम् ।
+ + + + + +
+ + + + + + ॥
वाग्देवताचरितचित्रितचित्तसद्मा
श्रीजानकीचरणचिन्तनचक्रवर्ती ।
श्रीरामचन्द्रवनवासकथासमेतं
काव्यं करोति हरिशङ्करभूमिदेवः ॥ इत्यादि ।

End. चननुवनान्तसपरिशिथिलाकृति
रिनद्वदि विलसति हिमवति सीता ।
जिमपति-कुञ्जरकरनिभबाहुक-
बलयित-सुतनुरतनुरथभीता ॥ (?)

द्विजहरिशङ्करविरचितमीतक-
मिदमुदयतु हरिजनहृदि सारम् ।
कलियुगमानुष-बहुविधकिल्विष-
मिबिड़विपिनपरिच्छेदनकुठारम् ॥

Colophon. श्रीरामचन्द्राय नमः ।

विषयः । नानाविधरागेण प्रथमसर्गे रामपरिदेवनादिकथनम् । २ य सर्गे, — भरत-सम्भाषणम् । ३ य सर्गे, — पञ्चवटीस्थानामपूर्वपक्षादर्शनादिः । ४ र्थ सर्गे, — श्रमचरितादि-कथनम् । ५ म सर्गे, — जानकीदर्शनम् । ६ ष्ठ सर्गे, — हनुमत्प्रेषणादिः । ७ म सर्गे, — अयोध्यागमनादिवर्णनञ्च ।

No. 54. गुणरत्नकोषः. (सटीकः) By रङ्गराजभट्टः. Substance, country-made paper, $11 \times 4\frac{1}{2}$ inches. Folia, 17. Lines, 18 on a page. Extent, 850 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Bhārata Rāmānuja Dāsa. Appearance, old. Prose and verse. Generally correct.

Beginning. मूलस्य ।

श्रिये समस्तचिदचिद्विधानव्यसनं हरेः ।
अङ्गीकारिभिरालोकैः सार्थयन्त्ये कृतोऽञ्जलिः ॥
उल्लासपल्लवितपालितसप्तलोकी-
निर्व्वाहकोरकितनेमकटाक्षलीलाम्
श्रीरङ्गहर्म्यतलमङ्गलदीपरेखां
श्रीरङ्गराजमहिषीं श्रियमाश्रयामः ॥
अनुकलमनुकाण्डान्निर्गतारम्भयुग्मात्-
प्रतिदिशमुजमालाश्रीसमानोकहर्द्धिः ।
मननयनगुलुच्छस्फारपुष्पद्विरेफा
रचयतु मयि लक्ष्मीः कल्पवल्लीः कटाक्षान् ॥ इत्यादि ।

टी— प्रा—

श्रीमते रामानुजाय नमः । श्रीकूरकुलपद्मः पारावारपार्व्वणचन्द्रमाश्चतुर्दश-विद्याविलासिनीविलासमुकुरविस्मापमान—श्रीरङ्गनायककरुणासमासादित—कुमारसाम्राज्य-श्रीनिवासभूत-श्रीरङ्गराजभट्टनामधेयकविरविन्नेन प्रारिचित-

ग्रन्थपरिसमाप्तौ स्वकृतग्रन्थप्रतिपादितदेवतामेवादौ नमस्करोति । श्रियै । समस्तचिदचिदिति । इत्यादि ।

End. मूलस्यान्तवाक्यम् ।

ऐश्वर्य्यमक्षरगतिं परमं पदं वा
कस्मैचिदञ्जलिभरं वहते वितीर्य्य ।
अस्मै न किञ्चिदुचितं कृतमित्यथाम्ब
त्वं लज्जसे कथय कोऽयमुदारभावः ॥
इत्युक्तिकैतवशतेन विडम्बयामि
तानम्ब सत्यवचसः पुरुषान् पुराणान् ।
यद्वा न मे भुजबलं तव पादपद्म-
लाभे त्वमेव शरणं विधितः कृतोऽस्मि ॥
श्रीरङ्गे शरदां शतं सह सुहृद्वर्गेण निष्कण्टकं
निर्दुःखं सुसुखं च दास्यरसिकां भुक्त्वा समृद्धिं पराम् ।
युष्मत्पादसरोरुहान्तररताः स्यामस्त्वमम्बा पिता
सर्व्वं च त्वमपि त्वमेव भवनं स्वीकुर्व्वकस्मात् कृपाम् ॥

इति श्रीगुणरत्नकोषः समाप्तः ॥

टीकाया अन्तवाक्यम् ।

श्रीरङ्गेति — निष्कण्टकादिपदत्रयं क्रियाविशेषणं दास्यरसिकां दास्यरसस्वादिनीं दास्यसमृद्धिमिति यावत् सुहृद्भिः सह शतायुर्वै पुरुषः इत्युक्ता +रवसानपर्य्यन्तं दास्यमेवानुभूय ततः परमपि युवयोः पादपद्मनिरता भवामः । अस्माकं मातापितृप्रभृतिसकलं त्वमेव सम्बन्धश्च त्वमेव तस्मादकस्मात् कृपां निर्हेतुकदयां अस्मद्विषये स्वीकुरुष्वेति सर्व्वं समञ्जसम् ।

Colophon. इति श्रीमद्रामानुजाचार्य्यविरचित-श्रीगुणरत्नकोषव्याख्यानं समाप्तम् ।

विषयः । रङ्गनाथनामाभिहितस्य भगवतो विष्णोः शक्त्याश्च लक्ष्मीदेव्याः स्तवात्मकोऽयं ग्रन्थः ।

No. 55. गोत्रप्रवरदर्पणः. By कमलाकरभट्टः. Substance, country-made paper, 19×4 inches. Folia, 22. Lines, 6 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, Calcutta, Çyāmapukura, Bābu Nagendranātha Vasu. Appearance, fresh. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

नारायणात्मज-श्रीमद्रामकृष्णस्य सूनुना ।
कमलाकरसंज्ञेन गोत्रप्रवरनिर्णयः ।
क्रियते विदुषां प्रीत्यै ग्रन्थानालोच्य सर्व्वशः ॥
तत्र सगोत्राय दुहितरं न यच्छेत् : असमानप्रवरैर्विवाह इत्यापस्तम्ब-
गौतमाश्वलाद्यैः सगोत्रा सप्रवरा निषिद्धा । इत्यादि ।

End. भोगनस्त्वां परित्यज्य पालयेज्जननीमिव ।
अज्ञानादेव वै गच्छेत् विभिर्गर्भस्तु कश्यप ॥ इति ।
तच्छोत्रियोपलभ्या स्वादिषयत्वेन स्वेपखमिति दिक् ॥

Colophon. इति श्रीकमलाकरभट्टकृत-गोत्रप्रवरदर्पणः समाप्तः ॥ ० ॥

विषयः । समानगोत्रादिविवाहदोषकथनमुखेन गोत्रप्रवरादिनिरूपणम् ।

No. 56. गोत्रप्रवरविवेकः. (धर्म्मप्रदीपान्तर्गतः) By धनञ्जयः. Substance, country-made paper, 14×3 inches. Folia, 3. Lines, 5 on a page. Extent, 42 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office, Rūpaganja, Nāorā, Paṇḍita Çivacandra Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. श्रीसूर्य्याय नमः ।

अथ गोत्रप्रवरविवेकः ।
जमदग्निर्भरद्वाजो विश्वामित्रात्रिगोतमाः ।
वशिष्ठकाश्यपागस्त्या मुनयो गोत्रकारिणः ॥
एतेषां यान्यपत्यानि तानि गोत्राणि मन्यते ॥
एतदुपलक्षणम् । अन्येषामपि दर्शनात् । प्रवरस्तु गोत्रप्रवर्त्तकस्य मुनेर्व्यावर्त्तको मुनिगणः । जमदग्निगोत्रस्य जमदग्नि-और्व्व-वशिष्ठाः । भरद्वाजगोत्रस्य भरद्वाज-आङ्गिरस-वार्हस्पत्याः । विश्वामित्रगोत्रस्य विश्वामित्र-मरीचि-कौशिकाः । अत्रिगोत्रस्य अत्रि-आत्रेय शातातपाः । इत्यादि ।

End. धन्वन्तरिगोत्रस्य धन्वन्तरि-अपार-नैध्रुव-आङ्गिरस-वार्हस्पत्याः । एवमन्ये व्यवहारतो ज्ञातव्याः । विष्णुवृद्धिगोत्रस्य विष्णुवृद्धि-आङ्गिरस-वार्हस्पत्याः ॥

Colophon. इति धनञ्जयकृते धर्म्मप्रदीपे गोत्रप्रवरविवेकः ॥ इति श्रीदुर्गा ॥

विषयः। गोत्रलक्षणम्। प्रवरलक्षणम्। जमदग्निप्रभृतिसप्तर्षिगोत्राणां प्रवरकथनम्। मतभेदमाश्रित्य केषाञ्चिद्गोत्राणां प्रवरस्य द्वैविध्यकथनञ्च।

No. 57. गोपालपञ्चाङ्गम्. (गोपालपटल-गोपालमन्त्रपद्धति-गोपालसहस्रनाम-गोपालकवच-गोपालस्तवराजात्मकम्) Substance, country-made paper, 7×4 inches. Folia, 104. Lines, 5 on a page. Extent, 100 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः। शुभम्।
ॐ गोपीजनान्ते प्रवदेद् वल्लभायाग्निसुन्दरी।
अयं दशाक्षरो मन्त्रो दृष्टादृष्टफलप्रदः॥
अथ पूजाप्रकरणम्। इत्यादि।

End. राजव × × × मेति भवेत् सर्व्वजनप्रियः।
अचलां श्रियमाप्नोति स वाग्मी जायते ध्रुवम्॥

Colophon. इति श्रीगौतमीयतन्त्रे गोपालस्तवराजः समाप्तः॥

विषयः। अङ्गन्यास-ध्यान-विन्दुवीज कामवीज-अष्टमन्त्राद्यात्मकगोपालपटल-गोपालमन्त्रपद्धति—सम्मोहनतन्त्रोक्तहरपार्व्वतीसंवादमयगोपालसहस्रनाम—सनत्कुमारसंहितान्तर्गतत्रैलोक्यमङ्गलनामगोपालकवच-गौतमीतन्त्रान्तर्निविष्टगोपालस्तवराजात्मकोऽयं ग्रन्थः॥

No. 58. गोपालसहस्रनामभूषणम्. By दयालुशर्म्मा. Substance, country-made paper, 16×5 inches. Folia, 31. Lines, 16 on a page. Extent, 1,200 çlokas. Character, Nāgara. Date, Sm. 1885. Place of deposit, District Mediuīpura, Candrakoṇā, Bhārata Rāmānuja Dāsa. Appearance, tolerable. Prose. Correct.

Beginning. श्रीमते रामानुजाय नमः। श्रीविद्यागुरवे नमः।
ॐ नमः श्रीभृगोरस्तु देवाय दुरितच्छिदे। (?)
लभ्याय तदुपाङ्गे गुरवे बुद्धिसाक्षिणे॥
चिकीर्षोर्नामसाहस्रभूषणं गोपिकापतेः।
शिवः शिवदया × × र्थं दाक्षिण्यमवताद् विभुः॥
जयजय + + + + + ।

इह खलु सकलभुवनवन्द्यानवद्यैकशरणचरणा पञ्चरार्पितवसुमतीमण्डला गौरी निजस्वामिनं शङ्करं जगतां सुखकरं शिवं पृच्छति तदन्तर्ज्ञातु-मिच्छतीति शङ्कराभिप्रायस्पष्टत्वमन्तर्ज्ञानानुकूलव्यापाराश्रया गौरीति शाब्द-बुद्धेरित्यादि ॥

End. हे महादेवि तस्य गृहे यदा सर्व्वस्मिन् काले श्रीगोपालो देवः वसेत् यस्य गेहे नाम्नां सहस्रमिति पूजितमपि तिष्ठति किं पुनरभ्यस्तमिति सिद्धम् ।
इति श्रीगोपालसहस्रनामस्तोत्रं विवृतं समाप्तम् ॥
बुद्धौ शुद्धिमतो निरीक्ष्य नितरां गौड़ान् क्रियासु स्थिरान्
प्रायो द्राविड़भूसुरानिति यदोर्वंशावतंसो विभुः ।
शाम्भव्याजमयात्युपासनपरानचानयनभूसुरां-
च्छाकद्वीपनिवासिनोऽथ सविदुर्भर्गानुरूपान् भुवि ॥
सारस्वताः कान्यकुब्जा गौड़ा उत्कलमैथिलाः ।
पञ्चगौड़ाः समाख्याता विन्ध्यस्योत्तरवासिनः ॥

+ + × +

माधवान् विश्वर यादवेन्द्र जगतां नाथेन्द्रदर्पापहन्

\+ + + + ।

\+ + + + +

दीनानाथदयानिधे दयितया नाथान् सनाथान् कुरु ॥

Colophon. इति श्रीभगवदर्पितसर्व्वस्वेन भूदेवशर्म्मशिष्येण मिश्रश्रीमद्दयालुशर्म्मणा विरचितं श्रीगोपालसहस्रनामभूषणं समाप्तम् ॥ संवत् १८८५ ॥

विषयः । गोपालसहस्रनामस्तोत्रस्य व्याख्यानम् ।

No. 59. गोपालसहस्रनामविवृतिः. Substance, country-made paper, 13 × 5 inches. Folia, 52. Lines, 5 on a page. Extent, 150 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।
ॐ नमः श्रीभुवीरस्तु देवाय दुरितच्छिदे ।
लभ्याय सदुपश्रद्धे गुरवे बुद्धिसाक्षिणे ॥

चिकीर्षोर्नामसाहस्रभाष्यं श्रीगोपिकापतेः ।
शिवः शिवदयाम्भोर्मे दाक्षिण्यमवताद्विभुः ॥ इत्यादि ।

End. यस्य गेहे नाम्नां सहस्रमिति पूजितमपि तिष्ठति किं पुनरभ्यस्तमिति ॥

Colophon. इति श्रीगोपालसहस्रनामविवृतिः समाप्ता ॥

विषयः । गोपालसहस्रनामव्याख्यानम् ।

No. 60. गौरगणोद्देशदीपिका. By कविकर्णपूरः. Substance, country-made paper, 13 × 5 inches. Folia, 10. Lines, 13 on a page. Extent, 325 çlokas. Character, Bengali. Date, ? Place of deposit, Seyāḍsol *viá* Rāṇīgañja Çrīcandranānda Ṭhākura. Appearance, old. Verse. Generally correct.

Beginning. श्रीश्रीराधाकृष्णाभ्यां नमः ।
यः श्रीवृन्दावनभुवि पुरा सच्चिदानन्दसान्द्रो
गोराङ्गीभिः सहमरुचिभिः श्यामधामा ननर्त्त ।
तासां भ्रमत् द्दढ़तरपरीरम्भसम्भेदतः किं
गौराङ्गः स न जयति नवद्वीपमालम्बमानः ॥ इत्यादि ।

End. गौराङ्गकान्तशरणौ चिरञ्जीवसुलोचनौ ।
नयेन्न × × गुर्व्वाख्यामिति शास्त्रानुसारतः ॥
श्रीश्रीनाथस्य पूर्व्वाख्या मया न प्रकटीकृता ।
+ + कारपरीपाट्या यो भागवतसंज्ञिता ॥
कुमारहट्टे यत्कीर्त्तिः कृष्णदेवो विरचाम (?)
× × मद्दान्तः क्रमभङ्गभूता-
स्ते मेऽपराधं कृपया चमन्तु ।
गुणान् विनिर्णीय सतां स + +
मच्छेषशेषाः कथितुं न शक्ताः ॥
मीमांसकेभ्यः शठतार्किकेभ्यो
विशेषतो हेतुवचः + + ।
गोप्यः प्रयत्नाद्दसमासविद्भ्यो
देयः सदा गौरपदाश्रयेभ्यः ॥

श्रीगौराङ्गगणोद्देशदीपिका रचिता मया ।
दीयतां परमानन्दसन्दोहा भक्तवेश्मनि ॥
शाकेवसुग्रहमितैव युक्ते + ×
ग्रन्थो समाविरभवत् कथमस्य वक्त्रात् ।
चैतन्यचरितामृतमग्नचित्तैः
शोध्यः नितगौरगणाख्य एषः ॥ (?)

Colophon. इति श्रीकविकर्णपूरविरचिता श्रीगौराङ्गगणोद्देशदीपिका समाप्ता ॥ ० ॥

विषयः । नित्यानन्दाद्वैतादिसकलगौराङ्गपार्षदनामादिनिरूपणम् ।

No. 61. चन्द्रदूतम्. By श्रीकृष्णचन्द्रतर्कालङ्कारः. Substance, country-made paper, 14×3 inches. Folia, 14. Lines, 4 on a page. Extent, 112 çlokas. Character, Bengali. Date, ? Place of deposit, Āḍāihājār, District Ḍhākā, Paṇḍita Candrakānta Vidyālaṇkāra. Appearance, new. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।
रामो रामाभिरामो रमितकरभरैराश्रमाधिरामो-
त्प्रो मोमुह्यमानो झटिति वियति तं वीक्ष्य चन्द्रं तदीयैः ।
स्वरोऽयं वा स्मरो वा स्मररिपुरिति वा स्वर्मणिर्वा विभाति
प्रायेशीवक्त्रचन्द्रः किमु गगनचरस्तर्कयामास चैतत् ॥
नायं स्वरः कुवलयवपुर्न स्मरः सङ्गलक्ष्मा
मारप्रादुर्भवनवचनो न स्मरारि ... ... ।
न प्रायेशीमुखवदनशशी दूरगो यत् ... ...
जाने प्राणप्रणयविकली दुःखशङ्की शशाङ्कः ॥ इत्यादि ।

End. इति निगदितवाक्यः प्रेमसाध्यः शशाङ्कं
मदनशरचलाक्षो वर्द्धिया रिङ्गमाणः ।
विरहजलधिलीन प्रेमवारिप्रपूर्णो
रघुवरकुलसिंहः क्ष्मातले सम्पपात ॥
इति कतिपयवेलाः संस्थितो मूर्च्छितात्मा
किमिति किमिति वाक्यैर्बोधितो लक्ष्मणेन ।
झटिति करिकरौघैः चालिताशाश्च दृष्ट्वा
शिव शिव विदितात्मा जिह्मयामास रामः ॥

Colophon. इति श्रीगोपीकान्तभट्टाचार्य्यात्मज-श्रीकृष्णचन्द्रतर्कालङ्कारविरचितं चन्द्र-
दूतमहाकाव्यं समाप्तम् ॥
मत्काव्यपीयूषरसप्रमोदो येषाञ्च ... ... ।
रटन्तु ते मत्कृतकाव्यमेतत् श्रीराम ... कोमलाङ्गम् ॥
श्रीहरिकृष्णशर्म्मणो लिपिरेषा पुस्तिका च ।

विषयः। सीतां प्रति रामस्य दूतरूपेण चन्द्रमसः प्रेषणम् ।

No. 62. चम्पूभारतम्. By अनन्तभट्टः. Substance, country-made paper, 14×3½ inches. Folia, 89. Lines, 7 on a page. Extent, 1869 çlokas. Character, Bengali. Date, ? Place of deposit, Vĕḍo, Post Office Raghunāthapura, District Mānabhūma Veṇkaṭa, Varadācāryya Gosvāmī, Appearance, tolerable. Prose and verse. Incorrect.

Beginning. कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवाकान्तरालम् ।
प्रत्नं वेतसरत्नं सततपरिचलत्कर्णतानप्ररोहं
दूताङ्कुरच्छिदीर्णादरविदितफणापाटक्रमभूषाभुजङ्गः ॥ (?) इत्यादि ।

End. श्रीरेर्दोर्भ्यां घटितनिजदोर्दण्डभूर्वेदिपार्श्वे
साद्यखीर्णां शतमखदशां सन्दधानोऽभ्यसूयाम् ।
तत्राध्यर्चं नियमपरश्रीराजधाराश्वमेधं (?)
... ... ॥
राज्ञां मौलिपरम्परां चरणयोः पाणौ प्रदानश्रियं
बुद्धौ रत्नेन योदयं हृदि कृपां सत्यं रसज्ञाञ्चले। (?)
बाह्वौ सागरमेखलां वसुमतीं मस्ते किरीटं मुदा
कुर्व्वन्धर्म्मतनूभवश्चिरमसौ गोपायति स्म प्रजाः ॥ * ॥

Colophon. इत्यनन्तभट्टस्य कृतौ चम्पूभारते द्वादशस्तवकः समाप्तोऽयं ग्रन्थः ॥

विषयः। संक्षेपेण महाभारतीयविषयस्य कथनम् ।

No. 63. चिकित्सादर्पणः. Substance, country-made paper, 14×5 inches. Folia, 313. Lines, 10 on a page. Extent, 9390 çlokas. Character, Bengali. Date, ? Place of deposit, Vākule, Post Office Sālataḍā, District Vākuḍā. Bābu Balarāma Caudhuri. Appearance, tolerable. Verse. Generally correct.

23556

Beginning. ॐ नमः शिवाय ।

रोगमादौ परीक्षेत ततोऽनन्तरमौषधम् ।
ततः कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत् ॥
औषधा नीरसाः सर्व्वं मन्त्रयित्वा प्रदापयेत् ।
तेन सर्व्वं प्रयच्छन्ति आयुरारोग्यमेव च ॥
अथातो मूलिकाहरणविधिमाह ।
स्वभावारण्यमेकान्ते प्रभाते मन्त्रयुक्तितः ।
संग्राह्यमौषधेनैव न चेद्भवति काष्ठवत् ॥ इत्यादि ।

End. कोषातकी नीलकणा लाङ्गली सहदेविका ।
चक्रमर्द्दाम्रताकन्दकाकमाचीरविप्रिया ।
विष्णुक्रान्ता हस्तिशुण्डी विदारी भृङ्गराट् पटुः ॥

Colophon. अतःपरं खण्डितम् ॥ ० ॥

विषयः । औषधग्रहणकरणादिनिरूपणम् । भेद्यादिज्वराङ्कुशनिरूपणम् । वृहद्गुडूच्यादि-कथनम् । काञ्जिकरसादिनिरूपणम् । वारवल्लिकथनम् । लघुगङ्गाधरचूर्णादिनिरूपणम् । ग्रहण्यादिचिकित्सा । महाशङ्खवट्यादिनिरूपणम् । शतावरीघृतादिनिरूपणम् । मूत्रादि-चिकित्सा । उदररोगादिचिकित्सा । निर्गुण्डीतैलादिनिरूपणम् । कुष्ठरोगचिकित्सादिः । कर्णरोगादिचिकित्सा । शिरोरोगादिचिकित्सा च ॥

No. 64. चित्रकूटमाहात्म्यम्. Substance, country-made paper, 8×5 inches. Folia, 40. Lines, 11 on a page. Extent, 880 çlokas. Character, Nāgara. Date, Sm. 1933 Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीमते रामानुजाय नमः ।

रामं कामाभिरामं रघुकुलतिलकं सीतया शोभनीयं
श्यामं भक्ताभिनाशं सज्जनभयहरं वामदेवाभिवन्द्यम् ।
कामं कामाभिनाशं कलिकलुषहरं कामदं कामदानां
वन्दे लोकाभिरामं दशरथतनयं रावणारिं रमेशम् ॥
यतः सर्व्वाणि भूतानि प्रतिभान्ति स्थितानि च ।
यत्रैवोपशमं यान्ति तस्मै सत्यात्मने नमः ॥

... ...

श्रुत्वा रामायणं कृष्ण-रामचारित्रभूषितम् ।
भुशुण्डिं परिपप्रच्छ शाण्डिल्यो भगवानृषिः ॥

शाण्डिल्य उवाच ।

श्रुतं त्वत्तः कृपासिन्धो जगदुत्पत्तिकारणम् ।
अधुना श्रोतुमिच्छामि तीर्थमाहात्म्यमुत्तमम् ॥
चित्रकूटो गिरिश्रेष्ठः श्रीरामपदभूषितः ।
यस्मिन् श्रीजानकीनाथो रमते सर्व्वदैव हि ॥
माहात्म्यं श्रोतुमिच्छामि रहस्यं श्रुतिसम्मितम् ।
श्रुतञ्च परमैश्वर्य्यं श्रीरामस्य गिरेः प्रभो ॥ इत्यादि ।

End. माहात्म्यमेतत् कथितं पुरातनं वाल्मीकिगीतं सुतधान्यवर्द्धनम् ।
पठन्ति गायन्ति रटन्ति ये नरास्ते रामभक्तिं सततं लभन्ते ॥

Colophon. इति श्रीबृहद्रामायणे श्रीचित्रकूटमाहात्म्ये समस्ततीर्थवर्णनं नाम षोडशोऽध्यायः समाप्तः । जेठ वदि संवत् १९२३ अवस्थान श्रीचित्रकूट ।

विषयः । चित्रकूटमाहात्म्यकीर्त्तनम् । प्रसङ्गतः सर्व्वतीर्थानां माहात्म्यकीर्त्तनञ्च ।

No. 65. चैतन्यचन्द्रामृतम् . By प्रबोधानन्दसरस्वती . Substance country-made paper, 13 × 3 inches. Folia, 37. Lines, 3 on a page. Extent, 277 çlokas. Character, Bengali. Date, ? Place of deposit, Seyādsol, District Vardhamāna, *Çrī* Candranātha Ṭhākura. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. श्रीगौराङ्गः शरणम् ।
सुमस्तं चैतन्याकृतिमतिविमर्य्यादपरमा-
द्भुतौदार्य्यं वर्य्यं व्रजपतिकुमारं रसयितुम् ।
विशुद्धस्वप्रेमोन्मदमधुरपीयूषलहरीं
प्रदातुं चान्येभ्यः परपदनवद्वीपप्रकटम् ॥ इत्यादि ।

End. मत्तोऽशादिमहाश्चर्य्यमपिमापि महाप्रभुः ।
सुगधवाक्योदितं श्रुत्वा विस्मेरस्यं भविष्यति ॥

दृष्टं न शास्त्रं गुरवो न दृष्टा
विवेचितं नापि बुधैः सुबुद्ध्या ।
यथा तथा जल्पतु बालभावात्
तथैव मे गौरहरिः प्रसीदतु ॥ ० ॥

Colophon. इति श्रीप्रबोधानन्दसरस्वतीगोस्वामिना विरचितं श्रीमच्चैतन्यचन्द्रामृतं सम्पूर्णम् । श्रीश्रीगौरहरिचैतन्य ॥

विषयः । श्रीचैतन्यदेवस्य स्तवः ।

No. 66. चैतन्यचन्द्रामृतव्याख्या. (रसिकास्वादिनी). Substance, country-made paper, 12×4 inches. Folia, 40. Lines, 11 on a page. Extent, 1,320 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Uthuli, *Çrī* Dīnabandhu Gosvāmī. Appearance, old. Prose. Generally correct.

Beginning. श्रीकृष्णचैतन्यचन्द्राय नमः ।
कृत्वा दण्डप्रणामं स्वगुरुवरमहाश्रीन्द्रसिंहाङ्घ्रिपद्मे
केनाप्यानन्दि-नाम्ना प्रकरणघटिका रच्यतेऽनर्घ्यबुद्ध्या ।
टीका चैतन्यचन्द्रामृतरसरसिकास्वादिनी वैष्णवानां
देवास्त्रीनामिवासत्कुलदनुजघटा मोहिनीय ... ॥ इत्यादि ।

End. तत्तत् श्रवणादिपूर्व्वकप्रेमामृतवर्णित्वं सूचितम् ।
प्रेमनाम ... त्वादि श्रीवृन्दावनमाधुरीम् ।
राधिकाञ्च विजानीयात् को वा गौरहरिं विना ॥ * ॥

Colophon. इति श्रीचैतन्यचन्द्रामृतेऽवतारमहिमप्रकाशे विंशतिपद्यात्मके रसिकास्वादिन्यां टीकायां संशयो विभागः ॥

विषयः । चैतन्यचन्द्रामृतस्य व्याख्यानम् ।

No. 67. छन्दः. Substance, country-made paper, 6×3 inches. Folia, 12. Lines, 8 on a page. Extent, 115 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Gobinda Bhaṭṭa Solāpurkār. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय परापर्य्याय श्रीकृष्णाय नमः । ॐ ।
म य-र-स त-ज-भ-न ल ग संमितं भ्रमति वाङ्मयं जगति यस्य
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः ।
त्रिगुरुविद्धि मकारं लघ्वादिसमन्वितं यकाराख्यं
लघुमध्यमन्तरे यं सकारमन्ते गुरुनिबद्धम् ॥ इत्यादि ।

End. शेषः प्रचित इति । यथानुक्तं गाथा । द्विकौ ल्गौ । मिश्रौ । पृथग्ला मिश्राः वसवस्त्रिकाः ।

Colophon. इति छन्दः समाप्तम् ॥

विषयः। छन्दसां विशेषेण कथनम् ।

No. 68. जन्मचन्द्रिका. Substance, palm leaf $15 \times 1\frac{1}{2}$ inches. Folia, 59. Lines, 3 on a page. Extent, 463 çlokas. Character, Bengali. Date, ? Place of deposit, Kalasakāṭi *viá* Barisāl, Paṇḍita Kāçiçvara Tarkālaŋkāra. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः सूर्य्याय । अथ जन्मचन्द्रिका लिख्यते । अथ पापसौम्यग्रह-निर्णयः । अर्कार्की-नेन्द्वर्क-सौवाराः पापाः सौम्यास्ततोऽपरे । इत्यादि ।

End. शत्रुस्थाने स्थितो जीवो रिपुगेही विधोः सुतः ।
एष शत्रुहतो योगो यदि शत्रुसमो भवेत् ॥

Colophon. इति जन्मचन्द्रिका समाप्ता ॥

विषयः। पापादिग्रहनिर्णयः । ग्रहदृष्ट्यादिकथनम् । ग्रहचेष्टादिनिरूपणम् । ग्रहाणा-मुच्चनीचादिकथनम् । ग्रहाणां मूलत्रिकोणादिकथनम् । नाचत्रिकदशादिकथनम् । ग्रहाणां स्त्रीपुरुषज्ञानम् । योगादिकथनञ्च ॥

No. 69. जातरिष्ट्याद्दिनिर्णयः. By विद्यार्णवः. Substance, country-made paper, $13 \times 2\frac{1}{2}$ inches. Folia, 35. Lines, 5 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, Ākiādhala, Post Office Lohajaŋga, District Ḍhākā, Paṇḍita Kāçinātha Tarkālaŋkāra. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।
प्रणम्य परमानन्दं सूर्य्यं त्रिभुवनेश्वरम् ।
वक्ष्ये विद्यार्णवो विद्वान् जातरिष्टादिनिर्णयम् ॥
आदौ गण्डनिरूपणम् । दीपिकायाम् ।
अश्विनी-मघ-मूलानां तिस्रो गण्डाद्यनाड़िकाः ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । गण्डादिनिरूपणम् । जन्मस्थानादिनिरूपणम् । जातकशिरोज्ञानादि-निरूपणम् । दशाधिपादिकथनम् । मूर्द्धादिप्रसवज्ञाननिरूपणम् । रिष्टादिनिरूपणञ्च ।

No. 70. जानकीगीता . By श्रीहर्य्याचार्य्यः . Substance, country-made paper, 7½ × 4½ inches. Folia, 9. Lines, 11 on a page. Extent, 198 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinipura, Candrakoṇā, Bharatarāmānuja Dāsa. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।
साचाध्यमर्पयति भक्तिलवेऽप्युदग्रं
प्रेमृधि प्रदर्शयति पादसरोजशोभाम् ।
विघ्नं निवारयति या भजतां समन्तात्
सा जानकी विजयते कुलदैवतं नः ॥
विद्युच्चमत्कृतिमवाप निरीक्ष्य कान्तिं
क्षोभं करीन्द्रनिकरो गतिमाकलय्य ।
यस्या विलोक्य वदनं परितापमिन्दुः
सा जानकी रघुपतेर्मुदमातनोति ॥
× × × ×
मल्लार-रागे एकताली-ताले ।
जय जय जानकि रघुपतिदयिते
विधि-शिव-सनक-शुकादिकमहिते ।
देवि शरणं तव करुणा अभिलषिता
त्रिभुवनसुखदा । ध्रु ॥ इत्यादि ।

End. जय जितदूषणा सुरकुलभूषणा जय जय हरिदयिते ।
जय कविकमलविरोचन सुन्दर जय जय निखिले हिते ॥
जय दशमुखदलनिकरदलनाशन जय जय युवतिमणे ।
जय जय सदयहृदय सकलेश्वर जय जय नतचरणे ॥

\+ + +

विद्याविभूषणयुतो हरिरत्ननाभ-
पादारविन्दमधुपो यदिदं व्यधत्त ।
श्रीजानकीचरितगीतमुदग्रभावात्
तत् साधवः प्रतिदिनं मुदिताः पिबन्तु ॥

Colophon. इति श्रीहर्य्याचार्य्यविरचिते श्रीजानकीगीते आनन्दसीतारघुनन्दनो नाम षष्ठः सर्गः ॥

विषय: । गीतगोविन्दानुकारिणी श्रीजानकीविषयिणी गीतावलिः ॥

No. 71. जालन्धरमाहात्म्यम् (ब्रह्माण्डपुराणीयम्). Substance, country-made paper, 13 × 5 inches. Folia, 36. Lines, 10 on a page. Extent, 1,080 çlokas. Character, Nāgara. Date, Sm. 1839. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः । शौनकाद्य ऊचुः ।
सूत सूत महाभाग सदामतविदाम्वर ।
धन्योऽसि कृतकृत्योऽसि यस्य ते मतिरीदृशी ॥
जालन्धरस्य माहात्म्यं श्रावितं कुलसत्तम ।
पुनश्च श्रोतुमिच्छामस्त्वत्तः किञ्चिन्महाव्रत ॥ इत्यादि ।

End. वक्तुमर्होसि सर्व्वं हि किं वाच्यमधिकं मया ॥

Colophon. इति श्रीब्रह्माण्डपुराणे जालन्धरमाहात्म्ये त्रयोदशोऽध्यायः । सम्वत् १८३९

विषय: । १ मे अध्याये विपाशामाहात्म्यम् । २ये अध्याये वाणगङ्गाख्यापनम् । ३ये अध्याये तस्य माहात्म्यकीर्त्तनम् । ४ र्थ—१३ शेषु अध्यायेषु जालन्धरमाहात्म्यादिकथनम् ।

No. 72. ज्योतिषरत्नं. By केशवतर्कपञ्चानन. Substance, country-made paper, 13×3 inches. Folia, 15. Lines, 7 on a page. Extent, 420 çlokas. Character, Bengali. Date, Sk. 1748. Place of deposit, Vākule *viâ* Sālataḍā, District Vākuḍā, Bābu Caṇḍīcaraṇa Caṭṭopādhyāya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ राधाकृष्णाभ्यां नमः ।
श्रीकृष्णं सच्चिदानन्दं प्रणम्य जगदीश्वरम् ।
हिताय ज्योतिषः श्लोकान् सञ्चिनोमि यथोचितम् ॥
तत्र सर्व्वकार्य्येषु वर्जनीयत्वात् प्रथमं वारवेला लिख्यते ।
रवेर्वेदं चतुः पञ्च सोमे सप्तद्वयं तथा ।
कुजे षष्ठं द्वितीयञ्च बुधे वाणतृतीयकम् ॥
गुरौ सप्ताष्टकञ्चैव त्रिचत्वारि च भार्गवे ।
शनावाद्यन्तषष्ठञ्च वारवेला प्रकीर्त्तिता ॥ इत्यादि ।

End. खदशाभिर्द्दशां हृत्वा नवभिर्भागमाचरेत् ।
लब्धा मासास्तु तच्छेषं पूरयित्वा तु त्रिंशता ॥
षड्भिर्हृत्वा दिनं लभ्यं तच्छेषे षष्टिपूरिते ।
नवभिश्च हृते लब्धा ज्ञेया दण्डास्तदन्तरे ॥
ज्योतिःशास्त्रमहाम्भोधेः सारात्सारतरं कृतम् ।
अभ्यस्यमेतत् सततं व्यवहारोपयोगि यत् ॥ * ॥

Colophon. इति श्रीकेशवतर्कपञ्चाननभट्टाचार्य्यविरचितं ज्योतिषरत्नं समाप्तम् ॥ * ॥
शकाब्दाः १७४८ ।

विषयः । वारवेलाकथनम् । रिष्टादिकथनम् । चन्द्रवामवेधग्रहादिकथनम् । नक्षत्राणां देवतानिरूपणम् । अमृतयोगादिकथनम् । विवाहविहितनक्षत्रादिनिरूपणम् । सप्तशलाकावेधादिनिरूपणम् । गुणयामित्रादिकथनम् । नववध्वागमनकालादिकथनम् । ऋतुफलादिनिरूपणम् । नामकरणान्नप्राशनादिकालनिरूपणम् । तिथिदग्धादिकथनम् । पञ्चास्वतादिकथनम् । बीजवपनादिनिरूपणम् । रव्यादिभोगकालनिरूपणञ्च ।

No. 73. ज्योतिःसारः. By श्रीकृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यः. Substance, country-made paper, 17×3½ inches. Folia, 92. Lines, 7 on a page. Extent, 2,576 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Rādhānagara, Paṇḍita Guruprasanna Vidyāratna. Appearance, tolerable Prose and verse. Correct.

Beginning. श्रीकृष्ण मामुद्धर ।

श्रीसूर्य्यं विघ्नराजञ्च श्रीगुरुं श्रीरघूत्तमम् ।
नत्वाथहं कृष्णदेवो ज्योतिःसारं सतां मुदे ॥
प्रकाश्यते प्रदीपेन वर्त्तमानघटादिकम् ।
ज्योतिःशास्त्रप्रदीपेन विश्वं कालत्रयोदितम् ॥
सप्तविंशतिभिर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥

अस्यार्थो यथा,—अश्विन्यादिसप्तविंशतिनक्षत्रै ज्योतिश्चक्रं भवति तच्चक्रं स्तिमितवायुगं स्थिरेण वायुविशेषेण धृतम्। तस्यार्कांशो द्वादशांशो अश्विन्यादिनक्षत्रनवपादाङ्कितो राशिर्भवेत्। तथाच अश्विन्यादिसप्तविंशानां भानां नवनवाङ्घ्रिभिरेकैकराशिर्मेषादिद्वादशैव ते ॥ इत्यादि ॥

End. अतएव विष्णुपुराणम् ।

स्मृते सकलकल्याणभाजनं यत्र जायते ।
पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥
रिक्तयो व्यतिपाताद्य येऽन्ये लनीतिसम्भवाः ।
ते नामस्मरणाद्विष्णोर्नाशं यान्ति महात्मनः ॥
विदेशगतभ्रातुरन्वेषणाय न गन्तव्यम् ।

विष्णुपुराणम् ।

ततः प्रभृति वै भ्राता भ्रातुरन्वेषणे द्विज ।
प्रयातो न पश्यति तथा तत्र कार्य्यं विजानता ॥
ततः प्रभृति न भ्रातुः कनीयान् मार्गमिच्छति ।
अन्विष्य दुःखमाप्नोति तेन तत्परिवर्जयेत् ॥
इति यात्राप्रकरणं समाप्तम् ।

Colophon. इति महामहोपाध्याय—श्रीकृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यविरचितो ज्योतिःसारः समाप्तः ॥

विषयः। राशिनिरूपणम्। केन्द्रपर्य्यायतत्स्थाननिरूपणम्। ग्रहवर्णकथनम्। दिगधिपनिरूपणम्। दिक्बलिकथनम्। गुणरसाधिपकथनम्। जात्यधिपकथनम्। वेदाद्यधिपकथनम्। दुष्टतिथिनिरूपणम्। ग्रहचन्द्रादिशुद्धिनिरूपणम्। जातक-सुखप्रसवादिजारजयोगप्रभृतिनिरूपणम्। पापग्रहरिष्टिकथनम्। रिष्टिभङ्गादिनिरूपणम्। द्विग्रहयोगफलनिरूपणम्। अन्तर्दशाफलादिनिरूपणम्। क्षुत्प्रभृतिफलनिरूपणम्। यात्राप्रकरणञ्च ॥

No. 74. ज्योतिःसारः. By महेशपञ्चानन. Substance, country-made paper, 17 × 3 inches. Folia, 26. Lines, 5 on a page. Extent, 650 çlokas. Character, Bengali. Date, ? Place of deposit, Kājoḍā, District Bardhamāna *viâ* Anḍāl, Paṇḍita Mādhava Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो विवस्वते ॥

प्रणम्य भास्करं देवं बालकानां हितैषिणा ।
क्रियते श्रीमहेशेन सारो ज्योतिषि यत्नतः ॥
वैशाखो ज्यैष्ठ आषाढः श्रावणो भाद्रसंज्ञकः ।
आश्विनः कार्त्तिको मार्गः पौषो माघस्तथैव च ॥
फाल्गुनश्चैव इत्येव मासा द्वादश विश्रुताः ।
इति माससंज्ञा ॥ इत्यादि ।

End. मैत्रोत्तरापुष्यधनिष्ठषाढ्यचित्रोऽम्बुदे + वरुणे शुभेऽर्के
वारे कुशक्रेन्दुहस्तीनां शुभप्रदः स्यात् सरसः प्रकाशः ॥ * ॥

Colophon. इति महेशपञ्चाननविरचितो ज्योतिःसारः समाप्तः ॥ * ॥ श्रीहरिः ।

विषयः । मासराशिसंज्ञादिनिरूपणम् । अमृतादियोगनिरूपणम् । रविचन्द्रादिशुद्धिनिरूपणम् । यात्रिकतिथिनक्षत्रादिनिरूपणम् । निषिद्धनक्षत्रादिकथनम् । द्रेक्काणव्यवस्थादिः । जन्मलग्नादिनिर्णयः । चन्द्रादीनां स्थूलदशानिरूपणम् । वर्षणजनितावास्तुकथनम् । विवाहनक्षत्रादिकथनम् । गण्डपादादिनिरूपणम् । वास्तुप्रकरणम् । जलप्रवाहादिकाल-निरूपणञ्च ।

No. 75. ज्योतीरत्नम्. By गोपालचक्रवर्त्ती. Substance, country-made paper, 16 × $2\frac{1}{2}$ inches. Folia, 154. Line, 5 on a page. Extent, 3,850 çlokas. Character, Bengali. Date, Sk. 1631. Place of deposit, District Medinīpura, Post Office Çirṣā, Yadupura, Paṇḍita Rājendralāla Gosvāmī. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमः श्रीसूर्याय ।

लक्ष्मीशेशविरिञ्चि-स्मररजनीजानीन्दुजक्रूर ++ वा-
गीशा स्कु ++ नाकिराजशिखिनो मूर्द्ना प्रणम्याम्बिकाम् ।

ज्योतीरत्नमिदं तनोति सुधियां मोदाय नानागमात्
संदृश्याखिलकर्म्मंसु चितिसुरो गोपालनामा कृती ॥
वराहादिकृतान् ग्रन्थानालोक्य बहुशो मया ।
निरूप्यते कर्म्मकाण्डः सविशेषः सतां मुदे ॥
स्वरूपं राशिचक्रस्य नक्षत्राणाञ्च कीर्त्तनम् ।
देवताकीर्त्तनं तेषां नक्षत्रे + + + + ॥ इत्यादि ।

End. शब्दागमं सुनिपुणं कविचन्द्रपादात्
योऽधीत्य तत्र + + स्वमतं व्यतानीत् ।
काव्यादिशास्त्रनिबन्धेषु तथा × ×
यः सर्व्वदा व्यरचयद् बहुशस्तु पद्यान् ॥
ज्योतीरत्नमिदं तस्य + + + + ।
नानाग्रन्थेषु यज्ज्ञेयं + + + + ॥
वेदाङ्कबाणावनि १५९४ संमितेऽब्दे
शाके दिनेशे प्रमदां गते च ।
गोपालशर्म्मा समपूरि शास्त्र-
मिदं मुदा रूपवता + + + + ॥

Colophon. इति श्रीकविचन्द्रचरणारविन्दद्वन्द्वनिःस्यन्द + + + मधुव्रत-श्रीगोपाल-चक्रवर्त्तिविरचितं ज्योतीरत्नं सम्पूर्णम् ॥ श्रीरामः शरणम् । शकाब्दा १६११

विषयः । राशिनक्षत्रनिरूपणम् । सप्तविंशतिनक्षत्रघटितराशिमण्डलनिरूपणम् । लग्न-स्थाननिरूपणम् । कालाशुद्धिविवेचनम् । चन्द्रताराद्विशुद्धिविवेचनम् । पुंसवनादिकृत्य-निरूपणम् । कृषिकर्म्मादिनिरूपणम् । दृष्टिज्ञानादिनिरूपणम् । शुभलग्नादिनिरूपणम् । शक्रोत्थानादिप्रकरणनिरूपणम् ॥

No. 76. तत्त्वानुसन्धानम् . (अद्वैतचिन्ताकौस्तुभनामकटीकासहितम्)
Substance, country-made paper, 14 × 5½ inches. Folia, 147. Lines, 12 on a page. Extent, 5,292 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Prose and verse. Correct.

Beginning. मूलम् । वृत्तिर्नामविषयचैतन्याभिव्यञ्जकोऽन्तःकरणाज्ञानयोः परिणाम-
विशेषः । अभिव्यञ्जकत्वं नामापरोक्षव्यवहारजनकत्वमावरणपरिणामो नाम ।
इत्यादि ।

टीकायाः प्रारम्भवाक्यम् । श्रीकृष्णाय नमः ।
प्रमातारं मानं फलमपि च मेयं त्रिजगतां
नियन्तारं जीवं विगलितभिदं शुद्धममलम् ।
यमाहुर्योगीन्द्रा जड़तनुसमासक्तवशतो
नमामस्तं कृष्णं व्रजयुवति ... कमलम् ॥
तत्त्वमस्यादिवाक्यजन्याखण्डापरोक्षवृत्त्या ज्ञाननिवृत्तिरानन्दावाप्तिश्च भवती-
त्युक्तं तत्र केयं वृत्तिः किं वा तत्र प्रमाणं कथं वा तदुत्पत्तिः वृत्त्या वा किं
प्रयोजनमित्याकाङ्क्षायां प्रमाप्रमाभेदेन द्विविधां वृत्तिं निरूपयितुं प्रथमां
वृत्तिं लक्षयति वृत्तिर्नामेति । इत्यादि ।

End. मूलम् ।
परमसुखपयोधौ मग्नचित्तो भवेयम्-
हरि-विधि-हरमुख्यान् देशिकान् देवभावम् ।
जगदपि न विजाने पूर्णसत्यात्मसंवित्—
सुखतनुरहमात्मा सर्व्वसंसारशून्यम् ॥
यदुकुलवररत्नं कृष्णमन्यांश्च देवान्
मनुजपशुमृगादीन् ब्राह्मणादीन् न जाने ।
परमसुखसमुद्रे ... ... तन्मयोऽहं
गलितनिखिलभेदः सत्यबोधैकरूपः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपाद-
शिष्यमहादेवसरस्वतीमुनिविरचितं तत्त्वानुसन्धानं ॥
मतिसञ्चितध्यानयोगेन वन्धे चौधे साक्षात्कृतोऽसौ मुनिवरनिकरैः शुद्धसत्वै-
र्यदारैर्मुंक्तो गम्यो मुकुन्दो यदुकुलतिलकः श्रेयसे भूयसेऽस्तु ॥ (?)
शिष्यार्चितव्यो विमलाम्बरश्री-
रानन्दविज्ञानसदैकरूपः ।
वेदान्तवेद्यो यतिवर्य्यगम्यो
गोपीजनेशः प्रदिशत्वभीष्टम् ॥

याधीति वेदवचनानि वदन्ति देवीं
यामात्मयोनिगटविर्यौं हृदये स्मरन्ति ।
यच्चिन्तया सकलशास्त्रकृतो भवन्ति
तामानतोऽस्मि सततं प्रणतेष्टदात्रीम् ॥
दुरन्तसंसारमहाम्बुराशेः
समुद्धृतो येन दयालुनाहम् ।
महत्तमं तं पुरुषोत्तमं श्री-
स्वयंप्रकाशं गुरुमानतोऽस्मि ॥
नामानि रूपाणि निरस्य वेदो
यद्बोधयेन्नित्यनिरस्तमोहम् ।
साक्षित्स्वरूपं परिपूर्णरूप-
मर्च्यं तदेवास्मि विमुक्तगम्यम् ॥

अन्तवाक्यं टीकायाः । पूर्णेति । पूर्णः अपरिच्छिन्नः सत्यात्मा कालत्रयाबाधित-स्वरूपः संवित् चिद्रूपः सुखतनुः सुखस्वरूपः असङ्गोऽयं पुरुष इत्यादि-श्रुत्या कर्तृत्वादिसर्वसंसारवर्जितः आत्मानमित्यनुभवामीत्यर्थः । भिन्न-तया स्वेष्टदेवतामपि न पश्यामीत्याह यदुकृतेति । तत्र हेतुमाह परम-सुखेति ॥

उपासकानां चाद्वैतस्य ममसो विनियर्त्तकम् ।
श्रीकृष्णस्य गलेऽद्वैतचिन्ताकौस्तुभमर्पितम् ॥
अध्यारोपापवादोक्तृद्रितजड्तनुद्वैतहेतुः परात्मा
... ... ।
... ...
... ... तैकगम्यः ... ... ॥ (?)

इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्य-पादशिष्यभगवदानन्दसरस्वतीमुनिचूडामणिविरचिते तत्त्वानुसन्धानव्याख्याने-ऽद्वैतचिन्ताकौस्तुभे चतुर्थः परिच्छेदः । समाप्तोयम् ॥

विषयः। मूलस्य । इति प्रथमः परिच्छेदः । टीकायाः । इति श्रीमत्परमहंसपरि-व्राजकाचार्य्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवन्महादेवानन्दसरस्वतीमुनिविरचिते तत्त्वानुसन्धानव्याख्यानेऽद्वैतकौस्तुभे प्रथमः परिच्छेदः समाप्तः । मूलस्य । इति द्वितीयः परि-च्छेदः । टीकायाः । इति ... ... द्वितीयः परिच्छेदः समाप्तः । मूलस्य । इति तृतीयः

परिच्छेदः । टीकायाः । इति श्री ... ... तृतीयः परिच्छेदः समाप्तः । सम्वत् १९११ । मूलस्य । इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यमहादेवसरस्वतीमुनिविरचितं तत्त्वानुसन्धानम् ॥ टीकायाः । इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीमत्स्वयंप्रकाशानन्दसरस्वतीपूज्यपादशिष्यभगवदानन्दसरस्वतीमुनिचूडामणिविरचिते तत्त्वानुसन्धानव्याख्यानेऽद्वैतचिन्ताकौस्तुभे चतुर्थः परिच्छेदः ॥

No. 77. तद्धितगणदीपिका. By सच्चिदानन्दमहान्तठाकुरः. Substance, country-made paper, 12 × 2½ inches. Folia, 18. Lines, 5 on a page. Extent, 360 çlokas. Character, Bengali. Date, ? Place of deposit, Dakṣiṇakhaṇḍa, District Bardhamāna, Post Office Ukhaḍā, Gauraguṇānanda Ṭhākur. Appearance, tolerable. Verse. Correct.

Beginning. श्रीकृष्णचैतन्यः । आर्य्यागाथा । इन्तयमकम् ।

गोकुलभूमौ योऽजनि गोकुलराजात्मुदा च तं वन्दे ।

गोकुलविषाधिनयो गोकुलमप्यकरोच मोघम् ॥

सरस्वतीं नमस्कृत्य क्रियते गणदीपिका ।

तद्धितस्य च पद्येन सच्चिदानन्दधीमता ॥

... ... अथ गणाः ।

अजैडकाश्व वडवाचटकः कोकिलस्तथा ॥ इत्यादि ।

End. सखायप्रामकुमारौ ग्रामषण्डस्तथैव च ।

मनोज्ञादिर्गणो ज्ञेयोऽन्येऽपि चात्र प्रयोगतः ।

भुजङ्गप्रयातम् ।

कृतेऽस्मिन् गणे योऽप्यशुद्धो विजात-

स्तदा शोधनीयः कृपावत्-सुधीभिः ।

मुनीनां भ्रमः स्यादहं तत्र को वा

यदेतद्विचिन्त्यात्र चर्याय सन्तः ॥

Colophon. इति तद्धितगणदीपिका समाप्ता ॥ * ॥

विषयः। पद्येन संक्षेपतस्तद्धितगणादिनिरूपणम् ।

No. 78. तद्धितटीका. By वंशीवदनः. Substance, country-made paper, 14 × 3 inches, Folia, 31. Lines, 11 on a page. Extent, 1,250 çlokas. Character, Bengali. Date, Sk. 1814. Place of deposit, District Bardhamāna, Post Office, Ukhḍā, Dakṣiṇakhanda. Gauraguṇānanda Ṭhākura. Appearance, new. Prose. Generally correct.

Beginning. श्रीश्रीगौराङ्गः ।

श्रीरामचरणद्वन्द्वमद्वन्द्वद्वन्द्वसाधनम् ।
वन्द्यवृन्दारकैर्वन्द्यमिन्दिरामन्दिरं भजे ॥
तद्धितप्रत्ययेषु विधान्तरेषु लिङ्गानां स्वभावतः प्रातिपदिकनिष्ठत्वेन सन्निहितत्वात् लिङ्गकार्य्यम् । इत्यादि ।

End. समस्तत्वेऽपि इष्यते ह्यधिकारार्था प्रवृत्तिनिमित्तता । इति न्यायादनुवर्त्तनीयमिति भावः ॥ * ॥

Colophon. श्रीवंशीवदनं विभिन्नविनयं विद्वज्जनप्रीणनं
कृते रायमती सती मतिमती श्रीमान् वशिष्ठः स्वयम् ।
व्याकारे क्रमदीश्वरेण रचिते श्रीनन्दिना शोधिते
गोयीचन्द्रकृते तु तद्विरचिते पादे चतुर्थं त्विदम् ॥
युगाब्जाष्टेन्दुमिते शाके ।

विषयः । संक्षिप्तसारस्य तद्धितपादव्याख्यानम् ।

No. 79. तन्त्रदीपनी. By रामगोपालशर्म्मा. Substance, country-made paper, 18 × 4½ inches. Folia, 213. Lines, 7 on a page. Extent, 4,500 çlokas. Character, Bengali. Date, Sk. 1626. Place of deposit, Boḍiā, District Rājsāhi. Paṇḍita Kālidāsa Ṭhākura. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

कालव्यालभिया सुनिश्चलधिया मायामयेऽम्भोनिधौ
नान्यः त्रातुमलं विनाङ्घ्रिकमलं श्रीनाथधन्वन्तरेः ।
तारा तारयहेतवे नहि तरिर्ब्भिन्नाय बुद्धिं स्वयं
भक्तेऽस्त्वोम्भगुरुं तदीयचरणं वन्दे मनो मेऽस्वताम् ॥
निगमागोचरतत्त्वां तारितभुवनत्रयीसत्त्वाम् ।
किङ्करसिद्धकदम्बां जगदम्बां नौम्यनालम्बाम् ॥

कलौ विषयतादात्म्यव्याकुलाशेषचेतसाम् ।
ज्ञानाय तन्यते सिद्धिसाधनी तन्त्रदीपनी ॥
श्रीनाथाङ्घ्रिसहायेन रामगोपालशर्म्मणा ।
तन्त्राणां सारमाहृत्य ज्ञात्वा साधकसम्मतिम् ॥
तत्रादौ ब्रह्मनिरूपणम् । यथा श्रुतिः ।
अजामेकां लोहितशुक्लकृष्णां
प्रजा बह्वीर्जनयन्तीं सरूपाम् । इत्यादि ।

End. आगमे सर्व्वविद्याश्च सर्व्वशास्त्रार्थमागमे ।
आगमे सर्व्वदेवा हि आगमश्च परा गतिः ॥
येऽभ्यसन्ति त्विदं शास्त्रं पठन्ति पाठयन्ति वा ।
सिद्धयोऽष्टौ करे तस्य धनधान्यादिसम्पदः ॥
आदृताः सर्व्वलोकेषु भोगिनः क्षोभकारकाः ।
आप्नुवन्ति परं ब्रह्म सर्व्वशास्त्रविशारदाः ॥
यदत्र लिखितं भ्रान्त्या मोहाद्वृयचापि वर्ज्जितम् ।
तत्सर्व्वं क्षम्यतां मातरखिलात्मा यतोऽम्बिके ॥
महेश्वरप्रोक्तनिगूढशास्त्र-
मर्म्मार्थभिन्नं लपितं यदत्र ।
श्रीरामगोपालधरामरस्य
कृतौ महद्भिः परिशोधनीयम् ॥
षड्वह्निरसचन्द्रमःप्रमितशाकसम्वत्सरे (१६२६)
स्मरारिमुखपङ्कजाद्गलितसौधधारोचिता ।
नितान्तपरविदुषे परमतत्त्वसंसेविनां (?)
चिदर्थपरिपुञ्जिता जयति तन्त्रदीपन्यसौ ॥ ० ॥

Colophon. इति परमनिरञ्जन-श्रीकाशीनाथानन्दनाथपदारविन्दैकशरण-श्रीरामगोपाल-शर्म्मकृत-तन्त्रदीपन्यामेकादशोल्लासः ॥ समाप्तेयं तन्त्रदीपनीति । श्रीदुर्गा-चरणे भक्तिरस्तु ॥ ० ॥

विषयः । १ प्रथमोल्लासे तत्त्वज्ञानादिविवेचनम् । २ ये सामान्यपूजादिनिरूपणम् । ३ ये विष्णुसूर्य्यादीनां मन्त्रकथनम् । ४ र्थे श्रीविद्यादिमन्त्रपूजादिकथनम् । ५ मे छिन्ना-प्रकरणम् । ६ ष्ठे तारिण्यादिप्रकरणम् । ७ मे मञ्जुघोषादिमन्त्रनिर्णयः । ८ मे स्तवकवचादिः । ९ मे पूजोपचारादिनिर्णयः । १० मे विजयाकल्पादिः । ११ शे कुण्डादिनिरूपणमिति ।

No. 80. तन्त्रप्रदीपप्रभा. By सनातनतर्काचार्य्यः. Substance country-made paper, 18 × 3 inches. Folia, 17. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, Sk. 1741. Place of deposit, District Rājasāhi, Puṭhiā, Paṇḍita Guruprasāda Çiromaṇi. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय। पूर्व्वा। एकदेशोऽस्यास्तीति एकदेशी तत्रैकदेशशब्दे-नावयव उच्यते इत्युक्तम्॥ इत्यादि।

End. यदि हितसुखशब्दयोगे चाशिषि षष्ठी तत्कथं प्रभा यद्गुणिनां हितं इत्यादि-प्रयोग इत्यत आह आहितसुखाभ्यामित्यादि॥ *॥

Colophon. इति श्रीसनातनतर्काचार्य्यविरचितायां तन्त्रप्रदीपप्रभायां अनभिहितपादः समाप्तः॥ *॥ शकाब्दाः १७४१।

विषयः। तन्त्रप्रदीपस्य व्याख्यानम्।

No. 81. तन्त्रसंक्षेपचन्द्रिका. By भवानीशङ्करवन्द्योपाध्यायः. Substance, country-made paper, $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 108. Lines, 7 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Hugli, Khānākul Kṛṣṇanagara, Bābu Pūrṇacandra Bandyopādhyāya. Appearance, old. Prose and verse. Generally correct.

Beginning. (१ म पत्रं नास्ति)

अथ शिष्यलक्षणम्।

शान्तो विनीतः ... श्रद्धावान् धारणक्षमः।
समर्थश्च कुलीनश्च प्राज्ञः सच्चरितो यती॥
एवमादिगुणैर्युक्तः शिष्यो भवति नान्यथा।
गुरुता शिष्यता वापि तयोर्वत्सर ...॥
... ...

तत्र गुरोर्दोषा यथा,—

परीवादवैषकर्म्मश्रद्धा-कितवता-क्रियाहीनता-तत्तत्कल्पानभिज्ञता-गुरुनिन्दा--खर्व्वता--सदामात्सर्य्यं-श्वित्र-गलत्कुष्ठ-नेत्ररोग-कुनख-श्यावदन्तास्थिरा-व्याधि ... ... बह्वभोक्तृत्व-स्त्रीजितत्व-पत्नीपुत्रोभयरहित्यानि॥

इत्यादि।

End. मन्त्रेणोङ्कारयुक्तेन स्वाहान्तेन विचक्षणः ।
... ... ॥
इति श्रुतौ स्वाहान्तमन्त्रे स्वाहान्तरं निषेधयति ।
मन्त्रतन्त्रप्रकाशकानां मन्त्र इत्यभिधीयते ॥

Colophon. इति वन्द्यघटीय-श्रीभवानीशङ्करदेवशर्म्मविरचिता तन्त्रसंक्षेपचन्द्रिका समाप्ता ॥

विषयः। शिष्यलक्षणम् । गुरुदोषनिरूपणम् । साधककर्त्तव्यनिरूपणम् । अकडमचक्रनिरूपणम् । राशिचक्रनिरूपणम् । नक्षत्रचक्रनिरूपणम् । कुलाकुलचक्रनिरूपणम् । दीक्षाकालनिरूपणम् । मालानिर्णयः । मन्त्रस्य दशविधसंस्कारनिरूपणम् । तान्त्रिकसन्ध्यानिरूपणम् । दुर्गादिगायत्रीनिरूपणम् । पूजानिरूपणम् । प्राणायामनिरूपणम् । पुरश्चरणलक्षणम् । अन्नपूर्णादिमन्त्रनिरूपणम् । श्यामापूजाप्रकरणम् । लक्ष्म्यादिन्यासनिरूपणम् । रामलक्ष्म्यादिमन्त्रनिरूपणम् । षडङ्गादिन्यासनिरूपणम् । दुर्गाशतनामस्तोत्रम् । श्यामास्तोत्रम् । शिवस्तवकवचादिः । संक्षेपहोमनिरूपणम् । कूर्म्मादिचक्रनिरूपणम् । सर्व्वतोभद्रमण्डलादिनिरूपणम् । पञ्चायतनीदीक्षानिरूपणम् । कुण्डविधानञ्च ॥

No. 82. तारापञ्चाङ्गम् . Substance, country-made paper, 7 × 4 inches. Folia, 168. Lines, 6 on a page. Extent, 1,175 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. ॐ श्रीताराभगवत्यै नमः । तत्सत् ।
श्रीदेव्युवाच ।
भगवन् सर्व्वधर्म्मज्ञ सर्व्वागमविचक्षण ।
श्रीमदुग्रताराया ... तद्भवता परम् ।
सूचितं यत् कृपाम्भोधे कथयस्व वृषध्वज ॥
श्रीभैरव उवाच ।
श्रीतारा परमा विद्या जगच्चैतन्यरूपिणी ।
नातः परतरा विद्या नातः परतरो मनुः ॥ इत्यादि ।

End. मोक्षार्थी लभते मोक्षं धनार्थी लभते धनम् ।
विद्यार्थी लभते विद्यां तर्कव्याकरणादिकाम् ॥

इदं स्तोत्रं पठेद् यस्तु सततं भक्तिमान् नरः ।
तस्य शत्रुः क्षयं याति महाप्रज्ञा च जायते ॥
पीड़ायां वापि संग्रामे महोत्पाते तथा भये ।
य इदं पठते स्तोत्रं शुभं तस्य न संशयः ॥

Colophon. इति श्रीताराकल्पे तारास्तवराजः समाप्तः । शुभम् ॥

विषयः । श्रीतारायाः पटल-पूजापद्धति-तारार्णवीयसहस्रनामस्तोत्र-भैरवीतन्त्रोक्त त्रैलोक्यमोहननामककवच-ताराकल्पीयमहोग्रतारास्तवराजरूपपञ्चाङ्गम् ।

No. 83. ताराहस्यम् . By राजेन्द्रशर्म्मा . Substance, country-made paper, 18 × 3¼ inches. Folia, 98. Lines, 7 on a page. Extent, 1,300 çlokas. Character, Bengali. Date, Sana 1225. Place of deposit, Baradā Ājabnagar, Post Office Ghāṭāl, District Medinīpura, Paṇḍita Īçānacandra Vācaspati. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गुरवे ।
अथ श्रीराजेन्द्रकृत-श्रीताराहस्यं लिख्यते ।
अथ प्रातःकृत्यमभिलिख्यते । गौतमीयतन्त्रे ।
इदानीं पूर्व्वकृत्यञ्च प्रसङ्गात् कथयामि ते ।
यत् कृत्वाधिकारित्वं याति मन्त्रयन्त्रार्च्चनादिषु ॥
येन विना न सिद्धिः स्यात् नरकञ्च प्रपद्यते ॥
यामले च ।
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितो यजेत् ।
तस्य पूजा च विफला शौचहीना यथा क्रिया ॥
स्वतन्त्रे ।
शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम् ।
गन्धानुलेपनं शान्तं वराभयकराम्बुजम् ॥
मन्दस्मितं निजगुरुं कारुण्येनावलोकितम् ।
वामोरुशक्तिसंयुक्तं मुक्ताभरणभूषितम् ॥
स्वशक्त्या दक्षहस्तेन धृतचारुकलेवरम् ।
वामे धृतोत्पलायाश्च शुभशक्त्याः सुशोभनम् ॥
परानन्दरसोल्लासलोचनद्वयपङ्कजम् ॥ इत्यादि ।

End. ऋतुः षोड़शयामिन्यस्तत्रस्तास्तु गर्हिताः ।
पुत्रास्तास्वपि या युग्मा अयुग्मा कन्यकाप्रदाः ॥
त्यक्त्वा चन्द्रमसं दुष्टं मघां मूलां विहाय च ।
शुचिः संनिविशेत् पत्नीं पुंनामर्क्षे विशेषतः ॥
शुचिं पुत्रं प्रसूयेत पुरुषार्थप्रसाधकम् ॥
इत्यादि मन्वादिमुनिप्रणीत-
शास्त्रप्रणीते पथि वर्त्तमानः ।
न बध्यते कल्मषकर्म्मपाशैः
श्रीरामचन्द्रस्य पदं समेति ॥
... ...

Colophon. इति प्रकटगुप्ततरसम्प्रदायकुलकौलोत्तरनिर्गर्भरहस्यातिपरापररहस्याति-पूर्व्वरहस्याचिन्त्यप्रभाववत्-तारारहस्ये आगमशास्त्रे वेदगर्भवंशीय-राढ़ीय-महामहोपाध्याय-श्रीयुतकिशोरात्मजश्रीयुतराजेन्द्रद्विजविरचिते मन्त्रचैतन्यादिविवेचनो नाम द्वाविंशत्तमः परिच्छेदः ॥ समाप्तश्चायं ग्रन्थः ।
वेदगर्भः शूलपाणिस्तथा विद्यापतिः स्मृतः ।
ख्यातो धनपतिर्विप्रः कृष्णानन्दो महाशयः ॥
त्रैलोक्यनाथो विख्यातो रामानन्दस्तथा स्मृतः ।
वंशीदासः सुतो विप्रकिशोरोऽपि महाशयः ।
राजेन्द्र इति विख्यातो गुरुदेवार्च्चने रतः ॥
आसीद् वेदगर्भो जगति ... ... विद्यापतिश्च
कृष्णानन्दस्तनूजस्तदभिनवसुतः श्रीलत्रैलोक्यनाथः ।
रामानन्दस्तदीयस्तनय इह च तन्नन्दनो वंशीदास (?)
स्तत्पुत्रः श्रीकिशोरोऽस्य तनय इह श्रीलराजेन्द्रशर्म्मा ॥
तेनैवेदं प्रयत्नात् गुरुचरण ... ...
... ... ।
संसारे दुःखसारे सकलसुखकरं तारिणीतत्त्वमुक्तं
यत् संसेव्य त्रिलोकीमपि वशयति त्र्यम्बकः स्याच्च साक्षात् ॥
समाप्तश्चायं ग्रन्थः लिखितं ... ... सन् १२२५ साल ।

विषयः। अत्र प्रथमद्वितीयतृतीयपरिच्छेदेषु प्रातःकृत्य-गुरुस्तोत्रादिनिर्णयः। चतुर्थे स्नानादिविधानम् । पञ्चमे स्नानादिशोधनप्रकरणम् । षष्ठे प्राणायामविधानम् । सप्तमे भूत-

शुचिकालपुरुषादिनिरूपणम् । अष्टमनवमदशमेषु मानसपूजादिविवेचनम् । एकादशे यन्त्रादि-विवेचनम् । द्वादशे भूतशोधनविशेषनिरूपणम् । त्रयोदशे देवीपूजानिरूपणम् । चतुर्दशे पुष्पादिविवेचनं तारास्तोत्रकथनञ्च । पञ्चदशे स्तवादिः । षोडशे मन्त्रसिद्धेरुपायादिनिरूपणम् । सप्तदशाष्टादशोनविंशविंशेषु मालादिविवेचनम् । एकविंशे मन्त्रभेदविवेचनम् । द्वाविंशे मन्त्र-चैतन्यादिविवेचनञ्च । इति ।

No. 84. तिथितत्त्वटीका. By काशीरामवाचस्पतिः. Substance, country-made paper, 16 × 3 inches. Folia, 103. Lines, 8 on a page. Extent, 3,500 çlokas. Character, Bengali. Date, Sk. 1778. Place of deposit, Amarapura, District Medinipura, Post Office Rādhānagara, Paṇḍita Guruprasanna, Bidyāratna. Appearance, tolerable. Prose and verse. Correct.

Beginning. श्रीरामो जयति ।

नत्वा गुरोश्चरणपद्मरजांसि मूर्द्ध्ना
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
तिथ्यादितत्त्वविवृतिं वितनोति सम्यक् ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुम् ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥

मीमांसादिनानाशास्त्रपारदृश्वा वन्द्यघटीय-श्रीमान् रघुनन्दनभट्टाचार्य्यैः प्राचीनविचक्षणगणनानाविधव्याख्याजनितसन्देहस्य स्मृतिशास्त्रस्य मुन्यन्तर-वचनयुक्तिभ्यां तत्त्वं निर्णीय इदानीन्तनानां सुखबोधाय निबन्धांश्चकार । तत्र च स्मृतिशास्त्रस्य स्वभावतो दुर्गमतया कानिचित् कठिनानि सन्ति अतस्तानि मया यथामति व्याख्यायन्ते । तत्र तिथितत्त्वव्याख्या । इत्यादि ॥

End. तत्पूर्व्वदिने च सायं षष्ठीलाभात् तत्रामन्त्रणं निर्विवादं अत उक्तघटिका तदधिकेति । तदनुपपत्तेः आमन्त्रणानुपपत्तेः । अनुपपत्तौ हेतुमाह पूर्व्वेति पत्रिकाप्रवेशदिवसीय पूर्व्वतृतीयदिवसीयायाः अवच्छिन्नत्वात् पत्रिकाप्रवेशा-अवच्छिन्नपूर्व्वदिनेन अवच्छिन्नत्वात् इत्यर्थः । परदिवसीयायाः षष्ठ्याः कर्म्मानर्हत्वात् तिथिमहत्त्वात् घटिकान्यूनत्वाच्चेति बोध्यम् । मूलानुरोधात् मूलानक्षत्रानुरोधात् मध्याह्नादौ यदि शुद्धं प्रविशतीत्यन्वयः । विसर्गे पत्रीविसर्जनम् ।

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचिता तिथितत्त्वटीका समाप्ता ॥
शाके वस्वगसप्तक्ष्मामिते सूर्य्ये गते हरिम् ।
टीकेयं लिखिता श्रीलविचारामाख्यशर्म्मणा ॥
श्रीगोपालपदाम्भोजे मनो मे भ्रमरायताम् ॥

विषयः । रघुनन्दनकृततिथितत्त्वस्य दुर्गमस्थानां व्याख्यानम् ॥

No. 85. तिथितत्त्वटीका. By रामचरणविद्यावाचस्पतिः. Substance, country-made paper, 17 x 3 inches. Folia, 21. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, Dhātrigrāma, District Bardhamāna, Paṇḍita Ṣaṣṭhidāsa Bhaṭṭācāryya. Appearance, new. Prose. Correct.

Beginning. ॐ नमो गणेशाय । ग्रन्थारम्भे विघ्नविघाताय देवतानमस्काररूपमङ्गलमाचरन् शिष्यग्रहणार्थं प्रतिजानीते प्रणम्येति । इत्यादि ।

End. अथवा त्रयोदशवर्षानन्तरं चतुर्दशवर्षे कृष्णैकादश्यां षोडशमासार्द्धं कुर्य्यादिति॥

Colophon. इति श्रीरामचरणविद्यावाचस्पतिना कृतेयं तिथितत्त्वीयसामान्यकाण्डटीका समाप्ता ॥ • ॥

विषयः । रघुनन्दनकृत तिथितत्त्वीयसामान्यकाण्डस्य व्याख्यानम् ।

No. 86. तिथिद्वैधप्रकरणम्. By शूलपाणिमहामहोपाध्यायः. Substance, country-made paper, $17\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 10. Lines, 6 on a page. Extent, 225 çlokas. Character, Bengali. Date, ? Place of deposit, Amarapura, District Medinipura, Post Office Rādhānagara, Paṇḍita Guruprasanna Bidyāratna. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो रामाय ।
वचनद्वैधसंजातसंशयच्छिदुरः सताम् ।
मनोतु मुदमत्युच्चैर्द्वैधखण्डतिथिनिर्णयः ॥
प्रतिपदादितिथिविशेषविहितानां स्नानदानादीनां कर्म्मणामखण्डतिथौ निःसंशयमनुष्ठानम् । यदा तु वृद्धिह्रासादिना दिनद्वये तिथिप्राप्तिस्तदा कुत्र क्रियेवेति संशये निर्णयः । तत्र सम्वत्सरप्रदीपः ।

सा तिथिस्तदहोरात्रं यस्यामभ्युदितो रविः ।
तया कर्म्माणि कुर्व्वीत ह्रासवृद्धी न कारणम् ॥
यथास्तं सविता याति पितरस्तामुपासते ।
तिथिं तेभ्योऽपराह्णो हि स्वयं दत्तः स्वयम्भुवा ॥
इति गरुड़परिशिष्टवचनात् दैवकर्म्मणि उदयगामिनीति व्यवस्थामाह । न च पूर्व्वदिने षष्ठीयुक्तसप्तम्येकादशीयुक्तद्वादश्योः परदिने विनिर्गमे सूर्य्यव्रतविष्णुव्रते स्यातामिति वाच्यं भविष्यपुराणविरोधात् ॥ इत्यादि ।

End. यथा मनोरथद्वितीयायां दिवा वासुदेवार्च्चनं रात्रौ चन्द्रोदये अर्घ्यदानं नक्तभोजनादिकं यथा विष्णुधर्म्मे,—
देवमभ्यर्च्य पुष्पैस्तु धूपदीपानुलेपनैः ।
उद्गच्छतश्च वालेन्दोर्द्दद्यादर्घ्यं समाहितः ॥
नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ।
अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः ॥
अस्तं गते चन्द्रे । तथा पद्मपुराणे,—
दिवारात्रौ व्रतं यत्र एवमेव तिथौ स्मृतम् ।
तस्यामुदययोगिन्यामाचरेत्तद्व्रतं व्रती ॥
तेन प्रतिपदादियुक्तापि द्वितीया कर्म्मार्थं दिवारात्रौ न च लभ्यते न च तदा युग्मादरः कार्य्यः । द्वितीयातृतीयायुग्मादिने द्वितीयाविहितकर्म्मणि द्वितीया कालस्यालाभादित्यर्थः ।

Colophon. इति साण्डिल्यानमहामहोपाध्यायशूलपाणिविरचितं तिथिद्वैधप्रकरणं समाप्तम् । श्रीश्रीकृष्णः ।
शाके खरिपुमैनाङ्के द्विखण्डतिथिनिर्णयः ।
ग्रन्थोऽयं लिखितः श्रीमद्वेचारामाख्यशर्म्मणा ॥

विषय: । सत्सु तिथिषु परस्परविद्धेषु प्रतिपदादितिथिकृत्यकालनिर्णयः ॥

No. 87. तिथिविवेकटीका. By श्रीनाथाचार्य्यचूड़ामणिः. Substance, country-made paper, $15\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 15. Lines, 7 on a page. Extent, 400 çlokas. Character, Bengali. Date, ? Place of deposit, Khānākul Kṛṣṇanagara, Paṇḍita Brahmanārāyaṇa Bidyālaṇkāra, Appearance, tolerable. Prose and verse. Correct.

Beginning. श्रीरामः शरणम् ।

गजनिमीलनवन्न मनश्चिरं

दधति दर्शनतत्त्वविदः स्मृतौ ।

पदपदार्थविचारजडाः × × ×

तदिह शिष्यहिताय मम श्रमः ॥

श्रीकराचार्य्यपुत्रेण श्रीमच्छ्रीनाथशर्म्मणा ।

व्याख्या तिथिविवेकस्य यथामति वितन्यते ॥

शास्त्रस्य परार्थतया तत्प्रवृत्त्यङ्गं सम्बन्धप्रयोजनं ग्रन्थाशीर्व्वादव्याजेनादौ निबध्नाति वचनद्वैधेति । संशयच्छिदुर इति । यद्यपि छिदिभिद्योः कर्म्मकर्त्तर्य्येवाभिधानं तथापि केचिदर्थकर्त्तर्य्यपि दोषान्धकारभिदुरो इद्यारिपक्षच्छिदुर इति वृत्तिकारोक्तनयेन कर्त्तर्य्यपि साधुरित्याहुः । इत्यादि ।

End. अतएव वक्ष्यति ।

दिवा रात्रौ व्रतं यच्च एवमेव तिथौ स्मृतम् । इति ।

एवमेवेति दिवारात्रिव्यापिन्यामित्यर्थः द्वितीयाकालस्यालाभादिति शेषः । एवञ्च यद्युभयदिनस्यापि इत्वा दिवसान्तद्वितीयाद्तिथिर्दिवसरात्रिव्यापिन्यचैव युग्मादयो नान्यथेत्युक्तमिति सर्व्वमनुकूलम् ।

लघुरिति भावशेषो ग्रन्थो यथास्ते विषयता मद्गतौ ।

\+ \+ \+ \+ \+ \+ × ॥

सुशिष्यबुद्धिवैषद्यहेतोः श्रीनाथशर्म्मणा ।

कृता तिथिविवेकस्य टीका तात्पर्य्यदीपिका ॥

Colophon. इति महामहोपाध्याय-श्रीमच्छ्रीकराचार्य्यात्मज-श्रीमच्छ्रीनाथाचार्य्यचूडामणिकृता तिथिविवेकटीका तात्पर्य्यदीपिका समाप्ता ॥ श्रीसीतारामः ।

शाके वर्गद्विहितिरजनीनाथैर्मिते मीनभे

श्रीरामश्यामलपदयुगं ध्यात्वा पितुः पादकम् ।

मत्वा जन्माघनिकरहरं ब्रह्मार्चितं कोमलं

श्रीनाथाचार्य्यगुरुवरकेर्यत्नैः कृते मे लिपिः ॥

विषयः । शूलपाणिकृततिथिविवेकस्य व्याख्यानम् ।

No. 88. तिथिसंग्रहः. Substance, country-made paper, 14×3 inches. Folia, 38. Lines, 8 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, Sk. 1749. Place of deposit, Bākuliā, Post Office Sālatāḍā, District Vā̃kuḍā. Bābu Caṇḍīcaraṇa Caṭṭopādhyāya. Appearance, new. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । प्रायेण सङ्कल्पानामेव कर्म्मणामारम्भकत्वात् आदौ स एव लिख्यते । कायवाङ्मनोभिरर्जितं कर्म्म फलाय समर्थमिति श्रुत्वा चयाथामङ्गलसुतम् । इत्यादि ।

End. तथा ब्राह्मे ।
सर्व्वदानानि नियमा आवासाश्च तपांसि च ।
यज्ञो दानं तथा जप्यः श्राद्धश्च सुरपूजनम् ।
गङ्गायान्तु कृतं सर्व्वं कोटिकोटिगुणं भवेत् ॥

Colophon. इति समाप्तम् । लिखितमिदं गुरुचरणेन शकाब्दाः १७४९ ॥

विषयः। सङ्कल्पादिनिरूपणम् । मलमासादिनिरूपणम् । अर्थवाद-निषेध-पर्य्युदासादि-निरूपणम् । जन्मतिथ्यादिव्यवस्था । प्रतिपदादितिथिव्यवस्था । दुर्गोत्सवव्यवस्थादिः । मघा-श्लेषादिनिरूपणम् । अर्द्धोदयादिनिरूपणम् । सुवर्णदानविधिस्तत्फलादिकथनञ्च ।

No. 89. तिथ्यादिविधिसंग्रहः. By रघूत्तमतर्कशिरोमणिः. Substance, country-made paper, 17×3 inches. Folia, 31. Lines, 6 on a page. Extent, 750 çlokas. Character, Bengali. Date, ? Place of deposit, Bidgā̃, Bikramapura, District Ḍhākā. Paṇḍita Ānandacandra Bidyālaṇkāra, Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
भवाब्धिपङ्के च निमग्नकातरा
भवन्ति यत्पादयुगं पुरद्विषः ।
रघूत्तमस्तर्कशिरोमणिर्नमन्
तनोति तिथ्यादिविधेश्च संग्रहम् ॥ इत्यादि ।

End. तच्च प्राशस्त्यबोधितोत्कर्षत्वविशिष्टविशेषणाभावादेव विशिष्टनित्यत्वाभावात् ।
इति संक्षेपः ।
शिष्यप्रशिष्यशिष्यपादद्वन्द्व + + प्रणामाद्
यदिह रघुत्तमुत्तं नेति तत्पादयुग्मम् । (?)

निरवधि हृदि ध्यात्वा प्राप्नुयात् वाक्पतित्वं
भुवि वपुरवसाने यद्भवेत् किन्नु कथ्यम् ॥ * ॥

Colophon. इति तिथ्यादिविधिसंग्रहः सम्पूर्णः ॥ * ॥

विषयः । तिथिस्वरूपादिनिरूपणमुखेन तिथ्यादिव्यवस्था ।

No. 90. तीक्ष्णाकल्पः. Substance, country-made paper, 13×4 inches. Folia, 81. Lines, 8 on a page. Extent, 2,700 çlokas. Character, Bengali. Date, ? Place of deposit, Roāil, District Ḍhākā. Babu Yogendranātha Rāya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगत् ।
नमस्तस्यै नमस्तस्यै नमस्तस्यै चिमूर्त्तये ॥
प्राह्णे शुक्ले उत्थाय परिधायांशुकान्तरम् ।
उपवीतसमाकारमुत्तरीयं विधृत्य च ॥
प्रक्षाल्य नेत्रे आचम्य मूलाधारे त्रिकोणके ।
सुखाहतब्रह्मद्वारां ध्यात्वा क्रोधेन बोधयेत् ॥ इत्यादि ।

End. कूर्म्मपृष्ठसमं कुर्य्यात् दक्षिणस्य च पृष्ठकम् ।
एवं बद्धा कूर्म्ममुद्रां सर्व्वसिद्धिं प्रयच्छति ॥
संसक्ता अङ्गुलीः सर्व्वाः (अतःपरं खण्डितम्)

Colophon. शाके वर्षेऽचिवह्निचितिधरधरणीमे तु चन्द्रप्रतापि-
श्रीराधामोदनस्य द्विजमणिशरणीभर्गुरानन्दसूनोः ।
संसारापारपाथोनिधिपतितजनोत्तारतारापदेष्वो-
स्तीक्ष्णाकल्पः सुश्लिष्टस्त्रिभुवनजननीतारिणीधीप्रकाशः ॥

विषयः । १ मे पटले,—प्रातःकृत्यादिकथनम् । जपपूजादिविधिः । यन्त्रादिकथनम् । आसनशुद्ध्यादिविधिः । मातृकाध्यानादिः । ध्यानविध्यादिः । न्यासादिनिरूपणम् । एकजटापूजाविधिस्तत्प्रयोगादिश्च । २ ये पटले,—पूजोपचारादिनिरूपणम् । मन्त्राभिषेकादिनिरूपणञ्च । ३ ये पटले,—नित्यासाधकस्तवादिः । ४ र्थे पटले,—पुरश्चरणस्थानादिनिरूपणम् । ५ मे पटले मायास्तोत्रादिः । मुद्रादिनिरूपणम् । अतःपरं खण्डितम् ।

No. 91. तीर्थतत्त्वम् . By रघुनन्दनभट्टाचार्य्यः . Substance, country-made paper, 13×3 inches. Folia, 32. Lines, 7 on a page. Extent, 625 çlokas. Character, Bengali Date, ? Place of deposit, Mānapāsā, District Barisāla. Paṇḍita Mathurānātha Bhaṭṭācāryya. Appearance, fresh. Prose and verse. Generally correct.

Beginning. प्रणम्य सच्चिदानन्दं जगतामीश्वरं हरिम् ।
स्मृतितत्त्वे तीर्थतत्त्वं वक्ति श्रीरघुनन्दनः ॥

End. कलौ तु सर्व्वतीर्थानि स्वं स्वं वीर्य्यं स्वभावतः ।
गङ्गायां प्रतिमुञ्चन्ति सा तु देवी न कुत्रचित् ॥
अतःपरं खण्डितम् ।

विषयः । तीर्थयात्राविधिः । गयापद्धतिकथनम् । प्रयागमाहात्म्यकथनम् । मथुरा-माहात्म्यकथनम् । स्नानश्राद्धादिकथनम् । गङ्गामाहात्म्यं खण्डितम् । अतःपरं नास्ति ।

No. 92. त्रिपुरासारतन्त्रम् . Substance, country-made paper, 13×4 inches. Folia, 7. Lines, 11 on a page. Extent, 280 çlokas. Character, Bengali. Date, ? Place of deposit, Roāil, District Ḍhākā. Babu Yogīndramohana Rāya, Appearance, tolerable.* Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । पार्व्वत्युवाच ।
त्रिपुरेश महाभाग कुलाचारप्रबोधक ।
सारं श्रीत्रिपुरेशान्याः कथयस्व मयि प्रभो ।
सप्तलक्षमहाविद्याः कथितास्त्वन्तभेदतः ।
तेषु सारतरा का वा का वा शीघ्रफलप्रदा ॥ इत्यादि ।

End. अन्तर्यागमृते देवि बहिर्यागं न चाचरेत् ।
अन्तर्यागे हि चरिते बहिर्यागे प्रवर्त्तते ।
दैवताशापमाप्नोति न च देवी प्रसीदति ॥ * ॥

Colophon. इति श्रीसारतन्त्रे दशमः पटलः सम्पूर्णोऽयं तन्त्रः (?) ॥ श्रीदुर्गा ॥

विषयः । १ मे पटले,—भक्तिविधानादिकथनम् । २ ये पटले,—दशविद्यादिकथनम् । ३ ये पटले,—महामन्त्रविवरणम् । ४ र्थे पटले,—मन्त्रार्थादिकथनम् । ५ मे पटले,—पूजा-विध्यादिः । ६ ष्ठे पटले,—गुरुमन्त्रगोपनविध्यादिः । ७ मे पटले,—योगोदयकथनम् । ८ मे पटले,—पूजाक्रमादिकथनम् । ९ मे पटले,—षट्कर्म्मसाधनप्रकरणम् । १० मे पटले,—अन्त-र्यागादिकथनञ्चेति ।

No 93. त्रोटकदीपिका. By सच्चिदानन्दयोगी. Substance, country-made paper, 11 × 7 inches. Folia, 54. Lines, 9 on a page. Extent, 1,000 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Prose. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः ।

ॐ विलसचिति यन्ततः स्फुरदखिलसकलमसा
परिनिर्म्मितविपुलस्वरपिचितसकमहिमा ।
व्यवहारिकवपुषा विधिवचनादिकविषयो
मम मानसनिलयोऽस्त्विता जगदखिलम् ॥ इत्यादि ।

End. नियन्तारं सहस्रशीर्षेत्यादिश्रुतिसिद्धं विष्णुं मुमुक्षुरहं नमामीत्यर्थः ॥

Colophon. इति श्रीपूज्यपादयोगीन्द्रशिष्येण सच्चिदानन्दयोगिना विरचिता तत्त्वदीपिका त्रोटकदीपिका समाप्ता ॥ ० ॥

विषयः । श्रुतिसारसमुद्धरणव्याख्यानम् ।

No. 94. दत्तात्रेयसहस्रनाम (ब्रह्माण्डपुराणीयम्). Substance, foolscap paper, 6 × 4 inches. Folia, 52. Lines, 5 on a page. Extent, 200 çlokas. Character, Nāgara. Date, Sм. 1936. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । दत्तात्रेयसहस्रनामप्रारम्भः ।

सूत उवाच ।

पुण्ये भागीरथीतीरे तपस्यन्तं परन्तपम् ।
सनत्कुमारं ब्रह्मर्षिं ज्ञानयोगपरायणम् ।
सर्व्वे समेत्य मुनयः पप्रच्छुर्मुनिपुङ्गवम् ॥

ऋषय ऊचुः ।

कथ्यतां भो मुनिश्रेष्ठ भुक्तिमुक्तिप्रदायकम् ॥

सनत्कुमार उवाच ।

प्रणम्य परमानन्दमादिदेवं जगत्पतिम् ।
दत्तात्रेयं महात्मानं सत्यविज्ञानभास्करम् ॥ इत्यादि ।

End. य इदं पठते नित्यं पाठयेद्वा समाहितः ।
सर्व्वान् कामानवाप्नोति दत्तात्रेयप्रसादतः ॥

Colophon. इति श्रीब्रह्माण्डपुराणे श्वकुलागमे सनत्कुमारब्रह्मर्षिसम्वादे दत्तात्रेयसहस्रनाम सम्पूर्णम् ॥ श्रीकृष्णाय नमः । सम्वत् १९३६ ।

विषयः । दत्तात्रेयस्य भगवतः सहस्रनामकथनम् ॥

No. 95. दत्तात्रेयसहस्रनामस्तोत्रम् . Substance, foolscap paper, 6×4 inches. Folia, 48. Lines, 5 on a page. Extent, 189 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीगुरुदत्तात्रेयाय नमः ।

श्रीपार्व्वत्युवाच ।

देव शङ्कर सर्व्वेश भक्तानामभयप्रद ।

विज्ञप्तिं शृणु मे प्रभो नराणां हितकारिणीम् ॥

श्रीईश्वर उवाच ।

वद प्रिये महाभागे भक्तानुग्रहकारिणि ।

श्रीपार्व्वत्युवाच ।

देवदेवस्य दत्तस्य हृदयं ब्रूहि मे प्रभो ॥ इत्यादि ।

End. तदारभ्य भुवि श्रेष्ठः प्रसिद्धश्चाभवद्गुरुतिः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीमच्छङ्कराचार्य्यविरचितं सम्भावस्थायां दत्तात्रेयोपदेशितं सकलपुराणवेदोक्तप्रपञ्चार्थसारवत्सहस्रनामस्तोत्रं सम्पूर्णम् ॥ लि० नाथुरामेण ।

विषयः । दत्तात्रेयस्य भगवतः सहस्रनामस्तोत्रकथनम् ॥

No. 96. दत्तात्रेयहृदयस्तोत्रम् . Substance, foolscap paper, 6×4 inches. Folia, 10. Lines, 5 on a page. Extent, 42 çlokas. Character, Nāgara. Date, Sm. 1936. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीदत्तात्रेयाय नमः ।

कदाचिच्छङ्कराचार्य्यश्चिन्तयित्वा दिवाकरम् ।

किं साधितं मया लोके पूजया चैव वन्दनैः ॥

बहुकाले गते तस्य दत्तात्रेयो महामुनिः ।
स्वप्ने प्रदर्शयामास स्वर्थरूपमनुत्तमम् ॥ इत्यादि ।

End. गुरुभक्ताय दातव्यमन्यथा न प्रकाशयेत् ।
तव स्नेहाच्च कथितं भक्तिं ज्ञात्वा मया शुभे ॥
दत्तात्रेयस्य कृपया स भवेद्दीर्घमायुकः (?)

Colophon. श्रीरुद्रयामले श्रीशिवपार्व्वतीसम्वादे दत्तहृदयस्तोत्रं सम्पूर्णमस्तु ॥

विषयः । दत्तात्रेयस्य भगवतो हृदयाख्यस्तोत्रकथनम् ।

No. 97. दानसागरविधिः. Substance, palm-leaf, 14×1⅓ inches. Folia, 14. Lines, 3 on a page. Extent, 350 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Vahara, Paṇḍita Tāriṇicaraṇa Vidyābhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ दानसागरविधिः । दानकौमुद्यां । तत्र दान-क्रममाह व्यासः । भूद्वीपान्नमित्यादि ।

End. ताम्बूल-विचित्रोपानद्‌युगल-विचित्रध्वजेन गावमार्ज्जनीवस्त्र । विचित्र-दार्व्वासनाय नमः । इत्यादि वाक्यम् ॥

विषयः । दानसागरप्रयोगादिनिरूपणम् ।

No. 98. दायतत्त्वव्याख्या. Substance, country-made paper, 18×3 inches. Folia, 15. Lines, 6 on a page. Extent, 350 çlokas. Character, Bengali. Date, Sk. 1739. Place of deposit, District Barisāl Mānapāsā, Paṇḍita Mathurānātha Bhaṭṭācāryya. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । तत्त्वं स्वाश्रयप्रतिपादकसम्बन्धेन तादृशस्मृतित्व-साधारणरूपं दायतत्त्वमिति यावत् । ... ... निबध्यन्ते इत्यस्य क्रियन्ते इत्यर्थकत्वे पितृकृतविभागश्च इत्यन्वयापत्तिसामग्रीसत्त्वे चात्मन्येव निश्चय-सम्भवात् ॥ इत्यादि ।

End. दायभागकारोऽपि अस्य पुनरेष विषयो यत्र एकस्य भ्रातुरल्पसंख्यकाः पुत्राः अपरस्य चाल्पसंख्यकास्तत्र पितृतो भागकल्पना इत्याह ॥ * ॥

Colophon. इति दायतत्त्वव्याख्या समाप्ता ॥ शकाब्दाः १७२९ ॥

विषयः । रघुनन्दनकृतस्य दायतत्त्वस्य व्याख्यानम् ।

No. 99. दुर्गार्चाकालनिष्कर्षः. By मधुसूदनवाचस्पतिः. Substance, country-made paper, 12 × 2½ inches. Folia, 6. Lines, 5 on a page. Extent, 75 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna Dhātrīgrāma, Paṇḍita Ṣaṣṭhīdāsa Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गुरवे ।
नत्वा दुर्गां महाभागां सारदार्चां कृपामयीम् ।
तदर्चाकालनिष्कर्षं करोति मधुसूदनः ॥ इत्यादि ।

End. यजमानस्य हिताय पूजां कुर्य्यात् । महागुरुनिपाते तत्र कुर्य्यात् इत्यलं विस्तरेण ॥

Colophon. इति श्रीमधुसूदनवाचस्पतिविरचितो दुर्गार्चाकालनिष्कर्षः समाप्तः ॥ * ॥ ॐ गुरुः ।

विषयः । दुर्गापूजाव्यवस्थादिनिरूपणम् ।

No. 100. दुर्गार्चाकौमुदी वा दुर्गार्चापद्धतिः. By परमानन्दवेदान्तवाचस्पतिः. Substance, country-made paper, 13 × 3 inches. Folia, 31. Lines, 6 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna Dhātrīgrāma, Paṇḍita Ṣaṣṭhidāsa Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । अथ कालिकापुराणोक्तदुर्गापूजाविधिर्लिख्यते ॥ अष्टाद्रश्भुजापक्षे कृष्णनवम्यां बिल्वद्रुचे देव्या बोधनं षोड़शभुजापक्षे कृष्णाचतुर्द्दश्यां बोधनम् ॥ इत्यादि ।

End. नवम्यां दक्षिणादानमुचितं विसर्ज्जनस्य पूजाङ्गत्वादिति साङ्गपूजानन्तरमेवौचित्यात् । विद्यापतिरप्येवं । ततो जलक्रीड़ां कृत्वा मङ्गलमाचरेत् ।
श्रीगोविन्दपदद्वन्द्ववन्दनानन्दनात्मना ।
दुर्गार्चाकौमुदी चक्रे परमानन्दशर्म्मणा ॥

Colophon. इति श्रीमहामहोपाध्यायवेदान्तवाचस्पतिभट्टाचार्य्यकृता कालिकापुराणीय-
दुर्गार्चापद्धतिः समाप्ता ॥ * ॥

विषयः । कालिकापुराणीयदुर्गापूजाविधिस्तत्प्रयोगश्च ।

No. 101. दुर्गार्चामुकुरः. By कालीचरणः. Substance, country-made paper, 18 × 3 inches. Folia, 10. Lines, 9 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna Dhātrigrāma, Paṇḍita Ṣaṣṭhidāsa Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

Beginning. ॐ तत्सत् । अथ दुर्गार्चामुकुरः ।
प्रणम्य दुर्गाचरणं सुचेता
करोति कालीचरणोऽतिभक्तितः ।
तदीय-दुर्गानवमी-दिनार्चन-
व्यवस्थितेर्निर्णयमुत्तमं स्फुटम् ॥
अथ कार्त्तिकशुक्लनवम्यां दुर्गापूजामाह कामाख्यातन्त्रे । इत्यादि ।

End. सदाशिवं पूजयित्वा अन्नपूर्णां प्रपूजयेत् ।
तत आकर्षन्ति इति मन्त्रेण तदितरमूलमन्त्रेण वा होमं कृत्वा शक्त्यदृष्टो-
त्तरशतप्रदक्षिणप्रणामं कृत्वा दक्षिणां दद्यात् ॥

विषयः । अत्र खण्डद्वयमस्ति । प्रथमखण्डे दुर्गार्चामुकुरस्तत्र जगद्धात्रीपूजाकालादि-निरूपणम् । तत्पूजाप्रयोगश्च ॥ द्वितीयखण्डे कालिकार्चामुकुरस्तत्र कालीपूजाकालादिनिरू-पणम् । अन्नपूर्णापूजादिनिरूपणञ्च ॥

No. 102. दुर्गापञ्चाङ्गम्. Substance, country-made paper, 6 × 4 inches. Folia, 98. Lines, 5 on a page. Extent, 500 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः । श्रीदेव्युवाच ।
भगवन् सर्व्वतन्त्रज्ञ साधकानां जयावह ।
यत् पुरा सूचितं देवि दुर्गापञ्चाङ्गमुत्तमम् ॥
तदद्य कृपया ब्रूहि यद्यस्ति मयि ते दया ॥ इत्यादि ।

End. श्रीभैरव उवाच ।

इदं रहस्यं परमं दुर्गासर्व्वस्वमुत्तमम् ।

Colophon. इति श्रीरुद्रयामलतन्त्रे देवीरहस्ये दुर्गास्तोत्रं पञ्चाशत्पटलः ॥ दुर्गापञ्चाङ्गं समाप्तम् ॥

विषयः । १ मे पटले, — दुर्गापूजाविधिः । २ ये पटले, — दुर्गापूजापद्धतिनिरूपणम् । ३ ये पटले, — दुर्गायाः सहस्रनामकथनम् । ४ र्थे पटले, — दुर्गाकवचम् । ५ मे पटले, — दुर्गायाः स्तोत्रम् ॥

No. 103. देवतावादरहस्यम्. Substance, country-made paper, 18×3 inches. Folia, 3. Lines, 3 on a page. Extent, 38 çlokas. Character, Bengali. Date, ? Place of deposit, Mollāigrāma, District 24-Parganas, Paṇḍita Gopālacandra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । देवतावाचक इन्द्रादिपदानामिन्द्राय स्वाहा इत्यादि मन्त्रात्मकचेतन एव शक्तिः ॥ इत्यादि ।

End. शक्तिसम्बन्धेन मन्त्रपदवाच्यस्यैव मन्त्ररूपत्वादिति ।

Colophon. इति देवतावादरहस्यम् ॥ * ॥

विषयः । देवताशब्दविचारः ॥

No. 104. देवीमाहात्म्यव्याख्या. By गोविन्दरामसिद्धान्तवागीशः. Substance, country-made paper, 18×3 inches. Folia, 102. Lines, 7 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Boāil grāma, Babu Yogīndracandra Rāya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो दुर्गायै ।

यत्पादपद्ममभिशं परिवन्द्य भक्त्या
योगीन्द्रवृन्दपरिवन्द्यपदो चरोऽभूत् ।
तस्याः स्तुतेर्टीकेयं प्रकाश्यते
गोविन्दरामेण विपश्चितां मुदे ॥ इत्यादि ।

End. सूर्य्यात् जन्म उत्पत्तिं समासाद्य प्राप्य सावर्णिर्मनुर्भविता । श्लोकमेकं वारद्वयं केचित् पठन्ति तदिद्वाप्रमाणं वचनाभावात् प्राचीनव्यवहारा-भावाच्च ॥ इति देवीमाहात्म्यं समाप्तम् ॥
नागाग्निरेतोनयनारिपृथ्वी १६३८
गते शकाब्दे गिरिजापदाब्जम् ।
गोविन्दरामेण सदा प्रणम्य
व्यकारि चण्डीस्तुतिवृत्तिकेयम् ॥

Colophon. इति श्रीगोविन्दरामसिद्धान्तवागीशभट्टाचार्य्यविरचिता चण्डीस्तुतिव्याख्या समाप्ता ॥ * ॥ श्रीरामः ।

विषय: । मार्कण्डेयपुराणीय-देवीमाहात्म्यव्याख्या ।

No. 105. देवीमाहात्म्यटीका. (तात्पर्य्यकौमुदीनाम्नी) By रघुनाथचक्रवर्त्ती. Substance, country-made paper, 17×1½ inches. Folia, 102. Lines, 3 on a page. Extent, 1,400 çlokas. Character, Bengali. Date, Sk. 1682. Place of deposit, District Ḍhākā, Vikramapura Bahar, Paṇḍita Tāriṇicaraṇa Bidyābhūṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. (अस्य प्रथमपत्रं नास्ति तेन द्वितीयपत्रप्रारम्भवाक्यं लिखितम् ।) देवी भगवती आद्या शक्तिः । यदनुग्रहात् सर्व्वेषां सर्व्वकर्म्मसु शक्त्यधिकयम् ॥ इत्यादि ।

End. एवम्प्रकारेण सुरथः देव्या वरं लब्ध्वा क्षत्रियर्षभः क्षत्रियश्रेष्ठः सूर्य्यात् जन्म-समासाद्य संप्राप्य सावर्णिर्मनुर्भविता सावर्णिर्भवितामनुरिति पुनरावृत्तिः समाप्तिं द्योतयति ।

Colophon. इति वैशाखस्य चतुर्विंशतिदिवसे शनिवारे कृष्णपक्षीयतृतीयायां तिथौ दिवाप्रहरद्वयगते श्रीरघुनाथचक्रवर्त्तिकृतायां तात्पर्य्यकौमुद्यां देवीमाहात्म्य-व्याख्यानं समाप्तम् ॥ * ॥ शुभमस्तु शकाब्दाः १६८२ ॥

विषय: । मार्कण्डेयपुराणीय-देवीमाहात्म्यव्याख्या ।

No. 106. देवीरहस्यम् . Substance, country-made paper, 10 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 120 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātnā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

राजोवाच ।

भगवन्नवतारा मे चण्डिकायास्त्वयोदिता ।

एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तुमर्हसि ॥

ऋषिरुवाच ।

इदं रहस्यं परममनाख्येयं प्रचक्षते ।

भक्तोऽसीति न मे किञ्चित् तवावाच्यं नराधिप ॥ इत्यादि ।

End. व्याख्यानं दिव्यमूर्त्तीनामभीष्टफलदायकम् ।

तस्मात् सर्व्वप्रयत्नेन देवीं जप निरन्तरम् ॥

सप्तजन्मार्जितैर्घोरैर्ब्रह्महत्याशतैरपि ।

पाठमात्रेण मन्त्राणां मुच्यते सर्व्वकिल्बिषैः ॥

देव्या ध्यानं मयाख्यातं गुह्याद्गुह्यतरं महत् ।

तस्मात्सर्व्वप्रयत्नेन सर्व्वकामफलप्रदम् ॥

Colophon. इति श्रीवैकृतिकरहस्यं तन्त्रोक्तं समाप्तम् । शुभम् ।

विषयः । चण्डिकापूजाविधानम् । पूजाकरणे फलातिशय्यकथनञ्च ॥

No. 107. दैवकीनन्दनम् . (ज्योतिर्ग्रन्थः खण्डितः) By दैवकीनन्दनः. Substance, country-made paper, 14 × 3 inches. Folia, 32. Lines, 6 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Kāliganja grāma Dakṣiṇābhāga, Paṇḍita Rakṣākara Nyāyapañcānana. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

श्रीदैवकीनन्दनमादिभूतं,

प्रणम्य विश्वेशमशेषवन्द्यं ।

विधीयते दैवकीनन्दनाख्यं,

दैवज्ञमोदाय हिताय शास्त्रम् ॥

आदौ भास्करमीश्वरं ... ... साचात् सुराणां वरं
विश्वेश्वरं विश्वगतं ... ... ।
नानाशास्त्रमुपास्य भास्करमतञ्चालोक्य वाराचकं,
ज्योतिःशास्त्रमकल्पयन्नवमिदं श्रीदेवकीनन्दनः ॥
बुधानाञ्च विबुद्धीनां बोधाय विबुधोपमं ।
विदधाति महाबुद्धिर्देवज्ञानबुद्धये ॥
यद्यस्ति वाञ्छा झटिति प्रवेष्टुं,
ज्योतिःक्रियायामिह दत्तचित्तं ।
न ज्योतिषे नास्ति विना जगत्यां,
क्रिया हि काचित्तदिदं रधीष्व ॥ (?)
अथ नक्षत्राणि : अश्विनी भरणी कृत्तिका रोहिणी मृगशिरा ... ...
... ... एषामधिष्ठात्री देवता यथा । अश्वि-यम-दहन-कमलज-
शशि-शूलभृत् ... ... ततो राशिनाम ।
मेषवृषमिथुनकर्कटसिंहकन्यातुलावृश्चिकधनुर्मकरकुम्भमीनाः ।

अथ योगाः ।

विष्कुम्भः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ।
अतिगण्डः सुकर्म्मा च धृतिः शूलस्तथैव च ॥
गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ।
वज्रञ्चाहम् व्यतीपातो वरीयान् परिघः शिवः ॥
साध्यः सिद्धः शुभः शक्रो ब्रह्म इन्द्रश्च वैधृतिः ॥ इत्यादि ।

End. अथ नक्षत्रगुणः । प्रियभूषणः शुभदः दक्षोऽश्विन्यां ॥ १ ॥ ... ...
... ...
धनी मधुरवाक् प्रजावान् स्त्रीजितो धार्म्मिकः सुखी जितशत्रुस्तद्धि-
शते ॥ २६ ॥ पूर्णाङ्गः सुभगः शूरः शुचिर्वक्तवाक् पौष्णे ॥ २७ ॥ * ॥

Colophon. इति माण्डव्ये देवकीनन्दने तृतीयोऽध्यायः समाप्तः ॥ * ॥
मीने प्राप्ते रवेरंशे चन्द्रमाने शनेर्दिने ।
समाप्ता पुस्तिका चैषा श्रीरामसुन्दरशर्म्मणा ॥

विषय: । मङ्गलाचरणम् । नक्षत्रकथनम् । नक्षत्राधिष्ठातृदेवताकथनम् । राशि-कथनम् । योगकथनम् । करणकथनम् । वारकथनम् । रव्यादिवाराणां गुणकथनम् । गोच-रादिमुद्राणां गुणदोषकथनम् । एते विषयाः प्रथमाध्याये वर्त्तन्ते । द्वितीयाध्याये तावत्, —

दशाक्रमकथनम् दशाफलकथनम् । षष्टिस्थितिकथनम् । षड्ष्टककथनम् । प्रीतिद्वादश-कथनम् । विवाहे कन्याया गोचरादिग्रहफलकथनम् विवाहे मासदोषकथनम् । राशीनां जातिकथनम् । वर्णनिर्णयश्च । तृतीयाध्याये तु,—गणकथनम् । नवान्नभक्षणविधिः । नूतन-पूपभक्षणविधिः । गर्भधारणक्रमेण जन्मप्रकरणम् । चौरक्रमकथनम् । बालनिष्क्रमणम् । अन्न-प्राशनम् । चूडाकरणम् । कर्णवेधः । विद्यारम्भः । उपनयनम् । वस्त्रालङ्कारधारणम् । देव-प्रतिष्ठाकथनम् । द्रविणाधाननिषेधः । कूपखननम् । अक्रयणीयकथनम् । यात्राप्रकरणम् । वास्तुलक्षणम् । गृहारम्भः । नववध्वागमनम् । रोगविमुक्तिस्नानम् । राशीनां गुणकथनम् । नक्षत्राणां गुणकथनञ्चेति ।

No. 108. धातुगणः. By भीमसेनाचार्य्यः. Substance, palm-leaf, 14×1½ inches. Folia, 16. Lines, 4 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Rājasāhī Baidyabelghariyā, Babu Çaçibhūṣaṇa Cakravarttī. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

स्थानानि धातवः शब्दा वेदशास्त्रप्रयोगिनः ।
व्याहृता मुनिना येन तस्मै पाणिनये नमः ॥
भू सत्तायाम् । इत्यादि ।

End. आदौ च एवं ।
इत्वाविति इविशब्दः मध्येऽपि टुतुखिगति ।
इदेदिति इदिशब्दः एवञ्च मङ्गलं शास्त्रम् ॥ * ॥

Colophon. इति श्रीमाचार्य्यभीमसेनेन प्रणीतो धातुगणः समाप्तः ॥*॥ नमो गणपतये ॥*॥

विषयः। धात्वर्थनिरूपणम् ।

No. 109. धातुप्रबोधः. By कालिदासचक्रवर्त्ती. Substance, country-made paper, 13×3 inches. Folia, 55. Lines, 7 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura, Vidgā, Paṇḍita Īçānacandra Smṛtipañcānana. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।
संसारध्वान्तविध्वंसि चतुर्व्वर्गप्रदं न्दणाम् ।
ईडे ब्रह्मपदाम्भोजमात्मनः कामसिद्धये ॥
धीर-श्रीरामगोविन्दचक्रवर्त्तिमहौजसः ।
जितब्रह्मयशःक्रतेरादेशात् क्रतनिश्चयः ।
वाचस्पतिप्रतिमभूसुरकामदेव
वाचस्पतेस्तनयसद्मनि सन्निविष्टः ।
धातुप्रबोधमसुमन्त्र शिष्यप्रियार्थं
संक्षेपतः प्रकुरुते द्विजकालिदासः ॥
धातवो द्विविधाः प्रोक्ता सकर्म्माकर्म्मभेदतः ॥

End. प्रायशो नोच्यन्ते न प्रदर्श्यन्ते ते च यथाविधानं ज्ञातव्याः ॥

Colophon. इति कालिदासचक्रवर्त्तिकृत-धातुप्रबोधे पञ्चमपरिच्छेदः ॥ * ॥

विषयः । धात्वर्थादिनिरूपणमुखेन तद्रूपादिकथनम् ।

No. 110. धान्याचलादिदानतत्त्वं. Substance, country-made paper, 12 × 3 inches. Folia, 21. Lines, 5 on a page. Extent, 400 çlokas. Character, Bengali. Date, ? Place of deposit, District Mānabhūma Post Office, Raghunāthapura, Nerogrāma, Paṇḍita Veŋkaṭa Varadācāryya Gosvāmī. Appearance, tolerable. Verse. Generally correct.

Beginning. प्रणम्य जगतामीशं ज्ञानकामप्रदं शिवम् ।
धान्याचलादिदानेषु तत्त्वं वक्ष्यामि यत्नतः ।
तदाह मत्स्यपुराणम् ।
महादेवं प्रति देवर्षिप्रश्नः ।
भगवन् श्रोतुमिच्छामि दानमाहात्म्यमुत्तमम् ।
यदक्षयं परे लोके देवर्षिगणपूजितं ॥ इत्यादि ।

End. अत्र दानपूर्व्वोत्तरदिने निवेदनोपवाससङ्कल्पवाक्ययोः परदिने च दान-सङ्कल्पपुण्याहादिवाचनवरणवाक्येषु धान्याचलपदस्थाने शर्कराचलनिवेशात् वाक्यं कुर्य्यात् लक्ष्म्यादिप्रस्थापनशाल्मलघटप्रस्थापनञ्च कर्म्म धान्याचलग्रन्थे-नैव कर्त्तव्यम् ॥ * ॥

Colophon. इति शर्करावलदानम् ॥ * ॥ इति धान्याचलादिप्रमाणप्रयोगौ ॥
श्रीगुरवे नमः ॥

विषयः। धान्याचलादिदानविधिस्तत्प्रयोगादिश्च ।

No. 111. नरजन्मलक्षणम् . By विद्यार्णवः . Substance, palm-leaf, 18 × 2 inches. Folia, 106. Lines, 4 on a page. Extent, 900 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Lohajaṇga Post Office, grāma Ākiyādhala, Paṇḍita Kāçīnātha Tarkālaṇkāra. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमः श्रीगुरवे ।
नत्वा सूर्य्यपदद्वन्द्वं गुरुं त्रिभुवनेश्वरम् ।
वक्ष्ये विद्यार्णवः श्रीमान् नराणां जन्मलक्षणम् ॥ इत्यादि ।

End. ... ...
... ... ।
आयुः श्रियं ददतु यस्य नरस्य कोष्ठीं
शास्त्रं विचार्य्य गणयामि गुरोः प्रसादात् ॥

Colophon. (खण्डितत्वात् शेषो नास्ति) ।

विषयः। कोष्ठीगणनकरणादिनियमः ।

No. 112. नर्म्मदामाहात्म्यम् . (स्कन्दपुराणीय-रेवाखण्डान्तर्गतम्) Substance, country-made paper, 11 × 7 inches. Folia, 424. Lines, 9 on a page. Extent, 5,300 çlokas. Character, Nāgara. Date, Sm. 1938. Place of deposit, Mahārājā's Library, Hātuā. Appearance, tolerable. Verse. Correct.

Beginning. श्री गणेशाय नमः । श्रीसरस्वत्यै नमः । श्रीनर्मदायै नमः ।
मार्कण्डेय उवाच ।
पुराणानाञ्च सर्व्वेषां प्रारम्भे व्यासपूजनम् ।
हिरण्यकर्णमुद्राभ्यां करमुद्रादिसंयुतम् ॥
वस्त्राणि पञ्च देयानि यज्ञसूत्राणि भक्तितः ।
तदन्ते च तथा देया दक्षिणा पुष्कला नृप ॥

युधिष्ठिर उवाच ।
त्यक्त्वा चोत्तरदिग्भागं देवभूमिं मनोहराम् ।
गङ्गा त्रिपथगा देवी यमुना च सरस्वती ॥
गङ्गाद्वारं हिमस्थानं कुब्जाखे ब्रह्मयोनिकम् ।
ओघं कणखलञ्चैव केदारं भैरवं तथा ॥
निमिषञ्च गयातीर्थं कुरुक्षेत्रञ्च पुष्करम् ।
वाराणसीप्रयागञ्च गङ्गासागरसङ्गमम् ॥
कालञ्जरञ्चार्य्यतीर्थं प्रभासं शशिभूषणम् ।
पुण्यान्येतानि तीर्थानि त्यक्त्वा चोचापि सुव्रत ॥
सेव्यते केन कार्य्येण नर्म्मदैव महानदी ।
मार्कण्डेय उवाच ।
शृणु राजन् महाबाहो भ्रातृभिर्ब्राह्मिभिः सह ।
तत्तेऽहं कथयिष्यामि पुराणं स्कन्दकीर्त्तितम् । इत्यादि ।

End. कारुण्यं सर्व्वभूतेषु नर्म्मदाख्यानुचिन्तनम् ।
इदं ज्ञानमिदं ध्यानं ध्येयं कर्म्मात्मबन्धनम् ॥
यज्जपाच्छ्रवणादेव पुनर्जन्म न विद्यते ।

Colophon. हरिः ॐ तत्सदिति श्रीस्कन्दपुराणे रेवाखण्डे नर्म्मदामाहात्म्ये रेवाखण्डकल्प-
कल्पान्तविवरणं नामाध्यायः ॥ ७५ ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥
शुभमस्तु श्रीॐकारेश्वरनर्म्मदोत्तरतटे लेखक केशवजोषी महाराजाधिरा-
जजी तस्य पठनार्थं शुभम् । सम्वत् १९१८ ॥

विषयः। इति स्कन्दपुराणे रेवाखण्डे नर्म्मदामाहात्म्ये आदिकल्पे देव-ऋषिसम्वादे प्रथमोऽध्यायः । इति स्क० पु० नर्म्मदावतारो नाम २ अः । इति स्क० पु० नर्म्मदावतारो नाम ३ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ४ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ५ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ६ अः । इति स्क० पु० नर्म्मदामाहात्म्ये मनुयको (?) नाम ७ अः । इति स्क० पु० नर्म्मदामाहात्म्ये सोमनाथयात्राविधिर्नाम ८ अः । इति स्क० पु० नर्म्मदामाहात्म्ये सोमनाथतीर्थवर्णनं नाम ९ अः । इति स्क० पु० नर्म्मदामाहात्म्ये योगतीर्थादिमाहात्म्यं नाम १० अः । इति स्क० पु० नर्म्मदामाहात्म्ये गाङ्गलेश्वरतीर्थवर्णनं नाम ११ अः । इति स्क० पु० नर्म्मदामाहात्म्ये मत्स्येश्वरतीर्थवर्णनं नाम १२ अः । इति स्क० पु० नर्म्मदामाहात्म्ये कलहंसवर्णनं

नाम १३ अः । इति स्क० पु० नर्म्मदामाहात्म्ये पुरसिद्धेश्वरादिलिङ्गवर्णनं नाम १४ अः । इति स्क० पु० नर्म्मदामाहात्म्ये निषादशिवलोकप्राप्तिर्नाम १५ अः । इति स्क० पु० नर्म्मदामाहात्म्ये नागेश्वरतीर्थवर्णनं नाम १६ अः । इति स्क० पु० नर्म्मदामाहात्म्ये जनकयज्ञो नाम १७ अः । इति स्क० पु० नर्म्मदामाहात्म्ये सप्तसारस्वततीर्थकीर्त्तनं नाम १८ अः । इति स्क० पु० नर्म्मदा-माहात्म्ये १९ अः । इति स्क पु० नर्म्मदामाहात्म्ये २० अः । इति स्क० पु० नर्म्मदामाहात्म्ये कुब्जासङ्गमो नाम २१ अः । इति स्क० पु० नर्म्मदामाहात्म्ये २२ अः ! इति स्क० पु० नर्म्मदा-माहात्म्ये घृतकुल्यामधुकुल्यामाहात्म्ये २३ अः । इति स्क० पु० नर्म्मदामाहात्म्ये कुब्जासङ्गमो नाम २४ अः । इति स्क० पु० नर्म्मदामाहात्म्ये माण्डेश्वरपुराणानुकीर्त्तनं नाम २५ अः । इति स्क० पु० नर्म्मदामाहात्म्ये मण्डलेश्वरकीर्त्तनं नाम २६ अः । इति स्क० पु० नर्म्मदामाहात्म्ये गर्द्दभेश्वरतीर्थ-वर्णनं नाम २७ अः । इति स्क० पु० नर्म्मदामाहात्म्ये गौरीखण्डाख्यानं नाम २८ अः । इति स्क० पु० नर्म्मदामाहात्म्ये २९ अः । इति स्क० पु० नर्म्मदामाहात्म्ये बाणासुरवरप्रदानो नाम ३० अः । इति स्क० पु० नर्म्मदामाहात्म्ये हिरण्यबाहुवरप्रदानो नाम ३१ अः । इति स्क० पु० नर्म्मदामाहात्म्ये पञ्चलिङ्गवर्णनं दीप्तादिऋषिमोचणं नाम ३२ अः । इति स्क० पु० नर्म्मदा-माहात्म्ये ब्राह्मणभार्य्यासिद्धस्वर्गारोहणं चक्रतीर्थवर्णनं सुवर्णपुरहूतमोचणं नाम ३३ अः । इति स्क० पु० नर्म्मदामाहात्म्ये हिमांशुरक्षणार्थं पातालेश्वरवर्णनं नाम ३४ अः । इति स्क० पु० नर्म्मदामाहात्म्ये मान्धातृतीर्थवर्णनं इन्द्रद्युम्नवरप्रदानो नाम ३५ अः । इति स्क० पु० नर्म्मदामाहात्म्ये वैदूर्य्यपर्व्वतवर्णनं नाम ३६ अः । इति स्क० पु० नर्म्मदामाहात्म्ये कपिला-सङ्गमे वरुटक(?)वरप्रदानो नाम ३७ अः । इति स्क० पु० नर्म्मदामाहात्म्ये विश्वरूपाख्यानं नाम ३८ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ३९ अः । इति स्क० पु० नर्म्मदामाहात्म्ये विमलेश्वरकीर्त्तनं बभ्रुभारद्वाजादिऋषीणां सानुग्रहं व्याघ्रेश्वरवर्णनं नाम ४० अः । इति स्क० पु० नर्म्मदामाहात्म्ये पर्व्वतसूत्रवेष्टनमहिमा नाम ४१ अः । इति स्क० पु० नर्म्मदामाहात्म्ये कावेरीसङ्गमो नाम ४२ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ध्वजाविमलारोपणविधिखण्ड-वेगास्वर्गसोपानपद्धतिर्नाम ४३ अः । इति स्क० पु० एरण्डीसङ्गममहिमाकथने निमिनाम राजर्षिमोचणं नाम ४४ अः । इति स्क० पु० नर्म्मदामाहात्म्ये एरण्डीसङ्गमे सूर्य्यसेनवरप्रदानो नाम ४५ अः । इति स्क० पु० नर्म्मदामाहात्म्ये एरण्डीमहिमा ब्रह्मदुर्वासोवरप्रदानो नाम ४६ अः । इति स्क० पु० नर्म्मदामाहात्म्ये भरतवरप्रदानो नाम ४७ अः । इति स्क० पु० नर्म्मदामाहात्म्ये भृगुमाहात्म्यं नाम ४८ अः । इति स्क० पु० नर्म्मदामाहात्म्ये ४९ अः । इति स्क० पु० नर्म्मदामाहात्म्ये कपिलासङ्गमो नाम ५० अः । इति स्क० पु० नर्म्मदामाहात्म्ये कुवलयाश्वस्वर्गारोहणं नाम ५१ अः । इति स्क० पु० नर्म्मदामाहात्म्ये नरकवर्णनं नाम ५२ अः । इति स्क० पु० नर्म्मदामाहात्म्ये नरकाख्या नाम ५३ अः । इति स्क० पु० नर्म्मदामाहात्म्ये

कूर्म्मगतिश्चक्रे (?) नाम ५४ अः। इति स्क० पु० नर्म्मदामाहात्म्ये राजर्षिशशाङ्कहरिश्चन्द्रवरप्रदानो नाम ५५ अः। इति स्क० पु० नर्म्मदामाहात्म्ये गौरीतीर्थादिकीर्त्तनं नाम ५६ अः। इति स्क० पु० नर्म्मदामाहात्म्ये गौरीतीर्थादिकीर्त्तनं नाम ५७ अः। इति स्क० पु० नर्म्मदामाहात्म्ये मातृलोकादिवर्णनं नाम ५८ अः। इति स्क० पु० न० मा० मातृकालोकादिवर्णनं नाम ५९ अः। इति स्क० पु० न० मा० शिवमहिमा नाम ६० अः। इति स्क० पु० न० मा० युवनाश्वसत्यधर्म्मयोराख्यानं नाम ६१ अः। इति स्क० पु० न० मा० शिष्टादि-ऋषि-रन्तिदेवसंवादो नाम ६२ अः। इति स्क० पु० न० मा० रन्तिदेवसंवादो नाम ६३ अः। इति स्क० पु० न० मा० कुब्जामाहात्म्ये ६४ अः। इति स्क० पु० न० मा० कुब्जामाहात्म्ये ६५ अः। इति स्क० पु० न० मा० अगस्त्यप्रत्यागमनो नाम ६६ अः। इति स्क० पु० न० मा० अशोकवनिकावर्णने ६७ अः। इति स्क० पु० न० मा० वागीश्वराख्यानं नाम ६८ अः। इति स्क० पु० न० मा० सप्तसारस्वततीर्थवर्णने ६९ अः। इति स्क० पु० न० मा० वाराहतीर्थवर्णने ७० अः। इति स्क० पु० न० मा० शुक्लतीर्थे रुद्रकीर्त्तने ७१ अः। इति स्क० पु० न० मा० शुक्लतीर्थमहीवर्णने ७२ अः। इति स्क० पु० न० मा० कोकिलाख्यान-विष्णुस्तुतिर्नाम ७३ अः। इति स्क० पु० न० मा० रोहिणीतीर्थवर्णनं ७४ अः। इति स्क० पु० न० मा० भृगुतीर्थवर्णनं नाम ७५ अः। इति स्क० पु० न० मा० रेवासागरसङ्गमे, भुवनेश्वरतीर्थवर्णनं नाम ७६ अः। इति स्क० पु० रेवाखण्डे नर्म्मदामाहात्म्ये रेवासागरसङ्गमे भुवनेश्वरतीर्थवर्णनं नाम ७७ अः। इति स्कन्दपुराणे रेवाखण्डे नर्म्मदामाहात्म्ये रेवाखण्डकल्पकल्पान्तविवरणं नाम ७८ अध्यायः। इति सम्पूर्णम्।

No. 113. नव्यधर्म्मप्रदीपः. By कृपारामः. Substance, country-made paper, 18×4½ inches. Folia, 68. Lines, 11 on a page. Extent, 4,200 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura Post Office Khaḍāra grāma Kurāna, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose and verse. Correct.

Beginning. ॐ कालिकायै नमः।

शोणाधरस्मितसुखेन्दुविलासलक्ष्मीम्
विभ्रन्मनोहर × × × निशमञ्जनाभः।
हृत्पुण्डरीकमधितिष्ठति शाश्वतं यो
भक्तायमानचरणोऽखिलधर्म्मसाक्षी॥
लोलालकः कवलकुञ्चितपाणिकोषः
स्फीताभिरामस्मितपङ्कजलोचनश्रीः।

पायादपायबहुलादिह मां विभूत्यै
गोपीजनाञ्जननिभोऽखिलधर्म्मसाक्षी ॥
क्षिति-जल-शुचि-पवन-द्यो-यजमानेन्दर्कमूर्त्तिर्जयति ।
विश्वं परिरभ्य × × नम ईशायेन्दुमौलये तस्मै ॥
विपुलतनुरतीवनिम्ननाभिः
पलितशिराः करिविन्दुशोषमूर्त्तिः ।
स्मृतिषु नयविदर्थपारदृश्वा
जयति गुरुर्जयरामनामधेयः ॥
वंशाविव पुष्पपक्षौ त्रिलोकचन्द्रः कृष्णचन्द्रः ।
सीमामयस्तवन्नीतीरचरौ नरपतौ जयताम् ॥
तर्कादितन्त्रपरतन्त्रविशुद्धबुद्धि-
रानन्दकन्दभरतेषु विशारदश्च ।
तावेतयोर्विषदकीर्त्तिलतावितान-
च्छायां निषेव्य सुखिनौ सुकवी श्रयाते ॥
तौ प्रीणयन् सुवलिताञ्जलि साधुना वा
(?) घन्नदवासतनयो ह्यथ वंशजन्मा ।
मन्वादिशास्त्रममलीकृतधर्म्मजातं
पूर्व्वैरितो व्यवहृतं समुदीरयामि ॥
वैषद्येन व्यञ्जयंस्तूर्णमर्था-
नल्पारम्भः श्रीकृपारामनाम्ना ।
निर्म्माल्य श्रीकृष्णपादारविन्दे
व्यातेनेऽयं नव्यधर्म्मप्रदीपः ॥
गौड़ाः स्मृतौ साम्प्रतमाद्रियन्ते
प्रायेण नव्यानुमतान् हि धर्म्मान् ।
अतोऽत्र गौड़ादृत एव धर्म्म-
प्रकाशने स्यान्मम पक्षपातः ॥
... ...
... ... ।
विश्वाधारं तं प्रपञ्चादिहेतुं
कालं वक्ष्याम्यर्थतो भेदतश्च ॥

यद्यप्यखण्डानन्दबोधः परमात्मा सर्ग-स्थिति-लय-लीन-सकलाधारः सनातनः शुभाशुभकर्म्मफलदानप्रतिभूरेकः कालोऽखण्डदण्डायमानः सिद्ध एव यथाह ।

विष्णुपुराणम् ।

कालस्वरूपं रूपन्तद्विष्णोर्मैं त्रेय वर्त्तते ।

विष्णुधर्म्मोत्तरम् ।

अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः ।

कलनात् सर्व्वभूतानां स कालः परिकीर्त्तितः ॥ इत्यादि ।

End. अत्र ब्राह्मणवधप्रायश्चित्तमुक्त्वा यस्तैः सह सम्बन्धं कुर्य्यात् तस्यापि प्रायश्चित्तमभिधाय सुमन्तुनोक्तमिति । तेनाततायिवधे नैतत् सूत्रं पूर्व्वोक्तनिषेधकम् । दोषोऽन्यथेति सूत्रन्तु आततायिव्यतिरिक्तवधे दोषप्रतिपादकं गोब्राह्मणात् स्नातः प्रायश्चित्तं कुर्य्यादिति तु प्रायश्चित्ताङ्गस्नानप्रतिपादकं गोहेतुकं स्नानं व्यासेन प्रतिपादितम् । तथाच व्यासः ।

श्रूयन्ते यानि तीर्थानि त्रिषु लोकेषु विश्रुतः ।

अभिषेकः समस्तेषां गवां शृङ्गोदकस्य च ॥

ब्राह्मणशब्देनाच विधिवाच्यमपेक्षितं तद्धेतुकं स्नानं यथाविहिताघमर्षणपूर्व्वकम् । तेन गोहेतुकं स्नातो ब्राह्मणहेतुकं स्नातश्च प्रायश्चित्ताधिकारी भवति नत्वाम्नयममावेषेति वाक्यार्थः ।

Colophon. (अतःपरं खण्डितम्) ।

विषयः । कालनिरूपणम् । धर्म्माधर्म्मोणामादिकारणकथनम् दशविधसंस्कार-तिथ्यादि-और्द्धदेहिक-शुद्धि-श्राद्ध-आह्निकाचार-इष्टापूर्त्तादिसमस्तधर्म्माणां निरूपणम् । स्वर्गापवर्गदधर्म्मनिरूपणम् । राजधर्म्मनिरूपणम् । धर्म्माधर्म्मविवर्त्तनकथनञ्च ॥

No. 114. नारायणार्च्चारत्नमाला By भगवद्गोस्वामी. Substance, country-made paper, 11 × 4 inches. Folia, 46. Lines, 9 on a page. Extent, 1,150 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura Candrakoṇā Mohanta Bharata Rāmānuja Dāsa. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. नारायणं परं धाम नौमि बोधसुखाप्तये ।

यन्नामार्कोदयो हन्ति मायामोहतमस्विनीम् ॥

प्रातः प्रबुध्य गुरुं देवञ्च नमस्कृत्य वक्ष्यमाणोपदेशेनोत्थाय स्वस्तिकाद्यासनेनो· पविश्य ... ब्रह्मरन्ध्रान्तं ज्योतिर्मयं देवं ध्यात्वा .... आवश्यकं निर्वर्त्त्य शौचं दन्तधावनं च कृत्वा मूलमन्त्रेण मुखं प्रक्षाल्याचम्य मन्त्राभिषेकपूतदेहः देवनिर्माल्यमपाकृत्य पुष्पादिना अभ्यर्च्य स्नायात् ॥ इत्यादि ।

End. अथवान्यप्रकारेण पुरश्चरणमुच्यते ।
ग्रहणेऽर्कस्य चेन्दोर्वा शुचिः पूर्व्वमुपोषितः ॥
नद्यां समुद्रगामिन्यां नाभिमात्रे जले स्थितः ।
ग्रासाद्विमोक्षपर्य्यन्तं जपेन्मन्त्रं समाहितः ॥
अनन्तरं तद्दशांशं क्रमाद्धोमादिकं चरेत् ।
तदन्ते मन्त्रसिद्ध्यर्थं गुरुं संपूज्य तोषयेत् ॥
ततश्च मन्त्रसिद्धिः स्यात् देवता च प्रसीदति ।
अथवा देवतारूपं गुरुं भक्त्या प्रतोषयेत् ॥
पुरश्चरणहीनोऽपि मन्त्री सिध्येन्न संशयः ।
एवं साधितमन्त्रस्तु काम्यकर्म्माण्यथाचरेदिति ॥

Colophon. इति श्रीभगवद्गोस्वामिकृता नारायणार्चारत्नमाला समाप्ता ॥ शुभमस्तु ॥

विषयः । प्रातःकृत्यनिरूपणम् । वासुदेवपूजानिरूपणम् । नारायणबीजादिनिरूपणम् । नारायणपूजाविधिः । दशाङ्गाद्युपासनाभेदनिरूपणम् । मन्त्रसिद्धिप्रकारकथनम् । मन्त्रसिद्धौ पुरश्चरणस्यावश्यकताकीर्त्तनम् । पुरश्चरणमकृत्वापि मन्त्रसिद्धिर्भवितीति कथनञ्च ॥

No. 115. नृसिंहपूर्व्वतापनीयोपनिषद्दीपिका. (षट्चक्रोपनिषद्दीपिकासहिता) By नारायणः. Substance, country-made paper, 13×7 inches. Folia, 33. Lines, 12 on a page. Extent, 500 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः । ॐ श्रीगुरवे नमः ।
ॐ नृसिंहतापनी पूर्व्वपक्षोपनिषदुच्यते ।
खण्डानि सप्त चत्वारि चैकं त्रीणि च त्रीणि च ॥
सप्तशाकः परस्परोऽनादिरनन्त इत्युक्तमद्वैतप्रकरणे स च स्वलीलया जगत् तनोति धर्म्माधर्म्मौ चान्योन्यप्रतियोगिनावाक्रयमाणौ राजेव भट्टौ विलोक-

यितुं निर्मिमीते तदधिकारिणश्च स्वमायाकल्पितान्यज्ञानिनो जीवानावि-
ष्करोति तेषु च धर्म्माधर्म्मानुसारेणानुग्रहनिग्रहावातनोति तत्र यदा
केचिदधर्म्माः सज्जनधर्म्माधर्म्मव्यवस्थाभङ्गाय प्रवर्त्तन्ते तान्निग्रहीतुं स्वयमदेहो-
ऽपि देहवान् इवाभाति तदावतीर्ण इत्युच्यते । तेऽप्यवतारा भगवदीच्छा-
नुरोधेन चतुर्विधाः गुणावताराः पूर्णावताराः कल्पावताराः अंशावतारा-
श्चेति तत्र गुणावतारा यथा चतुर्मुख-त्रिनयन-चतुर्भुजादयः ते ह्येकैकं
गुणप्रधानत्वाद्गुणावतारा इत्युच्यन्ते पूर्णावतारा यथा नारसिंह-दाशरथि-
देवकीपुत्रादयः ते हि गुणसाम्येन सकलभागवतैश्वर्य्यपूर्णत्वात् पूर्णावतारा
उच्यन्ते । कल्पावतारा यथा नरनारायण-कपिल-व्यासादयः ते ह्येकैक-
कार्य्यार्थमेकैकमैश्वर्य्यमाविर्भावयन्तः कल्पावतारा इत्युच्यन्ते । अंशावतारा
यथा कार्त्तवीर्य्यार्जुन-नारद-भरत-पाण्डवेयार्जुनप्रभृतयः तेषु ह्यस्ति जीवांशो-
ऽस्ति च पारमेश्वरांशः उभयथा (स्वात्म अपारत्वाभ्यां ?) कार्य्यदर्शनात् तत्र
परं तत्त्वं वेदान्तैकपदेश्यं तद्व्यवस्थाद्वययुक्तं निर्व्यापारञ्च तत्र निर्व्यापारं
निर्गुणं स्वरूपज्ञानेनापवर्गदं सव्यापारं सगुणन्तु स्वानुग्रहेण तेनोभयमपि
ज्ञेयं ध्येयमुपास्यञ्चेति परमकारुणिको वेदः शान्तं रूपमुद्दिश्य सानुग्रहं
तूपदेष्टुं प्रवृत्तः । प्रथमं तावत् मायामात्रोपादानं भौतिकं प्रातिभासिकं
स्वेच्छामयं स्वरूपानतिरिक्तं वस्तुतो गन्धर्वनगरीसमनीश्वरोपितं नारसिंहं
स्वरूपं मन्त्रतोऽर्थतश्च निर्णेतुमारभमाणो जगन्मङ्गलस्य भगवतो भजने प्रत्यू-
हनिरासार्थमाशीरूपमङ्गलमाचरति ॐ भद्रं कर्णेभिः शृणुयाम इत्यादि ।

End. तापनीयोक्तस्तु पञ्चाङ्गन्यासपक्षोऽनेन वा ध्यानेनापि विकल्प्यतेऽधिकफलार्थ-
त्वात् —

नारायणेन रचिता श्रुतिमात्रोपजीविना ।
अस्पष्टपदवाक्यानां षट्चक्रस्य प्रदीपिका ॥

Colophon. इति षट्चक्रोपनिषद्दीपिका समाप्ता ॥

नृसिंहोत्तरतापन्यां त्रिंशं स्युः खण्डका नव ।
अक्षरैः परमं रूपं प्रणवेनात्र गीयते ॥

पूर्व्वतापन्यनुष्टुप् त्रिष्टुप् नापरा उत्तरा प्रणवद्वारा नारसिंहं रूपं निर्णेतु-
मारभ्यते तत्रापि मङ्गलार्थं भद्रमित्यादि शान्तिः शान्तिः शान्तिः पाठः ॥ * ॥

विषयः। नृसिंहपूर्व्वतापनीयोपनिषद्व्याख्यानम् । षट्चक्रोपनिषद्व्याख्यानञ्च ।

No. 116. नैमिषारण्यमाहात्म्यम् (स्कन्दपुराणीयं) । Substance, country-made paper, 8 × 4 inches. Folia, 47. Lines, 9 on a page. Extent, 650 çlokas. Character, Nāgara. Date, Sм. 1908. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः । ॐ नमः पुरुषोत्तमाय ॥
पुरा कृतयुगे चैव ऋषयः शौनकादयः ।
नैमिषारण्यमागत्य तप उग्रं चकार सः ॥ (?)
अयोध्यानगरे रम्ये स्वयम्भुः पृथिवीपते ।
सरोजवदना भार्य्या सत्यरूपा पतिव्रता ।
राज्ञा वशिष्ठमाश्रय ऋषीणां सर्व्वमागता ॥ (?) इत्यादि

End. कृतोपवासो द्वादश्यां ततः पूर्व्वन्तु पारणम् ।
त्रयोदश्यां चतुर्द्दश्यां पौर्णमास्याञ्च या वसेत् ॥
सर्व्वपापविनिर्मुक्ता विष्णुलोकं स गच्छति ॥

Colophon. इति श्रीस्कन्दपुराणे नैमिषारण्यमाहात्म्ये उमामहेश्वरसंवादे मिश्रित-माहात्म्ये पञ्चदशदिनवासः × × × × षोड़शोऽध्यायः ॥ संवत् १९०८

विषयः । १ अध्याये, उमामहेश्वरसंवादेन मूलप्रकृतिनिरूपणम् । २ ये, चक्रतीर्थ-माहात्म्यादिकथनम् । ३ ये, तीर्थयात्राविध्यादिः । ४ र्थे, द्वितीयादिप्रवासफलादिकथनम् । ५ मे, तृतीयादिप्रवासफलकथनम् । ६ ष्ठे, चतुर्थ्यादिप्रवासफलादिकथनम् । ७ मे, षष्ठदिवसादि-प्रवासफलादिकथनम् । ८ मे, सप्तमदिवसादिप्रवासफलादिकथनम् । ९ मे, अष्टमदिवसप्रवास-फलकथनम् । १० मे, नवमदिवसप्रवासफलकथनम् । ११ शे, ब्रह्मावर्त्तमाहात्म्यकथनम् । १२ शे, पुष्करमाहात्म्यकथनम् । १३ शे, हंसचेत्रमाहात्म्यकथनम् । १४ शे, मूलभेदमाहात्म्यकथनम् । १५ शे, शालिनीमाहात्म्यम् । १६ शे मिश्रितमाहात्म्यकथनञ्चेति ॥

No. 117. न्यायदीपिका. By रामकृष्णतर्कावतंसभट्टाचार्य्यः. Substance, country-made paper, 16 × 2½ inches. Folia, 10. Lines, 6 on a page. Extent, 225 çlokas. Character, Bengali. Date, Sк. 1737. Place of deposit, District Medinīpura, Post Office Rādhānagara, Amarapura, Paṇḍita Guruprasanna Vidyāratna. Appearance, tolerable. Prose. Correct.

Beginning. प्रणम्य परमात्मानं सदानन्दं ततो गुरुम् ।
न्यायशास्त्रं करोत्कुर्व्वे ईश्वरज्ञानहेतवे ॥

अथ वागीश्वरं नत्वा आचार्य्यं पितरं तथा ।
तर्कावतंसः श्रीरामकृष्णः × × × दीपिकाम् ॥
तत्र त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः उद्देशो लक्षणं परीक्षा च । उद्देशश्च नाममात्रेण कीर्त्तनम् । लक्षणन्त्वसाधारणो धर्म्मः । लक्षितस्य लक्षणमुपपद्यते नवेति विचारः परीक्षा । भावकार्य्यस्य त्रीणि कारणानि भवन्ति । समवायिकारणं असमवायिकारणं निमित्तकारणञ्च । आद्यं यत्समवेतं कार्य्यमुत्पद्यते तत् । द्वितीयन्तु समवायिकारणप्रत्यासन्नत्वे सति कारणम् । तृतीयन्तु एतदुभयभिन्नकारणम् । इत्यादि ॥

End. अतएव सर्व्वधियां सामर्थ्यमिति । अत्र नैयायिकाः ननु विशिष्टबुद्धिर्विशेषणसाध्या बुद्धित्वात् दण्डीति बुद्धिवत् प्रत्येकज्ञानस्य कारणत्वे उभयवत्तानभिज्ञपरादनुमित्यापत्तेः । वह्निव्याप्यो धूमः आलोकः पर्व्वतवृत्तिरित्यादेः । अतो विशिष्टज्ञानस्यैव कारणत्वं न तु ज्ञानद्वयस्य अतएव ख्यातौ अधिकरणप्रकारकत्वमिति । इति षोड़शपरिच्छेदः ।

Colophon. इति श्रीरामकृष्णतर्कावतंसभट्टाचार्य्यविरचिता न्यायदीपिका समाप्ता । श्रीआनन्दरामदेवशर्म्मणो लिपिरियं पुस्तिका च । शुभमस्तु शकाब्दाः १७२० ।

विषयः । उद्देशलक्षणपरीक्षात्मकत्रिविधशास्त्रप्रवृत्तिनिरूपणम् । समवायिप्रभृतित्रिविधकारणनिरूपणम् । प्रमाणप्रमेयादिषोड़शपदार्थनिरूपणम् । षड़िन्द्रियनिरूपणम् । उपमाननिरूपणम् । शब्दनिरूपणम् । मङ्गलवादः । प्रामाण्यवादश्चेति ॥

No. 118. न्यायसूत्रम् वा न्यायसूत्रोद्धारः. By वाचस्पतिमिश्रः. Substance, country-made paper, 18 × 3½ inches. Folia, 5. Lines, 10 on a page. Extent, 130 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Khaḍāra, Kurāna, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose. Correct.

Beginning. ॐ काली जयति ।
श्रीवाचस्पतिमिश्रेण मिथिलेश्वरसूरिणा ।
लिख्यते मुनिमूर्द्धन्य-श्रीगौतममतं मधत् ॥
प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः । दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः । प्रत्य-

चानुमानोपमानशब्दाः प्रमाणानि । इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यम-
व्यभिचारिव्यभिचारिव्यवसायात्मकं प्रत्यक्षं अथ तत्पूर्व्वकमनुमानं त्रिविधं
पूर्व्ववत् शेषवत् सामान्यतो दृष्टञ्च । इत्यादि ।

End. स्वपक्षे दोषाभ्युपगमात् परपक्षे दोषप्रसङ्गो मतानुज्ञानिग्रहस्थानप्राप्तस्या-
निग्रहः पर्य्यनुयोज्योपेक्षणं अनिग्रहस्थाने निग्रहस्थानानुयोगो निरनुयो-
ज्यानुयोगः । सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्तः । हेत्वा-
भासाश्च यथोक्ताः ।

Colophon. इति सूत्रोद्धारे पञ्चमाध्यायस्य द्वितीयमाह्निकम् । निग्रहस्थानविशेष
लक्षणं नाम समाप्तः पञ्चमाध्यायोऽपि ॥
शिवेनोरसि विधृतौ पादौ नत्वापवर्गदौ ।
व्यलेखि न्यायसूत्राख्यं चैत्रवक्षसिवासरे ॥

विषयः । प्रमाण-प्रमेय-संशय प्रयोजन-दृष्टान्त-अवयव-सिद्धान्त-तर्क-निर्णय-वाद्-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां निःश्रेयसकारणानां निरूपणम् ।

No. 119. न्यासतिलकम् (सटीकम्). By वेङ्कटनाथः. Substance, country-made paper, 12 × 5½ inches. Folia, 17. Lines, 10 on a page. Extent, 400 çlokas. Character, Nāgara. Date, Sм. 1879. Place of deposit, District Medinīpura, Candrakoṇā, Mohanta Bharata Rāmānuja Dāsa. Appearance, new. Verse and prose. Correct.

Beginning. गुरुभ्यस्तद्गुरुभ्यश्च नमोवाकमधीमहे ।
वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥
प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।
स्वतः श्रीरङ्गभर्त्तुर्मामव्याद्भय + + + ॥
अनादेर्निस्सीम्नो दुरितजलधेर्यन्निरुपमं
विदुः प्रायश्चित्तं यदु-रघु-धुरीणाशयविदम् ।
तदारम्भे तस्या गिरमवदधानेन मनसा
प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम् ॥
महेन्द्राग्निविष्णुप्रभृतिषु महत्त्वप्रभृतिवत्
प्रथमव्ये तत्त्वे परिणमितवैमिश्र्यविभवान् ।
अधृष्यत्वं धृत्वा कमितुरधिगम्यत्वजननीं
श्रियं शीतापाङ्गामवसमशरणो यामि शरणम् ॥ इत्यादि ।

टीकायाः प्रारम्भवाक्यम् । श्रीमते ।

श्रीमान् वेङ्कटनाथार्य्यः कवितार्किककेशरी ।

वेदान्ताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि ॥

वाधूल श्रीनिवासार्य्यप्राप्तवेदान्तसम्पदम् ।

लक्ष्मणार्य्यदयापात्रं श्रीनिवासगुरुं भजे ॥ इत्यादि ।

End. आचार्य्याङ्गभुर्य्यद्वयसमधिगमे लब्धसत्त्वं तदात्वे

विश्लिष्टाश्लिष्टपूर्व्वोत्तरदुरितभरं यापितारब्धदेहम् ।

श्रीतं त्वत्कैरवया वा निरवधिकदयोद्भूतबोधादिरूपं

त्वद्भोगैकस्वभोगं दयितमनुचरं त्वत्कृते मां कुरुष्व ॥

विधानं रङ्गेशादधिगतवतो वेङ्कटकवेः

स्फुरद्रत्नं वक्षे परिकलयतां न्यायतिलकम् ।

इहामुत्रापेष प्रणतजनचिन्तामणिगिरिः

सपर्य्यङ्के सेवां दिशति फणिपर्य्यङ्करसिकः ॥ इति ॥

टीकायाः शेषवाक्यम् ।

वेदान्ताचार्य्यपद्यानां भावं को वक्तुमर्हति ।

तथापि तत्कृतिव्याख्यामकार्षं तत्प्रसादतः ॥

श्रीमद्-वेङ्कटनाथार्य्य-करुणापरिणामतः ।

श्रीन्यायतिलकव्याख्या कृता सद्भिर्विशोध्यताम् ॥

वेदान्ताचार्य्यसन्दर्भव्याख्याने कृतसाहसम् ।

क्षमध्वं मां क्षमासारा विदुषामपि दुष्करे ॥

श्रीभाष्यश्रीनिवासेन कौशिकान्वयशोभिना ।

कृतेयं न्यायतिलकव्याख्या भाष्या विचक्षणैः ॥

Colophon. इति श्रीन्यायतिलकव्याख्यानं समाप्तम् । शुभमस्तु श्रीरस्तु । श्रीशुभ-संवत् १८७९ ।

विषयः। श्री-श्रीकृष्ण-रङ्गनाथादिदेवतास्तवः ।

No. 120. पञ्चवटीमाहात्म्यम् . (पद्मपुराणीयम्) . Substance, country-made paper, 12×9 inches. Folia, 49. Lines, 9 on a page. Extent, 800 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीसीतारामचन्द्राय नमः ॥

जटाजीर्णारण्यान्तरगतसरित्तीरनिनदत्-

खगश्रेणीकोलाहलविगतनिद्रा भगवती ।

पिधाय स्त्री कर्णौ स्वपिति तु तदा तत्कुचयुगं

निजानन्दः शम्भुः स्पृशति सुखहेतुर्भवतु नः ॥

जैमिनिरुवाच ।

कलौ युगे पापमयी धरित्री

धर्मो गतः सर्व्वजनात् पृथिव्याः ।

वर्णाश्रमा नैव वसन्ति तस्यां

दिवौकसः क्वापि गता मुनीन्द्राः ॥

तस्मिन् कलियुगे घोरे क्व वस्तव्यं द्विजातिभिः ॥

मार्कण्डेय उवाच ।

साधु साधु महाभाग बुद्धिमानसि वै मुने ।

यत् पृष्टं भवता सर्व्वं तव लोकहिताय च ॥

क्षेत्रं परं पञ्चवटीति नाम्ना

गोदातटे ख्यातिमुपैष्यतीति ।

भुक्तिञ्च मुक्तिं लभतां नराणां

नारायणीयं प्रतिदास्यति यत् ॥ (?)

... ... पुंसां

रामस्य नामस्मरणेन चाच ॥

क्षेत्राणि यानि जगतीतलसंस्थितानि

मुक्तिप्रदानि कथितानि महामुनीन्द्रैः ।

तेषामसौ पञ्चवटी ह्यपाञ्चो

रामस्य पादरजसाधिष्ठिता भवन्ताम् ॥ इत्यादि ।

End. तेषां मुक्तिफलं करस्थितमिति ज्ञेयं बुधैर्निश्चयात् ।

श्रीरामस्य दयानिधेर्यदि कृपा जायेत किं दुर्लभम् ॥

Colophon. इति श्रीपद्मपुराणे नासिकपञ्चवटीमाहात्म्ये महिमवर्णनं नाम एकोनविंशाध्यायः । श्रीसीतारामार्पणमस्तु ।

विषयः । पञ्चवटीनामकस्थानस्य माहात्म्यकीर्त्तनम् ॥

No. 121. पञ्चीकरणवार्त्तिकाभरणम् . Substance, country-made paper, 12×3 inches. Folia, 12. Lines, 10 on a page. Extent, 280 çlokas. Character, Nāgara. Date, ? Place of deposit, Benaras, Gurusvāmi Maṭha. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगुरवे नमः । इह खलु परमेश्वराराधनार्थमनुष्ठितैरित्यादिकर्म्मभिः परिशुद्धान्तःकरणानां अतएव नित्यानित्यवस्तुविवेको इहामुत्रार्थभोगविराग-शमादिसाधनसम्पत्-मुमुक्षुत्वाख्य ... ... ।

End. अवणमननस्यैव निदिध्यासनोऽधिकारादिति ।

Colophon. इति पञ्चीकरणवार्त्तिकाभरणं समाप्तम् ।

विषयः । पञ्चीकरणवार्त्तिकस्य व्याख्यानम् ।

No. 122. पञ्चीकरणविवरणटीका (तत्त्वचन्द्रिका) . Substance, country-made paper, 12×3 inches. Folia, 12. Lines, 9 on a page. Extent, 532 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Gurusvāmi Maṭha. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः परमात्मने श्रीगुरवे ।
यन्नामरूपजगदुद्भवसम्प्रतिष्ठा
संकोचकारणमनिर्व्वचनीयशक्ति ।
सच्चित्सुखाद्वयवपुर्जगतो हिताय
रामाभिधासुपगतं भुवि तं नमामि ॥ इत्यादि ।

End. सीता-सुवर्णलतिका-परिवीतगात्रं
प्रेमरसार्द्रचरणं सुखसुत्पलाद्यम् । (?)
कीर्त्तिप्रसूनपरिशान्ति + सर्व्वलोकं
रामाभिधं जगति कल्पतरुं नमामि ॥

Colophon. इति श्रीपञ्चीकरणविवरणटीका तत्त्वचन्द्रिका नाम परिसमाप्ता । महाशील-महाबुद्धि-श्रीसदाशिवानन्दतीर्थस्वामिपूज्यपादशिष्य-श्रीरामब्रह्मानन्दतीर्थस्येयम् ॥

विषयः । पञ्चीकरणविवरणस्य व्याख्यानम् ।

No. 123. पञ्जीवाक्यप्रबोधः (कातन्त्रस्य, खण्डितः). By नरहरिशर्म्मा
Substance, palm-leaf, 20½ × 1½ inches. Folia, 47. Lines, 4 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Kāligañja, Parganā Bhāyoāl grāma Dakṣiṇa-bhāga, Paṇḍita Rakṣākara Nyāyapañcānana. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ॥ श्रीधातुः ॥

श्रीयुतकृष्णपदाम्बुजयुग्मं मम चित्तमत्तरोलम्बः ।
श्रीमकरन्द ... ... इन्दिराश्रयं विशतु ॥

श्रीधातुः ॥

धातुविभक्तिवर्ज्जमिति, ननु वर्ज्जनं परित्यागः । न हि अर्थवत्तायां धातुविभक्तिपरित्यागः सम्भवति तयोरप्यर्थवत्त्वात् । किन्तर्हि लिङ्गसंज्ञाप्राप्तिकाले, ततश्च निषेधस्य प्राप्तिपूर्व्वकत्वात् अर्थवल्लिङ्गं धातुविभक्तिवर्ज्जमिति निर्द्देशो युज्यते । सत्यं लिङ्गसंज्ञाप्राप्तिदशायां धातुविभक्ती वर्ज्जयिष्यतीति कृत्वा तत्पूर्व्वदशायामपि योग्यतया धातुविभक्तिवर्ज्जमित्युच्यते क्रियायोग्यतयैव कृदन्तप्रयोगात् । यथा अपचन्नपि सूपकारः पाचनयोग्यतया पाचक उच्यते इति केचित् । वर्ज्जनशब्दोऽत्यन्ताभाववचनोऽन्योन्याभाववचनश्च । तत्र नाद्यः धातुविभक्त्योरत्यन्ताभावो धातुविभक्त्योरपि वर्त्तते, ततश्च धातुविभक्त्योरपि लिङ्गसंज्ञा स्यात् वर्ज्जनस्य वैयर्थ्यं स्यात् । द्वितीयस्तु सम्भवत्येव । तथाहि धातुविभक्त्योरन्योन्याभाववद् यदर्थवत्तल्लिङ्गमिति । अत्यन्ताभावोऽपि घटते । तथाहि जातिरेव पदार्थ इति मते धातुविभक्तिशब्देन धातुत्वविभक्तित्वमुच्यते, ततश्च धातुत्वविभक्तित्वात्यन्ताभाववद्यदर्थवत्तल्लिङ्गमिति न दोषः ।

End. अन्ये तु प्रत्ययग्रहणाभावे ककार इति क्रियतां कृतकारग्रहणस्य व्याप्त्यर्थत्वात् सामान्येऽकारे भविष्यतीत्याहु अपरे तु कृद्ग्रहणसामर्थ्यादेव सामान्यककारोपलब्धिः अन्यथा क्रियामाकार इति कृते अक्षयोरनुवर्त्तनात् पुत्रकाम्या इत्यत्र सर्व्वथैव न स्यादिति दिक् ॥

Colophon. इति श्रीनरहरिशर्म्मविरचिते पञ्जीवाक्यप्रबोधे नामप्रकरणे द्वितीयः पादः ॥

विषयः । वादार्थरीतिमाश्रित्य यथासम्भवं त्रिलोचनदासकृत-कातन्त्रवृत्तिपञ्जिकायाः व्याख्यानम् । अश्रुतपूर्व्वोऽयं ग्रन्थः कालापानामतीवोपयोगी । सन्धिप्रकरणस्य तु व्याख्यानमनेन न कृतमित्यनुमीयते ।

No. 124. पदार्थखण्डनटीका. By रुद्रन्यायवाचस्पतिः. Substance, country-made paper, 11×5 inches. Folia, 15. Lines, 8 on a page. Extent, 360 çlokas. Character, Bengali. Date, Sk. 1547. Place of deposit, District Pharidpura, Kotālipāḍā, Unasiyā grāma, Paṇḍita Dvārikānātha Nyāyapañcānana. Appearance, old. Prose. Correct.

Beginning. ॐ नम इत्यादिश्लोकव्याख्या अस्मदीयानुमानदीधितिपरीक्षायां द्रष्टव्या । तत्र तेषु मध्ये दिक्कालौ दिक्कालपदवाच्यौ । इत्यादि ॥

End. तत्तत्प्रकारतातिरिक्तप्रकारतासम्बन्धस्यैव कार्य्यतावच्छेदकत्वात् ।

Colophon. इति रुद्रन्यायवाचस्पतिभट्टाचार्य्यविरचिता पदार्थखण्डनव्याख्या समाप्ता ।

विषयः । रघुनाथशिरोमणिकृतस्य पदार्थखण्डननामकस्य न्यायग्रन्थस्य टीका ।

No. 125. परमहंसपञ्चाङ्गम् (रुद्रयामलीयम्). Substance, country-made paper, 7×4 inches. Folia, 89. Lines, 6 on a page. Extent, 500 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । श्रीभैरव उवाच ।
ॐ त्वत्सेवयास्मि तुष्टोऽहं वरं वरय सुव्रते ।
यत्किञ्चित् प्रार्थसे देवि तत्ते सर्व्वं ददाम्यहम् ॥
श्रीदेव्युवाच ।
सन्तुष्टो देवदेवो मे वरयोग्यास्म्यहं यदि ।
तदा मे ब्रूहि पटलं परमहंसस्य दैवतम् ॥ इत्यादि ।

End. इदं परमतत्त्वं हि सर्व्वभूतस्य पञ्चमम् ।
परमहंसस्य देवस्य स्तवराजं सर्व्वोत्तमम् ॥
सदा गुह्यं सदा गोप्यं गोप्तव्यञ्च सदा प्रिये ।
राज्यं देयं शिरो देवि न देयं मे सदीश्वरि ॥
अभक्तेभ्योऽपि पुत्रेभ्यो दत्त्वा नरकमाप्नुयात् ।
विना शिष्याय नो दद्याद् यस्य कस्यापि कर्हिचित् ॥
दुर्जनेभ्यः सदा गोप्यं गोप्तव्यं सर्व्वथा प्रिये ॥

Colophon. इतिश्रीरुद्रयामले तन्त्रे परमहंसस्तोत्रं समाप्तम् ।

विषयः। परमहंसस्य षड्यामलोक्त-पटल-पद्धति-सहस्रनाम-कवच-स्तोत्रात्मकपञ्चाङ्गस्य कथनम्।

No. 126. पुरश्चरणचन्द्रिका. Substance, country-made paper, 13×4 inches. Folia, 44. Lines, 7 on a page. Extent, 600 çlokas. Character, Bengali. Date, Sk. 1738. Place of deposit, District Ḍhākā, Roāil grāma, Bābu Yogīndra Mohana Rāya. Appearance, fresh. Prose and verse. Generally correct.

Beginning. ॐ नमः शम्भवे।

अथातः संप्रवक्ष्यामि पौरश्चरणिकं विधिम्।
येन विना न सिद्धः स्यान्मन्त्रः कल्पशतैरपि॥
जीवहीनो यथा देही सर्व्वकर्म्मसु चाक्षमः।
पुरश्चरणहीनोऽपि तथा मन्त्रः प्रकीर्त्तितः॥ इत्यादि।

End. श्रोत्रयोर्नेत्रयोश्चापि प्रोक्ता नासा न्यसेच्च पृष्ठके।
अथ कर्पूरयोर्नाभौ मूलविद्यां च विन्यसेत्॥ *॥

Colophon. इति पुरश्चरणचन्द्रिका समाप्ता॥ शाके वसुवह्निमुनीन्दुमे लेखयामास)

विषयः। पुरश्चरणलक्षणादिनिरूपणम्। पुरश्चरणविधिः। नैमित्तिकपुरश्चरणनिरूपणम्। पञ्चपुरश्चरणादिनिरूपणम्। मन्त्रप्रबोधज्ञानादिकथनञ्चेति।

No. 127. पुरश्चरणदीपिका. By चन्द्रशेखरः. Substance, country-made paper, 14×3 inches. Folia, 41. Lines, 6 on a page. Extent, 950 çlokas. Character, Bengali. Date, Sk. 1656. Place of deposit, District Barisāla, Mānapāsā, Paṇḍita Mathurānātha Bhaṭṭācāryya. Appearance, old. Prose. Correct.

Beginning. नमो गणेशाय।

इन्दीवरनिभं श्यामं पुण्डरीकदलेक्षणम्।
गोपीनां हृदयानन्दं तं वन्दे यदुनन्दनम्॥
श्रीचन्द्रशेखरो विप्रः सम्प्रदायक्रमान्वितः।
नानागुरुमतं ज्ञात्वा सद्दृशां मतं शुभम्॥

तनोति सर्व्वमन्त्राणां पुरश्चरणदीपिकाम् ।
धर्म्मार्थकाममोक्षेषु शास्त्रमार्गेषु योजनम् ॥
सिद्धमन्त्रस्य प्रोक्तो हि विनियोगो विचक्षणैः ।
पुरश्चरणपूर्व्वोऽसौ विनियोगो मनोर्मतः ॥ इत्यादि ।

End. ... ... यः कृष्णं पश्यति चक्षुषा ।
जीवन्मुक्तो भवेन्मन्त्री सत्यं सत्यं मयोदितम् ॥
कलिनिमिरहरा निर्म्मिता दीपिकेयम् ।
वर्षे द्वादशसंयुक्ते दशपञ्चशते गते ॥

Colophon. इति चन्द्रशेखरविरचितायां पुरश्चरणदीपिकायां पञ्चमः प्रकाशः समाप्तः ।
समाप्तोऽयं ग्रन्थः ॥ ऋतुवाणतिथौ शाके ... ... ।

विषयः । सर्व्वमन्त्राणां पुरश्चरणविध्यादिः ॥

No. 128. पुरश्चरणोल्लासतन्त्रम्. Substance, country-made paper, 14 × 3 inches. Folia, 7. Lines, 5 on a page. Extent, 125 çlokas. Character, Bengali. Date, ? Place of deposit, District Rājasāhi, Post Office Pākuḍā, Keḍā grāma, Paṇḍita Kālidāsa Ṭhākura. Appearauce, fresh. Verse. Generally correct.

Beginning. श्रीगुरवे नमः । श्रीसुभगा उवाच ।
पूजाश्चैकं महाभाग नारद ब्रह्मनन्दन ।
शिष्यस्त्वं शिवदेवस्य पार्व्वत्याश्च महापते ॥
एकोच्चारणमात्रेण सर्व्वसिद्धीश्वरो भवेत् ।
किं तस्य पुरश्चरणं देव कथं वा क्रियते वद ॥ इत्यादि ।

End. डाकिनीषु न सिद्धेत शाकिनीपुटितं जपेत् ।
तदा सिद्धो भवेद्विप्र नात्र कार्य्या विचारणा ॥

Colophon. इति पुरश्चरणोल्लासतन्त्रे पञ्चमः पटलः ॥ * ॥

विषयः । १ मे पटले नारदसुभगासम्वादमुखेन प्रातःकृत्यादिनिरूपणम् । २ ये चक्राच-धारणफलादिनिरूपणम् । ३ ये वर्णपूजनविध्यादिः । ४ र्थे जपविध्यादिः । ५ मे पुरश्चरणान्ते कर्त्तव्यादिकथनञ्च ।

No. 129. प्रपञ्चसारः. By शङ्कराचार्य्यः. Substance, country-made paper, 8 × 3½ inches. Folia, 2. Lines, 13 on a page. Extent 68 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ अवस्थिते त्वेवं मासात् पक्षात् दिनादपि ।
सूक्ष्मोन्नाड़िकायाश्च क्षणादपि च वर्द्धते ॥
जन्तुः षड़ङ्गी पूर्व्वं स्याच्छिरः पादौ करौ तथा ।
अन्तराधिश्चेति पुनः षड़ङ्गेषु प्रवर्त्तते ॥ इत्यादि ।

End. सोपुत्रवर्ग्गं सुधियोदित नादसङ्गात्
पश्चाग्रदीरयति पंक्तिश एव वर्णान् ।

Colophon. इति श्रीमच्छङ्कराचार्य्यकृते प्रपञ्चसारे द्वितीयः पटलः ॥ * ॥

विषयः । उदरमध्यस्थशिशोरवस्थावर्णनम् ॥

No. 130. प्रपञ्चसारः. Substance, country-made paper, 13 × 6 inches. Folia, 167. Lines, 9 on a page. Extent 2,800 çlokas. Character, Nāgara. Date, ? Place of deposit, Hātuā, Bābu Girīndranātha Datta. Appearance, new. Verse. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः ।

अ क च ट त प याद्यैः सप्तभिर्वर्णवर्गै-
र्विरचितसुखबाह्या पादमध्याख्यरत्ना (?) ।
सकलजगदधीशा शाश्वता विश्वयोनि-
र्वितरतु परिशुद्धिं चेतसः शारदा नः ॥
अथाभवन् ब्रह्महरीश्वराख्याः
पुरा प्रधानात् प्रलयावसाने ।
गुणप्रभिन्ना जगतोऽस्य सृष्टि-
स्थिति-क्षये स्पष्टनिविष्टचेष्टाः ॥
स्वनिष्पत्तिं च कृत्यञ्च ते विचिन्त्य समाविदन् ।
अक्षारमजमव्यक्तमरूपं शायिनं विभुम् ।
सूर्य्याभासेन दुग्धाब्धौ कणमञ्जुसमाकुले (?) ।
मरुत्संघट्टनोत्कीर्णलहरीकणशीतले ॥

उद्यदादित्यकिरणप्रशान्तशिशिरोदये ।
पूर्णचन्द्रकरामर्शप्रतिक्षुब्धजलाशये ॥
अनन्ताभोगे विमले फलायुतविराजिते ।
शायिनं शार्ङ्गिणं शौरिं ... ... ।
तुष्टुवुर्हृष्टमनसो विष्टर ... विभुम् ॥
इति श्रुतो हरिस्तेन सरोजोद्भवयोनिना ।
मूलार्णमर्णविकृतौ विकृते विकृतीरपि ॥ इत्यादि ॥

End. इत्याचारयुतः सम्यगाचार्य्यं यः समर्चयेत् ।
कृतकृत्यः स वै शिष्यः परत्रेह च ... ... ॥
देवान्मुनीनपि पितॄनतिथींस्तथाग्नीन्
नित्योदितेन मनसा ... ... र्चयेद् यः ।
इहानवाप्य सकलानिह भोगजातान्
प्रेत्यापि याति परमं पदमादिपुंसः ॥
यदाश्रया हि प्रकृतिः प्रभावतो
विभिन्ननारादिसमुत्थितो यशः । (?)
अनन्ति पुंस ... रवीन्दुवह्नयो
नमोऽस्तु तस्मै परिपूर्णतेजसे ॥

Colophon. इति श्रीप्रपञ्चसारे षट्त्रिंशत्तमः पटलः ॥ ३६ ॥ समाप्तोऽयं प्रपञ्चसार-ग्रन्थः । शुभम् ।

विषय: । मूलक्रियादीनां प्रकृतिनिरूपणम् । शिरःपादादिभिः षड्भिः पूर्वस्य जन्तो-र्बहिरभ्यन्तरवृत्तिनिरूपणम् । अग्निसोमयोर्भेदतः षोडशसंख्यात्मकवर्णविभागनिरूपणम् । वर्णानां बीजस्वरूपनिरूपणम् । विधिविहितमन्त्राणां दीक्षाविधानम् । दीक्षाग्रहणनियमः । अक्षर-देवतानां नामकीर्तनपुरःसरं प्रवरादिकीर्त्तनम् । प्राणाग्निहोत्रविधानम् । सकलप्रपञ्चमूला-त्मिकायाः प्रकृतेः सजपाभिषेकाङ्कनार्चनाद्यसाङ्गमन्त्रविधानम् । त्रिपुराभिधविद्यानिरूपणम् । सदाङ्गभेदजपार्चनाङ्कनक्रमैः श्रियोमन्त्रविधिः । दुर्गायाः साङ्गजपार्चनाङ्कनविधिः । चतुरक्षर-संज्ञकमन्त्रविधानम् । चन्द्रमन्त्रकथनम् । मन्मथमन्त्रविधिः । अष्टाक्षराख्यमन्त्रविधिः । मास-भेदभिन्नमन्त्रादिविधानम् । श्रीकरनामधेयाष्टाक्षरमन्त्रविधिः । विष्णुपञ्जरनिरूपणम् । दक्षिणा-मूर्त्तिसंज्ञकमन्त्रविधिः । यन्त्रविरचनादिभिर्बहुप्रकारयुतानां मन्त्रविशेषाणां कथनम् । प्राण-प्रतिष्ठानमनोविधानम् । सन्तानयागकथनञ्चेति ।

No. 131. प्रमेयमाला. Substance, country-made paper, 10 × 5 inches. Folia, 13. Lines, 11 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Post Office Andāl Kājoḍā, Paṇḍita Yadunātha Bhaṭṭācāryya. Apprearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमः कृष्णाय । यत्तु भेदमिथ्यात्ववादिभिरुक्तं प्रमाणतः स्वरूपतश्च दुर्निरूपकत्वात् भेदो न सम्भवतीति । इत्यादि ।

End. उदाहृतश्रुतिस्मृतिविरोधात् पूर्व्वव्याख्यातृभिरनुदाहृतत्वाच्च स्वकपोलकल्पितमिति द्रष्टव्यम् । अतश्चतुर्णामपि यतीनां उपवीतमवश्यमन्यार्थ्यमिति सिद्धम् ॥

Colophon. इति प्रमेयमालायां यतिलिङ्गसमर्थने प्रथमः स्कन्धः ॥ ० ०

विषयः । भेददूषणखण्डनम् । भावान्तराभावसमर्थनम् । खण्डवाक्यार्थभङ्गः । त्रिविधवस्तुपरिच्छेदराहित्यम् । सर्व्वशरीरत्वादिकथनम् । यतिलिङ्गसमर्थनञ्चेति ।

No. 132. प्रयोगदर्पणम्. Substance, country-made paper, 12 × 4 inches. Folia, 31. Lines, 11 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, Sk. 1740. Place of deposit, District Mānabhūma, Post Office Raghunāthapura, Vēḍogrāma, Çrī Jagannātha Ācāryya Gosvāmī. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ श्रीहरिः ।

श्रीधरादस्मदाचार्य्यपर्य्यन्तान् प्रणमन् गुरून् ।
प्रयोगदर्पणं कुर्व्वे दृश्यते येन संस्फुटम् ॥
श्रीवैकुण्ठं गमिष्यन्तं पुत्रादयः शङ्खोदेवीः आपो वा इदं द्रुपदादिव आपोहिष्ठा मयोभुवः ऋतञ्चेतिः संस्नाप्य । इत्यादि ।

End. पित्रादीनां मात्रादीनां आब्दिकं प्रत्याब्दिकं वा कृत्वा परेद्युः पित्रादीन् मात्रादींश्च तर्पयेत् । तीर्थश्राद्धे हिरण्यश्राद्धे च श्राद्धात् परं मघात्रये परेद्युः । * । एवं शङ्खमेधादीनां प्रयोगो यथामति सीतारामप्रेरणया कृतस्तस्मादिदं प्रयोगदर्पणं सम्यग्वीक्ष्य अत्रानुक्तद्विरुक्तादीन् धर्म्मशास्त्रप्रवीणाः सन्तः संशोधयन्तु । अनेन भगवान् प्रीतः सीतारामः सीतारामः ॥

Colophon. इति प्रयोगदर्पणे सप्तदशः खण्डः ॥ श्रीहरिः समाप्तश्चायं ग्रन्थः ॥ शकाब्दाः १७४० ॥

विषयः। १ मे खण्डे मुमुर्षुकर्त्तव्यादिनिरूपणम्। २ ये खण्डे प्रायश्चित्तादिनिरूपणम्। ३ ये खण्डे गर्भिण्यादिमरणे कर्त्तव्यविषयनिरूपणम्। ४ र्थे खण्डे ब्रह्ममेधप्रयोगादिः। ५ मे खण्ड प्रेतनिर्हरणप्रायश्चित्तादिनिरूपणम्। ६ ष्ठे खण्डे अनुमरणविशेषादिकथनम्। ७ मे खण्डे अस्थिसञ्चयनश्मशानाग्निनष्टसन्धानादिनिरूपणम्। ८ मे खण्डे दशाहकृत्यादिनिरूपणम्। ९ मे खण्डे एकादशाहकृत्यादिनिरूपणम्। १० मे खण्डे एकोद्दिष्टादिनिरूपणम्। ११ शे खण्डे सपिण्डीकरणादिनिरूपणम्। १२ शे खण्डे सपिण्डीकरणकालादिनिरूपणञ्चेति।

No. 133. प्रश्नप्रदीपः. By काशीनाथः. Substance, country-made paper, 14½×3½ inches. Folia, 14. Lines, 5 on a page. Extent, 200 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Kāligañja *grāma*, Dakṣiṇabhāga, Paṇḍita Rakṣākara Nyāyapañcānana. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमः श्रीसूर्य्याय॥

तिमिराम्बुनिधौ मग्नं करैरुद्धृत्य यो जगत्।
प्रीणयत्यातुरं प्रीत्या तस्मै सर्व्वात्मने नमः॥
मिहिरेऽस्तमुपायाते तम ... धरातले।
प्रश्नगेहे प्रदीपोऽयं काशीनाथकृतो बभौ॥
अवनीपादिकं भावं श्रुभिचयटद्धादिकम्।
विचार्य्यांशं जातकञ्च प्रश्नं ब्रूयाद्विचक्षणः॥
सुतप्रश्ने सुतस्वामी लग्नस्वामी च संस्थितः।
नरराशौ तदा पुत्रः स्त्रीराशौ कन्यकोच्यते॥
समे लग्ने समांशे च शनिः कन्याकरो भवेत्।
विषमे विषमांशे च लग्ने पुत्रः प्रमोदतः॥
१७ १५ ९
जनन्या नाम नक्षत्रं गतमासतिथी पक्षाः।
४
इन्द्रयुक्ताः सप्तभक्ताः पुत्रदोऽर्कौ गुरुः कुजः॥
लग्नस्य त्रिंशतांशेन गतमासा निरूपिताः।
भोग्यांशैर्भोग्यमासैश्च गर्भस्य कल्पयेद्दिनम्॥
५ १
विषमे जीवसूर्य्यौ + पुत्रजन्मकरौ मतौ।

१ २ ३
समे राशौ स्त्रियं कुर्य्युः शुक्र चन्द्रधरासुताः ॥
५ ११
सुते लाभे शुभे नारी गुर्व्विणीति निगद्यते ।
शुभयुक्ते स्थितैः पुत्रे सन्ततेः शुभमादिशेत् ॥
शुक्रसोमौ सुतस्थानं यदि दृष्ट्वा न पश्यतः ।
न जायते तदा पुत्रः पुत्रप्रश्ने निगद्यते ॥ इत्यादि ।

End.

लग्नस्थौ चन्द्रभूपुत्रौ षष्ठस्थौ बुधभार्गवौ ।
निधनस्थो दिननाथस्तदा मन्त्रिवधो भवेत् ॥
तनयस्थ बुधः प्रष्टुः पापैरुदयपुत्रगैः ॥
निधने च निशानाथे भङ्गः सूर्य्यात्मजे स्थितैः ।
सप्तमे निधने चन्द्रे लग्नस्थे च दिवाकरे ॥
विपर्य्यये वा प्रष्टुश्च भवेद्बन्धवधागमः ।
द्वित्रिकेन्द्रस्थितैः पापैः सौम्यैश्च बलवर्जितैः ॥
अष्टमस्थे निशानाथे प्रष्टुर्बन्धे वधेऽथवा ।
१
अर्कार्किसंयुते लग्ने दृष्टे च क्षितिसूनुना ॥
चन्द्रे रविबले सौम्ये प्रष्टुः शिलापतेर्बधः ।
इति जयपराजयप्रश्नः ।
कटुः सूर्य्यः कुजस्तिक्तो नवनिशाकरं मिश्रो ।
बुधो गुरुमिष्टो भार्गवश्चाम्ल उच्यते ॥ (?)
शनिः कषायः केन्द्रो भवेन्नित्यं ग्रहो बली ।
सौम्ये लग्ने रसैर्युक्तो भुक्तः पापैर्न नीरसः ॥
यः पश्यति ग्रहो लग्नं केन्द्रस्थस्तस्य यो रसः ।
स रसः प्रथमो भुक्तः प्रष्टु ... ... ॥
पापलग्ने शुभैर्युक्ते शुभे च पापसंस्थिते ।
यद्वास्तु दैवात् संप्राप्तं प्रष्टा तच्च न भुज्यते ॥
इति भोजनविचारः ॥

Colophon. इति श्रीकाशीनाथकृतौ प्रश्नदीपः समाप्तः ॥

विषयः। मङ्गलाचरणम् । पुत्रप्रश्नः । स्त्रीप्रश्नः । स्त्रीजातकम् । रोगिप्रश्नः । पुरुषज्ञा-

गमनप्रश्नः । गमनागमनप्रश्नः । हृतप्रश्नः । नौकाविचारः । स्त्रीलाभप्रकरणम् । मल्लस्त्राभप्रश्नः । लाभप्रश्नः । पथि विशेषवस्तुदर्शनम् । भोजनविचारश्चेति ।

No. 134. प्रश्नसंग्रहः. By ताजकाचार्य्यः. Substance, country-made paper, 13 × 22 inches. Folia, 46. Lines, 4 on a page. Extent, 1,150 çlokas. Character, Bengali. Date, Sk. 1713. Place of deposit, District Ḍhākā, Post Office Lohajaṇga Ākiyādhala, Paṇḍita Kāçinātha Tarkālaṇkāra. Appearance, old. Verse. Correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।
भास्वन्तं जगदाधारं प्रणम्य विदुषां मुदे ।
कुरुते ताजकाचार्य्यः प्रश्नानां सारसंग्रहम् ॥
परागमनपृच्छायां लग्ने क्रूरग्रहो यदि ।
मार्गे चागच्छतः शत्रोर्भूतुरेव न संशयः ॥ इत्यादि ।

End. पापाः केन्द्रान्त्यविलगाः ।
यत्नात् प्रयत्नतस्त्वाच्या चान्यथैव तु शोभनाः ॥

Colophon. इति प्रश्नसंग्रहः समाप्तः ॥ ० ॥ शकाब्दाः १७१३ ॥

विषयः । प्रश्नगणनादिनिरूपणम् ।

No. 135. प्रस्तावसारसंग्रहः. By श्रीरामशर्म्मा. Substance, country-made paper, 13 × 2 inches. Folia, 76. Lines, 5 on a page. Extent, 1,000 çlokas. Character. Bengali. Date, Sk. 1645. Place of deposit, District Ḍhākā, Post Office Kāligañja grāma, Dakṣiṇabhāgā, Paṇḍita Rakṣākara Nyāyapañcānana. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो वाग्देवतायै ।
उमेशमेशौ सर्व्वेशौ नत्वा श्रीरामशर्म्मणा ।
परिसन्तोषकामार्थं प्रस्तावसारसंग्रहः ॥
वाञ्छा सज्जनसङ्गमे परगुणे प्रीतिर्गुरौ नम्रता,
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खला-
दैते येषु वसन्ति निर्म्मलगुणा स्तेभ्यो नरेभ्यो नमः ॥

तत्रादौ पुत्रप्रसङ्गो यथा ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्म्मिकः ।
काणेन चक्षुषा किं वा चक्षुः पीड़ैव केवलम् ॥ १ ॥
अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ २ ॥
न पठति यदि पुत्रो धर्म्मशीलो न शूरो,
वदति च परितापं शेषमन्नञ्च भुङ्क्ते ।
परगृहचलनशय्याक्लेशितः कर्म्मदुःखी,
स्मरति च पितृवाक्यं वाम्पलोलाकुलाक्षः ॥ ३ ॥
शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्य्यातपो,
नागेन्द्रो निगड़ाङ्कुशेन समदो दण्डेन गोगर्द्दभौ ।
व्याधिर्व्वैद्यकभेषजैर्म्मणिमयैर्म्मन्त्रप्रयोगैर्व्विषं,
सर्व्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम् ॥ ४ ॥
लालयेत् पञ्चवर्षाणि दशवर्षाणि ताड़येत् ।
प्राप्ते तु षोड़शे वर्षे पुत्रं मित्रवदाचरेत् ॥ ५ ॥
... ...
जायमानो हरेज्जायां वर्द्धमानो धनं हरेत् ।
म्रियमाणो हरेत् प्राणान् नास्ति पुत्रसमो रिपुः ॥ ११ ॥

End. राजा मत्तः शिशुश्चैव प्रमदा धनगर्व्विता ।
अप्राप्तमभिवाञ्छन्ति किं पुनर्लभ्यमेव तत् ॥ १६ ॥
वक्ता गुणी शुचिर्दक्षः प्रा ... व्यसनी क्षमी ।
ब्राह्मणः परमर्म्मा च दूतः स्यात् प्रतिभाषवान् ॥ १७ ॥
शतब्दद्यान्न विवदेदिति प्राज्ञस्य लक्षणम् ।
विना हेतुमपि द्वन्द्वः सदा मूर्खस्य लक्षणम् ॥ १८ ॥
महतो दूरभीरुत्वमासन्नेश्वरता गुणः ।
विपत्तौ हि महद्दोषो धीरतामधिगच्छति ॥ १९ ॥

Colophon. इति श्रीरामशर्म्मविरचित-प्रस्तावसारसंग्रहः समाप्तः ॥ श्रीरस्तु शुभमस्तु
शक १६४५ कार्त्तिकस्य चतुर्व्विंशतिदिवसे रविवासरे शुक्लपक्षे दशम्यान्तिथौ
समाप्तोऽयमिति ॥

विषयः । मङ्गलाचरणम् । सज्जनप्रशंसनम् । पुत्रप्रसङ्गः । विद्याप्रसङ्गः । धनप्रसङ्गः । दैवप्रसङ्गः । सुजनप्रसङ्गः । खलप्रसङ्गः । निन्दाप्रसङ्गः । अनभिज्ञप्रसङ्गः । शत्रुप्रसङ्गः । मित्रप्रसङ्गः । आश्रयप्रसङ्गः । भार्य्याप्रसङ्गः । आदरप्रसङ्गः । राजप्रसङ्गः । आशीर्व्वादप्रसङ्गः । धर्म्मप्रसङ्गः । अन्योन्यप्रसङ्गः । गङ्गाप्रसङ्गः । वज्रालुमेन (?) प्रसङ्गः । शिवाप्रसङ्गः । शङ्खप्रसङ्गः । वकपञ्चकम् । नानाप्रसङ्गः । विषमार्थप्रसङ्गः । भिक्षाप्रसङ्गः । राजप्रसङ्गान्तरम् । ग्रन्थेऽस्मिन्नेकैकं प्रसङ्गमवलम्ब्य बहवः श्लोकाः सन्निवेशिताः, ते च नानाग्रन्थेभ्यः संगृहीताः ।

No. 136. **प्रातिशाख्यभाष्यम् .** By **उवटः .** Substance, country-made paper, $8\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 157. Lines, 11 on a page. Extent, 4,290 çlokas. Character, Nāgara. Date, Sm. 1830. Place of deposit, Benares City, Govinda Bhaṭṭa Solāparkāṛa. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः । ॐ ।
सूत्रभाष्यकृतः सर्व्वान् प्रणम्य शिरसा शुचिः ।
शौनकस्य विशेषेण येनेदं पार्षदं कृतम् ॥ इत्यादि ।

End. स्वामिकुमारपुत्रेण सुङ्गलेन तु धीमता ।
कस्मानायेदं द्रव्यं आचे शिष्याय धीमते ॥
चैष्णुभजागतानि यो वेद भक्तितः स स्वर्गलोकं जयति एभिः अथ अमृतत्वं गच्छति इत्याह भगवान् शौनकः ।

Colophon. इति श्रीपार्षदव्याख्यायामानन्दपुरवास्तव्यवज्रटपुत्र उवटकृतौ प्रातिशाख्यभाष्ये अष्टादशं पटलं समाप्तं ॥ सम्वत् १८३० ॥

विषयः । ऋग्वेदप्रातिशाख्यव्याख्या ।

No. 137. **प्रायश्चित्तविवेकव्याख्या . (निगूढार्थप्रकाशिका) .** Substance, country-made paper, 12×3 inches. Folia, 22. Lines, 8 on a page. Extent, 700 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Post Office Aṇḍāl, Kājoḍā, Akhilanātha Nāyek. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ दुर्गायै नमः ।
गोरोचनातिलकमञ्जुलभालदीप्त-
मिन्दीवरोदरसहोदरकान्तिकान्तम् ।

नन्दाङ्गने तत इतः परिधावमानं
सानन्दमीश्वमनिशं हरिमानतोऽस्मि ॥
प्रायश्चित्तविवेकस्य निगूढार्थप्रकाशिका ।
टिप्पनीयं सहृदयै श्रितां हृदये सदा ॥
शास्त्रस्य परार्थतया तत्प्रवृत्त्युपयोगित्वेनाभिधेयप्रयोजने विवक्षुराह
नित्येत्यादि ॥

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । शूलपाणिकृतस्य प्रायश्चित्तविवेकस्य व्याख्यानम् ।

No. 138. प्रेमामृतटीका. By हरिनारायणशर्म्मा. Substance, palm-leaf, 17 × 1$\frac{1}{2}$ inches. Folia, 43. Lines, 4 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vidgā, Paṇḍita Içānacandra Tarkapañcānana. Appearance, old, Prose. Generally correct.

Beginning. ० ० ० ० श्रीहरिनारायणशर्म्मा । तनुते प्रेमामृतस्य टीकां ० ० ० ० इह संसारोद्धारणकारण ० ० ० ० अशेषविघ्नध्वंसपूर्व्वकमिष्टदेवतानमस्कारं कुर्व्वन्नाह यं ब्रह्मेति ॥ इत्यादि ।

End. × × × पिधानव इति नानार्थकेयं मेदिनी ॥ * ॥

Colophon. इति श्रीहरिनारायणशर्म्मविरचितायां प्रेमामृतटीकायां पारखण्डः समाप्तः ॥ ० ॥ अतःपरं खण्डितम् ।

विषयः । प्रेमामृतस्य व्याख्यानम् ।

No. 139. बालविवेकिनी. By नाह्निदत्तः. Substance, country-made paper, 9$\frac{1}{2}$ × 3$\frac{1}{2}$ inches. Folia, 5. Lines, 9 on a page. Extent, 125 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Mohanta Bharata Rāmānuja Dāsa. Appearance, old. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
रेवत्युत्तररोहिणीमृगमघामूलानुराधाकरः
स्वातीषु प्रमदानुलामिथुनके लग्ने विवाहः शुभः ।

मासाः फाल्गुनमाघमार्गशुचयोऽन्येष्टस्तथा माधवः
शस्ताः सौम्यदिनं तथैव तिथयो रिक्ताकुहूवर्जिताः ॥

इति विवाहमुहूर्त्तः ।

पूषा पुष्यपुनर्वसूत्तरहस्तमैत्राश्विहस्तत्रयं
रोहिण्यां श्रवणाद्द्विरागमविधौ मूला धनिष्ठा तथा ।
कुम्भाजालिरविस्थ वर्षमसमं त्यक्त्वा कुजार्कौ तुला
कन्या मत्स्यमीनयुक्तमकरा लग्नानि यात्रातिथिः ॥

इति द्विरागमः ।

मूलादित्रितये करे श्रवणके भाद्रद्वयाद्राद्वये
रेवत्यां च मृगे गुरौ दिनकरे भौमेऽप्यरिक्ते तिथौ ॥

... ...

लग्ने पुंसवनं तथैव शुभदं सीमन्तकर्माष्टमे ॥

इति पुंसवनसीमन्तकर्म ॥ इत्यादि ।

End. जीवे मूलयमार्य्यमानिलमघाश्लेषात्रयं वारुणं
पूषा चाश्व करौ शिवेन्द्रपवना × × त्रयं रोहिणी ।
चित्रा चाश्व शनौ मघा हरियुगं पूर्व्वार्य्यमादित्रयं
... ... प्राग् यामतः शोभनाः ॥
बालानामकर्म्मः केवलः श्लोकादेरिति ?
संगयानि नियमात् श्लोकचतुर्व्विंशति च । (?)
पूर्व्वाचार्य्यकृतान् विलोक्य बहुशो ज्योतिर्निबन्धान् बहून्
नत्वा श्रीपतिपादपद्ममधुपः श्रीनाथदत्तो द्विजः ॥

Colophon. इति श्रीबालविवेकिनी समाप्ता । श्रीरामाय नमः ।

विषयः । विवाहकालनिरूपणम् । द्विरागमनकालनिरूपणम् । पुंसवनसीमन्तोन्नयनकाल-निरूपणम् । निष्क्रमणकालनिरूपणम् । नववस्त्रपरिधान-नवान्नप्राशनयोः कालनिरूपणम् । विद्यारम्भकालनिरूपणम् । प्रथमान्नप्राशनकालनिरूपणम् । कर्णवेधकालनिरूपणम् । बीजवपन-कालनिरूपणम् । गृहप्रवेशकालनिरूपणम् । तडागप्रतिष्ठाकालनिरूपणम् । यात्रायां निषिद्ध-कालनिरूपणम् । माहेन्द्रचषादिकालनिरूपणम् ॥

No. 140. बृहज्जाबालोपनिषत्. Substance, country-made paper, 12 × 5 inches. Folia, 12. Lines, 9 on a page. Extent, 250 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ श्रीमद्विद्याधिष्ठानपरमहंससद्गुरुरामचन्द्राय नमः ॥
यज्ज्ञानाग्निः स्वातिरिक्तभ्रमं भस्म करोति तत् ।
बृहज्जाबालनिगम शिरो-वेद्यमहं महः ॥
भद्रं कर्णेभिरिति शान्तिः ॐ आपो वा इदमासन् सलिलमेव स प्रजापति-
रेकः पुष्करपर्णे समभवत् । इत्यादि ।

End. तद्विप्रासो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत् परमं पदं ॐ सत्यमित्युपनिषत् ॥
अष्टमं ब्राह्मणं ॐ भद्रं कर्णेभिरिति शान्तिः ॐ श्रीमद्विद्याधिष्ठानपरमहंस-
सद्गुरुरामचन्द्रार्पणमस्तु बृहज्जाबालोपनिषत् समाप्ता ॥

विषयः। विभूतियोगादिकथनम् । कालाग्निरुद्रमाहात्म्यादिकथनञ्च ॥

No. 141. बृहदारण्यकभाष्यटीका. By आनन्दज्ञानः. Substance, country-made paper, 12 × 7 inches. Folia, 532. Lines, 7 on a page. Extent, 10,600 çlokas. Character, Nāgara. Date, Sm. 1884. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीगणेशाय नमः ।
यदविद्यावशाद्विश्वं दृश्यते रसवाद्विवत् ।
यद्विद्यया च तद्भाति तं वन्दे पुरुषोत्तमम् ॥ इत्यादि ।

End. गुरवे परपक्षौघध्वान्तध्वंसप्रतिपत्तये । (?)

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्युद्दानन्द-पूज्यपाद-शिष्य-भगवदानन्दज्ञान-कृतायां बृहदारण्यकभाष्यटीकायां अष्टमोऽध्यायः समाप्तः । सम्वत् १८८४ ।

विषयः। बृहदारण्यकशाङ्करभाष्यस्य व्याख्यानम् ।

No. 142. बृहद्गोत्रप्रवरमञ्जरी. By पुरुषोत्तमपण्डितः. Substance, country-made paper, 19×4 inches. Folia, 57. Lines, 6 on a page. Extent, 1,250 çlokas. Character, Nāgara. Date, ? Place of deposit, Calcutta, Syāmapukura, Bābu Nagendranātha Vasu. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
यज्ज्ञं यत्स्थं यदीयं जगदिदमखिलं यन्मयं यत्प्रधानं
यत्प्रमेयं यन्निवासं स्थिरचरहृदयं यन्मुरासं (?) प्रभूतम् ।
यत्क्रीडावस्तुभूतं यदनुभवसुखं यत्स्वरूपानभिज्ञं
यत्स्वापं यत्प्रबोधं यदतिचितमं ब्रह्म तस्मै नमोऽस्तु ॥
... ... ।
तत्तत्प्रोक्तपुराणभारतगताः स्मृत्यन्तरोक्ताश्च ये
ते गोत्रैः प्रवरैश्च पूर्व्वगदितां बध्नाम्यहं मञ्जरीम् ॥
कन्यामूढ्वा सगोत्रप्रवरपुरुषजां मातृवत् दोषदोषैः ।
प्रायश्चित्तादिदोषभाक् स्याज्जनयति च सुतं जातिचाण्डालमस्यां ॥ इत्यादि ।

End. नान्यवर्णो दद्यान्नापुत्राय नाशिष्याय नासम्वत्सरोषिताय सर्व्वेषां पंक्तिपावनानामुपरिष्ठो भवति यः प्रवराध्यायमधीते स चिरजीवी भवति पुण्यवान् भवति यः प्रवराध्यायमधीते ॥

Colophon. इति श्रीपुरुषोत्तमपण्डितविरचितायां गोत्रप्रवरमञ्जर्य्यां मत्स्यप्रवराध्यायपरिसमाप्तिः गोत्रप्रवरकाण्डं समाप्तम् ॥ * ॥

विषयः । प्रथमाध्याये समानगोत्रप्रवर-विवाहदोषादिकथनम् । २ ये विवाहे गोत्रप्रवरवर्ज्जनादिकथनम् । ३ ये प्रवरक्रमादिकथनम् । सर्व्वे सगोत्रा इत्यादिवाक्यानां विचारमुखेन व्याख्यानञ्च । ४ । ५ । ६ । ७ । ८ । ९ मेषु भृगूनां गोत्रप्रवरकाण्डकथनम् । एतत् सर्व्वं वौधायनीय प्रवराध्याये । आपस्तम्बीयप्रवराध्याये । १ मे आपस्तम्बप्रोक्तभृगूनां गोत्रप्रवरादिकथनम् । कात्यायनप्रोक्त भृगूनां प्रवरादिकथनम् । आश्वलायनप्रोक्त भृगूनां प्रवरादिकथनम् । मत्स्यपुराणीय भृगुगोत्रप्रवरादिकथनम् । गौतमगोत्रप्रवरादिकथनम् । आपस्तम्बायुक्त गौतमभरद्वाजादिगोत्रप्रवरादिकथनञ्च ॥

No. 143. ब्रह्मसूत्रभाष्यम्. By विज्ञानभिक्षुः. Substance, country-made paper, 8×3 inches. Folia, 198. Lines, 7 on a page. Extent, 2,376 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Damanācāryya Çāstri. Appearance, old. Prose. Correct.

Beginning. ॐ नमो नारायणाय ।
सर्व्वंच यो यत्र सर्व्वं यस्य सर्व्वमतो भजेत् ।
वेदवित्रश्नये तस्मै नमश्चिन्मात्ररूपिणे ॥
गुरुदिष्टज्ञान + × + विज्ञानभिक्षुणा ।
ब्रह्मसूत्र ऋजुव्याख्या क्रियते गुरुदक्षिणा ॥
श्रुतिस्मृतिन्यायवचः क्षीराब्धिमथनोद्धृतम् ।
ज्ञानामृतगुरोः प्रीत्यै भूदेवेभ्योऽनुदीयते ॥ इत्यादि ।

End. शरीरारम्भकत्वं न सम्भवतीत्याशङ्कायामाह मांसादिभौमं यथाशब्द-
मितरयोश्च ॥

Colophon. इतो नास्ति ।

विषयः । महर्षिवादरायणप्रणीतस्य ब्रह्मसूत्रस्य व्याख्यानम् ।

No. 144. ब्रह्माण्डपुराणम् . Substance, country-made paper, 17×7 inches. Folia, 312. Lines, 11 on a page. Extent, 10,000 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ॥
नमो नमः क्षये सृष्टौ स्थितौ सचेष्टमायया ।
नमो रजस्तमःसत्वत्रिरूपाय स्वयम्भुवे ॥
जितं भगवता तेन हरिणा लोकधारिणा ।
अजेन विश्वरूपेण निर्गुणेन गुणात्मना ॥
ब्रह्माणं लोककर्त्तारं सर्व्वज्ञमपराजितम् ।
प्रभुं भूतभविष्यस्य साम्प्रतस्य च सत्पतिम् ॥ इत्यादि ।

End. सर्व्वाणि यानि तथैव तानि
... विधाद्वेवोपनिषद्यस्य ।
... प्रच्छन्नं अननं जनानां
यश्चात्मकं सत्यलोकप्रतिष्ठम् । (?)
वरं वराणां वरदं महेश्वरं
ब्रह्माणमादिं प्रयतो नमस्ये ॥

Colophon. इति श्रीब्रह्माण्डपुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्माण्डावर्त्तः समाप्तः ॥ * ॥ * ॥

विषयः । इति श्रीब्रह्माण्डपुराणे प्रक्रियापादः प्रथमः अध्यायः । इति श्रीब्र० पु० अनुषङ्गे रुद्रप्रसवः २—४ अः । इति श्रीब्र० पु० महादेवविभूतिः ५, ६ अः । इति श्रीब्र० पु० अनुषङ्गपादे अग्निविक्रमः ७ अः । इति श्रीब्र० पु० व्याससद्भावः ८ अः । इति श्रीब्र० पु० प्रियव्रतवंशानुकीर्त्तनं ९, १० अः । इति श्रीब्र० पु० अनुषङ्गपादे भारतवर्णनं ११, १२ अः । इति श्रीब्र० पु० अनुषङ्गपादे जम्बुवर्णनं १३ अः । ... ... । इति श्रीब्र० पु० षट्पञ्चाशत्तमोऽध्यायः । एषु अध्यायेषु शाकद्वीपादिवर्णनम् । इति श्रीब्र० पु० आदित्यसङ्कीर्त्तनं नाम ५७, ५८ अः । इति श्रीब्र० पु० लिङ्गोत्पत्तिकथनं नाम ५९—६३ अः । इति श्रीब्र० पु० देवदारुवनप्रवेशभस्मस्नानविधिर्नाम ६४ अः । इति श्रीब्र० पु० सांख्यवर्णो नाम ६५, ६६ अः । इति श्रीब्र० पु० यज्ञप्रवर्त्तनो नाम ६७ अः । इति श्रीब्र० पु० अनुषङ्गपादे चतुर्युगाख्यानं नाम ६८, ६९ अः । इति श्रीब्र० पु० ऋषिलक्षणं नाम ७० अः । इति श्रीब्र० पु० अनुषङ्गपादे ऋषिशिष्योत्पत्तिः नाम ७१ अः । इति श्रीब्र० पु० अनुषङ्गपादे पृथिवीदोहनं नाम ७२ अः । इति श्रीब्र० पु० अनुषङ्गपादः द्वितीयः समाप्तः ॥ इति श्रीब्र० पु० उपोद्घाते प्रजापतिवंशानुकीर्त्तनं नाम १, २ अः । इति श्रीब्र० पु० उपोद्घाते मरुदुत्पत्तिः नाम ३—५ अः । इति श्रीब्र० पु० उपोद्घाते दनुवंशकीर्त्तनं नाम ६ अः । इति श्रीब्र० पु० श्राद्धकल्पे शौचविधिः नाम ७—१४ अः । इति श्रीब्र० पु० उपोद्घातपादे ब्राह्मणपरीक्षा नाम १५ अः । इति श्रीब्र० पु० श्राद्धकल्पे दानप्रशंसा नाम १६ अः । इति श्रीब्र० पु० श्राद्धकल्पे तिथिश्राद्धं नाम १७ अः । इति श्रीब्र० पु० नक्षत्रश्राद्धं नाम १८ अः । इति श्रीब्र० पु० उपोद्घातपादे श्राद्धकल्पो नाम १९, २० अः । ... ... । इति श्रीब्र० पु० मध्यभागे ६१ अः । इति श्रीब्र० पु० मध्यभागे वशिष्ठसगरसम्वादे अर्जुनोपाख्याने जामदग्न्यतपश्चरणं नाम ६२ अः । इति श्रीब्र० मध्यभागे अर्जुनोपाख्याने ६३—६७ अः । इति श्रीब्र० पु० मध्यभागे भार्गवचरिते ६८—७९ अः । इति श्रीब्र० पु० भा० च० कार्त्तवीर्य्यवधः नाम ८०—९८ अः । इति श्रीब्र० पु० वायुप्रोक्ते वैवस्वतोत्पत्तिर्नाम ९९ अः । इति श्रीमद्ब्रह्मपुराणे वायुप्रोक्ते वैवस्वतमनुसृष्टिः नाम १०० अः । इति श्रीम० पु० वा० प्रो० गान्धर्व्वमूर्च्छा नाम १०१ अः । इति श्रीम० पु० वा० प्रो० गान्धर्व्वलक्षणं नाम १०२ अः । इति श्रीम० पु० वा० प्रो० इक्ष्वाकुवंशकीर्त्तनं नाम १०३ अः । इति श्रीम० पु० वा० प्रो० मिथिलावंशकीर्त्तनं नाम १०४ अः । इति श्रीम० पु० वा० प्रो० राजवृत्तं नाम १०५ अः । इति श्रीम० पु० वा० प्रो० प्रसवः नाम १०६ अः । इति श्रीम० पु० वा० प्रो० व्यासवृद्धिः नाम १०७ अः । इति श्रीम० पु० वा० प्रो० वृष्णिवंशानुकीर्त्तनं नाम १०८ अः । इति श्रीवायुपुराणे अनुषङ्गपादः १०९ अः । इति श्रीमद्ब्रह्मपुराणे वायुप्रोक्ते शिवप्रकरणं नाम ११० अः । इति श्रीब्रह्माण्डपुराणे वायुप्रोक्ते द्वादशसाहस्र्यां संहितायां ब्रह्माण्डावर्त्तः समाप्तः ॥ * ॥

———

No. 145. भगवदाराधनक्रमः. By श्रीमन्नारायणमुनिः. Substance, country-made paper, $5\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 11. Lines, 6 on a page. Extent, 170 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinipura, Candrakoṇā, Mohanta, Bharata Rāmānuja Dāsa. Appearance, new. Prose and verse. Correct.

Beginning. श्रीमते रामानुजाय नमः। प्रातरारभ्यानुष्ठानक्रमः। प्रातः समुत्थाय पादौ हस्तौ प्रक्षाल्य प्राङ्मुखः स्थित्वा हरिरिति विरचार्य्य गुरुपरम्परा-मनुसन्धाय स्वाचार्य्यं ध्यात्वा अनन्तरम्
सत्सङ्गात् भवनिस्पृहो गुरुमुखात् श्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्म्मसकलं प्रक्षीणकर्म्मान्तरम्।
न्यासादेव निरङ्कुशेश्वरदयानिर्मूलमाया × ×
श्चार्द्दानुग्रहलब्धमध्यमनाडिद्वाराद्बहिर्निर्गतः॥ इत्यादि।

End. संपूज्य भगवते पर्य्यङ्के निवेश्य निवेद्यं मनसा चतुर्भागं परिकल्प्य विष्वक्सेन-अनन्त-गरुड़-सुदर्शनेभ्यः निवेद्यान्नं × × स्वाचार्य्येभ्यश्च निवेद्य × × × शेषं भागवतैः सह भुञ्जीत॥

Colophon. इति श्रीमन्नारायणमुनिकृतं भगवदाराधनक्रमणं सम्पूर्णम्॥

विषयः। भगवत्परायणस्य प्रातरुत्थाय दिनं यावत् कर्त्तव्यकर्म्मनिरूपणम्।

No. 146. भगवद्गीताटीका. (सारार्थवर्षिणी). Substance, foolscap paper, 13×6 inches. Folia, 73. Lines, 14 on a page. Extent, 340 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura Lohajanga, Bābu Mukundalāla Pāla Caudhurī. Appearance, fresh. Prose. Correct.

Beginning. श्रीश्रीराधाकृष्णाभ्यां नमः।
गौरांशुकः सत्कुमुदप्रमोदी स्वाभिख्यया गोस्तमसो निहन्ता।
श्रीकृष्णचैतन्यसुधानिधिर्मे मनोऽधितिष्ठन् स्वरतिं करोतु॥
प्राचीनवाचः सुविचार्य्य सोऽहमज्ञोऽपि गीतामृतलेशलिप्सुः।
यतेः प्रभोरेव मते तदत्र सन्तः क्षमध्वं शरणागतोऽस्मि॥
इह खलु सकलशास्त्राभिमत-श्रीमच्चरणसरोजभजनः स्वयं भगवान्नराकृतिः परब्रह्म श्रीवसुदेवसूनुः स्वसौन्दर्य्यमाधुर्य्यास्वादनया स्वीयप्रेममहाम्बुधौ निमज्जयामास। इत्यादि।

End. भगवतोक्ते सति गाण्डीवपाणिरर्जुनो योद्धुमुदतिष्ठदिति । ... ...
इति श्रीभगवद्गीताटीकायां सारार्थवर्षिणी समाप्तिभूता सतां प्रीतये स्ता-
दिति । सारार्थवर्षिणी विश्वजनीना भक्तचातकान् ।
माधुरी धिनुतादस्या माधुरी भातु मे हृदि ॥ ० ॥

Colophon. इति सारार्थवर्षिण्यां कर्षिण्यां भक्तचेतसां ।
गीतास्वष्टादशोऽध्यायः सङ्गतः सङ्गतः सताम् ॥ ० ॥

विषयः । भगवद्गीताया व्याख्यानम् ।

No. 147. भगवद्गीताव्याख्या (तत्वप्रकाशिका) By केशवकाश्मीरिभट्टः. Substance, country-made paper, $14\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 171. Lines, 12 on a page. Extent, 6,000 çlokas. Character, Nāgara. Date, Sм. 1935. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Correct.

Beginning. श्रीसर्वेश्वरोजयतिराम् ।
यो मायागुणदोषलेशरहितः स्वाभाविकैः सद्गुणैः
स्वानन्त्याखिलविज्ञताद्यगणितैर्युक्तोऽजआदिस्तुतः ।
भक्ताभीष्टप्रदो रमैकरमणो वेदैकगम्यो हि य-
स्तं वन्दे मनसा गिरा च शिरसा गोपीप्रियं श्रीहरिम् ॥
यस्य श्रीकरुणार्णवस्य करुणालेशेन बाल्यो ध्रुवः
स्थेष्टं प्राप्य समार्ग्यधाम समगादङ्क्रोप्यविन्दच्छ्रियम् ।
याता मुक्तिमजामिलादिपतिताः शैलोऽपि पूज्योऽभवत्
तं श्रीमाधवमाश्रितेष्टदमहं नित्यं शरण्यं भजे ॥
श्रुतीनां सूत्राणां स्मृतिनिखिलवेदानुवचसां
परं चार्थं गुप्तं ह्यखिलचिदचिद्भिन्नमपि च ।
अभिन्नं स्वाभाव्याद् × × × परमं ब्रह्मकमिदं
समादिष्टं यैस्तानपि सततमीडे गुरुवरान् ॥
संसाररोगशमने खलु निम्बवन्यो
ह्याद्यधिकारहरणेऽर्कवदेव यश्च ।
श्रीकृष्णपादपरिचारणतुष्टचेताः
निम्बार्कदेशिकवरः सच मे गतिः स्यात् ॥

श्री श्रीनिवासमाचार्य्यं गुरुं श्रीमङ्गलाभिधं ।
प्रणम्य क्रियते गीताव्याख्या तत्त्वप्रकाशिका ॥

अथ स्वभावतोऽपास्ताखिलाऽविद्याक्लेशकर्म्मजन्मादिषड्भाव-सद्वादिगुणकार्य्य-सम्बन्धः सत्यज्ञानानन्दस्वरूपो ज्ञानशक्तिबलैश्वर्य्यतेजोवीर्य्यवात्सल्यौदार्य्य-कारुण्य क्षमा-दया-माधुर्य्य-लावण्यमार्दवाद्यनन्तकल्याण-गुणमहोदधिः समस्त-चेतनप्रकृतिकालकर्म्मनियन्ताऽतिशयसाम्यवर्ज्जितो विष्वक्सेनगरुडादिनित्य-मुक्तैर्निषेवितो ब्रह्मरुद्रेन्द्राद्यचिन्त्यमहिमा तद्वन्द्यो वेदान्तैकवेद्यो जग-ज्जन्मादिहेतुः प्रपन्नार्त्तिहरणस्वभाव उभयविभूतिर्भगवान् श्रीपुरुषोत्तमो ब्रह्मरुद्रादिदेवतावृन्दैः स्वीयाराधनप्रार्थितो भूभारोत्तारणाय यादवकुले आविर्बभूवेति सर्व्वजनप्रसिद्धं भगवदवतारप्रयोजनम् । इत्यादि ।

End. त्यक्त्वा श्रेयस्काम्यया श्रीभगवदाश्रितैर्लब्धविजया × × द्वैः पाण्डवैः सह राज्याद्यर्पणेन सन्धिं विधाय स्वीयानां संरक्षणं कुर्व्विति भावः ।

श्रीकृष्णाय नमः ।

स्वतन्त्रः सर्व्वफलदः सर्व्वोपास्योऽपि यो हरिः ।
कर्त्तृत्वं सर्व्वजीवानां तन्त्रत्वमिति निश्चयात् ॥
श्रेयस्कामो मुमुक्षुर्वा तमेव शरणं व्रजेत् ।
स्वाभिमानं परित्यज्य ह्येतदन्ते दृढीकृतम् ॥
संसाराम्बुधिमग्नानां स्वभक्तकृपया हरिः ।
चकार गीतानावं तं वन्दे सर्व्वगरीयसम् ॥

हंसस्वरूपं शनकादिकेभ्य-
स्तत्त्वोपदेशाय विधाय शुद्धम् ।
तत्त्वं परं भागवतश्च धर्म्मं,
सत्सम्प्रदायार्थमुपादिशद् यः ॥
श्रीवासुदेवो भगवान् स एव,
भक्ताय पार्थाय तु भारतादौ ।
मोक्षापवर्गं शास्त्रमुवाच गीतां
सर्व्वेश्वरं तं शरणं प्रपद्ये ॥
व्याख्यातमादौ तदद्भबोधा-
दाचार्य्यवर्य्येण हरिप्रियेण ।
निम्बार्कनःम्नातिगभीरबोधं
श्रीनारदानुग्रहभाजनेन ॥

तस्माद्चिन्ताप्रतिबुद्धबुद्धिना
भट्टेन श्रीकेशवसंज्ञकेन ।
यदर्थबोधाय तदाश्रितानां
संक्षिप्य चैतद्विहितं सुबोधम् ॥
मङ्गलं श्रीरमाकान्तः सच्चिदानन्दविग्रहः ।
मङ्गलं नियमानन्दो ज्ञानभक्तिप्रदो स्वयाम् ॥

Colophon. इति श्रीसनत्कुमारसन्ततिप्रवर्त्तक—श्रीमन्निम्बार्कसम्प्रदायाश्रित—श्रीकेशव-काश्मीरिभट्टविरचितायां भगवद्गीताटीकायां तत्त्वप्रकाशिकायां सर्व्व-गीतार्थनिर्णयो नामाष्टादशोऽध्यायः । १८ । सम्वत् १९३५ ।

विषयः । निम्बार्कमतेन भगवद्गीताव्याख्यानम् ।

No. 148. भगवद्गीताटीका (सारावली) *By* रामशङ्करः. Substance, country-made paper, 15½×3½ inches. Folia, 82. Lines, 9 on a page. Extent, 400 çlokas. Character, Bengali. Date, Sk. 1745. Place of deposit, District Hugli Khānākula Kṛṣṇanagara, Paṇḍita Bramhanārāyaṇa Bidyālaṇkāra. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ गुरुभ्यो नमः ॐ रामाय नमः ।
श्रीरामपितरौ वन्दं वन्दं श्रीरामशङ्करः ।
श्रीधरस्वामिकृद्गीताव्याख्यां वन्द्यसनोतकि ॥
आज्ञा मे राम वे तुष्टा प्रभावात् तातपादयोः ।
सारावलीविदा गीताव्याख्या तस्याः समो जनः ॥
गीतास्वरूपमादौ यत् तदादौ दर्शितं यथा ।
प्रत्यर्जुनं भगवता यदुक्तं गुह्यमुत्तमम् ॥
तस्यादेशो भवेद् यत्र सा गीता परिकीर्त्तिता ॥
× × × × × ×
इह खलु सकललोकहितावतारः परमकारुणिको भगवान् देवकीनन्दनः तत्त्वज्ञानविज्ञम्भितशोकमोहविभ्रंशितविवेकतया निजधर्म्मत्यागात् परधर्म्माभिसन्धिनमर्जुनं धर्म्मज्ञानरहस्योपदेशप्लवेन तस्माच्छोकमोहसागरादुद्दधार ।

इत्यादि ।

End. यत्रेति यत्र यस्मिन् स्थले योगेश्वरः कृष्णः श्रीकृष्णः यत्र धनुर्धरः पार्थः अर्जुनः तत्र श्रीर्लक्ष्मीः विजयः भूतिरैश्वर्य्यं ध्रुवानि निश्चितानि इति एतानीति मम मतिः । एतेन पाण्डवेभ्यः सर्व्वस्वं दत्त्वा श्रीकृष्णशरणं प्रपद्य त्वदीयानां प्राणरक्षामवश्यं कुरु अन्यथा तेषां विनाशो भविष्यत्येवेति भाव अथवा ध्रुवा निश्चिता नीतिस्तत्रेति मतिर्ममेत्यन्यत् प्रोक्तमिति वाक्यार्थः । :

Colophon. इति गीताव्याख्यायां सारावल्यां अष्टादशोऽध्यायः ॥ समाप्तेयं व्याख्या श्रीसीतारामपदाब्जयुगलेऽर्पितेति समाप्तम् ।
श्रीरामगुरुतातांह्रिस्मृतेः सारावली मम ।
श्रीरामशङ्करस्येयं तदङ्घ्रिद्वयतुष्टये ॥
श्रीधरस्वामिकृद्गीताव्याख्येदानीं सुविस्तृता ।
इति राम सतां मोदा व्याख्यातागमदुत्तरात् ॥
जगद्रामः पिता रामो माता रामो रामोऽहं ।
त्वत्तः समं + + × × ॥
इति स्थानाकुलकृष्णनगराख्यासीनवन्द्यघटीय–श्रीरामशङ्करदेवशर्म्मविरचिता कृता सारावल्याख्या गीताव्याख्या समाप्ता श्रीरामार्पितेति सुधीभिर्द्रष्टव्येति ।
शकाब्दाः १७४५ ।

विषयः । भगवद्गीतायाः श्रीधरस्वामिकृतव्याख्यायाः विस्तृतरूपेण व्याख्यानम् ।

No. 149. भगवद्भक्तिरत्नावली. (सकान्तिमाला) Substance, country-made paper, 11 × 7 inches. Folia, 31. Lines, 11 on a page. Extent, 650 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārāja's Library, Hātuā. Appearance, new. Prose. Correct.

This is the same work as 422, in the Notices of Sanskrit MSS. It contains two verses at the end which give some information about its date and place of composition. From these we learn that the work was composed in Benares in the year 1555 Sk. in a Temple dedicated to Hari in front of the Great Temple of Siva. The verses are:—

महायज्ञशर-प्राण शशाङ्कगुणिते शके
फाल्गुने शुक्लपक्षस्य द्वितीयायां शुभङ्करे ॥

वाराणस्यां महेशस्य सन्निधौ हरिमन्दिरे ।
भक्तिरत्नावली सिद्धा रचिता कान्तिमालया ॥

No. 150. भजनामृतम् . By नरहरिठक्कुरः . Substance, country-made paper, 10 × 3 inches. Folia, 12. Lines, 9 on a page. Extent, 270 çlokas. Character Bengali. Date, Sk. 1813. Place of deposit, District Bardhamāna, Post Office Ukhaḍā, Dakṣiṇākhaṇḍa, Paṇḍita Gauraguṇānanda Ṭhākura. Appearance, fresh. Verse. Correct.

Beginning. श्रीश्रीचैतन्यः ।
वन्दे श्रीकृष्णचैतन्यं प्राणसर्व्वस्वमीश्वरम् ।
सर्व्वावतारकथनानिःक्षोभकरणं विभुम् ॥ इत्यादि ।

End. सेवायां प्रीतिरास्तां मे प्रीतिरास्तिश्च कीर्त्तने ।
स्थिते प्रीतिरास्तां मे प्रीतिश्च भोजनोन्मुखे ।
आत्मनि प्रीतिरास्तां मे कृष्णभक्तिर्यथा भवेत् ॥ ० ॥

Colophon. इति श्रीमन्नरहरि (क?) विमुखोदितं श्रीकृष्णभजनामृतं समाप्तम् ॥
शकाब्दाः १८१३ ।

विषयः । पूर्व्वपक्षसिद्धान्तमुखेन वैष्णवानां श्रीकृष्णभजनादिप्रकारकथनम् ।

No. 151. भविष्यपुराणम् . Substance, country-made paper, 12 × 6 inches. Folia, 877. Lines, 8 on a page. Extent, 21,925 çlokas. Character, Nāgara. Date, Sm. 1936. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. ॐ नमो भगवते वासुदेवाय ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥
शौनकस्य तु राजर्षेः सत्रे चैव महात्मनः ।
आयाता मुनयः सर्व्वे यज्ञमण्डपमुत्तमम् ॥ इत्यादि ।

उत्तरभागस्य । ॐ नमः श्रीगणेशाय । ॐ नमो भगवते वासुदेवाय ।
स्वच्छं चन्द्रावदातं करिकरमकरक्षोभसञ्जातफेनं
... ... ।
... ...
... ... पौष्करं वः पुनातु ॥ इत्यादि ।

End. देवार्थे ब्राह्मणार्थे च यस्तु प्रार्थयते नरः ।
अलमन्नं महावाहो स याति परमं पदम् ॥
... ... ।
एष ते कथितो राजन् प्रतिष्ठाविधिरुत्तमः ॥

उत्तरभागस्य । गात्रे शिरे प्रलेपश्चेद् ... चान्द्रायणं चरेत् ।
मुखनासादिसंस्पर्शे महाचान्द्रायणं चरेत् ॥

Colophon. इति श्रीभविष्यपुराणे नवमीकल्पे शतसाहस्रार्द्धसंहितायां नवमीकल्पः समाप्तः २८१ । सम्वत् १९३६ ।

उत्तरभागस्य । इति श्रीभविष्यपुराणे मध्यमतन्त्रे चतुर्थभागे सुरापानकथने एकादशोऽध्यायः समाप्तः ॥ ११ ॥

विषयः । अध्यायानां पुष्पिकाः । इति भविष्यपुराणे शतसाहस्र्यां संहितायां कथाप्रस्तावने प्रथमोऽध्यायः । इति भ० पु० ब्राह्मे पर्व्वणि २ अः । इति भ० पु० उपनयनविधिः ३ अः । इति भ० पु० स्त्रीलक्षणं ४, ५ अः । इति भ० पु० स्त्रीविषये नरव्रतं ६, ७, ८ अः । इति भ० पु० गृहधर्म्माः ९ अः । इति भ० पु० स्त्रीधर्म्मे १०, ११, १२ अः । इति भ० पु० प्रतिपदाकल्पे १३, १४, १५ अः । इति भ० पु० द्वितीयाकल्पः १६, १७ अः । इति भ० पु० तृतीयाकल्पः समाप्तः १८ अः । इति भ० पु० चतुर्थीकल्पे १९, २० अः । इति भ० पु० चतुर्थीकल्पे पुरुषलक्षणे २१ अः । इति भ० पु० चतुर्थीकल्पे २२, २३ अः । इति भ० पु० पुरुषलक्षणं २४ अः । इति भ० पु० चतुर्थीकल्पे स्त्रीलक्षणं समाप्तं २५ अः । इति भ० पु० ४ र्थीकल्पे गणपतिकल्पः २६ अः । इति भ० पु० ४ र्थीकल्पे २७ अः । इति भ० पु० शिवाचतुर्थी २८ अः । इति भ० पु० शान्ताचतुर्थी २९ अः । इति भ० पु० साहस्रार्द्धसंहितायां वैयासिक्यां ब्राह्मे पर्व्वणि चतुर्थीकल्पे अङ्गारचतुर्थी सुखावहा नाम चतुर्थीकल्पः समाप्तः ३० अः । इति भ० पु० ५ मीकल्पे ३१, ३२, ३३, ३४; ३५, ३६, ३७ अः । इति भ० पु० षष्ठीकल्पे ३८,—४५ अः । इति भ० पु० ७ मीकल्पे शाकसप्तमी ४६ अः । इति भ० पु० ७ मीकल्पे ४७, ४८, ४९ अः । इति भ० पु० ७ मीकल्पे रथसप्तमी ५० अः । इति भ० वै० ७ मीकल्पे ब्राह्मे पर्व्वणि ५१,—६८ अः । इति भ० पु० ब्राह्मे पर्व्वणि आदित्यमाहात्म्ये सर्षपसप्तमी ६९ अः । इति भ० पु० ब्राह्मे पर्व्वणि ७ मीकल्पे ब्रह्मप्रोक्तानि नामानि ७० अः । इति भ० पु० ७ मीकल्पे ७१, ७२ अः । इति भ० पु० ७ मीकल्पे मित्राध्यायः ७३ अः । इति भ० पु० ७ मीकल्पे शाम्बोपाख्यानं ७४, ७५, ७६, ७७, ७८, ७९ अः । इति भ० पु० विजयासप्तमी ८० अः । इति भ० पु० ७ मीकल्पे आदित्यवारकल्पे नन्दविधिः ८१ अः । इति भ० पु० आदित्यकल्पे भद्रविधिः ८२ अः । इति भ० पु० आदित्यवारकल्पे सौम्यविधिः ८३ अः । इति

भ० पु० आदित्यवारकल्पे कामदविधिः ८४ अः। इति भ० पु० आदित्यवारकल्पे विजयविधिः ८५ अः। इति भ० पु० आदित्यवारकल्पे जयन्तविधिः ८६ अः। इति भ० पु० आदित्यवारकल्पे प्रवरविधिः ८७ अः। इति भ० पु० आदित्यवारकल्पे आदित्याभिमुखविधिः ८८ अः। इति भ० पु० आदित्यवारकल्पे हृदयविधिः ८९ अः। इति भ० पु० रविवारकल्पे मद्दवश्वविधिः ९० अः। इति भ० पु० आदित्यवारकल्पे महाश्वेतावारविधिः ९१ अः। इति भ० पु० ७ मीमल्पे ९२, ९३, ९४ अः। इति भ० पु० ७ मीकल्पे जपनामेति सप्तमी ९५ अः। इति भ० पु० ७ मीकल्पे अपराजितकल्पः ९६ अः। इति भ० पु० ७ मीक० महाजयासप्तमी ९७ अः। इति भ० पु० ७ मीक० भद्रकल्पः ९८ अः। इति भ० पु० ७ मीकं० नचचेष्टा ९९ अः। इति भ० पु० ७ मीक० १००, १०१ अः। इति भ० पु० ७ मीक० कामदासप्तमी १०२ अः। इति भ० पु० ७ मीक० पापनाशनी सप्तमी १०३ अः। इति भ० पु० ७ मीक० भानुपदद्वयव्रतं १०४ अः। इति भ० पु० ७ मीक० सर्व्वावाप्तिसप्तमी १०५ अः। इति भ० पु० ७ मीक० मार्त्तण्डसप्तमी १०६ अः। इति भ० पु० ७ मीक० अनन्तसप्तमी १०७ अः। इति भ० पु० ७ मीक० अभ्यङ्गसप्तमी १०८ अः। इति भ० पु० ७ मीक० विभयप्रदानं १०९ अः। इति भ० पु० ७ मीक० ११०, १११, ११२ अः। इति भ० पु० ७ मीक० सत्राजितोपाख्याने ११३, ११४ अः। इति भ० पु० ७ मीक० पाद्गोपाख्यानं (?) ११५ अः। इति भ० पु० ७ मीक० दीपमाहात्म्यं ११६ अः। इति भ० पु० ७ मीक० ब्रह्मविष्णुसम्वादः ११७ अः। इति भ० पु० ७ मीक० ११८ अः। इति भ० पु० ७ मीक० आदित्यस्तवः ११९ अः। इति भ० पु० ७ मीक० ब्रह्म-महर्षिसम्वादः १२० अः। इति भ० पु० ७ मीक० प्रवरवर्णनस्य समाप्तं १२१ अः। इति भ० पु० ७ मीक० व्योममाहात्म्यं १२२ अः। इति भ० पु० ७ मीक० १२३ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने १२४ अः। इति भ० पु० ७ मीक० स्तवराजः १२५ अः। इति भ० पु० शाम्बोपाख्याने १२६ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने प्रासादलक्षणं १२७ अः। इति भ० पु० शाम्बोपख्याने दारुपरीक्षा समाप्ता १२८ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने प्रतिमालक्षणं १२९ अः। इति भ० पु० ७ मीक० प्रतिष्ठाकल्पे विश्वरूपाध्यायः १३० अः। इति भ० पु० ७ मीक० सर्पप्रतिष्ठामण्डनविधिः १३१ अः। इति भ० पु० ७ मीक० शाम्बोख्याने सूर्य्यप्रतिमाविधिः १३२ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने सूर्य्यप्रतिष्ठायां १३३ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने प्रतिष्ठाविधिः १३४ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने ध्वजारोहणविधिर्नाम १३५ अः। इति भ० पु० ७ मीक० भोजकानयनो नाम १३६ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने भोजकाख्याने भोजकोत्पत्तौ १३७, १३८ अः। इति भ० पु० ७ मीक० अभ्यङ्गोत्पत्तिः १३९ अः। इति भ० पु० ७ मीक० शाम्बोपाख्याने धूपविधिः १४० अः। इति भ० पु० शाम्बोपाख्याने भोजकोत्पत्तौ १४१ अः। इति भ० पु० ७ मीक० भोजकाख्यानं १४२ अः। इति भ० पु० ७ मीक०

शम्बोपाख्याने १४३ अः। इति भ० पु० ७मीक० शाम्बोपाख्याने भोजकलक्षणं समाप्तं १४४ अः इति भ० पु० ७मीक० शाम्बोपाख्याने १४५, १४६, १४७ अः। इति भ० पु० शतार्द्धसाहस्र्यां संहितायां ब्राह्मे पर्व्वणि समाप्तः सप्तमीकल्पः आदित्यमाहात्म्ये वाचकमाहात्म्ये श्रवणविधिः समाप्तश्च ब्राह्मे पर्व्वणि प्रथमसिति नन्दाकल्पः समाप्तः १४८ अः। इति भ० पु० प्रथमसिति नन्दाकल्पः समाप्तः १४९ अः। इति भ० पु० निषेधविधिः समाप्तः १५० अः। इति भ० पु० अष्टमीकल्पे शिवमाहात्म्ये प्रथमोऽध्यायः १५१ अः। इति भ० पु० ८मीक० महेश्वरमाहात्म्ये प्रतिष्ठाविधाने लिङ्गलक्षणं १५२ अः। इति भ० पु० विष्णुपर्वणि ८मीक० ईश्वरमाहात्म्ये लिङ्गप्रतिष्ठापनविधौ १५३ अः। इति भ० पु० ८मीक० महादेवमाहात्म्ये १५४ अः। इति भ० पु० ८मीक० लिङ्गप्रतिष्ठाविधौ १५५ अः। इति भ० पु० ८मीक० विष्णुपर्वणि लिङ्गलक्षणेषु १५६ अः। इति भ० पु० ८मीक० महादेवमाहात्म्ये लिङ्गार्चनविधौ १५७ अः। इति भ० पु० ८मीक० प्रतिष्ठाविधिः १५८,—१७० अः। इति भ० पु० ८मीक० लिङ्ग-प्रतिष्ठा समाप्ता १७१ अः। इति भ० पु० ८मीक० विष्णुसनत्कुमारसम्वादे १७२, १७३, १७४, १७५, १७६,—१७९ अः। इति भ० पु० ८मीक० अष्टकाष्टमी १८० अः। इति भ० पु० ८मीक० महादेवमाहात्म्ये दाम्पत्यपूजनं १८१ अः। इति भ० पु० ८मीक० विष्णुसनत्कुमार-संवादे १८२, १८३ अः। इति भ० पु० ८मीक० विष्णुकृतं स्तोत्रं १८४ अः। इति भ० पु० ८मीक० शतरुद्रीयं १८५ अः। इति भ० पु० ८मीक० महादेवमाहात्म्ये १८६ अः। इति भ० पु० ८मीक० महादेवरथयात्रायां १८७ अः। इति भ० पु० ८मीक० महादेवरूपव्रतं १८८ अः। इति भ० पु० ८मीक० महाव्रतं १८९ अः। इति भ० पु० ८मीक० १९०, १९१, १९२, १९३ अः। इति भ० पु० ८मीक० पुण्याध्याये १९४ अः। इति भ० पु० ८मीक० १९५ अः। इति भ० पु० ८मीक० महाष्टमी १९६ अः। इति भ० पु० ८मीक० जयन्त्यष्टमी १९७ अः। इति भ० पु० ८मीक० १९८, १९९, २००, २०१ अः। इति भ० पु० ८मीक० विष्णुपर्वणि गौरी-माहात्म्ये २०२ अः। इति भ० पु० ८मीक० २०३ अः। इति भ० पु० ८मीक० विष्णुपर्वणि गौरीविवाहो नाम २०४ अः। इति भ० पु० विष्णुपर्वणि ८मीक० २०५ अः। इति भ० पु० ८मीक० चित्रसेनकृतं स्तोत्रं २०६ अः। इति भ० पु० ८मीक० २०७, २०८, २०९ अः। इति भ० पु० ८मीक० ब्रह्महत्याप्रायश्चित्तेषु २१० अः। इति भ० पु० ८मीक० २११, २१२ अः। इति भ० पु० ८मीक० विष्णुपर्वणि ब्रह्महत्याप्रायश्चित्तं नाम २१३ अः। इति भ० पु० विष्णु-पर्वणि ८मीक० सुरापानप्रायश्चित्तेषु २१४ अः। इति भ० पु० ८मीक० २१५ अः। इति भ० नवमीकल्पे दुर्गामाहात्म्ये २१६, २१७, २१८ अः। इति भ० पु० ९मीक० विष्णुपर्वणि दुर्गामाहात्म्ये भगवतीस्तोत्रं समाप्तं २१९ अः। इति भ० पु० ९मीक० २२० अः। इति भ० पु० ९मीक० विष्णुपर्वणि चण्डिकाराधने २२१ अः। इति भ० पु० ९मीक० चण्डिकास्तवः २२२ अः। इति भ० पु० विष्णुपर्वणि ९मीक० २२३ अः। इति भ० पु० ९मीक०

दुर्गास्नानफलं २२४ अः। इति भ० पु० ९ मीक० दुर्गामाहात्म्ये २२५, २२६, २२७, २२८ २२९, २३० अः। इति भ० पु० ९ मीक० दुर्गामाहात्म्ये उभयनवमी २३१ अः। इति भ० पु० ९ मीक० भगवतीनवमी २३२ अः। इति भ० पु० ९ मीक० रथनवमी २३३ अः। इति भ० पु० ९ मीक० विष्णुकृतं भगवतीस्तोत्रं २३४ अः। इति भ० पु० ९ मीक० २३५, २३६ अः। इति भ० पु० ९ मीक० महानवमी २३७ अः। इति भ० पु० ९ मीक० २३८, २३९ अः। इति भ० पु० ९ मीक० सर्वमङ्गलार्चनविधौ २४० अः। इति भ० पु० ९ मीक० मन्त्रोद्धारः २४१ अः। इति भ० पु० ९ मीक० २४२, २४३, २४४, २४५, २४६ अः। इति भ० पु० ९ मीक० भगवतीयज्ञे २४७ अः। इति भ० पु० ९ मीक० २४८ अः। इति भ० पु० ९ मीक० सिद्धाध्यायः २४९ अः। इति भ० पु० ९ मीक० रक्तवधे २५० अः। इति भ० पु० ९ मीक० २५१ अः। इति भ० पु० ९ मीक० कौजम्भिवधो नाम २५२ अः। इति भ० पु० ९ मीक० कुम्भानुकुम्भवधे २५३ अः। इति भ० पु० ९ मीक० निचकुम्भवधः २५४ अः। इति भ० पु० ९ मीक० कुम्भवाहनवधो नाम २५५ अः। इति भ० पु० ९ मीक० सुकुम्भवधो नाम २५६ अः। इति भ० पु० ९ मीक० २५७ अः। इति भ० पु० घण्टाकर्णवधो नाम २५८ अः। इति भ० पु० ९ मीक० रुद्रधर्म्मवधः २५९ अः। इति भ० पु० मेघनादवधः २६० अः। इति भ० पु० ९ मीक० जम्भासुरवधः २६१ अः। इति भ० पु० ९ मीक० रक्तवधोपाख्याने २६२ अः। इति भ० पु० ९ मीक० रक्तवधः २६३ अः। इति भ० पु० ९ मीक० मण्डलविधिः २६४ अः। इति भ० पु० ९ मीक० मातृमण्डलविधानं नामाध्यायः २६५, २६६, २६७ अः। इति भ० पु० ९ मीक० देव्या नामविधानो नामाध्यायः २६८ अः। इति भ० पु० ९ मीक० रथयात्रा २६९ अः। इति भ० पु० ९ मीक० दुर्गायात्रा समाप्ता २७० अः। इति भ० पु० ९ मीक० २७१, २७२ अः। इति भ० पु० ९ मीक० मन्त्रोद्धारः २७२ अः। इति भ० पु० ९ मीक० २७४ अः। इति भ० पु० शतसाहस्र्यार्द्धसंहितायां आनन्दनवमीकल्पो नामाध्यायः २७५ अः। इति भ० पु० ९ मीकल्पे नन्दिनी नाम नवमी २७६ अः। इति भ० पु० नन्दा नाम नवमीकल्पे नामाध्यायः २७७ अः। इति भ० पु० ९ मीकल्पे नन्दकल्पः २७८ अः। इति भ० पु० ९ मीकल्पे नन्दिनीप्रतिष्ठा २७९ अः। इति भ० पु० महानवमीकल्पः समाप्तः २८० अः। इति भ० पु० ९ मीकल्पे प्रतिष्ठातन्त्रे भूमिपरीक्षाध्यायः २८१ अः। इति भ० पु० ९ मीकल्पे प्रासादलक्षणं २८२ अः। इति भ० पु० ९ मीक० शिलालक्षणं २८३ अः। इति भ० पु० ९ मीक० ब्रह्मणोऽर्च्चालक्षणं २८४ अः। इति भ० पु० ९ मीक० प्रतिमालक्षणं २८५ अः। इति भ० पु० ९ मीक० प्रतिष्ठामन्त्रे अधिवासनविधिः २८६ अः। इति भ० पु० ९ मीक० शतसाहस्र्यार्द्धसंहितायां नवमीकल्पः समाप्तः २८७ अः। शुभमस्तु श्रीसम्वत् १९३६। पूर्व्वभागस्य ॥ ० ॥ इति श्रीभविष्यपुराणे मध्यमतन्त्रे उपरिभागे प्रथमोऽध्यायः। द्वितीयोऽध्यायः इति भ० पु० म० त० उ०

पातालवर्णनो नाम ३ योऽध्यायः । इति भ० पु० म० त० ज्योतिश्चक्रे ४ र्थोऽध्यायः । इति भ० पु० म० त० उ० ५ मोऽध्यायः । इति भ० पु० म० त० उ० गुरुमाहात्म्यकथनं नाम षष्ठोऽध्यायः । इति भ० पु० म० त० उ० पुस्तकादिमानलक्षणो नाम ७ मोऽध्यायः । इति भ० पु० म० त० उ० अष्टमोऽध्यायः । इति भ० पु० म० त० उ० यूपनियमो नाम नवमोऽध्यायः । इति भ० पु० म० त० उ० १०, ११, १२, १३ अः । इति भ० पु० म० त० उ० प्रतिमालक्षणो नाम १४ अः । इति भ० पु० म० त० उ० १५, १६, १७ अः । इति भ० पु० म० त० उ० षोडशोपचारविधौ १८ अः । इति भ० पु० म० त० उ० अग्निनामकथनं नाम १९ अः । इति भ० पु० म० त० उ० द्रव्यपरिभाषो नाम २० अः । इति भ० पु० म० त० उ० दर्वीनिर्णयो नाम २१ अः । इति भ० पु० म० त० उ० २२, २३ । इति भ० पु० म० त० उ० मण्डलकथने २४ अः । इति भ० पु० म० त० उ० मण्डलाध्यायकथने २५ अः । समाप्तोऽयं प्रथमभागः ॥ ० ॥ इति भ० पु० म० त० द्वितीये भागे मूल्यकथनोऽध्यायः १ अः । इति भ० पु० म० त० द्वि० २, ३, ४ अः । इति भ० पु० म० त० द्वि० तिथिखण्डकथनम् ५ अः । इति भ० पु० म० त० द्वि० व्रतादिकथने ६ अः । इति भ० पु० म० त० द्वि० प्रवरकथनं नाम ७ अः । इति भ० पु० म० त० द्वि० वास्तुनिर्णयोनाम ८ अः । इति भ० पु० म० त० द्वि० ९ अः । इति भ० पु० म० त० द्वि० अर्घ्यदानविधौ १० अः । इति भ० पु० म० त० द्वि० ११,—१७ अः । इति भ० पु० म० त० द्वि० मध्यमप्रतिष्ठाविधौ १८,—२२अः । इति भ० पु० म० त० द्वि० क्षुद्रारामप्रतिष्ठाविधौ २३ अः । इति भ० पु० म० त० द्वि० २४ अः । इति भ० पु० म० द्वि० अश्वत्थप्रतिष्ठाविधौ २५ अः । इति भ० पु० म० त० द्वि० वटप्रतिष्ठाविधौ २६ अः । इति भ० पु० म० त० तृतीयभागे १, २, ३, ४ अः । इति भ० पु० म० त० तृ० पुष्पारामप्रतिष्ठाविधौ ५ अः । इति भ० पु० म० त० तृ० ६ अः । इति भ० पु० म० त० तृ० सेतुप्रतिष्ठाविधौ ७ अः । इति भ० पु० म० त० तृ० ८, ९, १० अः । इति भ० पु० म० त० तृ० ग्रहहोमविधौ ११ अः । इति भ० पु० म० त० तृ० १२, १३ अः । इति भ० पु० म० त० तृ० प्रतिष्ठाविधौ १४ अः । इति भ० पु० म० त० तृ० १५ अः । इति भ० पु० म० त० तृ० महालक्ष्मीव्रतप्रतिष्ठाविधौ १६ अः । इति भ० पु० म० त० तृ० एकादशीव्रतप्रतिष्ठाविधौ १७ अः । इति भ० पु० म० त० तृ० पवित्रविधानं नाम १८ । इति भ० पु० म० त० ध्वजारोपणं नाम १९ अः । इति भ० पु० म० त० तृ० कुम्भदानविधौ २० अः । इति भ० पु० म० त० तृ० २१ अः । इति भ० पु० म० त० तृ० प्रासादप्रतिष्ठाविधौ २२ अः । इति भ० पु० म० त० तृ० २३, २४, २५ अः । इति भ० पु० म० त० चतुर्थभागे दानविधौ १ अः । इति भ० पु० म० त० च० २, ३ अः । इति भ० पु० म० त० च० धेनुदानविधौ ४ अः । इति भ० पु० म० त० च० ५, ६ अः । इति भ० पु० म० त० च० प्रायश्चित्तविधौ ७, ८ अः । इति भ० पु० म० त० च० ९, १० अः । इति भ० पु० म० त० च० अः । इति श्रीभविष्यपुराणे मध्यमतन्त्रे चतुर्थभागे सुरापानकथने एकादशोऽध्यायः समाप्तः ।

No. 152. भारतसाविची. By वेदव्यासमुनिः. Substance, country-made paper, 9 × 1¾ inches. Folia, 9. Lines, 4 on a page. Extent, 72 çlokas. Character, Bengali. Date, ? Place of deposit, Tripurā, Parganā Varadākhāta, Post Office Navinagara grāma Nārāyaṇapura, Çrī Candranātha Cakravartti. Appearance, old. Verse. Generally correct.

Beginning. नमः कृष्णाय ॥ धृतराष्ट्र उवाच ।

ब्रूहि सञ्जय यद्वृत्तं युद्धे तेषां महात्मनाम् ।
पाण्डवानां कुरूणाञ्च सम्प्रवृत्ते महाहवे ॥
के तत्र प्रमुखा योधाः के च तत्र महारथाः ।
महाबलाश्च के तत्र कथन्ते विनिपातिताः ॥
भीष्मद्रोणौ कथं भग्नौ कर्णशल्यौ कथं हतौ ।
पुत्रश्च मम मन्दात्मा कथं दुर्य्योधनो हतः ॥
सञ्जय उवाच ।
शृणु राजन् यथा वृत्तं सैनयोरुभयोरपि ।
पाण्डवानां कुरूणाञ्च सम्प्रवृत्ते महाहवे ॥
ये तत्र प्रमुखा योधा ये च तत्र महारथाः ।
महाबलाश्च ये तत्र यथा ये विनिपातिताः ॥
भीष्मद्रोणौ यथा भग्नौ कर्णशल्यौ यथा हतौ ।
पुत्रश्च तव मन्दात्मा यथा दुर्य्योधनो हतः ॥
पाण्डवानां रणे योधाः सर्व्वे विष्णुपराक्रमाः ।
कौरवाणां रणे योधाः सर्व्वे वीरपराक्रमाः ॥
अर्ज्जुनः सात्यकिश्चैव धृष्टद्युम्नो घटोत्कचः ।
नकुलः सहदेवश्च धर्म्मपुत्रो युधिष्ठिरः ॥
भीमसेनो विराटश्च द्रुपदश्चोत्तरस्तथा ।
धृष्टकेतुः शिखण्डी च काशीराजश्च वीर्य्यवान् ॥
सौभद्रो द्रौपदेयाश्च षोडशैते महारथाः ।
... ... ॥
हेमन्ते प्रथमे मासि शुक्लपक्षे त्रयोदशी ।
प्रवृत्तं भारतं युद्धं नक्षत्रे यमदैवते ॥
अर्ज्जुने दूरपातित्वमाचार्य्ये लघुशस्त्रता ।
कर्णे दृढ़प्रहारित्वं भीष्मे सन्ति त्रयो गुणाः ॥

... ... ।
अर्ज्जुनेन हतो भीष्मो माघशुक्लाष्टमीतिथौ ।
नवम्यां वृषसेनस्तु हतो राजा महाबलः ॥
दशम्यामपि सौभद्र एकादश्यां जयद्रथः ।
द्वादश्यां मध्यभागे च हतो वीरो घटोत्कचः ॥
त्रयोदश्यान्तु मध्याह्ने भारद्वाजो निपातितः ।
आकर्णपलितश्यामो वर्षस्याशीतिपञ्च च ॥
रणे पर्य्यटते द्रोणो वृद्धः षोड़शवर्षवत् ।
चतुर्द्दश्यान्तु सन्ध्यायां कर्णो वैकर्त्तनो हतः ॥
सूर्य्यपुत्रो यदा कर्णश्चार्ज्जुनेन निपातितः ।
तद्दैवोर्द्धमिता भूमिरङ्गुली चैकविंशतिः ॥ इत्यादि ।

End. एषा भारतसावित्री व्यासेनोक्ता मनीषिणा ।
नरो भारतसावित्रीं प्रातरुत्थाय यः पठेत् ॥
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ।
संवत्सरकृतं पापं पठनादेव नाशनम् ॥
ब्रह्महा स्वर्णहारी च मातृहा पितृहा तथा ।
पापं प्रक्षिप्य ते यान्ति द्वैपायनवचो यथा ॥ ० ॥

Colophon. इति महाभारते शतसहस्रसंहितायां वैयासिक्यां भारतसावित्री समाप्ता ॥०
श्रीरामः ॥ श्रीकृष्णः ॥ ० ॥

विषयः । महाभारते वर्णितानां विषयाणां सारसंग्रहः ॥

No. 153. **भ्रमरदूतम्.** By रुद्रन्यायवाचस्पतिभट्टाचार्य्यः. Substance, country-made paper, 13 × 2½ inches. Folia, 12. Lines, 6 on a page. Extent 288 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Āḍāihājār, Paṇḍita Candrakānta Vidyālaṅkāra. Appearance, old. Verse. Correct.

Beginning. श्रीरघुवीराय नमः ।
रामः सीताविरहविधुरो माल्यवत्कन्दरासु
पाण्डुश्यामच्छविरविरतं वाष्पसंरोचणान्तः ।
प्रत्याहर्त्तुं मनसि विरुदश्लाघनेयस्य निन्ये
दीर्घोत्कण्ठः कथमपि तदा दीर्घदीर्घाण्यहानि ॥

अन्तश्चिन्ताहुतवहभुजा दूयमानः प्रियाया
नर्मालापस्मरणसुधया सिञ्चितो राघवस्य ।
प्रौढानन्दप्रसरपिशुनो मन्दमन्दं तदानीं
पस्पन्देऽस्य प्रकृतिसुभगो दक्षिणो बाहुदण्डः ॥
दूरात् पश्यन् पवनतनयः शासितारं रघूणां
प्रौढानन्दव्यतिकरसमुद्भिन्नरोमाञ्चदण्डः ।
पादन्यासैर्वनविटपिनां मौलिमभ्रंलिहानां
व्याधुन्वानो रघुकुलपतेरङ्घ्रिमूले पपात ॥
वेणीबन्धान्मणिरयमयं देव देव्यावतीर्णो
जल्पन्नित्थं पुलकिनि मणिं रामपाणौ निधाय ।
यावत् ब्रूते जनकतनयावाचिकं वायुसूनु-
स्तावद् बाष्पस्तवककलुषो रामभद्रो बभूव ॥
श्रुत्वोदन्तं रघुकुलपतिः पेशलायाः प्रियायाः
प्रस्थानाय प्लवगपतये तत्क्षणन्यस्तभारः ।
कुञ्जाभ्यासे क्वचन विशिनीकाण्डखेलत्प्रवाले
रामः कान्तां विरहविमनाः कोमलाङ्गीं निदध्यौ ॥
मन्दोन्मीलन्नवनवदलग्रन्थिनिर्यन्मधूनां
शैलोपान्ते नवकमलिनीं राजहंसावतंसां ।
तत्रापश्यत् परिमलभरैर्वासयन्तीं दिगन्ता-
नामन्देन भ्रमरमिथुनेनाभितः सेव्यमानाम् ॥
तत्र स्निग्धे सरसि सरसाम्भोजकेलिप्रवीणं
रामो देव्या विरहविधुरो दूनतां प्रापयिष्यन् ।
धीरोदात्तः कथमपि दृशोः स्तम्भयन् बाष्पधाराः
प्रौढप्रेमस्तवकितपदं षट्पदं व्याजहार ॥
कच्चित् भ्रातर्भ्रमर भवता शीलितो मालतीनां
सीधुः कच्चित् कुसुमितशिखाः सेविता वा कदम्बाः ।
नीताः कच्चित् कथमपि सखे वासरा वारिवाह-
व्यूहच्छन्ने नभसि निभृतं यूथिकावीथिकासु ॥ इत्यादि ।

End. पायं पायं मधु सुमधुरं पुष्पितानां लतानां
स्वायं स्वायं नवकमलिनीगर्भहर्म्योदरेषु ।

निर्मायेदं मधुकर सखे मादृशि स्नेहबन्धान्
वीतग्लानिर्गुणनिसचितो यापयेस्त्वं त्रियामाः ॥

Colophon. श्रीऽभूद् गौड़क्षितिपतिशिखारत्नघृष्टाङ्घ्रिरेणु
विंद्यावाचस्पतिरिति जगद्गीतकीर्त्तिप्रपञ्चः ।
तस्मादासीद् भुवनविदित-श्रील-विद्यानिवास-
स्तत्पुत्रेण त्रिभुवनगुरोः प्रीतये राघवस्य ॥
यद्रेणैषा समरचि मया कापि वाचां सतत्त्वि-
र्वीतक्लेशा रसिकहृदयाह्लादिनी कल्पयन्तिः ।
श्रवद् ... ग्रसनजनिताशेषपापोपशान्तिं
तस्मै कुर्य्यान्निजगुणकथाराधितो रामचन्द्रः ॥
श्रीगुरुः शरणम् । इति श्रीन्यायवाचस्पतिभट्टाचार्य्यविरचित-भ्रमरदूतकाव्यम्
समाप्तम् ॥ श्रीरामचन्द्राय नमः । श्रीसीतायै नमः ॥

विषयः । श्रीरामस्य सीतासमीपे दूतरूपेण भ्रमरप्रेषणमवलम्ब्य रचितमिदं काव्यम् ।

No. 154. मतनिर्णयः. Substance, country-made paper, 15½ × 5½ inches. Folia, 24. Lines, 7 on a page. Extent, 420 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Candrakoṇā, Mohanta Bharata Rāmānuja Dāsa. Appearance, new. Verse. Correct.

Beginning. श्रीरामचन्द्राय नमः ॥ अथ मतनिर्णयः । अथ समाहृताः पुष्कृतपुरोहिता
इव विद्वांसः क्रमशः प्रविशन्ति स्म तत्र प्रथमतः प्रविशन्तं वैष्णवमालोक्य
कोऽप्येकः सकलशास्त्राभिज्ञो विदितपरतत्त्वो निजगाद प्रभुं प्रति ।
स्नानासमूर्द्धतिलकी वक्षशङ्खचक्र-
पद्माङ्कितोज्ज्वलवपुर्धृतपीतवासा ः।
कण्ठेन नामतुलसीस्रजमादधानः
श्रीमानयंहरिकथां कथयन्नुपैति ॥ प्रविश्य वैष्णवः ।
ईषन्मीलितलोचनो दृढ़तरप्रारब्धयोगासनो
यद्ब्रह्मादिसुरेन्द्रवन्दितपदः शम्भुः स्वयं ध्यायति ।
वैकुण्ठैकनिकेतनं जगदपि व्याप्य स्थितं लीलया
तद् ब्रह्माम्बुजवपुः सदैव मुदितं त्वचित्तमाम्नतास् ॥

अथायाम्तं शैवमालोक्याह सः ।
श्रीमानसावेति जटाह्लमौलिर्व्याघ्रलगालम्बितमध्यभागः ।
विभूतिसंभूषितभास्वदङ्गो रुद्राक्षमालाकलितोर्द्धदेहः ॥

प्रविश्य च शैवः ।

संगायन्ति सदा समस्तनिगमा ध्यायन्ति यं योगिनो
यस्याज्ञामधिगत्य देवतगणाः कुर्व्वन्ति सृष्ट्यादिकम् ।
सोऽयं वो भुवनाग्निराकृतिरपि चातुं जगत् साकृतिः
ध्यायन् स्वं स्वयमेव सर्वजगतां शिवाकरः + + ॥ इत्यादि ।

End. अत्रान्तरे रामोपासकः —— आ आमोदः ।
रामेति यन्नाम जनाः स्मरन्तः
संसारवारांनिधिमुत्तरन्ति ।
स कस्य वेशस्य कृपामुपेत्य
बबन्ध सेतुं जगदेकनाथः ॥
महान् मुरारेरपरो न कश्चित्
तस्यापि रूपाणि बहूनि सन्ति ।
रूपेषु तेष्वप्युपपन्नशीलात्
न रामचन्द्रादपरो गरीयान् ॥
(अतः परं खण्डितम्)

विषयः । वैष्णव-शैव-शाक्त-वैशेषिक-नैयायिक मीमांसक-वैदान्तिक साङ्ख्य-पातञ्जलाभिज्ञ-पौराणिक नास्तिकादीनां परस्परविभिन्नमतविरोधात्मकश्लोकसंग्रहः ॥

No. 155. मथुरासेतु. By अनन्तदेवः. Substance, country-made paper, 12 × 4½ inches. Folia, 98. Lines, 7 on a page. Extent, 1,372 çlokas. Character, Nāgara. Date, Sm. 1934. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Prose and verse. Generally correct.

Beginning. श्री गणेशाय नमः ।
समस्तब्रह्माण्डान्युदरविवरे यस्य सततं
वसन्ति ध्यायन्ति स्वहृदि तपसा यञ्च मुनयः ।
स यस्यां क्रीडार्थं स्पृहयति वनाञ्चिततनौ
तनोरेषा लोके जयति भवसिन्धोर्मधुपुरी ॥

इह खलु सकलवैष्णवजनसमुचितमार्गप्रदर्शनाचार्य्य—अम्बरीषप्रभृतीनां परमपुरुषार्थप्रापकतया प्रसिद्धतममपि माथुरमण्डलमहिमानं तत्रैव वसता हरिकेशवगोविन्दनामानं भगवन्तमनन्यशरणतया भजतां तत्रभवतां सतां सन्तोषसंजननेन वाचः सफलतायै प्रदर्शयामः ॥ इत्यादि ।

End.

वासुदेवाभिधं ब्रह्म जगदिन्द्र मया स्थितम् ।
माथुरे मण्डले नित्यं जयत्यानन्दकारितः (?) ॥
आसीद्गोदावरीतीरे वेदवेदिसमन्वितः ।
श्रीकृष्णभक्तिमानेकणकनाथाभिधो द्विजः ॥
तत्पुत्रस्सद्गुणैर्युक्तः सर्व्वशास्त्रार्थतत्त्ववित् ।
आपदेवोऽभवद्देवात् प्रापयः सकलान् मनून् ॥
मीमांसानयकोविदो मधुरिपोः सेवासु नित्योद्यतः
सर्व्वाशापरिपूरणक्षमयशा आसीत्तदीयात्मजः ।
यस्यानन्तगुणैरनन्त इति सन्नामार्थवत्तां गतं
येनावादि च वादिना श्रुतिशिरःसिद्धान्ततत्त्वं मुदे ॥
न्यायप्रकाशकर्त्ता निरवधिविद्यामृतप्रदः सततं ।
मीमांसाद्वयनयवित्ततनयस्तस्यापदेवोऽभूत् ॥
तौदीक्षनुर्निजवंशदेवं श्रीकेशवं तोषयितुं चकार ।
अनेन संज्ञो मथुरामहिम्नः सेतुः सदाकाङ्क्षितपूर्त्तिहेतुः ॥
अनुचितमप्यर्थं ब्रुवती बालस्य गौः सतोऽनुचिता ।
रचयति पितोस्तोषं वागेषा स्यात् तथा मुदे महताम् ॥

Colophon. इति श्रीमत्सकलशास्त्रार्थतत्त्वविद्‌ वैष्णवसन्मार्गप्रतिपादनैकप्रयोजनगृहीतावतार-श्रीमदापदेवसुतानन्तदेवेन कृतो मथुरासेतुः समाप्तः ॥ सम्वत् १९९४ ॥

विषयः । मथुरामाहात्म्यादिकथनमुखेन तत्तत्तीर्थकर्त्तव्यादिनिरूपणम् ।

No. 156. मन्त्रप्रश्नः (तैत्तरीयशाखोक्तः). Substance, country-made paper, 5×2 inches. Folia, 45. Lines, 7 on a page. Extent, 540 çlokas. Character, Nāgara. Date, Sm. 1771. Place of deposit, Benares City, Gobinda Bhaṭṭa Solāpurkār. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

ॐ प्रसुग्मन्ता धियसानस्य सक्षणि

वरेभिर्वरा अभिषु प्रसीदत ।
अस्माकमिन्द्र उभयं जुजोषति
यत् सौम्यस्यान्धसो बुबोधति ॥ इत्यादि ।

End. परि त्वाग्ने परिस्तृणामि ।
सुभवः सुश्रवसस्मा कुरु ।
योगे योगे तवस्तरं ।
आगन्ता समगन्महि ॥
आयुर्दा देवजयसं गृणानः ॥

Colophon. इति तैत्तिरीयशाखायां मन्त्रप्रश्नः समाप्तः ॥ सम्वत् १७०१ ॥

विषयः । कृष्णयजुर्वेदीयानां कर्म्मविधानम् ।

No. 157. महानाटकटीका. By चन्द्रशेखरः. Substance, country-made paper, 13 × 2½ inches. Folia, 36. Lines, 9 on a page. Extent, 1,498 çlokas. Character Bengali. Date, ? Place of deposit, District Bardhamāna, Post Office Caukidāṇgā Nandirājapura, Paṇḍita Çaçibhūṣaṇa Bhaṭṭācāryaya. Appearance, old. Prose. Correct.

Beginning. ॐ नत्वा रामपदाम्भोजद्वन्द्वं भवभयापहम् ।
टीकां महानाटकस्य कुरुते चन्द्रशेखरः ॥
व्याख्यानामन्वयज्ञानकृत एषा वितन्यते ।
भावोपहासं कुर्व्वन्तु तद्धीमानतिवस्तुनि ॥
कर्त्तव्ये महानाटकाख्ये ग्रन्थे प्रथमतो विघ्नेश इत्यादि दशभिः श्लोकैर्नान्दीं विदधाति ॥ इत्यादि ।

End. येन युधि निर्व्वापितः जितः मम जीवनाथः प्राणनाथः तस्यापि परशुरामस्य विजयी । अतःपरं खण्डितम् ॥

विषयः । महानाटकस्य व्याख्यानम् ॥

No. 158. महान्यासः. Substance, country-made paper, 5 × 3 inches. Folia, 24. Lines, 9 on a page. Extent, 214 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः । ओम् । अथातः पञ्चाङ्गरुद्राणां न्यासपूर्व्वकं जपहोमार्चनविधिं व्याख्यास्यामः । ओम् या ते रुद्र शिवा तनूरघोरा ॥ इत्यादि ।

End. स्वामिन् सर्व्वजगन्नाथ यावत् पूजावसानकम् ।
तावत्त्वं प्रीतिभावेन देवेऽस्मिन् सन्निधीभव ॥

Colophon. इति महान्यासः समाप्तः ॥

विषयः । देवाधिदेवरुद्रस्य न्यास-जप-होमार्चनकथनम् ।

No. 159. महार्णवकर्म्मविपाकः. By विश्वेश्वरभट्टः. Substance, country-made paper, 14×6 inches. Folia, 307. Lines, 10 on a page. Extent, 6,202 çlokas. Character, Nāgara. Date, Sm. 1903. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Generally Correct.

Beginning. श्रीगणेशाय नमः ।
ॐ नमः सकलकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवनाथाय रामाय ॥ ?
प्रवालाद्रिप्रख्यद्युतिनिचयमयाय वपुषे (?)
नमो विघ्नश्रेणीविघटनवरिष्ठाय महसे ।
जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रयतफलसिद्धिप्रतिभुवे ॥
यदिन्दिरानाथपुरन्दराद्यै-
राराध्यते भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणारविन्दं
वन्दामहे तत् कुलदेवतायाः ॥
... ...
आसीदसीमगुणटक्ककुलाम्बुराशा-
वुद्यत्प्रभूतशुभकीर्त्तिघनप्रकाशः ।
लोकैः सदा हृदि धृतो गुणसन्निविष्टः
श्रीरत्नपालन्टपतिर्भुवनैकरत्नम् ॥
तस्मात्मजो भरहपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमृद्धकीर्त्तिः ।
दानेन यः सुकृतिनां क्षिपति स्म दैन्यं
सैन्यश्च वैष्णसहस्रः प्रतिभूपतीनाम् ॥

सुतोऽस्य जातः सुकृतोन्नतस्य
न तस्य कश्चित् सदृशो बभूव ।
यमस्खलत् + + मवेक्ष्य लातो
नाम्ना चरित्रचन्द्र इति ब्रुवन्त ॥
तस्मात्मजोऽभूदतुलप्रतापः
साधारणो भूमिपतिर्वदान्यः ।
अभूतपूर्व्वामवनीश्वराणा
+ × यो जगति स्वकीर्त्तिम् ॥
बन्धच्छिदा विशदकीर्त्तिमिषान्वितार्थां
कृत्वा परत्र च तथैव विधातुमिच्छुः ।
कीनाशपाशचयबन्धविमोचनार्थं
तीर्थत्रयीकरणमुक्तिमचीकरद् यः ॥
तस्मात्मजः श्रीमदनेन नाम्ना
धाम्ना च रूपेण च संगतार्थः ।
... ...
... ... कान्तारसमाश्रितोऽभूत् ॥
यः कूपानारामान् धर्म्मायतनानि सन्निबन्धांश्च ।
कृत्वा स्वकीर्त्तिमेकामदीदृशन् मूर्त्तिभेदेन ॥
परिशीलयता कलाकलापं
विदधानेन च भूरिशः प्रबन्धान् ।
मदनेन महीभृताथ येन
प्रथिता नूतनभोजराजकीर्त्तिः ॥
पुत्रेषु सत्स्वपि कलत्रयुगे च तस्य
पुत्रौ जगत्त्रयविस्फुरकीर्त्तिपारौ
जातौ प्रियावनितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणौ + × ॥
उदारशीलौ सुमनौ विलास-
मनोज्ञ-वृन्दावन केलिशीलौ ।
यशोदया वर्द्धितमङ्गलाङ्गौ
तौ रामकृष्णाविति संप्रतीतौ ॥
+ + + + न युवा न वृद्धः

शक्नोति कर्त्तुमपरः सुतसद्‌गुणोऽपि ।
दानं निदानमखिलार्थिजनार्थसिद्धौ
कीर्त्तिं + + वितनान यतस्तदीया ॥
अप्रतिपचः पृथ्व्यां पृथ्वीमल्लस्तयोरभूद् ज्येष्ठः ।
अपरो मान्धातृगुणैर्मान्धाता गीयते जगति ॥
सोऽयं सुकृतिविधातरि × × तनोति मान्धाता ।
विद्वन्मुखेन मतिमान् सुकृतिरलं मदार्णवं नाम ॥
माता पुण्यचरित्रकीर्त्तिविभवा यस्या हि का नामतः
शाकल्यापरसूक्तिराव्यचरितः श्रीचेदिभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरो
वेदे स्मार्त्तमते नये च + × वाक्ये कृती वर्त्तते ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया यवह्वृतिः
परा शीलं स्लाघ्यं जगति खलव स्ते कतिपये ।
चिरं चित्ते येषां मुकुरतलभूते स्थितिमिया
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥
श्रुतिस्मृतिपुराणानि समालोच्य यथामति ।
निबध्यते समासेन निबन्धोऽयं मदार्णवः ॥
दुष्कर्मपाकजनितामयकर्षितानां
सत्कर्मशर्मकर × × मुनीन्द्रैः ।
मत्‌साङ्गजातमितरोक्तिविधान + +
वक्ष्यामि रोगनिखिलार्त्तिनिवर्त्तनाय ॥
तत्र तावद् वक्ष्यमाणकर्मोपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्राय-
श्चित्तादेरवश्यकर्त्तव्यता प्रतिपाद्यते ॥ इत्यादि ।

End. मेषप्रहदेशेन वह्निदानमन्त्रमाह ।
प्रसूलीष्व वह्निं येमं मेषप्रह महाप्रह ।
आतुरस्य सुखं सिद्धिं प्रयच्छ त्वं महायश ॥
इति मेषप्रहहरं ।
मतिर्येषां शास्त्रे प्रकृतिरमणीया यवह्वृतिः
परं शीलं स्लाघ्यं जगति खलवस्ते कतिपये ।
चिरं चित्ते येषां मुकुरतलभूते स्थितिमिया

दिथं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥
कविराधुनिकश्चिरन्तनो वा
न विशेषः क्वचिदस्ति सज्जनानाम् ।
इयतैव जितं मयापदेषा
मतिर्लोकेषु गुणेषु जातः ॥ (?)

Colophon. इति श्रीचेदिभट्टात्मज श्रीविश्वेश्वरविरचिते महार्णवाभिधाने निबन्धे कर्म्मविपाकसमुच्चये महार्णवः समाप्तः ॥ शुभमस्तु सम्वत् १९०२ शाके १७६८ ।

विषयः । सकलकर्म्मविपाकजनितरोगाणां निरूपणमुखेन तत्तद्रोगाधिष्ठातृग्रहाणां शान्तिकथनम् ॥ रोगानुमितपापानां प्रायश्चित्तविधानञ्च ॥

No. 160. महिषमर्द्दिनीस्तवरहस्यप्रकाशः. By जगदीशपञ्चाननभट्टाचार्य्यः. Substance, country-made paper, $18 \times 3\frac{1}{2}$ inches. Folia, 2. Lines, 10 on a page. Extent, 130 çlokas. Character, Bengali. Date, ? Place of deposit, Nānākhi, Post office Demrā, District Ḍhākā, Paṇḍita Pratāpacandra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
मनाक् कटाक्षविक्षेपात् पालयन्ती जगत्त्रयम् ।
भवानी भवतां भूत्यै भूयान्महिषमर्द्दिनी ॥
अष्टश्लोकानामादौ रष्टभिरक्षरैः प्रायशः अष्टाक्षरमहिषमर्द्दिनीमन्त्रोद्धारपूर्व्वकं भैरवः स्तवमारभते महिषघ्नीत्यादि । हे चण्डि मम चित्ते मम भक्तस्य चित्ते च वसतिं कुरु ॥ इत्यादि ।

End. इदानीं स्तव ... ... फलमाह स्तोममित्यादि । गूढोपदिष्टं स्वप्रकाशक्रमेण कथितं कुलोपचारः दक्षिणे ... ... कौशवकौशिकार्चनचरी कीर्त्तिर्मास्तित्यादिना वर्त्तं गृह्णन्ति यदा मुनयः । तव सार्वेण हस्तागता इवेत्यर्थः ॥

Colophon. इति श्रीजगदीशपञ्चाननभट्टाचार्य्यविरचितो महिषमर्द्दिनीस्तवरहस्यप्रकाशः सम्पूर्णः ॥ श्रीरामचन्द्राय नमः ॥

विषयः । महिषमर्द्दिनीस्तवस्य व्याख्यानम् ।

No. 161. मानवसारः. Substance, English paper, 6×10 inches. Folia, 54. Lines, 20 on a page. Extent, 1,040 çlokas. Character, Nāgara. Date, ? Place of deposit, Calcutta Çyāmapukura Viçvakoṣa office. Appearance, new. Verse. Incorrect.

Beginning. मानवसारशिल्पारम्भः ।

सुराणां भूसुराणाञ्च वर्णानां वासयोग्यकम् ।
सर्व्वासामग्निशालानां लक्षणं वक्ष्यतेऽधुना ॥
दण्डका स्वस्तिकञ्चैव मौलिकञ्च चतुर्मुखम् ।
सर्व्वतोभद्रकञ्चैव वर्धमानञ्च षड्विधम् ॥
त्रिहस्तन्तु समारभ्य द्वि-द्वि-हस्तविवर्द्धनात् ।
त्रयो विंशत्करान्तं स्यादेकादशविशालकम् ॥
युग्महस्तविधानेन चतुर्हस्तं समारभेत् ।
चतुर्विंशत्करान्तं स्याद्द्वि-द्वि-हस्तविवर्द्धनात् ॥
एवमेकादश प्रोक्ता चैकशाला विशालतः ॥ इत्यादि ।

End. मध्यमालामपि चार्थहारतः
तत्स्वर्णसूत्रं परितस्तु नाभ्याम् ।
रत्नमालिका दुकूलवीरायुक्तः
स्वर्णकञ्चुकहिरण्यमालिका ॥ (?)
लम्बहारमपि चुल्लिकादिभिः
पूरि मद्रिरर्पिके चूडकम् । (?)
ब्रह्मविष्णुमहेशशक्रसकलैर्दिक्पालकैः किन्नरै-
र्गन्धर्व्वैरपि सर्व्वदेवनिकरैर्दुर्गा सती गौरिभिः ॥ (?)
चामुण्डादिसरस्वती गणपतेः
सप्तमातरः स्वापि तत्संख्यानम् । (?)
सकलं विभूषणं नित्यादिनैमित्तिके
राजाधिराजैरपि राजसर्व्वैः ॥
सुरपि (?) देय देव्यादिषड्कर्मैः
पञ्जरमेवमुक्तं क्षतमिये च स्यातुलक्ष्मीहेतुः ॥

Colophon. इति मानवसारे वास्तुशास्त्रे भूषणलक्षणविधानं नाम सप्तचत्वारिंशोऽध्यायः ॥ ० ॥ इत्यादिमानवसारः समाप्तः ॥

विषयः। शालाविधानादिनिरूपणम्। गृहमानादिनिरूपणम्। गृहप्रवेशविधानम्। द्वारमानविधानम्। द्वारस्थानादिविधानम्। राजगृहविधानम्। राजलक्षणम्। रथलक्षणम्। शयनविधानम्। तोरणलक्षणादिनिरूपणम्। मध्यरङ्गविधानम्। कल्पवृक्षविधानम्। अभिषेकलक्षणम्। भूषणलक्षणनिरूपणञ्चेति।

No. 162. मासाद्युल्लेखदुर्गभञ्जनम्. Substance, country-made paper, 12 × 2½ inches. Folia, 13. Lines, 7 on a page. Extent, 325 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Kālnā, Paṇḍita Kānticandra Tarkavācaspati. Appearance, old. Prose. Correct.

Beginning. श्रीगणपतिर्जयति। अथ मासाद्युल्लेखदुर्गभञ्जनम्।

तत्र मत्स्याण्डभविष्यपुराणयोः।

मासपक्षतिथीनाञ्च निमित्तानाञ्च सर्व्वशः।

उल्लेखनमकुर्व्वाणो न तस्य फलभाग्भवेत्॥

मासपक्षतिथीनां निमित्तीभूतानामनिमित्तानां वा तद्दिनरेखाञ्च निमित्तानामित्यर्थः। निमित्तानामुपस्थितक्रियानिमित्तानाम्। इत्यादि।

End. जात्यभिलापपदव्याहृतिरभिहिता सातैव ज्ञेया तस्य प्रथमान्तास्मत्पदघटितत्वादेव तत्रास्तत्तेरिति॥

Colophon. इति मासाद्युल्लेखदुर्गभञ्जनं समाप्तम्॥ ० ०॥

विषयः। दैवपैतृकादिकर्म्मसु संकल्पे मासपक्षाद्युल्लेखविधिविचारः।

No. 163. मिश्रितमाहात्म्यम् (स्कान्दपुराणीयम्). Substance, country-made paper, 10 × 6 inches. Folia, 30. Lines, 12 on a page. Extent, 850 çlokas. Character, Nāgara. Date, Sм. 1914. Place of deposit, Mahārājā's Library, Hātuā. Appearance, tolerable. Verses. correct

Beginning. श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीमिश्रिताय नमः।

ॐ नमः परमात्मने श्रीपुराणपुरुषोत्तमाय।

नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।

देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया।

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः॥

सूत उवाच ।

कैलासशिखरे रम्ये नानाधातुविचित्रिते ।

अप्सरोगणसङ्कीर्णे गन्धर्व्वगणसेविते ।

महादेवं सुखासीनं पप्रच्छ गिरिकन्यका ॥

पार्व्वत्युवाच ।

सर्वं धर्म्ममयं श्रुत्वा त्वत्प्रसादान्महेश्वर ।

मिश्रितस्य च माहात्म्यं गरिष्ठं पापनाशनम् ॥

ईश्वर उवाच ।

शृणु देवि प्रवक्ष्यामि लोकानां हितकाम्यया ।

माहात्म्यं सर्व्वपापघ्नं उत्पत्तिं मिश्रितस्य च ॥

त्रैलोक्ये यानि तीर्थानि ये सर्वे च देवताः । (?)

तानि सर्व्वाणि इच्छन्तो मिश्रिते शृणु सुन्दरि ॥ इत्यादि ।

End. विमानैरर्कसङ्काशैरागत्य तस्य बान्धवाः ।

पितरो बान्धवैः सार्द्धं भर्त्यैश्चैवान्विताश्च्या ॥

भासमानाश्च तेजोभिर्ययुस्ते वैष्णवं पदम् ।

एतत्ते कथितं देवि माहात्म्यं मिश्रितस्य च ॥

Colophon. इति श्रीस्कन्दपुराणे उमामहेश्वरसम्वादे मिश्रितमाहात्म्ये द्वादशोऽध्यायः ।१२।

इति मिश्रितमाहात्म्यं सम्पूर्णम् । शुभमस्तु सम्वत् १९१४ भाद्रकृष्ण ।११।

सोमवासरे ॥ + + ॥

विषयः । गङ्गायाश्चोत्तरे भागे सरय्वा दक्षिणेन च ।

यस्य दक्षिणभागे तु गोमती नाम विश्रुता ॥

तादृशस्य महापुण्यस्य मिश्रितक्षेत्रस्य माहात्म्यकीर्त्तनम् । दधीचिनाम्नो राज्ञ उपकारार्थं महादेवोपदेशेन सर्व्वेषां तीर्थानामेकत्रसमावेशादस्य मिश्रिततीर्थमित्याख्या ।

No. 165. मुक्तिवादरहस्यम् . Substance, country-made paper, 14 × 2½ inches. Folia, 9. Lines, 7 on a page. Extent, 225 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Ambikā Kālnā, Paṇḍita Kānticandra Tarkavācaspati. Appearance, old. Prose. Correct.

Beginning. श्रीगुरुर्जयति । कथावदपवर्गः । तत्रात्यन्तिकी दुःखनिवृत्तिरेवापवर्गः । इत्यादि ।

End. स्वस्वतया स्थितानि जीवात्मनि सुखदुःखावच्छेदकानीति विदध्विनः ॥

Colophon. इति मुक्तिवादरहस्यं सम्पूर्णम् ॥

विषयः । गदाधरभट्टाचार्य्यकृतस्य मुक्तिवादस्य टीका ।

No. 166. मुग्धबोधः. By वैद्यरघुनन्दनः. Substance, palm-leaf, 18 × 1½ inches. Folia, 279. Lines, 3 on a page. Extent, 3,000 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā, Paṭuyāṭuli, Bābu Yādavānanda Gupta. Appearance, old. Prose and verse. Generally correct.

Beginning. नमो गणेशाय ।

नमो गणेशाय शिवात्मजाय गजेन्द्रवक्त्राय चतुर्भुजाय ।
किम्विघ्ननाशाय वरप्रदाय योगात्मने सिद्धिषु सेवकाय ॥
चक्रपाणेः चक्रपदद्वन्द्वं वन्दे महेश्वरम् ।
... ... ॥
यदुक्तं वाग्भटे तन्त्रे सुश्रुते वैद्यसागरे ।
अन्यैश्च बहुभिः सिद्धैर्यदुक्तं तद्विलोक्य च ॥
तत्र यद्यदसाध्यं स्यात्तद्देशेषु दुर्लभम् ।
तत्तत् सर्व्वं परित्यज्य सारभूतं मया कृतम् ॥
मुग्धबोधमहं कुर्व्वे वैद्यशास्त्रमहाम्बुधेः ।
संगृह्य सर्व्वशास्त्रञ्च वैद्यश्रीरघुनन्दनः ॥ इत्यादि ।

End. भौषधैव कशेरुकं खमाक्षिका तालाङ्कुरं तास्रकम् ।
यष्टी नागधना तिला मधुरिका जातिफलं सैन्धवम् ॥
(अतः परं खण्डितम्)

विषयः । वैद्यलक्षणप्रसंशादिः । वैद्योत्पत्तिकथनम् । मूत्रपरीक्षा नाड़ीविज्ञानादिकथनम् । सर्व्वरोगाणां निदान-चिकित्सा-पथ्यापथ्यादिकथनम् । नानातैलादिकरणप्रकारादिकथनञ्च ॥

No. 167. मूर्खदृष्टा. Substance, country-made paper, 18 × 4 inches. Folia, 126. Lines, 8 on a page. Extent, 5,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Bariçāla, Mānapāsā, Paṇḍita Mathurānātha Bhaṭṭācāryya. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय । प्रायेण सङ्कल्पानामेव कर्म्मारम्भकत्वात् आदौ स एव निरूप्यते । कायवाङ्मनोभीरचितं कर्म्म फलाय समर्थमिति श्रुत्या सर्वा मयार्था अङ्गलसुक्तं तच केन रूपेण कस्याङ्गत्वमित्यादि । इत्यादि ।

End. जीवोऽर्केण युतः करोति मरणं बार्ह्नांशको भागुरिः ।
नचचैकगते वदन्ति यवनाः + पण्डितो देवज्ञः ॥
(अतः परं खण्डितम्)

विषयः । सङ्कल्पवाक्यादिनिरूपणम् । नान्दीश्राद्धादिनिरूपणम् । प्रतिपदादिसकलतिथिव्यवस्था । श्राद्धव्यवस्थादिः । एकोद्दिष्टकालव्यवस्थादिः । गोवधादिप्रायश्चित्तकथनम् । व्यवहारदायादिव्यवस्था । विवाहनचत्रादिकथनम् । अतः परं खण्डितम् ।

No. 168. मृत्युञ्जयपञ्चाङ्गम् . Substance, country-made paper, 7 × 4 inches. Folia, 119. Lines, 5 on a page. Extent, 450 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः ।
ॐ कैलासशिखरे रम्ये मणिमालातिभासुरे ।
नानाद्रुमलताकीर्णे नानापुष्पोपशोभिते ॥
प्रसन्नवदनं दृष्ट्वा ... ... ।
गिरा मधुरया गौरी प्रोवाच परमेश्वरम् ॥
श्रीदेव्युवाच ।
भगव + + शिवो देवो महामृत्युञ्जयः परः ।
आदिनाथो जगत्त्राता दीचानायक ईश्वरः ॥
वर्णितः प्राङ् महादेव गुणातीतश्चिदीश्वरः ।
भवता तस्य देवस्य परब्रह्मस्वरूपिणः ॥
पञ्चाङ्गं श्रोतुमिच्छामि वक्तुमर्हसि मे विभो ॥ इत्यादि ।

End. इतीदं मम सर्व्वस्वं रहस्यं परमाद्भुतम् ।
यस्य कस्य न दातव्यमित्याज्ञा परमेश्वरि ॥

Colophon. इति श्रीदेवीरहस्ये तन्त्रे मृत्युञ्जयस्तोत्रं समाप्तम् ।

विषयः । श्रीमृत्युञ्जयस्य पटल-पद्धति-सहस्रनाम-कवच-स्तोत्रात्मकपञ्चाङ्गस्य कथनम् ।

No. 169. मेरुतन्त्रम्. By शिवः. Substance, country-made paper, 8×3½ inches. Folia, 144. Lines, 11–12 on a page. Extent, 3,164 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
यथासत् सदिवाभाति न च भाति कदापि सत् ।
यस्मिन् ज्ञाते न सा भाति तस्मै तस्मै नमो नमः ॥
जलन्धरेण विजिते सुरासुरनरेऽखिले ।
सूक्ष्मरूपेण ते सर्व्वे महेशशरणं गताः ॥ इत्यादि ।

End भविष्यति कलौ प्रायोऽविवेकाद्गुरुशिष्ययोः ।
ज्ञात्वा शास्त्रं गुरुं कुर्य्यात्तदा सुखमवाप्नुयात् ॥
इति दीक्षाविधिः प्रोक्तः कुलाचारसमन्वितः ।
अर्थवादं विना देवि किमन्यच्छ्रोतुमिच्छसि ॥

Colophon. इति श्रीमहाकालमहामायानुमते मेरुतन्त्रे शिवप्रणीते पीठवर्णनं नाम द्वात्रिंशः प्रकाशः ॥

विषयः । व्यवस्थाप्रकाशः । विधवाविवाहकथनम् । संस्कारप्रकाशः । दीक्षाप्रकारकथनम् । होमविधिः । आह्निकप्रकाशः । पुरश्चर्य्याप्रकाशः । सिद्धिस्थिरीकरणप्रकाशः । कौलिकाचारप्रकाशः । मन्त्रादित्यागप्रकाशः । मुद्रालक्षणप्रकाशः । पीठवर्णनञ्चेति ॥

No. 170. यमुनामाहात्म्यम्. (पद्मपुराणीयम्) Substance, country-made paper, 11×4 inches Folia, 6. Lines, 16 on a page. Extent, 175 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः । शक्तिरुवाच ।
सर्गं कथयतो तात मरीचेर्हि विवस्वतः ।
अपत्यद्वयमुत्पन्नं यदुक्तं भवता पितः ॥
+ + तद्विस्तरेणात्र ब्रूहि सम्यगशेषतः ।
श्रोतव्यञ्च मया तस्माद् वक्तव्यञ्च त्वया गुरो ॥
वशिष्ठ उवाच ।
शृणु पुत्र यदि श्रद्धा हृदये तव वर्त्तते ।

कथयामि यथातत्त्वं श्रोतुः कल्मषनाशनम् ॥
एवमेव पुरा पृष्टः प्राचो वैण्येन भूभुजा ।
यदाह भार्गवो धीमान् तत्ते वक्ष्याम्यशेषतः ॥
सूर्य्यात् त्वष्ट्री पुरा पुत्रं लेभे वैवस्वतं मनुम् ।
धर्म्मेण धर्म्मं धर्म्मज्ञा पुत्रमैच्छत् ततः परम् ॥
ततः सम्प्राप्य संज्ञां स धर्म्मराजः समुत्थितः ।
श्यामः प्रांशुर्लोहिताक्षो विद्युत्कुन्तलमूर्द्धजः ॥
तथैव यमुना श्यामा पद्मपत्रायतेक्षणा ।
स्वभासा भासयन्ती सा भास्करानन्दिनीति या ॥ इत्यादि ।

End. श्रोतव्यमेतत् कृतिभिः पवित्रं
धर्म्मार्थकामार्थिभिरेव सम्यक् ।
मोक्षार्थिभिश्चापि ततश्चतुर्णा-
माकर्णतेऽस्मिन् भवतीह सिद्धिः ॥
कार्त्तिके शुक्लपक्षे तु द्वितीयायां विशेषतः ।
माहात्म्यं यमुनायास्तु यः शृणोति स मोक्षभाक् ॥

Colophon. इति श्रीपद्मपुराणे मरीचिसर्गे यमुनामाहात्म्येऽष्टमोऽध्यायः । शुभम् ।
ॐ तत्सत् ॥

विषयः । यमुनाया उत्पत्तिमुक्त्वा विशेषतो माहात्म्यकीर्त्तनम् ॥

No. 171. यात्राविवाहादिविध्युपायः. Substance, country-made paper, $18 \times 1\frac{1}{2}$ inches. Folia, 40. Lines, 3 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, Nandirājapura, Post Office Coukiḍāṇgā, Paṇḍita Atalabihārī Bhaṭṭācāryya. Appearance, Old. Verse Generally correct.

Beginning. श्रीहरिः ।
भूयः प्रणम्याच्युतपादपद्मं
संक्षेपतः कोऽपि तनोति यत्नात् ।
बालप्रबोधाय सुखेन शीघ्रं
यात्राविवाहादिविधेरुपायम् ॥
अत्र तिथयः प्रतिपदादयः पञ्चदश सुप्रसिद्धाः ॥ इत्यादि ।

End. अन्यं खण्डितम् ।

विषयः । नक्षत्रादिनिरूपणम् । वामवेध-रव्यादिग्रहादिनिरूपणम् । वारवेलादिनिरूपणम् । अमृतादियोगनिरूपणम् । ग्रहाणां शत्रुमित्रादिभावकथनम् । यात्राविवाहादिविहिततिथिनक्षत्रादिनिरूपणम् । जोटकादिनिरूपणम् । वध्वागमनदिनादिनिरूपणम् । सीमन्तोन्नयनतिथ्यादिनिरूपणम् । रिष्टादिनिरूपणम् ॥ अतः परं खण्डितम् ।

No. 172. योगवाशिष्ठरामायणे मोक्षोपायनानाप्रश्नः . (खिलः) Substance, country-made paper, 14½ × 6½ inches. Folia, 16. Lines, 14 on a page. Extent, 320 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance new. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः । येषामयं प्रतिसिद्धिः (?)

श्रीवाल्मीकिरुवाच ।

निर्व्वाणाख्यादुदारार्थात्प्रकरणात् परम् ।
जीवस्वभावाः श्रूयन्ते मोक्षोपायाः खिला इमे ॥
निर्व्वाणाख्यं प्रकरणं वर्णयित्वा सुविस्तरम् ।
श्रेयसे महतां श्रेष्ठो वशिष्ठः प्रोक्तवानिदम् ॥

वशिष्ठ उवाच ।

सर्व्वैः स्वतः स्वजगति व्योम्नि (?) व्योमात्मनि स्वयम् ।
स्वमार्जवं जवीभावं स्वभावोऽनुभवस्थितः ॥
यस्तस्यां बोधसंदृष्टौ परां परिणतिं व्रजेत् ।
सोऽन्योन्यं तानयान्यांश्च पश्यत्यनुभवत्यपि ॥

श्रीराम उवाच ।

भान्तिमात्रात्मनि जगत्यस्मिन्नेवं स्थिते प्रभो ।
पश्यामो यदि नान्योन्यं वयं ते च मृता जनाः ॥
तदितो ये मृता स्वभ्यासैरसुन स्वयम्भवः ।
तपो धर्मो वयश्चेति मुने किं सद्भिरुच्यते ॥ इत्यादि ।

End. ततो मुनेः स्तुतिमुखरामनात्मनां
समन्ततो द्विजमुनिपौरभूभृताम् ।
समुद्ययौ कलकल उच्चकैस्तदा
महार्णवाद्गिरिमथितोदरादिव ॥

पुष्पाणि रत्नान्यथ मण्डलानि
धनानि विप्रर्षिमहीपतिभ्यः ।
ददौ नृपेशो मुनये तु तस्मै
प्रणाममष्टाङ्गमनुत्तमश्रीः ॥
नानाप्रश्नः समाप्तः ।
सर्वोपनिषदां सारं सारमाध्यात्मसुत्तमम् ।
नानाप्रश्नेति यवाख्ये मोक्षदं सिद्धिकारणम् ॥

Colophon. इत्यार्षे रामायणे शतसाहस्र्यां संहितायां निर्व्वाणप्रकरणे नानाप्रश्नः समाप्तः । समाप्तश्चायमी मोक्षोपायः इति शुभमस्तु ॥

विषयः । श्रीरामवशिष्ठसंवादमुद्धृत्य वाल्मीकिरेवास्य वक्ता तत्रास्मिन् महाप्रलयविचारः । ध्यातिवाहिकाधिभौतिकैक्यावबोधपूर्वकं बन्धाभावप्रतिपादनम् । ब्रह्मप्रतिपादनम् । प्राक्तनेन मरणविचारणम् । मरणजीवितैक्यावबोधनम् । जीवस्वभावपरमार्थवर्णनम् । जीवस्वभावेषु परमपदावबोधनम् । जीवन्मुक्तस्वभाववर्णनम् । सदेहादेहमुक्तवर्णनम् । लोकद्वयानुभवयुक्तोपदेशवर्णनम् । सर्गादावुपादानकारणनिरसनम् । प्राक्तनजन्मपितृकार्य्यनिरूपणम् । परब्रह्मस्वरूपवर्णनम् । पूर्वोक्तविषयाणां साकल्येनावबोधनञ्च ।

No. 173. योगसारः. Substance, country-made paper, 18×3 inches. Folia, 22. Lines, 9 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, ? Place of deposit, Kājoḍā, Post Office Aṇḍāl, District Bardhamāna, Yatīndra Nātha Nāyek. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ दुर्गा । श्रीमहादेव उवाच ॥
मातर्मे देवदेवेशि योगेशि प्राणवल्लभे ।
सर्वं मातः सुरेशानि संसारतारिके शुभे ॥
शरणागतदीनार्त्तपरित्राणपरायणे ।
त्वां विना देवदेवेशि संसारः तृणवत् प्रिये ॥
एकं संप्रष्टुमिच्छामि यदि तेऽनुग्रहो मयि ।
योगसारं महेशानि कथयस्वानुकम्पया ॥
संसारतारणे देवि तरणिस्त्वं यतः प्रिये ।
असारे घोरसंसारे सर्वे दुःखमलीमसाः ।
जायन्ते च म्रियन्ते च असंख्या जीवराशयः । इत्यादि ।

End. स्नात्वान्तोऽयं मनुः प्रोक्तो राचिव्यत्ययकर्म्मणि ।
स्वचद्वयजपात् सिद्धिर्जायते कुलभैरव ॥
इति ते कथितं किञ्चिद्वशीकरणमुत्तमम् ।
समासेन महेशान किमन्यत् कथयामि ते ॥ ० ॥

Colophon. इति योगसारे सर्व्वागमोत्तमोत्तमे श्रीपार्व्वतीशिवसम्वादे शतसाहस्र्यां संहितायां वशीकरणोद्दीपने राचिव्यत्ययो नाम द्वादशः परिच्छेदः ॥ * ॥
अतः परं खण्डितम् ।

विषयः । प्रथमपरिच्छेदे मन्त्रपुरश्चरणविधिः । २ ये योगमाहात्म्यवर्णनम् । ३ ये षट्चक्रदर्शनोद्दीपनादिः । ४ र्थे मूलाधारस्थदेवताध्यानम् । ५ मे वाणलिङ्गोपाख्यानम् । ६ ष्ठे देवस्थदेवतावर्णज्ञानमुखेन मणिपूरकाधिष्ठानचक्रादिवर्णनम् । ७ मे हृत्पद्मध्यानार्चनादिः । ८ मे षोड़शदलस्य वर्णनम् । ९ मे षट्चक्रादिचक्रे द्विदलादिवर्णनम् । १० मे गुरुस्तवकवचादिः । ११ शे गुरुसहस्रनामादिः । १२ शे वशीकरणोद्दीपने राचिव्यत्ययकर्म्मादिनिरूपणमिति ।

No. 174. रघुवंशटीका . (सुबोधा) By भरतसेनः . Substance, country-made paper, 13×3 inches. Folia, 169. Lines, 7 on a page. Extent, 4,000 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Kālnā, Paṇḍita Kānticandra Tarkavācaspati. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
प्रणम्य गौरीं गिरिशञ्च भक्त्या
गौराङ्गमल्लीकतनुप्रभूतः ।
भूष्टिग्निदेशाङ्करतः सुबोधां
वैद्यो विधत्ते रघुवंशटीकाम् ॥
कालिदासो महाकविः महाकाव्यं रघुवंशाभिधं विधित्सुर्विघ्नविघातार्थं स्वेष्टदेवताप्रणामात्मकं मङ्गलमादावाचरति । वागर्थावित्यादि । पार्वतीपरमेश्वरौ गौरीशङ्करावहं वागर्थप्रतिपत्तये वाचामर्थानाञ्च सम्यगवबोधाय वन्दे प्रणमामि । इत्यादि ।

End. रघुवृषभो रघुवंशश्रेष्ठो दशरथः सैनिकैः समीयिवान् सङ्गतः सन् स्वमन्दिरं म्यवर्त्तत समागतवान् । रुचिराच्छन्दः ।

Colophon. इति वैद्यचरित्वरखानवंशसम्भवगौराङ्गमल्लीकात्मज-श्रीभरतसेनकृतायां रघुवंशटीकायां सुबोधायां नवमः सर्गः ॥ * ॥ श्रीकृष्णाय नमः ।

विषयः । प्रथममारभ्य नवमसर्गं यावत् कालिदासकृत रघुवंशाख्यकाव्यस्य व्याख्यानम् ।

No. 175. रङ्गनाथपादुकासहस्रम्, By वेङ्कटनाथवेदान्ताचार्य्यः. Substance, country-made paper, 11 × 4 inches. Folia, 79. Lines, 10 on a page. Extent, 1,400 çlokas. Character, Nāgara. Date. ? Place of deposit, District Medinipura Candrakoṇā, Mohanta Bharata Rāmānuja Dāsa. Appearance, old. Verse. Generally correct.

Beginning. श्रीमते निगमान्तगुरवे नमः ।
श्रीमान् वेङ्कटनाथार्य्यः कवितार्किककेशरी ।
वेदान्ताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि ॥
सन्तः श्रीरङ्गपृथ्वीशचरणत्राणशेखराः ।
जयन्ति भुवनत्राणपदपङ्कजरेणवः ॥
भरताय परं नमोऽस्तु तस्मै
प्रथमोदाहरणाय भक्तिभाजाम् ।
यदुपज्ञमशेषतः पृथिव्यां
प्रथितो राघवपादुकाप्रभावः ॥
वर्णस्तोमैर्वकुलसुमनोवासनामुद्वमन्ती-
माम्नायानां प्रकृतिमपरां संहृतां दृष्टवन्तम् ।
पादे नित्यं प्रणिहितधियं पादुके रङ्गभर्तु-
स्त्वन्नामानं मुनिमिह भजे त्वामहं स्तोतुकामः ॥ इत्यादि ।

End. यदि स्तेया भक्तिः प्रणयमुखवाची + + +
पदत्राणस्तोत्रं हृदि विहृत रङ्गेतिनिहृतः ।
नियन्माद्रो यद्वा निरवधिसुधानिर्भरसुचो
वचोभङ्गीरेताः कथमनुदत्ते सहृदयः ॥ (?)
जयति यतिपतिराजस्सूत्रैर्जयति मुकुन्दस्य पादुकायुगलम् ।
... ... ॥

Colophon. इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्य्यस्य कृतिषु श्रीरङ्गनाथपादुकासहस्रे फलपद्धतिर्द्वात्रिंश + + ।

विषयः । भगवतो रङ्गनाथस्य पादुकास्तवः पादुकयोश्च समोभावप्रस्तावपद्धति-समाख्या-पद्धतिप्रभावपद्धति-सञ्चारपद्धति-परागपद्धति-बिम्बप्रतिबिम्बपद्धति-चित्रपद्धति-फलश्रुतिपद्धतिप्रभृ-तिभिर्विविधाभिः स्तुतिभिः स्तवः ॥

No. 176. **रसकल्पलता,** By **मोहनानन्दः .** Substance, country-made paper, 12 × 4 inches. Folia, 7. Lines, 7 on a page. Extent, 122 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Uthali, Paṇḍita Dinabandhu Gosvāmi. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीश्रीकृष्णाय नमः ।

राधायै रसरूपायै कृष्णायानन्दरूपिणे ।
नमोऽनिश्चिततत्त्वाय तयोरनुभवो रसः ॥
साध्वं श्रीरूपनिषदोक्तां भक्तिसंप्राप्तियों पराम् ।
रचयामि यथाज्ञानं प्रीतये रतये हरौ ॥ इत्यादि ।

End. श्रीकृष्णकरजस्पर्शात् प्रेम्णा या पुलकायिता ।
सेयं शब्दप्रबन्धेन रसकल्पलतां भज ॥ १२२ ॥

Colophon. इति श्रीमोहनानन्दाचार्य्यविरचिता रसकल्पलता समाप्ता ॥ * ॥

विषयः । कृष्णस्तुतिः भक्त्युपदेशश्च ।

No. 177. **रसचन्द्रिका,** By **माधवकविचन्द्रः.** Substance, country-made paper, 14 × 3 inches. Folia, 181. Lines, 5 on a page. Extent, 2,200 çlokas. Character, Bengali. Date, Sk. 1735. Place of deposit, Ḍhākā, Paṭuātuli, Bābu Yādavānanda Gupta. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

विधत्ते यन्नूनं रुचिरनखराग्रेण खचितं
पुरारातेर्मौलौ हिमकरकिशोरभ्रमभयम् ।
... ...
खानीय सत्कृतिमुदे कविचन्द्रवैद्य-
श्रीमाधवेन विदधे रसचन्द्रिकेयम् ॥ इत्यादि ।

End. भाषितः कामदेवेन मेथीमोदकसञ्ज्ञकः ।
षण्डो वृषायते नित्यं मोदकस्य च सेवनात् ॥ मेथीमोदकः ।

Colophon. इति वृष्याधिकारः ॥ * ॥ समाप्तश्चायं ग्रन्थः ॥
बाणाब्धिद्याधरद्मापरिमिह्नितगते वत्सरे शाकशब्दे
सूर्य्ये तुर्य्ये द्विसंख्ये हिमकिरणदिने वैद्यवंशोद्भवोऽसौ ।
श्रीदुर्गानन्ददासो निजलिपिनिकरैः पूर्णतां ग्रन्थमेतत्
× × × × × × × ॥

विषयः । रसप्रशंसा । तत्शोधनादिनिरूपणम् । दीपनादिनिरूपणम् । अभ्रादिशोधनप्रकारः । ज्वरादिचिकित्सा । शूलादिचिकित्सा । व्रणादिचिकित्सा । प्रदरादिचिकित्सा । वृष्याधिकारश्चेति ।

No 178. रागवर्त्मचन्द्रिका. Substance, foolscap paper, 12 × 3 inches. Folia, 8. Lines, 9 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Lohajaṇga, Bābu Mukundalāla Pālacaudhurī. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीहरिदासवर्य्याय नमः ।
श्रीरूपवाक्सुधास्वादि-चकोरेभ्यो नमो नमः ।
येषां कृपालवैर्वीक्षे रागवर्त्मनि चन्द्रिकाम् ॥
श्रीमद्भक्तिरसाम्भोधिबिन्दुर्यः पूर्वदर्शितः ।
तत्र रागानुगा भक्तिः संक्षिप्तात्र प्रतन्यते ।
वैधी भक्ति र्भवेत् शास्त्रं भक्तौ चेत् स्यात् प्रवर्त्तकम् ॥ इत्यादि ।

End. गीतोक्तगन्धर्वमिश्चन्तो मुक्तवत्यातमनुभूतवन्तोऽनुभवन्तोऽनुभविष्यन्ति चेत्यलमति विस्तरेण ॥ * ॥
स्वल्प रागानुगावर्त्म दुर्दर्शं विबुधैरपि ।
परिचिन्वन्तु सुधियो भक्ताश्चन्द्रिकयानया ॥ * ॥

Colophon. इति समाप्तेयं रागवर्त्मचन्द्रिका ।

विषयः । संक्षेपेण रागानुगभक्त्यादिनिरूपणम् ।

No. 179. राजनीतिः. By नीलकण्ठः. Substance, country-made paper, 9×3 inches. Folia, 8. Lines, 9 on a page. Extent, 188 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीहरिः शरणम् ।

देवर्षिपितृसंघानामवाङ्मनसगोचरम् ।
प्रत्यक्षमपि तद्ब्रह्म सर्वदा समुपास्महे ॥
विरोधि मार्गद्वयदर्शनार्थं
द्वेधा बभूवाथ परः पुमान् सः ।
श्रीशङ्करो भट्ट इहैकरूपो
मीमांसकाद्वैतगुरोश्चकार ॥ इत्यादि

End. विभुश्चापि दिवि श्रेष्ठस्तथान्यश्च जगद्विमः ।
एते त्वामभिषिञ्चन्तु साध्या द्वादशपार्थिवाः ॥

Colophon. अतःपरं खण्डितम् ।

विषयः । राजधर्मकथनम् ।

No. 180. राममहिम्नः स्तोत्रम्, By विजयरामाचार्य्यः. Substance, country-made paper, $10\frac{1}{3} \times 5\frac{1}{2}$ inches. Folia, 7. Lines, 8 on a page. Extent, 250 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Bharata Rāmānuja Dāsa. Appearance, old. Verse. Generally correct.

Beginning. श्रीरामाय नमः ।

महामोहावर्त्ते पतितमिह मां ते शरणगं
शरण्यस्त्वत्तोऽन्यः प्रभवति न कोऽप्यत्र जगति ।
अतस्त्वत्पादाम्भोरुहयुगलमाश्रित्य नितरा-
मितीहे संसाराद्दृढजिननिषयादुद्धर विभो ॥
निजाध्यक्षेनेदं जगदखिलमिच्छादिकरणैः
समुत्पन्नं कृत्वा वससि सततं श्रीरघुपते ।
युगान्ते सर्वं वै चरसि किल रौद्रेण वपुषा
त्वमेकः सर्व्वास्मिन् विचरसि न चान्यो गुणनिधे ॥

रमन्ते योगीन्द्रास्त्रिपुरहरमुख्यास्त्वयि सदा
समाधौ विश्वात्मन् नियमित ... रघुपते ।
तथाप्येते पारं निखिलनिगमागोचर विभो
महिम्नस्ते नूनं गमयितुमलं नैव कुशलाः ॥ इत्यादि ।

End. तुभ्यं नमो भगवते रघुनन्दनाय
श्रीजानकीप्रियतमाय खलान्तकाय ।
योगेन्द्रपूजितपदाम्बुरुहद्वयाय
संसारदुःखशमनाय नमो नमस्ते ॥
कामाद्या दुर्जयास्तेऽमम भवतु पुनर्भक्तियोषित्सु कामः
क्रोधश्चेत् पातके वै तव चरणयुगाम्भोरुहे स्याच्च लोभः ।
मोहश्चेत् ध्यानयोगे मम भवतु पुनर्मत्सरो वै ततोऽन्यद्
+ + सौख्यस्थितिमिह नितरां नैव पश्यामि भूमौ ॥

Colophon. इति श्रीमच्चतुर्भुजाचार्य्यचरणसरोजनिवसनमनश्चञ्चरिकास्वादितचिन्मकरन्द श्रीमद्विजयरामाचार्य्यविरचितं श्रीराममहिम्नः स्तोत्रं समाप्तम् । शुभमस्तु ।

विषयः । श्रीरामस्य माहात्म्यकीर्त्तनम् ।

No. 181. रामवाणः. By दामोदरः. Substance, country-made paper, 8 x 2½ inches. Folia, 6. Lines, 11 on a page. Extent, 132 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
महादेवपुत्रं गणेशं भजेऽहं
स्मृतेर्यस्य कार्य्याणि सिद्धिं प्रयान्ति ।
कथिलेति (?) शक्तिर्मदानां विनाशी
(?) वशान्तिर्भवेत् यस्य स्तूर्णा प्रसादात् ॥ इत्यादि ।

End. रुद्राभिषेकाय हरिपूजनस्य सामग्रिकं स्वर्णमयं प्रदेयम् ॥

Colophon. श्रीमद्दामोदरकृता वायुर्वेद + × × ।
निर्म्मिते रामवाणेऽस्मिन्नध्यायो नेत्रसंमितः ॥ * ॥

विषयः । ज्वरादीनां निवृत्त्युपायादिकथनम् ॥

No. 182. लिङ्गादिसंग्रहटिप्पनी, By रामनाथविद्यावाचस्पतिः. Substance, country-made paper, 12 × 3 inches. Folia, 10. Lines, 7 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Kālnā, Paṇḍita Kānticandra Tarkavācaspati. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय । अलिङ्गमाल्लेरिति । पाणिनि-वररुचि-चन्द्रप्रभृतिभिर्यानि प्रणीतानि तत्सूत्रैः सनादिभिः प्रत्ययैः केवलस्य प्रत्ययस्यासम्भवात् ॥ इत्यादि ।

End. पूर्वस्य चन्द्रः कामेन पान्थहृष्टिविषं क्षतम् ।
इति दण्डिकाव्ये क्लीवप्रयोगो न्यायसिद्धः ॥

Colophon. इति महामहोपाध्याय—श्रीरामनाथविद्यावाचस्पतिभट्टाचार्यविरचितायां लिङ्गादिसंग्रहटिप्पन्यां कतिपयार्थः समाप्तः ॥ * ॥ लिखितं श्रीमहेशचन्द्रशर्मणा सप्तदशवर्षसमये चण्डिगाछायां स्थित्वा । चौरोऽस्य विष्ठाभुक् ॥

विषयः। लिङ्गादिसंग्रहनामकग्रन्थस्य व्याख्यानम् ।

No. 183. वशिष्ठसंहिता. Substance, country-made paper, 13 × 5 inches. Folia, 9. Lines, 9 on a page. Extent, 250 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Roāil grāma, Bābu Yogīndranātha Rāya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
इत्युक्तो योगिना योगी वशिष्ठेन महात्मना ।
शक्तिः पुत्रो महात्मानं पप्रच्छ पितरं पुनः ॥
यथात्मा निर्गुणः शान्तः सदानन्दोऽजरामरः ।
संसृतिः कस्य तातस्य चेतनाद्यैः कथं स्मृतिः ॥ इत्यादि ।

End. ग्रन्थतामभ्यसेन्नित्यं सर्व्वारम्भविवर्जिताम् ।
भावाभावविनिर्मुक्ता समाहितः ... ... ।
सोऽपि तस्मो विशेषेण मृत्युजिद्युयोगविद्भवेत् ॥ * ॥

Colophon. इति वाशिष्ठे योगकाण्डेऽष्टमोऽध्यायः ॥

विषयः। योगकथनम् । राम्यादियोगे शुभाशुभफलादिकथनञ्च ।

No. 184. वाक्यगोविन्दः. By श्रीरामेश्वरसेनः. Substance, country-made paper, 14×3 inches. Folia, 39. Lines, 7 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, Sana 1210. Place of deposit, District Ḍhākā, Aḍāihājār, Paṇḍita Candrakāuta Vidyālaŋkāra. Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ नमो गणपतये ।

प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम् ।
करोति वाक्यगोविन्दं ग्रन्थं गोविन्दरञ्जकम् ॥

वाक्यलक्षणमाह । लक्षणन्त्वसाधारणवचनं यथा गोः सास्नावत्त्वं । तिङ्सुबन्तचयो वाक्यं । तिङन्तचयो यथा पचति गच्छति पठति । सुबन्तचयो यथा पटुरयं भिक्षुः । उभयचयो यथा काष्ठैः स्थाल्यामोदनं पचति गोविन्दः इत्यन्ये । कारकान्विता क्रिया वाक्यं यथा कुञ्जरं गच्छति गोविन्द इत्यपरे । योग्यताकाङ्क्षासन्निधियुक्तं पदकदम्बकं वाक्यं यथा वृन्दावनं गच्छति कृष्णः इत्यत्र वृन्दावनकर्म्मकगमनानुकूलव्यापारवानाश्रयः कृष्णः । इत्यादि ।

End. अत्र यदि शब्दस्यासत्त्वं कालविशेषणार्थैः असत्त्वञ्च अभावप्रतियोगित्वं ततश्च धात्वर्थं अन्वेति अभावे प्रथमान्तार्थोऽधिकरणत्वे नान्वेति । एवञ्च शिष्टाः स्वहत्त्वभावप्रतियोगित्वे तु भूतातीतकोमल्लीभवनप्रकारकप्रसञ्जनविषयाः तत्कालीन ... ... । एवं यद्ययं निर्वह्निः स्यात् तदा निर्धूमः स्यात् इति ... ... । ... ... यदि वर्षसहस्रमजीविष्यं तदा पुत्रपौत्रमजनिष्यमित्यादिकम् ॥

विनायकसुतः श्रीमान् धन्वन्तरिर्वदाहृतः ।
तत्पौत्रस्तु विष्णुसेनस्तस्माद् भीम्मुरजायत ॥
भीम्मुपुत्रास्त्रयो जाता रविसेनस्तथोज्ज्वलः ।
रामसेनसमाख्यात उज्ज्वलो मध्यमोऽभवत् ॥
तद्भवः श्रीधरस्तस्माच्छान्तिसेन उदाहृतः ।
तद्वंशे नीलकण्ठश्च रामकृष्णस्तदुद्भवः ॥
तद्वंशे जायते श्रीस माधुसूदनिरेव च ।
श्रीरामेश्वरसेनेन कालापल्लीनिवासिना ।
तेन तेनेरितानेन वाक्यगोविन्दसंज्ञकः ॥ (?)

Colophon. इति श्रीरामेश्वरसेनकृते वाक्यगोविन्दव्याकरणे सिद्धान्तरूपाख्यानिरूपणं समाप्तम् ॥ दुर्गा । सन् १२१० साल ॥

विषयः। प्रथमं वाक्यलक्षणम्। तत्र योग्यताकाङ्क्षासत्तिनिरूपणम्। तात्पर्य्यवर्णनम्। पदनिरूपणम्। शब्दभेदकथनम्। शक्तिनिरूपणम्। अभिधालक्षणाव्यञ्जनावृत्तिस्फोटनिरूपणम्। अथ कारकनिरूपणम्। तत्र कर्तृ कर्म्म-करण हेतु सम्प्रदान-अपादान-अधिकरण-निरूपणम्। अथ विशेषण विशेष्यनिरूपणम्। लिङ्गनिरूपणम्। अनुकरणनिरूपणम्। समासनिरूपणम्। नञ्निरूपणम्। एकशेषनिरूपणम्। आख्यातस्य शक्तिनिरूपणञ्चेति॥

No. 185. वाक्यतत्त्वम्. By सिद्धान्तपञ्चाननः. Substance, country-made paper, 13×3 inches. Folia, 27. Lines, 6 on a page. Extent, 550 çlokas. Character, Bengali. Date, ? Place of deposit, District Bariçāla, Mānapāsā, Paṇḍita Govindacandra Çiromaṇi. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय।

आलोक्य तन्त्राणि बहूनि यत्ना-
न्नत्वा च पादौ शिवयोर्गुरूणाम्।
सिद्धान्तपञ्चानन एष धीरो
वाक्यस्य तत्त्वं सुगमं तनोति॥
अत्र वाक्यं मासपक्षतिथिघटितम्॥ इत्यादि।

End. विधिद्वयकल्पने तन्मूलीभूतश्रुतिद्वयकल्पने च गौरवं स्यात्। इति सुक्ष्मसुत्पश्यामः। अन्यत्तु सुधीभिर्यथ्यं विवेचितश्चेदं दशकर्म्मटीकायां अस्माभिः॥

Colophon. इति श्रीसिद्धान्तपञ्चाननभट्टाचार्य्यविरचिते द्वैततत्त्वे वाक्यतत्त्वं समाप्तम्।

विषयः। मासपक्षाद्युल्लेख वाक्यविचारमुखेन वाक्यस्य याथार्थकथनम्।

No. 186. विख्यातविजयः. By लक्ष्मणमाणिक्यदेवः. Substance, Palm-leaf, 14×1½ inches. Folia, 108. Lines, 3 on a page. Extent, 1,300 çlokas. Character, Bengali. Date, Sk. 1677. Place of deposit, Kumillā, Paṇḍita Ānandacandra Tarkavāgīça. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. विक्रान्तिर्मारसिंहौ निशितनखमुखक्षुण्णदैत्येन्द्रवक्षः-
श्वभ्रश्रियोत्तवेगोच्छलितघनरजःशुभ्रपंक्तिश्चवक्त्रौ।

पातु त्वां केशराग्रप्रपदनखशिखायोगपर्य्यन्तलीला-
कर्द्धाधःपीड्यमानप्रशिथिलविचलन्मध्यमग्रस्तजिह्मा ॥

अपि च । दृष्ट्वा सौमित्रिमन्तर्गतनिखिलमनाःशक्तिमुत्क्रान्तधैर्य्यं-
स्पष्टान्त्ययैं तदैव त्रिभुवनविवरोत्सारिभिः शक्रशालैः ।
उत्क्रान्तैवत्समाज्ञै रजनिचरपतेर्द्दिक्पतिभ्यो दृशश्य-
स्तीव्रामोदप्रदं यो वल्लिमुपहृतवान् रामचन्द्रः पुनीताम् ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । अये किमिदमपूर्व्ववस्तुविलोकनादुत्साहपरीवाहं
विगाह्यमान इव संवृत्तोऽस्मि । किञ्चिदुद्ग्रीवमवलोक्य । अहो प्रवलघनघटा-
प्रतिभटदन्तावलपटलघण्टाटोपटङ्कारतिरस्कृतान्यध्वनयो दिग्विभागा वर्त्तन्ते।

प्रविश्य पारिपार्श्विकः । भाव विजयतां विजयतां जगदुत्तरक्षतिमत्तया ।

सूत्रधारः । मारिष विजयसम्भावनाविशेषः प्रस्तूयताम् ।

पारिपार्श्विकः । अद्य खलु कुरुक्षेत्रयात्रासमाहूतसर्व्वोपतिमण्डलमुकुटमाणिक्यभूतैर्भूपतिभि
र्भारतायोधनभूविलोकनप्रादुर्भूतोद्दीपनविभावैः संभूय सन्दिष्टा अस्मद्-
गुरवो मनोहरमिश्राः यत् त्वं मनोहरतया विश्रुतोऽसि तदुत्साहस्थायि-
प्रबन्धप्रयोगविधानतया इतोऽस्माभिर्नामार्थानुसारिणीं क्रियां प्रतिपाद-
यस्वेति ।

पारिपार्श्विकः । तदनुकारी कतमः प्रबन्धोऽनुसन्धीयते सतीर्थ्यप्रतीक्षेण ।

सूत्रधारः । यादृक् समुचितोऽयं समावेशः ।

प्रेक्षावत्परितोषनिस्तुषमहामाणिक्यरत्नाकरः
प्राक् सत्पूरुषपौरुषोत्करकथाम्नोतस्ततीभूधरः ।
दृप्यद्वारवधातुरीमधुकरीप्रागल्भ्यपुष्पाकरः
श्रीमल्लक्ष्मणभूपतेरभिनयस्तादृक् प्रबन्धोत्तरः ॥

पारिपार्श्विकः । सानुमोदं । भाव
आश्रया यस्य राजानस्तस्य वीररसस्य चेत् ।
प्रबन्धो भूभुजा बद्धस्तस्मिन्नौपयिकः श्रमः ॥

किञ्च । यद्यपि मद्गीमदनीयमहिम्ना तेनोपनिबद्धानि दृश्यकाव्यानि बहून्यनुवर्त्तन्ते ।
तथापि विशिष्टविशेषणैर्विख्यातविजयं नाम नाटकं कण्ठोत्थमिव सम्भावितं
भावस्य । इत्यादि ।

End. राजा । भगवन् युधिष्ठिरैकशरण ! किमतः परं प्रियमस्ति ।
आजन्मप्रतिकूलतां प्रथितवान् दुर्य्योधनः साम्प्रतं

प्रत्याशातविभङ्गनिश्चितक्षतिः शोकार्णवे मज्जितः ।
विख्यातो विजयः क्षितौ समजनि प्रौढ़प्रतीपक्षया-
प्ययैव द्विरदाश्रयेऽस्मि भवता भद्रासने स्थापितः ॥

तथापीदमस्तु ।

लक्ष्मीनन्दनरेन्द्रनिर्म्मलनयैर्निर्मूलितोपप्लवा
स्तैण्य-स्तेन-कृतघ्न-दुर्जन-शठैः शून्यास्तु सर्व्वंसहा ।
स्थयान्तं भुवि सत्प्रसन्नवचनैराविघ्नविध्वंसनात्
चित्तं चन्द्रकलाकिरीटचरणे स्थेयात् स्थिरं मादृशः ॥
ईदृक् काव्यं प्रणेतुः प्रतिपदमरिपवः सन्तु गोचरस्थाः
श्रोतॄणां पश्यताञ्च प्रथयतु परमाभ्युद्धिमर्द्धेन्दुचूड़ः ।
भूयात् कीर्त्तिर्धनाभिर्दृढ़मभिनयतां प्रत्यहं नर्त्तकानां
श्चाकल्पान्तं प्रबन्धः स्फुरतु कृतधियां कौमुदीवाननेन्दौ ॥

सर्व्वे एवमस्त्विति निष्क्रान्ताः ॥

Colophon. इति श्रीश्रीयुतलक्ष्मणमाणिक्यदेवविरचिते विख्यातविजयनामनाटके परम-मङ्गोत्सवो नाम षष्ठोऽङ्कः ॥ शुभमस्तु १६७७ ।

विषयः। अस्यस्मिन् विख्यातविजयनामनाटके परिस्फुटः कर्णस्य निधनवृत्तान्तः । तत्र प्रथमेऽङ्के सहदेवस्य श्रीकृष्णानयनाय द्वारकागमनं श्रीकृष्णानयनञ्च । द्वितीयेऽङ्के कर्णशल्ययो-र्वाग्विरोधः । नकुलेन सह कर्णस्य युद्धं नकुलस्य निग्रहश्च । तृतीयेऽङ्के कर्णवधाय पाण्ड-वानामुद्योगः । चतुर्थेऽङ्के कर्णार्जुनयोर्द्वैरथयुद्धारम्भः । पञ्चमेऽङ्के गाण्डीवनिन्दया युधिष्ठिरं प्रति धनञ्जयस्य क्रोधः श्रीकृष्णेन तस्योपशमनं कर्णनिधनञ्च । षष्ठेऽङ्के कर्णनिधनादान-न्दितानां पाण्डवानामानन्दप्रकाश इति ।

No. 187. विभक्तितत्त्वम् . Substance, country-made paper, 14 × 5 inches. Folia, 38. Lines, 12 on a page. Extent, 1,500 çlokas. Character, Bengali. Date, Sana. 1235. Place of deposit, District Ḍhākā, Vidgā, Paṇḍita Īçānacandra Smṛtipañcānana. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य गौरीममलात्मधाम्नीं
गुरुञ्च मोचैकनिदानमादौ ।

विभक्तितत्वार्थमिदं विचित्रं
तनोति हेतोः कृपया हि धातुः ॥
प्रथमा । व्याकरणं हि शक्तिग्राहकम् । इत्यादि ।

End. नामलक्षणं नाम्ना पदेनेति यत्र निर्देशस्तत्र पदेन च समास इति ॥ ० ॥

Colophon. इति विभक्तितत्वं समाप्तम् ॥ सन १२९५ ।

विषयः । प्रथमादिविभक्तीनामर्थादिनिरूपणम् ।

No. 188. विरुद्धजागदीशी. Substance, country-made paper, 18×3½ inches. Folia, 17. Lines, 9 on a page. Extent, 800 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Khaḍāra grāma Kurāna, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose. Correct.

Beginning. श्रीदुर्गा । मणिकृन्मते सर्व्वमनित्यं प्रमेयत्वादित्यादेर्व्वस्तुत्वात् तत्रातिव्याप्त्य-भिधानमसङ्गतमत आह सम्प्रदाय इति + × × सर्व्वमनित्यं प्रमेयत्वात् भूर्नित्या गन्धवत्त्वादित्यादावसाधारणानुपसंहारिणावित्यर्थः अग्रे सिद्धान्ते ननु निश्चितत्वं यदि साध्यवद्भिन्नेऽप्यन्वितं तदानुपसंहार्य्यौ व्यावर्त्त इत्या-दिनापि सपक्षगतत्वांशस्य सार्थकत्वशङ्का विरुध्येत साध्यवद्भिन्नत्वनिश्चया-प्रसिद्धौ वानुपसंहारितादशायामतिव्याप्त्यसम्भवादतस्तदनुरोधेन साध्यवन्मा-त्रान्वयितया निश्चितत्वं व्याचष्टे ॥ इत्यादि ।

End. विरुद्धस्थले बाधस्वरूपासिद्ध्योरन्यतरस्यावश्यकत्वात् तत्र क्वाचित्कत्वासम्भ-वादाह बाधेति हेतुविशेषणासिद्ध्यादिरपि क्वचित् साङ्कर्य्यसम्भवादात्रया-सिद्ध्यादिपदस्योपलक्षणपरत्वमित्याशयेनाह अन्यसङ्करस्त्विति । ननु विरु-द्धहेतौ बाधासिद्ध्योरन्यतरस्यावश्यकत्वे तदेवास्तु दूषणं कृतं विरोधेनेत्यत आह ज्ञानेति ॥
श्रीकालीपदपङ्कजेऽस्तु सततं चेतो मदीयं मम
कायः क्लेशसहोऽस्तु तत्र परमे पूजाविधौ सन्ततम् ।
वाचस्तद्गुणराशिगाङ्गसलिले मग्नाः सदा सन्तु मे
सोऽहं तन्मकरन्दसुन्दरसुधां नित्यं पिबेयं मुदा ॥

Colophon. इति विषयवादजागदीशी समाप्ता । श्रीगुरुं वन्दे नित्यम् ।

विषयः । अनुमानचिन्तामणयन्तर्गतपक्षताभागीयविषयताप्रन्थस्य जगदीशकृता टीका ॥

No. 189. विश्वामित्रसंहिता. Substance, country-made paper, 12 × 3 inches. Folia, 8. Lines, 9 on a page. Extent, 2,500 çlokas. Character, Bengali. Date, ? Place of deposit, District Mānabhūma, Post Office Raghunāthapura Vēḍogrāma, Paṇḍita Veṇkaṭa, Varadācāryya Gosvāmī. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीहरिः । नमो गणेशाय ।
श्रीदेव्युवाच ।
देवदेव जगन्नाथ सर्व्वज्ञ सकलेश्वर ।
भैरवानन्द चिन्नाथ सर्व्वप्रिय महेश्वर ।
कीदृशेन सर्व्वसिद्धिः स्यात् केनोपायेन भैरव ॥ इत्यादि ।

End. अजरे अमरे देवि ब्रह्मयोनि नमोऽस्तु ते स्वाहा ।
नमस्कारं समर्पयामि । इति सूत्रमन्त्रं चिचारं जपित्वा इत्याह भगवान्
बौधायनः ॥ ० ॥

Colophon. इति विश्वामित्रसंहितायां नानाप्रयोगयोगो नाम दशमोऽध्यायः ॥ ० ॥

विषयः । मन्त्रसाधनादिनिरूपणम् । विघ्नेश्वरादिस्तोत्रम् । प्राणप्रतिष्ठादिनिरूपणम् । मातृकान्यासादिनिरूपणम् । प्रयोगादिश्चेति ।

No. 190. विष्णुधर्म्मोत्तरम्. (काण्डत्रयात्मकम्). Substance, country-made paper, 12 × 7 inches. Folia, 495. Lines, 13 on a page. Extent, 16,000 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Generally correct.

प्रथमकाण्डस्य ।

Beginning. श्रीगणेशाय नमः ।
नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

ॐ कृतवर्म्मा तथा भोजः चेतो माहिष्मतीपतिः ।
कुलिन्दः सर्व्वदमनो मातुरिश्चन्द्रवर्धनः ॥
पद्मनाभः सुबाहुश्च नन्दीशो द्वारकापतिः ।
चातिसारश्चित्रधन्वा सर्व्वो वायुरथस्तथा ॥
इनिङ्गः कुसुमापीड़ो + + + समरप्रियः ।
शम्भुः किरातराजश्च × × × नन्दिवर्द्धनः ॥
एते चान्ये च राजानः शतशो बहुदक्षिणाः ।
सम्पूर्णचन्द्रवदना नागराजः पुरोरवः ॥
उपासाञ्चक्रिरे वज्रं सिंहासनगतं नृपाः ।
बहुभिर्भूमिपालैश्च तथा वज्रेण भूभुजा ॥
युधिष्ठिरेण च सभा शोभिता शुशुभे सदा ।
राजानस्ते ततो दृष्ट्वा ऋषीन् दुर्लभदर्शनान् ॥
ब्रह्मलोकसमात्मानममन्यन्त यशोभृतः ।
ऊचुस्ते प्रणयाद् वाक्यं वज्रं भूरिसत्वदम् ॥
दुर्लभं दर्शनं यत्र ऋषिसङ्गे महीक्षिताम् ।
तस्मात् त्वं राजशार्दूल प्रष्टुमर्हो द्विजोत्तमम् ॥
वैष्णवान् विविधान् धर्म्मान् सरहस्यान् ससङ्ग्रहान् ।
इत्येवमुक्तो वज्रस्तु त्यक्त्वा सिंहासनं तदा ॥
वज्रन्तु प्राञ्जलिं दृष्ट्वा सर्व्व एव नराधिपाः ।
वरासनान् विहायाथ तस्थुः प्राञ्जलयस्तदा ॥

वज्र उवाच ।

भवद्भिर्नृपसिंहाश्च त्वर्थिता ये द्विजाः श्रुताः ।
अनुग्रहार्थं भूपानां जगतो हितकाम्यया ॥
भवन्तो वक्तुमर्हन्ति विष्णुधर्म्मान् सनातनान् ।
तस्मात् × + युगे नास्ति भवतां दर्शनं नृपैः ॥

ऋषय ऊचुः ।

उत्तिष्ठ त्वं महीपाल त्वत्कृत समागमम् ।
अवश्येऽपि वयन्तस्य विशेषेणार्थिनो नृप ॥
वज्र ते संशयान् सर्व्वान् छेत्स्यत्येष महामुनिः ।
इत्येवमुक्त्वा वज्रन्ते ऋषयस्तपसि स्थिताः ॥

मार्कण्डेयमथोचुस्ते ब्रूहि धर्म्मान् महीपतेः ।
वैष्णवान् विविधान् धर्म्मान् लोका + परायणाः ।
तथा पार्थिवसङ्गस्य संशयान् मनसि स्थितान् ॥ इत्यादि ।

द्वितीयकाण्डस्य प्रारम्भवाक्यम् ।

ॐ स्वस्ति प्रजाभ्यः । ॐ गणेशाय नमः ।
ॐ गुरवे नमः । ॐ ग्रन्थश्रीविष्णुधर्म्मोत्तरेषु द्वितीयकाण्डं लिख्यते ॥
ॐ नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥

ॐ वज्र उवाच ।

ॐ धर्म्मो भगवता प्रोक्तो विजये भरतस्य मे ।
यच्छ्रुत्वा वेद्मि चात्मानं ब्रह्मन् विगतकल्मषम् ॥
सुख + च हृद्यच कथासारस्तु भार्गव ।
कथाश्च विविधाः प्रोक्तास्तत्प्रसङ्गात् तथा त्वया ॥ इत्यादि ।

तृतीयकाण्डस्य प्रारम्भवाक्यम् ।

ॐ नमो भगवते वासुदेवाय ।

वज्र उवाच ।

किं कर्त्तव्यं मनुष्येण किं कुर्व्वन् सुखमेधते ।
अस्मिन् लोके परे चैव केनायाति महत् सुखम् ॥

मार्कण्डेय उवाच ।

अन्तर्वेदि बहिर्वेदि पुरुषेण विजानता ।
देवतापूजनं कार्य्यं लोकद्वयमभीप्सता ॥ इत्यादि ।

End. प्रथमकाण्डस्य ।

एतत् तदुक्तं विजयं मया ते रणाजिरे राघवनन्दनस्य ।
श्रोतव्यमेतन्नियमेन पुंसां विज्ञानधर्म्मार्थयशोऽभिरामम् ॥

Colophon. इति श्रीविष्णुधर्म्मोत्तरेषु मार्कण्डेय-वज्रसंवादे श्रीरामचन्द्रभरतसमागमो नाम एकोनसप्ततितमोऽध्यायः । १६९ । समाप्तश्चायं प्रथमः काण्डः ।

End. द्वितीयकाण्डस्य ।

धन्विनो रक्षणार्थाय धन्विंशोऽपि वियोजयेत् ।

कार्य्यं सर्व्वमसम्बाधं तथा तोरणरक्षणम् ॥
योजना च तथा कार्य्या यथा न स्याद् व्यतिक्रमः ।
सम्बाधश्च तथा राम न भवेच्च परस्परम् ।
तथाच सर्व्वमुक्तं संक्षेपतो भार्गववंशमुख्य ।
एतत्तु कृत्वापि नरः स युद्धे जयत्यवश्यं समुपार्जिते च ॥

Colophon. इति श्रीविष्णुधर्म्मोत्तरेषु मार्कण्डेय-वज्रसंवादे रामं प्रति पुष्करोपाख्याने धनुर्वेदे षष्ठोऽध्यायः । द्वितीयं काण्डं समाप्तम् ।

End. तृतीयकाण्डस्य ।

यथेष्टमूर्त्तिगं देवं सर्व्वकालमथार्च्चयेत् ।
तस्य सर्व्वा तिथि र्यस्मान्नक्षत्रे जगद्गुरोः ॥
स सर्व्वशक्तिर्भगवान् महात्मा
पूज्यः सदा भक्तिमुपेत्य राजन् ।
सम्पूजनं देववरस्य तस्य
भक्तिः प्रधाना न हि कालयोगः ॥

Colophon. इति श्रीविष्णुधर्म्मोत्तरे मार्कण्डेय-वज्रसंवादे कालनियमपूजा समाप्ता ॥ तृतीयकाण्डः समाप्तः ।

विषयः । इति श्रीविष्णुधर्म्मोत्तरे मार्कण्डेय-वज्रसंवादे प्रथमकाण्डे कथाप्रस्तावनं नाम प्रथमोऽध्यायः । हिरण्यगर्भोत्पत्तिर्नाम २ योऽध्यायः । वराहप्रादुर्भावो नाम ३ । पातालवर्णनम् ४ । लोकवर्णनम् ५ । द्वीपविभागवर्णनम् ६ । जम्बूद्वीपवर्णनम् ७ । भारतवर्षवर्णनम् ८ । जनपदवर्णनम् ९ । सप्तगिर्य्युद्भवनदीवर्णनम् १० । हिमवद्नदीवर्णनम् ११ । कोशलवर्णनम् १२ । अयोध्यावर्णनम् १३ । इक्ष्वाकुवर्णनम् १४ । मधुकैटभवधोपाख्यानम् १५ । धुन्धुमारोपाख्यानम् १६ । सगरोपाख्यानम् १७, १८ । गङ्गावर्णनम् १९ । जह्नुकन्योपाख्यानम् २० । त्रिविक्रमोपाख्यानम् २१ । गङ्गाव्याप्तिर्नाम २२ । अर्ज्जुनोपाख्यानम् २३ । वृत्रवधोपाख्यानम् २४ । दत्तात्रेयोपाख्यानम् २५ । पृथ्वीप्राक्लोकगमनम् २६ । ब्रह्मलोकगमनम् २७ । हरेर्दर्शनम् २८ । मण्डलदर्शनम् २९ । आदित्यदर्शनम् ३० । वनदाहो नाम ३१ । गाङ्गवायुरुत्पत्तिर्नाम ३२ । चरुविपर्य्यासो नाम ३३ । कुशिकवरप्रदानम् ३४ । रामोत्पत्तिर्नाम ३५ । रामस्य माहेश्वरादेशो नाम ३६ । औत्पातिकं नाम ३७ । शुक्रशाल्वसंवादः ३८ । स्वप्नाध्यायो नाम ३९ । समुद्रमथने लक्ष्मीसम्बोधनम् ४० । अमृतमथनम् ४१ । अमृतविभागो नाम ४२ । राहुवधो नाम ४३ ।

साल्ववाक्यं नाम ४४ । भार्गवरामयुद्धे साल्वनिर्याणम् ४५ । साल्वसेनादुर्निमित्तदर्शनम् ४६ । युद्धे भार्गवरामदर्शनम् ४७ । साल्वसैन्यवधो नाम ४८ । साल्ववधो नाम ४९ । अस्त्रप्राप्ति-र्नाम ५० । परशुरामोपाख्याने शङ्करगीतासु रामप्रश्नः ५१ । भार्गवरामप्रश्ने शङ्करगीतासु विष्णुं प्रति शङ्करचिन्तनम् ५२ । रामं प्रति शङ्करगीतासु श्वराहप्रादुर्भावे हिरण्याक्षवधो नाम ५३ । हिरण्यकशिपुवधे नरसिंहप्रादुर्भावो नाम ५४ । रामं प्रति शङ्करगीतासु बलिच्छलने वामनप्रादुर्भावो नाम ५५ । शङ्करगीतासु विभूतिर्नाम ५६ । भक्तिफलं नाम ५७ । भक्तिलक्षणं नाम ५८ । उपवासफलं नाम ५९ । उपवासविधिर्नाम ६० । अभि-गमनकालो नाम ६१ । उपादानकरणं नाम ६२ । इज्याकालविधिर्नाम ६३ । स्वाध्यायकालो नाम ६४ । शङ्करगीता समाप्ता ६५ । रामं प्रति शङ्करानुशासनम् ६६ । वैष्णवधनुष्प्रादुर्भावो नाम ६७ । श्मशाननगरदर्शनम् ६८ । वरुणादिदर्शनं नाम ६९ । अयःशङ्कुदानववधो नाम ७० । वरुणस्तोत्रं ७१ । अर्कादिमासवर्णनं नाम ७२ । कालसंख्यानम् ७३ । युगान्तवर्णनम् ७४ । जग-द्वस्थावर्णनम् ७५ । कल्पान्तवर्णनम् ७६ । महाकल्पवर्णनम् ७७ । बालप्रभाववर्णनम् ७८ । पद्मनाभोपाख्यानम् ७९ । शातकालवर्णनम् ८० । कल्पसादृश्यवर्णनम् ८१ । सूक्ष्म (?) निर्देशो नाम ८२ । कालावयवदैवतं नाम ८३ । षड्वर्गनिर्णयो नाम ८४ । ग्रहशुभाशुभनिर्णयो नाम ८५ । प्रतिदेशं पीडाज्ञानं नाम ८६ । प्रतिपुरुषं शुभाशुभनिर्णयो नाम ८७ । ग्रह-क्षेमफलनिर्देशो नाम ८८ । नवनक्षत्रस्थानं नाम ८९ । ग्रहार्चपूजाविधिर्नाम ९० । ग्रहनक्षत्र-स्नानविधिर्नाम ९१ । अग्निकार्य्ये प्राक्तनोत्तरतन्त्रविधिर्नाम ९२ । ग्रहपूजाविधानम् ९३ । मण्डल-कल्पना ९४ । ग्रहार्चावाहनमन्त्राध्यायो नाम ९५ । अनुलेपनं नाम ९६ । ग्रहार्चपुष्पदेयाध्यायो नाम ९७ । ग्रहार्चधूपदेयाध्यायो नाम ९८ । ग्रहनक्षत्रनैवेद्यदेयाध्यायो नाम ९९ । प्रतिग्रह-र्क्षदेयादेशो नाम १०० । होमद्रव्यविभागो नाम १०१ । होममन्त्रकथनम् १०२ । दक्षिणाविधा-नम् १०३ । प्रति + + आशीर्वादाध्यायो नाम १०४ । ग्रहशान्तिर्नाम १०५ । ग्रहसम्भवकथ-नम् १०६ । ग्रहर्क्षादिसम्भवो नाम १०७ । ध्रुवोद्भवो नाम १०८ । ध्रुवाभिषेको नाम १०९ । दाक्षा-यण्युत्पत्तिर्नाम ११० । भृगुवंशकीर्त्तनं नाम १११ । अङ्गिरोवंशकीर्त्तनं नाम ११२ । अत्रिवंशानु-कीर्त्तनं नाम ११३ । विश्वामित्रवंशानुकीर्त्तनं नाम ११४ । कश्यपवंशानुकीर्त्तनं नाम ११५ । वशिष्ठवंशानुकीर्त्तनं नाम ११६ । पराशरवंशानुकीर्त्तनं नाम ११७ । अगस्त्यवंशानुकीर्त्तनं नाम ११८ । धर्म्मवंशानुकीर्त्तनं नाम ११९ । आदित्योत्पत्तिर्नाम १२० । दित्यवंशानुकीर्त्तनं नाम १२१ । अग्निस्तोत्रं नाम १२२ । वायुस्तोत्रं नाम १२३ । भगवद्दर्शनं नाम १२४ । कालनेमिवधो नाम १२५ । वराहप्रादुर्भावो नाम १२६ । माधवोत्पत्तिर्नाम १२७ । कश्यपसर्गो नाम १२८ । उर्व्वशीसम्भवो नाम १२९ । उर्व्वशी-रम्भासंवादो नाम १३० । क्रीड़ावतारणं नाम १३१ । चन्द्रोदयवर्णनं नाम १३२ । उर्व्वशी-पुरूरवःसमागमो नाम १३३ । उर्व्वशीसम्भोगो नाम १३४ । पुरूरवःप्रलापो नाम १३५ । त्रेताग्न्युत्पत्तिर्नाम १३६ । पुरूरवःस्वर्गप्राप्तिर्नाम १३७ । पितृगण-

कीर्त्तनं १३८ । श्राद्धोत्पत्तिर्नाम १३९ । श्राद्धविधिः १४० । श्राद्धद्रव्यविनिर्णयः १४१ । श्राद्धकाल-निर्णयः १४२ । पात्रापात्रपरीक्षा १४३ । श्राद्धदेशानुकीर्त्तनं १४५ । वृषभलक्षणं नाम १४६ । वृषोत्सर्गविधिः १४७ । पुरूरवस्तपोवर्णनं १४८ । ऐरावतीवर्णनं १४९ । हिमवद्वर्णनं १५० । मद्दर्ध्याश्रमवर्णनं १५१ । आयतनवर्णनं १५२ । अप्सरोजलक्रीडावर्णनं १५३ । पुरूरवसोऽभि-दर्शनं १५४ । स्वपनचकरणं नाम १५५ । पुरूरवश्चरितवर्णनं १५६ । राज्यप्रदाद्वादशीविधिः १५७ । प्रकामाद्वादशीविधिः १५८ । शुक्लपक्षद्वादशीविधिः १५९ । कृष्णपक्षद्वादशीविधिः १६० । श्रवणाद्वादशीप्रशंसा १६१ । श्रवणाद्वादशीकथामाहात्म्यम् १६२ । तिलद्वादशीप्रशंसा १६३ । तिलद्वादशीकथा १६४ । गायत्रीमाहात्म्यं १६५ । दीपदानप्रशंसा १६६ । दीपमाहात्म्ये ललितकोपाख्यानं १६७ । पुष्पाहरणफलं १६८ । उपलेपनफलं १६९ । मान्धात्राख्यानं नाम १७० । पुरुषस्वरूपवर्णनं १७१ । प्रादुर्भावस्वरूपवर्णनं १७२ । अनन्तव्रतमाहात्म्यं १७३ । मासनक्षत्रपूजनं १७४ । शक्रचरिताख्यानं १७५ । शक्रं प्रति शाम्बरायणीयाख्ये प्रथमं मन्वन्तरं नाम १७६ । शक्रं प्रति शाम्बरायणोपाख्याने द्वितीयमन्वन्तरकथा नाम १७७ । तृतीयमन्वन्तरं नाम १७८ । चतुर्थ-तामसवर्णनं नाम १७९ । इन्द्रशाम्बरायणीकथायां पञ्चमरैवतमन्वन्तरवर्णनं नाम १८० । षष्ठ-मन्वन्तरवर्णनं नाम १८१ । सप्तमवैवस्वतमन्वन्तरं नाम १८२ । अष्टममन्वन्तरवर्णनं नाम १८३ । नवममन्वन्तरवर्णनं नाम १८४ । दशममन्वन्तरवर्णनं नाम १८५ । एकादश-द्वादश-त्रयोदश-चतुर्दशमन्वन्तरवर्णनं नाम १८६, १८७, १८८, १८९ । अनेकविष्णुप्रादुर्भावो नाम १९० । शक्र-शाम्बरायणीकथासमाप्ति १९१ । स्तुतिमाहात्म्यं १९२ । गन्धर्व्वयोर्गजनक्रीकरणं १९३ । गजेन्द्र-मोक्षणं १९४ । विष्णुपञ्जरस्तोत्रं १९५ । बालबाधाप्रशमनस्तोत्रं १९६ । यक्षोत्पत्तिर्नाम १९७ । वैश्रवंशवर्णनं १९८ । यवनोत्पत्तिर्नाम १९९ । प्रह्लादवंशानुकीर्त्तनं २०० । शैलूषपूजावर्णनं २०१ । भरतप्रस्थानं नाम २०२ । आनुयात्रिकं नाम २०३ । भरतनिर्याणं नाम २०४ । प्रयाणकवर्णनं नाम २०५ । गङ्गोत्तारो नाम २०६ । राजगृहागमनं नाम २०७ । राजगृहप्रवेशो नाम २०८ । आजाविकं नाम २०९ । गन्धर्व्वसभाक्षोभो नाम २१० । गन्धर्व्वगर्ज्जनं नाम २११ । शैलूषं प्रति + + नुशासनं नाम २१२ । अगस्त्यमाहात्म्यं २१३ । समुद्रवर्णनं २१४ । दैवतप्रयोजनं नाम २१५ । राक्षससेनानिर्याणं २१६ । साक्षिराक्षसवधः २१७ । राक्षसपातालप्रवेशो नाम २१८ । वैश्रव-णाख्यानं २१९ । रावणवरप्राप्तिर्नाम २२० । रावणभूर्लोकविजयो नाम २२१ । स्वर्गविजयो नाम २२२ । त्रयोविंश-चतुर्विंशाध्यायौ खण्डितौ । त्रिपुरदाहवर्णनं २२५ । अन्धकजयः २२६ । मातृबाधाप्रतिषेधो नाम २२७ । कृत्तिकापूजा नाम २२८ । षड्यष्ठीयमाहात्म्यं २२९ । पक्षो-त्पत्तिर्नाम २३० । पक्षलिङ्गवर्णनं २३१ । पक्षवधप्रतिषेधो नाम २३२ । महिषासुरवधः २३३ । देवयज्ञविध्वंसो नाम २३४ । दक्षयज्ञविध्वंसो नाम २३५ । कामदाहो (?) नाम २३६ । विष्णु-कवचं २३७ । वह्निराघवसमागमो नाम २३८ । रावणसत्रापुष्पदर्शनं २३९ । यक्षावर्णनं २४० ।

ग्रीष्मवर्णनं २४१। लवणवधे शत्रुघ्नं प्रति रामानुशासनं २४२। प्राहट्-शरद्-हेमन्तवर्णनं २४३। २४४। २४५। शत्रुघ्नप्रस्थानं २४६। लवणवधः २४७। पुलस्त्यवंशवर्णनं २४८। राजकीर्त्तनं २४९। शक्राभिषेकवर्णनं २५०। गजोत्पत्तिर्नाम २५१। वानरोत्पत्तिर्नाम २५२। गजवानरयुद्धं २५३। गन्धर्व्वप्रेषणं २५४। विरञ्चिपीवर्णनं २५५। २५६। निश्शेषभोगवर्णनं २५७। गन्धर्व्वसैन्यनिर्याणं २५८। २५९। सङ्कुलयुद्धं नाम २६०। द्वन्द्वयुद्धं नाम २६१। तृतीयदिवसयुद्धं नाम २६२। चतुर्थदिवसयुद्धं नाम २६३। पञ्चमदिवसयुद्धं नाम २६४। षष्ठदिवसयुद्धवर्णनं २६५। श्रीशैलूषवधः २६६। रणभूमिवर्णनं २६७। गन्धर्व्वस्त्रीविलापो नाम २६८॥०॥ इति श्रीविष्णुधर्म्मोत्तरेषु मार्कण्डेय-वज्रसंवादे श्रीरामचन्द्र-भरतसमागमो नाम २६९ अध्यायः॥ इति प्रथमकाण्डम्॥ इति श्रीविष्णुधर्म्मोत्तरेषु द्वितीयकाण्डे मार्कण्डेय वज्रसंवादे रामं प्रति पुष्करगृहागमनं नाम प्रथमोऽध्यायः॥ रामं प्रति पुष्करवाक्येषु राजप्रशंसा नाम २ अः। राजलक्षणं नाम ३। साम्वत्सरिकलक्षणं नाम ४। इति पञ्चमोऽध्यायः॥ मन्त्रिलक्षणं ६। महिषीलक्षणं ७ अः। पुरुषलक्षणं ८। स्त्रीलक्षणं ९। हस्तिलक्षणं १०। अश्वलक्षणं ११। चामरलक्षणं १२। छत्रलक्षणं १३। भद्रासनलक्षणं १४। रत्नलक्षणं १५। चापवाणलक्षणं १६। खड्गलक्षणं १७। राज्याभिषेककालो नाम १८। मन्त्रनिर्द्देशो नाम १९। ऋत्विक्लक्षणं २०। राज्ञोऽभिषेकविधिः २१।२२। तीर्थफलवर्णनं २३। २४। २५। षड्वर्गसम्पत्तिर्नाम २६। अगदङ्काराध्यायो नाम २७। राजरक्षाध्यायः २८। वास्तुविद्या २९। हस्त्यायुर्वेदो नाम ३०। सुरपूजादिमाहात्म्यं ३१। ब्राह्मणप्रशंसा ३२। साध्वीमाहात्म्यं ३३। स्त्रीधर्म्माध्यायः ३४। स्त्रीदेवतापूजनाध्यायः ३५। सावित्र्युपाख्यानम् ३६—४१। गोमाहात्म्यं ४२। गवां चिकित्सितं ४३, ४४। अश्वप्रशंसा ४५। अश्वचिकित्सा ४६। अश्वानां शान्तिकर्म्मविधानं ४७। गजप्रशंसा ४८, ४९। गजानां शान्तिकर्म्मविधिर्नाम ५०। पुरुषप्रशंसा ५१। बालतन्त्रं नाम ५२। रोहिणीस्नानं नाम ५३। पुष्यस्नानं ... पुचीयासप्तमीव्रतं ५४। पुचीयाष्टमीव्रतं ५५। ५६। शतभिषास्नानं नाम ५७। आरोग्यद्वितीया नाम ५८। आरोग्यप्रतिपन्नाम ५९। आरोग्यव्रतं ६०। राजधर्म्मः ६१। अन्तःपुरचिन्ता नाम ६२। भोज्यकल्पनं नाम ६३। गन्धयुक्तिर्नाम ६४। राजधर्म्माध्यायो नाम ६५। पुरुषकाराध्यायो नाम ६६। सामविधिर्नाम ६७। भेदविधिर्नाम ६८। दानविधिर्नाम ६९। उपायनचतुष्टये दण्डप्रशंसा ७०॥ ७१, ७२ अध्यायौ न दृष्टौ॥ प्रायश्चित्ताध्यायः ७३। रहस्यप्रायश्चित्ताध्यायः ७४। शौचविधिः ७५। (७६ अध्यायः खण्डितः) प्रेतक्रियाध्यायः ७७। वर्णधर्म्माध्यायः ८०। शङ्करधर्म्माध्यायः ८१। आपद्धर्म्माध्यायः ८२। पूर्व्वाषाढ़ास्नानं नाम ८३। मूलास्नानं नाम ८४। संस्काराध्यायः ८५। ब्रह्मचर्य्याश्रमाध्यायः ८६। धर्म्माध्यायः ८७। स्नानाध्यायः ८८। आचाराध्यायः ८९। देवकर्म्माध्यायः ९०। ९१। (९२। ९३। ९४ अध्यायाः खण्डिताः) गृहस्थधर्म्माध्यायः ९५। तन्तिकास्नानं ९६। शत्रुनाशनकर्म्माध्यायः ९७। स्नानसाधारणं नाम ९८।

नक्षत्रस्नानं नाम ९९ । अभिजित्स्नानं नाम १०० । तुष्टिकारकश्रवणास्नानं नाम १०१ । जन्मर्क्ष-स्नानं नाम १०२ । बार्हस्पत्यस्नानं नाम १०३ । दिक्पालस्नानं नाम १०४ । विनायकस्नानं नाम १०५ । महेश्वरस्नानं नाम १०६ । भगवद्विष्णुचतुर्विधपुरुषरूपपादोदकस्नानं नाम १०७ । १०८ । मणिबन्धाध्यायः १०९ । काम्यफलाध्यायः ११० । पापनिश्चयो नाम १११ । गर्भसंक्रान्तिर्नाम । (इतः परमध्यायस्य संख्या नास्ति) भोगदेहवर्णनं नाम । सम्भवाध्यायः । शरीरविषयो नामाध्यायः । यममार्गवर्णनम् । निरयगामिवर्णनम् । नरकवर्णनम् । तिर्य्यग्योनिवर्णनम् । नारकिचिह्न (?) वर्णनम् । दुर्गतितरणम् । कृच्छ्राध्यायः । ऋग्विधानम् । यजुर्विधानम् । सामविधिः । अथर्व्वविधिः । श्रीसूक्तमाहात्म्यम् । पुरुषसूक्तमाहात्म्यम् । वाणप्रश्नाध्यायः । चतुर्थाश्रमवर्णनम् । शान्तिकर्म्म । अर्चाविकारोपशमनं अग्निवैकृतं दृष्टवैकृतं दृष्टिवैकृतं स्त्रीप्रसूवैकृतं नामाध्यायाः । अश्वादिप्रसूतिवैकृतोपशमनम् । मृगपक्षिवैकृतम् । उत्पातप्रशमनम् । मण्डलचिन्ताध्यायः । उपेक्षाध्यायः । इन्द्रजालाध्यायः । षड्गुणाध्यायः । आजस्रिकाध्यायः । साम्वत्सरिकाध्यायः । चातुर्म्मास्यविधिः । शक्रध्वजोत्पत्तिः । शक्रध्वजोत्सवः । इन्द्रध्वजगमनम् । शक्रस्तवः । भद्रकालीपूजा । अश्वमन्त्रः । छत्रमन्त्रः । ध्वजमन्त्रः । हस्तिमन्त्रः । चापमन्त्रः । हतकाम्बल—साम्वत्सराभिषेक, माङ्गल्य—शकुन—अङ्गविद्या—शाखा—जातक—उपकरण-तिथिनक्षत्रप्रकरण-उदयास्तप्रकरणाध्यायाः । यात्राधिकार—यात्राविधि—साङ्ग्रामिकाध्यायाः । इति द्वितीयं काण्डं समाप्तम् । चित्रसूत्रे प्रथमोऽध्यायः । इति श्रीविष्णुधर्म्मोत्तरेषु तृतीये काण्डे शब्दाध्यायः । इति छन्दोविधि—तन्त्रयुक्तिर्नामाध्यायः । इति अभिधानकोशे प्रथम—द्वितीय—तृतीयपरिच्छेदाः । इति अभिधानकोशे स्त्रीलिङ्गनिर्देशश्चतुर्थः परिच्छेदः । इति अभिधानकोशे पुंवर्गनिर्देशः पञ्चमः परिच्छेदः । इति अभिधानकोशे नपुंसकविधिर्नाम षष्ठः परिच्छेदः । इति श्रीविष्णुधर्म्मोत्तरेष्वलङ्काराध्यायः । इति महाकाव्यलक्षणं प्रहेलिकालक्षणम् । सामान्याध्यायः, शयनासनस्थानकाध्यायः, आसीनकाध्यायः, उत्थितस्थानकाध्यायः, आङ्गिकाध्यायः, उपाङ्गाभिनयाध्यायः, हस्ताध्यायः, + + अभिनयाध्यायः, सामान्याभिनयाध्यायः, प्रचारो नामाध्यायः, नाट्यरसो नामाध्यायः, रहस्यमुद्राध्यायः, मुद्राध्यायः । इति श्रीविष्णुधर्म्मोत्तरेषु तृतीयकाण्डे नृत्यसूत्रं समाप्तम् । प्रमाणाध्यायः । चित्रसूत्रे सामान्यमानम् । प्रतिमालक्षणम् । रङ्गव्यतिकराध्यायः नर्त्तनाध्यायः, कूपाध्यायः । इति वज्रनारदसंवादे नासत्य + + निर्म्माणम् । इति यम रूप (?) निर्म्माणं नाम । इति वरुण + + निर्म्माणं नाम । इति वज्रवैश्रवण + + वर्णनं नाम । इति वज्रध्वज + + वर्णनं नाम । इति वज्रगौरीश्वर + + निर्म्माणं नाम । इति वज्र अग्नि + निर्म्माणं नाम । इति वज्र + + निर्म्माणं नाम । इति वज्रवायु + निर्म्माणं नाम । इति वज्र आकाशनिर्म्माणं—वज्रब्रह्म ... ... निर्म्माणं—वज्र आदित्य ... ... निर्म्माणं—वज्रदेवता ... ... निर्म्माणं—वज्रव्योमनिर्म्माणं—वज्रनरनारायणरूप + + वर्णनं

नामाध्यायः । इति श्रीरामं प्रति पुष्करोपाख्याने नृसिंहरूपनिर्म्माण—कपिलरूपनिर्म्माण—वराहरूपनिर्म्माण—हयशिरोरूपनिर्म्माण—पद्मरूपनिर्म्माण—लक्ष्मीरूपनिर्म्माण—विश्वरूपनिर्म्माण—देवरूपनिर्म्माणं नामाध्यायः । इति श्रीरामं प्रति पुष्करोपाख्याने प्रासादलक्षण—सर्व्वतोभद्रप्रासादलक्षण—सामान्यप्रासादलक्षण—दारुपरीक्षा—शिलापरीक्षा-इष्टकपरीक्षा नामाध्यायः । इति वज्रलेप—भूमिपरीक्षा—शङ्कुशिलान्यास-ध्वजविधाननामाध्यायः । इति प्रतिष्ठाकल्पे शल्योद्धारः । इति कालनिर्द्देशनामाध्यायः । इति प्रतिष्ठाकल्पे दीक्षाध्यायः । तोरणाध्यायः । + + पञ्चगव्यविधानाध्यायः । शौचाध्यायः । इति प्रतिष्ठाकल्पे अधिवासाध्यायः । इति आवाहनविधानं नाम । इति श्रीविष्णुबोधनं नाम । इति श्रीविष्णोरावाहनप्रयोजनं नाम । इति प्रतिष्ठाध्यायः । इति भोगाङ्गनाध्यायः । इति मालतेष्याध्यायः । इति तोरणोच्छ्रायविधिनामाध्यायः । इति यात्राविधिर्नाम । इति कामप्रादुर्भावपूजनम् । इति कार्य्यारम्भप्रादुर्भावपूजा नाम । इति श्रीकालनियमपूजा समाप्ता ।

इति तृतीयकाण्डः समाप्तः ॥ * ॥

No. 191. विष्णुसहस्रनामस्तोत्रम् . (केशवभट्टकृत-विष्णुनामार्थ-दर्शनाख्य-टीका-सहितम् .) Substance, country-made paper, 14 × 7. Folia, 32. Lines, 10 on a page. Extent, 1,000 çlokas. Character, Nāgara. Date, Sm. 1936. Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. The text in verse, the comm. in prose. Generally correct.

Beginning. श्रीगोपालाय नमः ।

सर्व्वेश्वरं नमस्कृत्य निम्बादित्यश्च भक्तितः ।

संक्षिप्तं क्रियतेऽस्माभिर्विष्णुनामार्थदर्शनम् ॥

शिष्टैः सर्व्वधर्म्मेभ्यः सर्व्वधर्म्मशिरोमणिः ।

सर्व्ववेदेतिहासानां सारोंऽर्थोऽयं निगद्यते ॥

वैशम्पायन उवाचेति सूतोक्तिः । इत्यादि ।

End. एवंभूतस्य धर्म्मपक्षपातिनः श्रीकृष्णस्य पुनरसाधारणान् गुणानाह ऋषय इति त्रिभिः १३८ । १३९ । १४० । शास्त्रस्याचार्य्यमनुबन्धचतुष्टयं च वदन् शास्त्रमुपसंहरति इममिति १४१ । पुनर्भजनीयं तद्भजनं च भजनफलं च दृढीकरोति विश्वेश्वरमिति । विश्वस्य सर्व्वस्य ईश्वरं सर्व्वेश्वरं १४२ ।

श्रीकेशवपदद्वन्द्वकल्पद्रुमनिवासिना ।
केशवेन कृतं श्रीमद्विष्णुनामार्थदर्शनम् ॥
श्रीनिम्बार्कपदाम्भोजभ्रमरयोद्बुद्धबुद्धिना ।
उद्धृतः शास्त्रसारोऽयं स्वाकरेभ्यः समासतः ॥

Colophon. इति श्रीमत्-काश्मीरिकेशवभट्टविरचितं श्रीमद्विष्णुनामार्थदर्शनं समाप्तम् । श्रीराधावल्लभाय नमः । श्रीकृष्णाय नमः । श्रीरामचन्द्राय नमः । शुभसंवत् १९२९ । ज्येष्ठ । ८ ।

No. 192. वृन्दावनयमकटीका. By रामकान्तः. Substance, country-made paper, $18 \times 2\frac{1}{2}$ inches. Folia, 8. Lines, 8 on a page. Extent, 375 çlokas. Character, Bengali. Date, Sk. 1734. Place of deposit, District Bariçāla, Mānapāsā, Paṇḍita Govindacandra Çiromaṇi. Appearance, old. Prose. Correct.

Beginning. ॐ नमः श्रीकृष्णाय । इह खलु निर्व्विघ्नाभिलषितसिद्धिकामः कविरयं अखिल-कविकुल-सम्मत-निखिल-विघ्नध्वन्दोत्सारण-कारण-कृष्णनमस्काररूप-मङ्गलमयतः समारभते वरदायेत्यादि ॥ इत्यादि ।

End. चषितानां कौहमानां लीलाजानां लीलया क्रीडया जातानामुत्पन्नानाम् । लाजाः पुंभूम्नि चाचतमित्यमरः । छाया सूर्य्यप्रिया कान्तिः प्रतिबिम्ब-मनातप इति च ॥ * ॥

Colophon. इति विश्वभारद्देवश्रीरामकान्तनिर्म्मिता ।
वृन्दावनयमकाख्यकाव्यटीकासमर्थिता ॥
शाके भस्माख्याब्धि-चितिधर-मन्दीवत्सरमिते ॥ ० ॥

विषयः । वृन्दावनयमकाख्यस्य नानाङ्कविकृतस्य काव्यस्य व्याख्यानम् ॥

No. 193. वेदान्ततत्त्वबोधः. Substance, country-made paper, $12\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 17. Lines, 14 on a page. Extent, 600 çlokas. Character. Nāgara. Date, ? Place of deposit, Hātuā, Bābu Girīndranātha Datta, Appearance, new. Prose. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
यश्चिन्तितो हरति ध्वान्तमशेषमन्त-
र्बोधप्रदस्तरणिकोटिसमप्रभो वै ।
योऽज्ञानवाद्प्रभवं च्छि ददाच ...
तं श्रीसुदर्शनमहं हृदि चिन्तयामि ॥
किं वेदान्ततत्त्वमिति प्रश्ने उच्यते । सार्व्व ... नन्तकगुणाब्धिरनन्तशक्ति-र्जगतो जन्माद्यभिन्ननिमित्तोपादानकारणं चेतनाचेतनवस्तुस्वाभाविकभेदा-भेदसंबन्धाश्रयः परब्रह्मपरमात्मपुरुषोत्तमादिशब्दाभिधेयः श्रीकृष्ण एवेति सर्व्ववेदान्तार्थः । इत्यादि ।

End. इति भगवतः सर्व्वत्रावस्थितिरेव सर्व्वभेदव्यपदेशहेतुरित्युक्तं अतो न भेदा-भेदव्यपदेशयोर्विरोध इति प्रतिपादितं एवञ्च केवलभेदे केवलाभेदयोः शास्त्रविरुद्धत्वेन निरस्तत्वाच्चिदचितोर्ब्रह्मणा सह स्वाभाविकभेदाभेदस्यैवाङ्गी-कारो निश्चितो भवति । अन्यथा शास्त्रे संबन्धान्तराभावेन पूर्व्वोक्तैकैक-तराङ्गीकारे तत्र स्वसुधीक्तदूषणानां सिद्धान्त एवापातादतो नान्यः पक्षः परिग्रहीतुं शक्यते तस्मादकामैरपि चिदचिदीश्वराणां स्वाभाविकभेदाभेद-मेव संबन्धमङ्गीकृत्य पुनर्विशिष्टत्वाङ्गीकारे गौरवापत्तोऽप्यनुपपन्नोऽपि स्वसम्प्र-दायस्य स्वातन्त्र्यसिद्ध्यर्थं इति सिद्धमल्पमिति विस्तरेण ।

Colophon. इति श्रीसनत्कुमार-नारदसम्प्रदायप्रवर्त्तकाद्याचार्य्य-श्रीभगवन्नियमानन्दानु-यायिना वेदान्ततत्त्वबोधः समाप्तः ॥ शुभमस्तु ॥

विषयः । निम्बार्कमतानुसारेण ब्रह्मणोऽद्वयत्वासर्वव्यापकत्वादिनिरूपकवेदान्तस्य मर्म्मो-द्घाटनम् ॥ ० ॥

No. 194. वेदान्ततत्त्वमञ्जरी . By शङ्कराचार्य्यः. Substance, country-made paper, $13 \times 1\frac{1}{2}$ inches. Folia, 14. Lines, 6 on a page. Extent, 600 çlokas. Character, Bengali. Date, Sk. 1667. Place of deposit, District Medinipura, Post Office Rādhānagara, grāma Amarapura, Paṇḍita Guruprasanna Vidyāratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।
अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम् ।
आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये ॥

चत्वारः खलु पुरुषार्था धर्मादयः। तत्र चरमः परमपुरुषार्थोऽविनाशि-त्वात् त्रयाणां प्रकृतिसाध्यत्वेन विनाशित्वात्। न च मुक्तिः प्रकृतिसाध्या, विवक्षितविवेकेन साध्याया अविद्यानिवृत्तिरूपायास्तस्या ज्ञानैकसाध्यत्वात्। न हि शतशः क्रियमाणेऽपि यत्ने शुक्तिविषयाविद्यायाः शुक्तिविषयकज्ञान-मन्तरेण नाशो दृष्टः। मुक्तिसाधनज्ञानन्तु पदार्थज्ञानसाध्यम्। इत्यादि।

End. अथ तस्यापि जगदिव न सद्रूपमस्तु अतस्त्वायातं शून्यवादेनेति चेत् न। यदस्तु नास्तीति व्यपदेशेनापि सिध्यति तत् कथमसद्रूपं। न हि प्रकाशमन्तरा नास्तीत्यपि प्रकाशः सम्भवति। अतश्च शून्यवादोऽपि विफलः × × शून्यस्य सद्रूपत्वासद्रूपत्वाभ्यां व्याघातः। आद्ये शून्येति नामधेयमात्रेणायातं नत्वर्थ-भेदेन। द्वितीये शून्यस्यासिद्धा तत्कल्पनासिद्धिः। अपि च, कल्पनाधि-ष्ठानस्यासद्रूपत्वेवाधिष्ठानं वाच्यमिति सिद्धं सदद्वैतवादेनेति संक्षेपः।

Colophon. इति परमहंस श्रीशङ्कराचार्य्यकृता वेदान्ततत्त्वमञ्जरी समाप्ता। श्रीकृष्णाय नमः।
शाके मुनिरसाङ्केन्दुसंख्याते शुचिमासके।
लिखितेयं स्वपाठार्थं वेदान्ततत्त्वमञ्जरी॥

विषयः। पदार्थनिरूपणम्। प्रकृतिनिरूपणम्। मुक्तिनिरूपणम्। प्रातीतिक-व्याव-हारिक-पारमार्थिकरूपत्रिविधसत्तानिरूपणञ्च।

No. 195. वेदान्ततात्पर्य्यनिवेदनम्. By गोविन्दः. Substance, country-made paper, 10 × 3½ inches. Folia, 83. Lines, 8 on a page. Extent, 1,411 çlokas. Character, Nāgara. Date, Sk. 1710. Place of deposit, Benares City, Paṇḍita Vāmanācāryya Çāstrī. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।
साध्वीकृतं सर्व्वकामाप्तिः सार्वज्ञं शुद्धबुद्धता।
यज्ज्ञानायत्तमीशन्तं प्रत्यञ्चं कारणं नुमः॥
गोपालसंचिन्मनवीतदोषः
प्रबोधितः श्रीगुरुलक्ष्मणेन।
वेदान्ततात्पर्य्यनिवेदनेन
स्वबोधशुद्धिं करवाणि सत्सु॥ इत्यादि।

End. श्रीमल्लक्ष्मणपण्डितैरधिकृतो वेदान्तविद्यापदे ।
गोविन्दो बुधनीलकण्ठतनयो भोगावतीगर्भजो ।
वेदान्तानुगतं विमत्सरबुधप्रेष्ठं प्रबन्धं व्यधात् ॥

Colophon. इति वेदान्ततात्पर्य्यनिवेदनमिदं समाप्तम् ॥ शकाब्दाः १७१० ।

विषयः । अद्वैतमतमाश्रित्य भाष्यतात्पर्य्यवर्णनम् ॥

No. 196. वेदान्तरत्नमाला. By अनन्तभट्टः. Substance, country-made paper, 10×4½ inches. Folia, 49. Lines, 10 on a page. Extent, 900 çlokas. Character, Nāgara. Date, ? Place of deposit, Hātuā, Pailādeyoyā Maṭha. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीराधासर्व्वेश्वरौ विजयेताम् । श्रीमद्भगवन्निम्बार्काय नमः ।
ब्रह्मादिसेव्यचरणं जगतश्च हेतुं
स्तुत्यं मुनीशविबुधैः स्वजनार्त्तिहारम् ।
कल्याणरूप-गुणमीशमहं भजामि
... ... ॥
आनन्दसंज्ञकमुनिं नियमोक्तिपूर्व्वं
आचार्य्यमाद्यमहमाश्रय ईशचक्रम् ।
पाञ्चजन्यावतारञ्च कृष्णाज्ञापरिपालकम् ।
श्रीश्रीनिवासमाचार्य्यं भाष्यकारं नमाम्यहम् ॥
वेदान्तरत्नमालाख्यो ग्रन्थस्तेषामनुग्रहात् ।
तदुक्तेनैव मार्गेण क्रियते माक्षमाननः ॥
प्रत्यक्चैतन्यतत्त्वञ्चाचेतनाख्यं ततः परम् ।
परब्रह्मादिसंज्ञञ्च भण्यतेऽस्मिन् समासतः ॥
साधनादिफलञ्चापि तद्विरोधिनिरूपणम् ।
तत्रादौ चेतना ज्ञेया वैष्णवैः साम्प्रदायिकैः ॥ इत्यादि ।

End. वेदान्तगेयं यदिमं जगतश्च हेतुं
तर्काद्यमेयमभिवन्द्यमजादिदेवैः ।
ध्यातो ह्यनन्यशरणैर्निजभावदस्तं
गोपीपतिं हरिमहं शरणं प्रपद्ये ॥

Colophon. इति श्रीभगवत्सनत्कुमारसन्ततिप्रवर्त्तक-श्रीमद्भगवन्नियमानन्दपादसरोजाश्रितानुगकाश्मीरि-श्रीकेशवभट्टचरणारविन्दानुजेनानन्ताभिधेयेन विरचित-वेदान्तरत्नमाला समाप्ता ॥ ० ॥ श्रीरस्तु । सम्वत् १९२१ ।

विषयः । निम्बार्कमतानुसारेण प्रत्यक्चैतन्यादिनिरूपणम् । परब्रह्मादिसंज्ञानिरूपणम् । साधनाफलादिकथनम् । साधनाविरोधिनिरूपणञ्च ।

No. 197. वेदान्तसंज्ञाप्रक्रिया. Substance, country-made paper, $11\frac{1}{2} \times 5$ inches. Folia, 19. Lines, 8 on a page. Extent, 260 çlokas. Character, Nāgara. Date, ? Place of deposit, Hātuā, Babu Girīndranātha Datta. Appearance, new. Prose. Correct.

Beginning. ॐ श्रीगणेशाय नमः ।

ॐ ... ... पादयुगं नत्वा तस्य प्रसादतः ।

वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ॥ इति वृद्धवचनम् ।

अथाध्यारोपो नाम वस्तुन्यवस्त्वारोपः अध्यारोपः । वस्तु सच्चिदानन्दात्मकं ब्रह्म । अवस्तु अज्ञानादिसकलजगत्समुदायस्वरूपमखाप्रपञ्चः । प्रपञ्चद्वयं अज्ञानद्वयं सूक्ष्मशरीरद्वयं स्थूलशरीरद्वयं शक्तिद्वयं निःश्रेयसद्वयं संशयद्वयं असम्भावनाद्वयं विपरीतभावनाद्वयं प्रज्ञाद्वयं ... ... शब्दद्वयं रसषट्कं नववर्णाः ऐश्वर्य्यादिषट्कं उत्पत्त्यादिषट्कं नादादित्रयं इत्येताः संज्ञाः । एताः शास्त्रैर्वेदान्तैरुक्ताः प्रत्येकं निरूप्यन्ते । इत्यादि ।

End. संहत्ते गलविवरे यत्कण्ठनिनादकरणं स नादः । अनुस्वारो विन्दुः नादैकदेशः कलेत्यर्थं तथाच संज्ञाद्वितीयब्रह्मप्रतिपादके वेदान्तशास्त्रे वृद्धवचनमनुसृत्याध्यारोपवशात् संज्ञास्सन्तीति प्रतिपादितं । सम्प्रत्यपवादो निरूप्यते अधिष्ठानमात्रपरवशोऽयमपवादस्तथाच सर्वप्रपञ्चरहितं ब्रह्माहमस्मीति प्रत्यगभिन्न-ब्रह्मज्ञानात्मुक्तिरिति सिद्धम् ।

Colophon. इति वेदान्तसंज्ञाप्रक्रियाप्रकरणं समाप्तम् ॥

विषयः। प्रपञ्चाज्ञान-स्थूलसूक्ष्मशरीर-शक्ति-निःश्रेयस-संशयासम्भावना-विपरीतभावना-प्रज्ञा-समाधीनां द्विप्रकाराणां ब्रह्म-जीव-शरीरावस्थाकरण-कर्म्म पुण्यकर्म्म-पापकर्म्म मिश्रकर्म्म-प्रारब्ध-प्रतिबन्ध-सम्बन्ध ताप अधिभूतादिकारणगुण-काल-मूर्त्ति-सत्वादिप्रपञ्च लोकवासना ज्ञान-प्रतिबन्धक-श्रवणादि-ज्ञानादि-देहादि-प्राणापान-आन्ध्यादितादात्म्य-एषणा-सुषुप्त्यादीनां त्रि-प्रकाराणां वर्त्तमानप्रतिबन्ध-पुरुषार्थ शब्द वर्ण-आश्रमसाधन-अनुबन्ध-अन्तःकरण-संकल्पादि-वेद-प्रमाण-मैत्र्यादि-भूतग्राम ब्रह्मविदादीनां चतुःप्रकाराणां श्रोत्र-ज्ञानेन्द्रिय-शब्दादि-कर्म्मेन्द्रिय-वचनादि—प्राणादि—उपवायुकर्म्मसूक्ष्मभूत—यम-नियम-भूमिका-प्रलय श्रमनिवर्त्तकदृष्टान्तख्यातीनां पञ्चप्रकाराणां समाधि-भावविकार-कोश-उर्म्मि-लिङ्ग-अवस्था-शास्त्र-सूत्र-अङ्ग-कर्म्मप्रमाणानां षट्-प्रकाराणां अवस्था—चैतन्यादि-भूम्यादि-असत्वादि-भूमिकादीनां सप्तप्रकाराणां पुरी-प्रकृति-अङ्गादीनामष्टप्रकाराणां नवविधसंसारस्य लिङ्गद्वयाहङ्कारद्वयानन्द-कर्म्म स्वप्न-सुषुप्ति-जाग्र-दात्मत्रयाणां भूमिका-युक्तिचतुष्टयानां नाड़िका-नाड़ीदैवतादशक-अष्टाक्षरस मद-षट्वर्ग्गमद—अष्टमूर्त्तिमद—अष्टपाश-सप्तधातु—सप्तव्यसन-षड्‌भ्रम पञ्चक्लेश-आध्यात्मिकतापत्रय स्वर्गलोकतापत्रय-पञ्चसप्ततिगुण-रूपषट्क-स्पर्शचतुष्टय-शब्दद्वय-रसषट्क-नववर्ण—ऐश्वर्य्यादिषट्क-उत्पत्त्यादिषट्क—नादादित्रयाणाञ्च वेदान्तसंज्ञानां लक्षणनिरूपणम् ॥

No. 198. वेदान्तसिद्धान्तमुक्तावलीटीका (मूलसहिता) By नानादीक्षितः। Substance, country-made paper, 13⅜ × 5⅛ inches. Folia, 128. Lines, 12 on a page. Extent, 5,000 çlokas. Character, Nāgara. Date, Sm. 1920. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose and verse. Correct.

Beginning. मूलस्य। ॐ नमः परमात्मने।
अदृष्टद्वयमानन्दमात्मानं ज्योतिरव्ययम्।
विनिश्चित्य श्रुतेः साक्षाद् युक्तिस्तत्त्वाभिधीयते ॥ इत्यादि।

टीकायाः। ॐ नमः परमात्मने पुरुषोत्तमाय।
विघ्नेशं ढुण्डिराजं जगदुदयकृतं शारदां सूत्रकारं
व्यासञ्चाचार्य्यवर्य्यं त्रिभुवनविदितं शङ्करं भाष्यकारम्।
आनन्दान्तःप्रकाशानुभवपदपदं सद्गुरुं श्रीन्द्रसिंहं
वन्दे विद्यानिधानं शमदमनिरतं राघवेन्द्रं यतीन्द्रम् ॥
यच्छिष्यशिष्यसन्दोहव्याप्ता भारतभूमयः।
वन्दे तं यतिभिर्वन्द्यं प्रकाशानन्दमीश्वरम् ॥

सिद्धान्तमौक्तिकश्रेणीप्रकाशाय प्रदीपिका ।
क्रियते परपक्षौघध्वान्तध्वंसप्रवर्त्तिनी ॥
शिष्टाचारप्राप्तं मङ्गलमाचरन् निरूपणीयं प्रतिजानीते श्रद्दृष्टद्वयमिति ।
इत्यादि ।

End. मूलस्य ।
स्नातं तेन समस्ततीर्थसलिले सर्व्वापि दत्तावनि-
र्यज्ञानाञ्च कृतं सहस्रमखिला देवाश्च सम्पूजिताः ।
संसाराच्च समुद्धृताः स्वपितरस्त्रैलोक्यपूज्योऽप्यसौ
यस्य ब्रह्मविचारणे क्षणमपि स्थैर्य्यं मनः प्राप्नुयात् ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीज्ञानानन्दपूज्यपादशिष्य प्रकाशानन्दविरचिता सिद्धान्तमुक्तावली समाप्ता ।

टीकायाः । यदज्ञानादिदं भाति यज्ज्ञानाच्च प्रलीयते ।
ब्रह्म + तदहं नित्यं नित्यसम्वित्सुखाद्वयम् ॥
अधिकार्य्युपविश्वेशमियं सिद्धान्तदीपिका ।
निर्म्मिता राजतां शश्वत् सदानन्दप्रदायिनी ॥
इति श्रीमत्परमहंसपरिव्राजकाचार्य्य-श्रीप्रकाशानन्दपूज्यपादशिष्य-श्रीनाना दीक्षितविरचिता सिद्धान्तमुक्तावलीटीका समाप्ता ।

विषयः । प्रकाशानन्दकृतस्य वेदान्तसिद्धान्तमुक्तावलीग्रन्थस्य व्याख्यानम् ।

No. 199. वैद्यनाथपूजाविधिः. Substance, country-made paper, $14 \times 3\frac{1}{2}$ inches. Folia, 4. Lines, 6 on a page. Extent, 90 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Āḍāihājār, Paṇḍita Candrakānta Vidyālaṇkāra. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमः परमदेवतायै । अथ स्कन्दपुराणोक्त वैद्यनाथपूजाविधिः । तत्र चतुर्द्दशीलाभेऽलाभे वा उपवासं कृत्वा सोमवासरे प्रदोषसमये शुक्ल वाससी परिधाय सायंसन्ध्यामुपास्य पूजामारभेत् । तत्राचम्य स्वस्तिवाचनं कृत्वा अर्घ्यपात्रं संस्थाप्य गणपत्यादिनानादेवताः संपूज्य ताम्रादिपात्रे

रक्तचन्दनेनाष्टदलपद्मं निर्म्माय लिङ्गं संस्थाप्य संकल्पं कुर्य्यात् विष्णुरो-मित्यादि आयुरारोग्यपूर्व्वकचतुर्वर्गफलप्राप्तिकामः सोमवाराधिकरणकप्रदोष समये पार्थिववैद्यनाथशिवलिङ्गपूजनमहं करिष्ये इति संकल्प्य पीठपूजां कुर्य्यात् । इत्यादि ।

End. ममास्तु नित्यमानन्दं प्रसादात् तव शङ्कर ।
सर्व्वपापाः क्षयं यान्तु प्रसीद मम शङ्कर ॥
नश्यन्तु दस्यवो राष्ट्रे जनाः सन्तु निरापदः ।
दुर्भिक्षमारीसन्तापाः शमं यान्तु रसातले ॥
सर्व्वशस्यसमृद्धिश्च भूयात् शम्भोः प्रसादतः ।
दुर्गायाश्च चतुर्वर्गप्रदायिन्याः प्रसादतः ॥
इति स्तुत्वा गालवाद्यं कृत्वा संहारमुद्रया ।
पुष्पमानीय चाघ्राय क्षमस्वेति विसर्जयेत् ॥
ततो दक्षिणाच्छिद्रं कृत्वा ब्राह्मणं भोजयित्वा यथाशक्ति क्षविष्याशनादिक-माचरेत् ॥

Colophon. इति स्कन्दपुराणोक्त-वैद्यनाथपूजापद्धतिः समाप्ता ॥
सुवर्णं रजतञ्चैव जपपूजादिकर्म्मसु ।
एष एव कुशः प्रोक्तो न दर्भो वनसम्भवः ॥
ॐ उमासहितवैद्यनाथशिवाय नमः ।

विषय: । वैद्यनाथसंज्ञक–पार्थिवलिङ्गस्य पूजाविधानम् ।

No. 200. व्याससूत्रवृत्तिः. By रङ्गनाथः. Substance, country-made paper, 18 × 3 inches. Folia, 68. Lines, 8 on a page. Extent, 3,200 çlokas. Character, Bengali. Date, ? Place of deposit, District Mānabhūma, Post Office Raghunāthapura, Vēḍogrāma, Paṇḍita Veṇkaṭa Varadācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीहरये नमः ।
नित्यं निजानन्दसदद्वितीयं
ध्रुवं विभुं सत्यमतिस्वतन्त्रम् ।
स्वच्छं निरस्ताखिलदृश्यगौणं

प्रत्यक्षमात्मानमजं भजामि ॥
शङ्करं शङ्कराचार्य्यं केशवं वादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः ॥
सत्यज्ञानानन्दात्मकमद्वितीयं ब्रह्मैव शुद्धसत्वप्रधानमायोपाधिकं सदीश्वर-भावं मलिनसत्वप्रधानाविद्योपाधिकं जीवभावञ्च जगाम । इत्यादि ।

End. नन्वेवं सातिशयत्वादन्तरत्वमप्यैश्वर्य्यस्य स्यात्तथाचानावृत्तिबोधकशास्त्रविरो-धश्चाह । अनावृत्तिः शब्दादनावृत्तिः शब्दात् । अर्चिरादिमार्गेण ब्रह्मणो-ऽभ्यगतस्य सातिशयैश्वर्य्यत्वेऽपि नावृत्तिर्भवति । एतेन प्रतिपद्यमाना इमं मानवमावर्त्तं नावर्त्तन्त इति श्रुतिः । सूत्राभ्यासः शास्त्रसमाप्तिद्योतनार्थः ।
गुरूणां चरणाम्भोजकृपया लिखिता मया ।
वृत्तिः श्रीव्याससूत्राणां प्रीत्यै सास्तु जगद्गुरोः ॥ ० ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रीआनन्दाश्रमचरणारविन्दसेवापरायणेन रङ्गनाथेन लिखितायां व्याससूत्रवृत्तौ चतुर्थोऽध्यायः समाप्तः ॥ श्रीरामः । श्रीमच्छङ्कराचार्य्येण रचिता व्याख्या श्रीमद्रङ्गनाथेन संक्षिप्य लिखिता ॥

विषयः । संक्षेपात् शाङ्करभाष्यानुसारेण व्याससूत्रस्य व्याख्यानम् ।

No. 201. व्रतकालनिष्कर्षः. By मधुसूदनवाचस्पतिः. Substance, country-made paper, 13 × 3 inches. Folia, 11. Lines, 5 on a page. Extent, 400 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Dhātrīgrāma, Paṇḍita Ṣaṣṭhīdāsa Bhaṭṭācāryya. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. नमो गणपतये ।
प्रणम्य कारणं कृष्णं ज्ञानानन्दस्वरूपिणम् ।
व्रतादिकालनिष्कर्षं करोति मधुसूदनः ॥
तत्रादौ तिथिनिरूपणम् । इत्यादि ।

End. चतुर्थ्यङ्गारवारे च अष्टमी च बृहस्पतौ ।
अत्र यत् क्रियते पापमथवा पुण्यसञ्चयः ॥
षष्टिजन्मसहस्राणि प्रतिजन्म तदक्षयं ॥ इत्यन्यथा

Colophon. इति श्रीमधुसूदनवाचस्पतिविरचितं व्रतादिकालनिरूपणं समाप्तम् ॥०॥

विषयः। व्रतकालव्यवस्थादिः।

No. 202. व्रतबोधवृत्तिः. Substance, country-made paper, 15½ × 5½ inches. Folia, 19. Lines, 13 on a page. Extent, 1,000 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinipura, Candrakoṇā, Mohanta Bharata Rāmānuja Dāsa. Appearance, tolerable. Prose and verse. Correct.

Beginning. श्रीरामचन्द्राय नमः।

नत्वा हृदिस्थं जगदेकरूपं रामं परं ब्रह्म विशुद्धबोधम्।

विस्तारशास्त्रश्रवणालसानां बोधाय कुर्व्वे व्रतबोधवृत्तिम्॥

अथ तिथिनिर्णयः। तत्र तिथिर्द्विधा शुद्धा विद्धा च एकस्मिन् दिने तिथ्यन्तरसम्बन्धरहिता शुद्धा तद्विपरीता विद्धा तत्र शुद्धायामसन्देहाद् विद्धा निर्णीयते। तत्र सामान्यतो वेधमाह माधवीये।

पक्षद्वयेऽपि तिथयस्तिथिं पूर्व्वां तथोत्तराम्।

त्रिभिर्मुहूर्त्तैर्विध्यन्ति सामान्योऽयं विधिः स्मृतः॥

हेमाद्रिमदनरत्नादौ तु द्विमुहूर्त्तोऽप्युक्तः—

उदिते दैवतं भानौ पैत्रं चास्तमिते रवौ।

द्विमुहूर्त्तस्त्रि + + सा तिथिर्हव्यकव्ययोरिति॥ इत्यादि।

End. एवं चकाराखिलशास्त्रदृष्टिः

कालस्य तत्त्वं गहनं विलोक्य।

संक्षेपतः संव्यवहारमार्च्चं

यत्किञ्चिदन्यत् परिमार्गणीयम्॥

Colophon. इति श्रीव्रतबोधनीसंग्रहे वैष्णवकृते सम्वत्सरकृत्यनिरूपणं नाम पञ्चमः परिच्छेदः॥ समाप्तश्चायं ग्रन्थः। ॐ तत्सत्।

विषयः। तिथिनिरूपणम्। व्रतारम्भकालादिनिरूपणम्। अष्टमद्वादशीनिरूपणम्। वैशाखादिस्नाने फलकथनम्। रामनवम्यादिव्रतकालनिरूपणम्। मासनिरूपणम्। वैशाखादि-चैत्रान्तमासकृत्यनिरूपणञ्च।

No. 203. शक्तिवादविवृतिः. By माधवसिद्धान्तः. Substance, country-made paper, 18 × 3 inches. Folia, 33. Lines, 8 on a page. Extent, 1,500 çlokas. Character, Bengali. Date, ? Place of deposit, District Barisāla, Post Office Kalasakāṭi, Gā̃ḍure, Paṇḍita Durgācaraṇa Nyāyaratna. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

आराध्य यां गिरिसुतां वरदां सुधीरै-
र्लब्धं फलं समधिकं प्रथितैरभीष्टात् ।
संसारसागरतरीं भजनैकपात्रीं
दुर्गां नमामि भवभीतिविनाशनाय ।
ख्यातः पूतकुलार्णवेन्दुसदृशो यस्तक्रपाणिः स्वयं
तद्वंश्यो नदराजभैरवमहावेगान्यथाकारकः ।
यो राजेन्द्रकृती तदीयकुलजो विख्यातविश्वेश्वर-
स्तत्पुत्रोऽहमिमां करोति विवृतिं श्रीमाधवस्तार्किकः ।
टीकां विज्ञजनप्रमोदजननीं सिद्धान्तसिद्धां शुभां
श्रीमन्माधवनामकेन रचितां यत्नेन धीभिः शुभैः ।
कापार्थैः परिहृत्य चित्ततरणिं संश्रित्य पारं परं
धीरो गच्छतु सत्पदार्थकुतुकी सत्‌शक्तिवादार्णवे ॥
शिष्यजिज्ञासया वृत्तिं विभजते सङ्क्षेन इति । अर्थनिष्ठा पदवृत्तिः पदनिरू-
पिता वृत्तिः वृत्तिः शाब्दबोधौपयिकसम्बन्ध इत्यर्थः ॥ इत्यादि ।

End. लब्धार्थोपस्थितेः स्वातन्त्र्येऽपि हेतुत्वमेव वाच्यमिति तत्र गौरवं स्फुटमेव शक्तिपदस्यैव इति समवायसम्बन्धे गोत्वप्रकारकज्ञानशक्तं पदमित्याकारक-ज्ञानस्यैवेत्यर्थः । तादृशबोधहेतुत्वात् समवायसम्बन्धेन गोत्वप्रकारकशाब्द-बोधहेतुत्वादित्यर्थः ।

Colophon. इति श्रीमन्महामहोपाध्यायमाधवसिद्धान्तभट्टाचार्यविरचिता शक्तिवादटीका समाप्ता ॥ * । ० ।

विषयः । गदाधरभट्टाचार्य्यकृतस्य शक्तिवादाख्यग्रन्थस्य व्याख्यानम् ।

No. 204. शतदूषणी. By श्रीनिवासदासः. Substance, country-made paper, 12×6 inches. Folia, 7. Lines, 15 on a page. Extent, 350 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Mohānta Bharata Rāmānuja Dāsa. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीमद्रामचन्द्राय नमः ।

श्रीमल्लक्ष्मणदेशिको गुणनिधि र्वादीभपञ्चाननः

संसारार्णवतारकश्च कृपया स्वाङ्घ्रिप्रपन्नान् जनान् ।

सद्विद्यापगजन्मभूमिशिखरी पाषण्डनैशोष्मगु- ?

र्मायावादद्वाग्नि रार्त्तशरणो वर्वर्त्ति सर्व्वोपरि ॥

श्रीश्रीनिवासदासेन नत्वा श्रीवेङ्कटं गुरुं ।

मायावादनिरासार्थं क्रियते शतदूषणी ॥

स देव सौम्येदमग्र आसीदेकमेवाद्वितीयमित्यत्र ग्रावादिना सजातीया-दिभेदशून्यं सन्मात्रमेवासीदिति सिद्धान्तितम् ॥ इत्यादि ।

End. अतो ब्रह्मविद्ब्रह्मैवेति श्रुते र्मुक्तस्य ब्रह्मसाम्यस्य स्वारस्यमित्यलं दिष्टहत-मुद्गराघातेनेति ॥

एवं सप्तत्यवधि दूषणानि × + + + + न्यायेनदिङ्मात्र मुक्तं ।

× × × × ईक्षिकाग्रन्थात् विचार्य्य च पुनः पुनः ।

दूषणानां शतं दत्तं केवलाद्वैतदर्शने ॥

Colophon. इति श्रीमन्नारायणचरणनलिनद्विरेफाणां वादीभकेशरिणां श्रीमद्वेङ्कटा-चार्य्याणां चरणारविन्दमधुपेन श्रीनिवासदासेन रचिता शतदूषणी समाप्ता ॥

विषयः । मायावादनिरासक शतसंख्याकदोषप्रख्यापनम् ।

No. 205. शब्दरत्नं (कलापस्य). By श्रीजनार्द्दनशर्म्मा. Substance, country-made paper, 14×3 inches. Folia, 89. Lines, 4 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, Sk. 1726. Place of deposit, District Ḍhākā, Post Office Rāyapurā, grāma Pirijerkādi. Paṇḍita Raghunātha Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ॥

प्रणम्य परमात्मानं श्रीजनार्द्दनशर्म्मणा ।

कलापाब्धेः शब्दरत्नं बालप्रीत्यै प्रकाश्यते ॥

पुंसि ॥ वृक्षः वृक्षौ वृक्षाः । वृक्षं वृक्षौ वृक्षान् । वृक्षेण वृक्षाभ्यां वृक्षैः । वृक्षाय वृक्षाभ्यां वृक्षेभ्यः । वृक्षात् वृक्षाभ्यां वृक्षेभ्यः । वृक्षस्य वृक्षयोः वृक्षाणां । वृक्षे वृक्षयोः वृक्षेषु । हे वृक्ष । एवमकारान्तः पुंसि देवादि-शब्दोऽपि । पुंसि दारशब्दो भूम्नि देववत् । स्त्रियां देवी नदीवत् । इत्यादि ।

End. एवमन्यासां । सर्व्वत्रातिक्रान्तवज्रश्रीस्त्र्योरपि वाच्यलिङ्गमित्यर्थः ॥ * ॥ * ॥

Colophon. इति शब्दरत्ने चतुर्थप्रकरणं समाप्तं ॥ ४ ॥ ४ ॥ श्रीभोलानाथदेवशर्म्मणः स्वाक्षरं पुस्तकश्च ॥ शुभमस्तु शकाब्दाः १७९६ ॥ श्रीहरिः श्रीगोविन्दः श्रीमाधवः श्रीगुरवे नमः ॐ वाग्देव्यै नमः ॥

विषयः । अस्मिन् शब्दरत्नं नाम एवंविधं पुस्तकान्तरम् । इदन्तु तस्मादुत्कृष्टम् । सुबन्तानि शब्दान्यत्र साधितरूपाणि विद्यन्ते ।

No. 206. शब्दसाधनं. By रामकान्तः. Substance, foolscap paper, 14×4 inches. Folia, 73. Lines, 8 on a page. Extent, 1,800 çlokas. Character, Bengali. Date, Sk. 1798. Place of deposit, District Ḍhākā, Uthuli, Paṇḍita Dīnabandhu Gosvāmī. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ।
नत्वा भवानीश्वरपादपङ्कजं विज्ञाय दुर्गादिकचन्द्रसम्मतं ।
बालावबोधाय वितन्यते मया श्रीरामकान्तेन तु शब्दसाधनं ॥
आनन्त्यादेव कार्त्स्न्येन शब्दान् वक्तुं न कोऽप्यलं ।
इत्यत्र कतिचिद्वाच्याः सर्व्वशब्दावबुद्धये ॥
शब्दोऽव्ययोऽनव्ययश्च । लिङ्गसङ्ख्याकारेण विभक्तिकृतसंस्कारः साधनम् ।
इत्यादि ।

End. इति आकारस्य रत्वं एवं मातुमाचष्टे मदित्यादि । अन्येऽपि शिष्टप्रयोगानुसाराद्बोद्धव्याः । दिङ्मात्रमेतदुक्तं शब्दानामनन्तत्वात् ।

Colophon. इति शब्दसाधनं समाप्तम् ॥ शक १७९८ ॥

विषयः । कातन्त्रव्याकरणानुसारेण नानाविधशब्दानां साधनम् ।

No. 207. शरभपूजापद्धतिः . Substance, country-made paper, 11×7 inches. Folia, 9. Lines, 12 on a page. Extent, 325 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ श्रीगणेशाय नमः ।

अथ शरभमन्त्रः ।

ॐ देवदेव महाभाग गिरीश गिरिजापते ।

पाहि मां दयया नाथ सच्चिदानन्द शाश्वत ॥ इत्यादि ।

End. भर्गेन्दुकेवलीबाधौ हलषष्ठस्वरान्वितौ ।

काद्यद्वयं समालिख्य वर्क्केन्दुजाये कचत्वारिंशदक्षरो मनुरिति ॥

Colophon. इति श्री आकाशभैरवतन्त्रे उमामहेश्वरसम्वादे शरभपक्षिराजनित्यपूजा पद्धतिः समाप्ता ॥

विषयः । शरभपक्षिराजस्य पूजाप्रकारादिकथनम् ।

No. 208. शरभेशकवचम् . Substance, country-made paper, 11×7 inches. Folia, 5. Lines, 12 on a page. Extent, 200 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose and verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।

ईश्वर उवाच ।

वक्ष्यामि शृणु देवेशि सर्व्वरक्षणमुत्तमम् । इत्यादि ।

End. प्रायश्चित्तं शिव तव नामाक्षरद्वयोच्चरितं ।

Colophon. इति श्री आकाशभैरवकल्पे प्रत्यक्षसिद्धिप्रदे उमामहेश्वरसम्वादे शरभेश कवचं समाप्तम् ।

विषयः । शरभेशकवचम् यत्भूतप्रेतादिभ्यो भीतिनिवारणाय क्रियते ।

No. 209. शालग्रामलक्षणम् वा शिलामाहात्म्यम् । Substance, country-made paper, 13 × 4 inches. Folia, 3. Lines, 7 on a page. Extent, 150 çlokas. Character, Bengali. Date, Sk. 1662. Place of deposit, District Ḍhākā, Post Office Rūpagañja, grāma Naora, Paṇḍita Çivacandra Bhaṭṭācāryya. Appearance, old. Verse. Generally correct.

Beginning.

ॐ नमो गणेशाय ।
द्वारदेशे समे चक्रे दृश्येते यस्य शोभने ।
वासुदेवः स विज्ञेयः शुक्लाभः सर्व्वकामदः ॥ १ ॥
प्रद्युम्नः सूक्ष्मचक्रन्तु नीलनीलसमन्वितः । (?)
सुषिरच्छिद्रं वर्त्तुलं दीर्घचक्रन्तु तद्भवेत् ॥ २ ॥
द्वे चक्रे एकलग्ने तु पूर्व्वभागे तु पुष्कलं ।
सङ्कर्षणः स विज्ञेयो रक्ताभश्चातिशोभनः ॥ ३ ॥ इत्यादि ।

End.

कृष्णस्य स्निग्धवर्णस्य पृष्ठे चक्रं सुशोभनं ।
शिवदस्तु स विज्ञेयो महासम्पत्फलप्रदः ॥ ३३ ॥
पीताम्बरः स विज्ञेय ऊर्द्धरेखा तथाम्बुजः ।
पीताम्बरद्वारदेशो रेखात्रयविभूषितः ॥ ३४ ॥
विष्णुना कथितं सम्यक् शिलामाहात्म्यमुत्तमम् ।
अष्टादशपुराणेभ्यो मन्वादिधर्म्मशास्त्रतः ॥
साङ्ख्ययोगात् समाहृत्य वेदवेदाङ्गसम्मतं ।
एतत्ते तु समाख्यातं ब्रह्मन् सत्यः समागतः ॥
यः पठेत् प्रयतो नित्यं शिलामाहात्म्यमुत्तमं ।
महापापानि सर्व्वाणि कृत्वा कर्म्म निरन्तरम् ॥
ऐश्वर्य्यं विपुलं यान्ति शालग्रामशिलार्च्चनात् ।
अचलां श्रियमाप्नोति चिरायुर्व्विगतज्वरः ॥
अक्षयं लभते पुण्यं विमुक्तः पापराशिभिः ।
यत् कृत्वा मुनयः सर्व्वे शालग्रामशिलार्च्चनम् ॥
सर्व्वे ते मोक्षमापन्ना विष्णुलोकं गताः सुखम् ॥

Colophon.

इति शालग्रामलक्षणं समाप्तं ॥ ० ॥ शकाब्दाः १६६२ ।
श्रीचन्द्रमणिदेवशर्म्मणः स्वाक्षरमिदं स्वकीयपुस्तकञ्चेति ॥
यथा दृष्टं तथा लिखितं लेखके नास्ति दूषणम् ॥ ० ॥

विषयः । वासुदेवादिचतुर्विंशत्प्रकार-शालग्रामशिलालक्षणम् । अष्टादशपुराण-मन्वादि-प्रणीतधर्म्मशास्त्रेभ्यः साङ्ख्ययोगाच्च समाकृष्य प्रथममेतच्छिलामाहात्म्यं भगवता विष्णुना कथित-मासीत् । अनन्तरं वेदवेदाङ्गसम्मतमेनं कोऽपि कश्चिद्ब्राह्मणं कथयामास ।

No. 210. शास्त्रप्रकाशिका (सुरेश्वरवार्त्तिकटीका) (समूला) By भगवदानन्दः. Substance, country-made paper, 13½×7 inches. Folia, 1,616. Lines, 15 on a page. Extent, 65,000 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः । श्रीगुरुभ्यो नमः ।

ॐ स्वाज्ञानोद्भूतभेदप्रमुखबहुसुखद्वैतदेवद्वयो ×
मात्मत्वादिप्रपञ्चप्रचयपरिचयप्राप्तसंसारपाशम् ।
नित्याभ्यासप्रसूतप्रवलमतिबलप्राप्तमोक्षप्रभाव-
प्रोत्थप्रत्यर्थिसार्थद्युतिकथमकथं धाम कामं प्रपद्ये ॥ (?)
मातर्मतोऽस्मि भवतीमथचार्थये त्वां
चेतः सरस्वति सुरेश्वरवार्त्तिके मे ।
वाचा सहैव सदनुग्रहसंप्रसन्न
मेकाग्रमस्तु परिहाय परार्थमर्थम् ॥
श्रीमद्व्यासपयोनिधिर्निधिरसौ सत्सूक्तिपङ्क्तिस्फुरन्-
मुक्तानामनवद्यहृद्यविपुलप्रोद्योतविद्यामुनिः ।
शान्तिः शान्तिरतौ दयेति सरितामेकान्तविश्रान्तिभू
र्भूयान्नः सततं मुनीन्द्रमकरश्रेण्याश्रयः श्रेयसे ॥
सम्प्रदायविदामुक्तीरनुसृत्य प्रणीयते ।
शास्त्रप्रकाशिका सेयं सुरेश्वरवचोऽनुगा ॥

इह खलु निखिलाम्नायार्थपरिशोधनार्थं काण्वोपनिषद्भाष्यं व्याचिकीर्षु-राचार्य्यश्चिकीर्षितपरिसमाप्त्यादिपरिपन्थिदुरितनिवर्हणसिद्धये शिष्टाचार-प्रमाणकमिष्टदेवताप्रणतिलक्षणं मङ्गलाचरणं × ×. × समाचरन्नर्थं + + व्याचिख्यासितभाष्यार्थसुखप्रतिपत्त्यर्थं संक्षिपति । स्वाविद्येत्यादिना । इत्यादि ।

मूलस्य प्रारम्भवाक्य । ॐ नमः श्रीदक्षिणामूर्तये ।
स्वाविद्याविभवप्रसूतविपुलद्वैतप्रपञ्चाचित
स्पष्टभ्रान्तिनिरोधितात्ममतयो यं भागशो मन्वते ।
निर्भागं सकलाभिधानमननव्यापारदूरस्थितं
वन्दे नन्दितविश्वमव्ययमजं भक्त्या तमेकं विभुम् ॥ इत्यादि ।

End. टीकायाः ।
श्रीतत्त्वार्थविचारनीरनिवहो नीता न योगी दृढ़ं
श्लोकग्रन्थिमहाग्रहस्फुटतरव्यापाररत्नाकरः ।
प्रत्यग्बोधसुधा विभूतिविभवप्रौढा मुमुक्षैकभूः
सोयं वार्त्तिकवारिधिर्विजयते भक्तस्य (?) चूडामणिः ॥
विद्विता निर्द्विता सेयं सुरेश्वरवचोऽनुगा ।
शास्त्रप्रकाशिकाऽस्माभिरर्पिता पुरुषोत्तमम् ॥
इति वार्त्तिकपीयूषसुरसास्वादनेच्छवः ।
शास्त्रप्रकाशिकाव्याख्यासमुत्पादं मुमुक्षवः ॥

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्यश्रीमच्छुद्धानन्दपूज्यपादशिष्य–श्रीमदानन्दगिरि-
नन्दकृतायां सुरेश्वरवार्त्तिकटीकायां शास्त्रप्रकाशिकायामष्टमोऽध्यायः ॥
समाप्तोयं सर्व्ववार्त्तिकग्रन्थः ॥

End. मूलस्य । यामेवादुदयात् तथास्तगिरितो भास्वद्गभस्तिरश्मिभि-
र्व्याप्तं विश्वमनन्धकारमभवद् यस्य + शिष्यैरिदं ।
धारा + न गभस्तिभिः प्रतिहतचन्द्रायते भास्कर-
स्तस्मै शङ्करभानवे तनुमनोवाग्भि र्नमः स्यात् सदा।

Colophon. इति श्रीदादश्यसाचश्रीवार्त्तिकामृतमीरितं ।
काण्वारण्यककभाष्यस्य शाङ्करस्य समासतः ॥
अष्टमाध्यायवार्त्तिकं समाप्तम् ।

विषयः। काण्वशाखीयोपनिषदां शाङ्करभाष्यस्य सुरेश्वराचार्य्यकृतं यद्वार्त्तिकं तस्य टीकेयम् अष्टाध्यायात्मकोऽयमतिदृष्टद्ग्रन्थः ॥

No. 211. शिवगीताटीका (समूला). By कलदिवेङ्कटाद्रिनायकः. Substance, country-made paper, $11\frac{1}{2} \times 6\frac{1}{2}$ inches. Folia, 130. Lines, 12 on a page. Extent, 2,200 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ शुद्धाद्वैतसमर्थने पटुमती यस्य प्रतापं सकृत्
श्रुत्वाप्यैक्यरुचिं (?) सदा विदधते त्यक्तैषणाभेदतः ।
यद्द्रव्येषु गणेषु कर्मसु तथा जातौ विशेषेषु च
प्रौढाचक्रतयोद्यतैः सह नियं सम्बन्धमद्रास्यत ॥ (?)
यत्कीर्त्तिं श्रवणातिथिं कृतवतः कल्पद्रुमस्याभवत्
कम्पः स्वाभरणस्तथा समभवत् शेषस्य गां बिभ्रतः ।
शक्रस्याचिमिषात् समस्तदिविषत्सौभाग्यलोपावधौ
वक्त्रच्छिद्रभरः परस्य भिषतो दारानकामानपि ॥
यत्कीर्त्तिं कलहंसकुन्दधवलां श्रुत्वा महेन्द्रादयो
ऽवज्ञामात्मनि सन्ततं विदधते लज्जाभरैर्मन्थराः ।
श्रुत्वा देवगुरोर्मनीषमसमना यद्वैखरी जायते
सोऽयं × कदलीशवेङ्कटविभु र्वर्वर्त्ति सर्व्वोपरि ॥
सोऽयं पद्मपुराणस्य षोड़शाध्यायनिर्म्मिताम् ।
शिवगीतां शिवप्रीत्या विवेचयति सादरम् । सूत उवाचेत्यादि ।

End. सस्वायमाशयः यद्यपि वह्निरेव सन्ध्यावयं प्रशस्तं तथापि यदा विस्मरणा-द्यन्यलोपप्रसक्तिः तदा श्रौतस्य विस्मरणस्य प्राबल्यात् तदनुरोधेन द्वे सन्ध्ये स्टचेऽप्यनुष्ठेये इति स्फुटश्चेदं माधवादिग्रन्थेष्वितिदिक् ।

Colophon. इति शिवगीतासूपनिषत्सु शुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धरिककलदि-वेङ्कटाद्रिनायकविरचितायां शिवगीताव्याख्यायां षोड़शोध्यायः ।
इति शिवगीताटीका सम्पूर्णा ।

विषयः । पद्मपुराणीय शिवगीताया व्याख्यानम् ।

No. 212. शिवतत्त्वसुधानिधिः. Substance, country-made paper, 11×5 inches. Folia, 104. Lines, 7 on a page. Extent, 1,800 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीस्कन्दपुराणान्तर्गतशिवतत्त्वसुधानिधिप्रारम्भः । अध्यायसंख्या २० । ग्रन्थ-संख्या १५०० । श्लोकसंख्या १८०० । पत्रसंख्या १२७ ॥ ॐ ढुण्ढिराजाग्र-पूर्वाम्बादिसमस्तपरिवारसमेतं श्रीकाशीविश्वनाथं सगुरुचरणारविन्दाभ्यां नमोनमः ।

शङ्करेन्द्रगुरुं नत्वा शिवेन्द्रं शिवरूपिणं ।
त्रिशाशीश्वरतुष्ट्यर्थं शिवतत्त्वसुधानिधिं ॥
यं प्रणम्य सुरेन्द्राद्या भवन्ति सुखशालिनः ।
सर्व्वविघ्नोपशान्त्यर्थं तं वन्दे शङ्करात्मजं ॥
श्रीसूत उवाच ।
शिवं हरिं विधातारं तत्पत्नीस्तत्सुतान् गुरून् ।
नत्वा समस्तप्रत्यूहशान्तये मङ्गलाय च ॥
वक्ष्ये शृणुध्वं सर्व्वज्ञाः शिवतत्त्वसुधानिधिं ।
नैमीषीयास्तु मुनयः शौनकाद्या महर्षयः ॥
सत्रावसाने संहृष्टाः सूतं पप्रच्छुरादरात् ॥ इत्यादि ।

End. एतत् पुण्यं समाख्यानं श्रावयेद्वा शृणोति वा ।
अपुत्रो लभते पुत्रं दरिद्रो लभते धनं ॥
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।
सर्व्वान् कामानवाप्नोति सत्यमेतन्न संशयः ॥ ॐ तत्सत्

Colophon. इति श्रीमत्स्कान्दे महापुराणे सनत्कुमारसंहितायां अन्तिमखण्डे शिव-तत्त्वसुधानिधौ सूतऋषिसम्वादे सकलाध्यायमहिमानुवर्णनं नाम विंशो-ऽध्यायः । अन्तिमखण्डस्य पूर्व्वभागः समाप्तः ॥

विषयः । श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां शिवतत्त्वसुधानिधौ प्रथमोऽध्यायः । सनत्कुमारप्रश्नवर्णनं नाम २ अः । शिवतत्त्वनिरूपणं नाम ३ अः । मायानिरूपणं नाम ४ अः । जगचैतन्यनिरूपणं नाम ५ अः । पञ्चकोशात्मदुर्गाभरणं नाम ६ अः । जीवन्मुक्तिस्वरूपवर्णनं नाम ७ अः । विदेहकैवल्यस्वरूपवर्णनं नाम ८ अः । स्कन्दसनत्कुमारसंवादे महावाक्यविवरणं नाम ९ अः । षण्मुखसनत्कुमारसंवादे शिवानन्दानुभवो नाम १० अः । षण्मुखसनत्कुमारसंवादे संसारदूषणं नाम ११ अः । षण्मुखसनत्कुमारसंवादे सगुणध्यानयोगनिरूपणं नाम १२ अः । स्कन्दसनत्कुमारसंवादे १३ अः । स्कन्दसनत्कुमारसंवादे शिवार्चनभक्तमहिमानुवर्णनं नाम १४ अः । कार्त्तिकेयसनत्कुमारसंवादे रुद्राक्ष-विल्वपत्र-रुद्राध्याय महिमानुवर्णनं नाम

१५ श्चः। भिक्षाटनवर्णनं नाम १६ श्चः। महालिङ्गप्रादुर्भावो नाम १७ श्चः। सुब्रह्मण्यसनत्कुमारसंवादे शिवनामस्मरणदर्शनमहिमानुवर्णनं नाम १८ श्चः। शिवपूजा-शिवस्तुति-महिमानुवर्णनं नाम १९ श्चः। श्रीस्कान्दे महापुराणे सनत्कुमारसंहितायां अन्तिमखण्डे शिवतत्त्वसुधानिधौ सूतऋषिसंवादे सकलाध्यायमहिमानुवर्णनं नाम विंशोऽध्यायः।

No. 213. शिवरहस्यम्. Substance, country-made paper, 12×5 inches. Folia, 46. Lines, 13 on a page. Extent, 1,256 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः।

विघ्नाद्रिभङ्गकुलिशायितशातशुण्डा
दन्ताग्रधारि + + + द्विरदेन्द्रवक्त्रं।
कर्णान्तरालचलितराजितचामरौघ-
संवीजनप्रहृतदानकटं नमामि ॥

सूत उवाच। इत्यादि।

× × × × ×

End. त्यक्त्वा मानुषमभुवं अनवधो(?) यात्येव शम्भो पदं।
तारानाथसहोदरा पतिव्रता पादारविन्दार्चन—
द्वारा तुष्टहृदन्तरं पुरहरं विश्वेश्वरं शङ्करं ॥

Colophon. इति श्रीशिवरहस्ये एकादशांशे भक्तिमहिमा नाम पञ्चाशोऽध्यायः। भाद्रपद शुक्लतृतीया रविवारे लेखनं समाप्तं। राक्षसनामसम्वत्सरे ॥ * ।

विषयः। शिवस्य माहात्म्यादिवर्णनम्।

No. 214. शिवसंहिता. Substance, foolscap paper, 10×3 inches. Folia, 24. Lines, 8 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, District Rājasāhi, Post Office Pākuḍe Keḍogrāma, Paṇḍita Kālidāsa Ṭhākura. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ तत् सत् अथ शिवसंहिता।

एकं ज्ञानं नित्यमाद्यन्तशून्यं।
नान्यत् किञ्चित् वर्तते वस्तु सत्यं। इत्यादि।

End. गेहे स्थित्वा पुत्रदारादिपूर्णः
सङ्गं त्यक्ता चान्तरे योगमार्गे ।
सिद्धेश्चिह्नं वीक्ष्य पश्चात् गृहस्थः
क्रीड़ेत् सो वै सम्मतं साधयित्वा ॥

Colophon. इतीश्वरविरचितायां शिवसंहिता समाप्ता ॥ * ॥

विषयः। प्रथमपटले योगशास्त्रकथनमुखेन लयप्रकरणकथनम् । २ ये ज्ञानोपदेशः । ३ ये योगाभ्यासतत्त्वकथनम् । ४ र्थे मुद्राकथनम् । ५ मे साधकलक्षण-प्रतीकोपासनादि-निरूपणञ्च

No. 215. शिवसहस्रनामस्तोत्रम् (रुद्रयामलीयम्) . Substance, country-made paper, 15×3 inches. Folia, 10. Lines, 6 on a page. Extent, 200 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Demḍā Bārapāḍā, Paṇḍita Ādinātha Tarkabhūṣaṇa. Appearance, tolerable. Verse. Correct.

Beginning. ॐ नमो गणेशाय । ॐ महादेवाय नमः ।
श्रीपार्व्वत्युवाच ।
केनोपायेन देवेश सर्व्वदा त्वं प्रसीदसि ।
वाञ्छितां सिद्धिमाप्नोति नरो यस्य प्रसादतः ॥
तन्मे कथय देवेश यदि मे विद्यते दया ॥
श्रीशिव उवाच ।
शृणु पार्व्वति वक्ष्यामि मन्त्राणां हितकाम्यया ।
महास्तोत्रं महापुण्यं मम वक्त्रविनिर्गतम् ॥
सहस्रनामस्तोत्रं मे दुर्लभं दैवतैरपि ।
विना पूजां विना ध्यानं विनाचारं विना जपम् ॥
लभते येन कल्याणं तन्मे निगदितं शृणु ॥ इत्यादि ।

End. स्तोत्रं सहस्रनामाख्यं मम वक्त्रविनिर्गतं ।
गोपितव्यं त्वया भद्रे स्वयोनिरिव चापरे ॥
स्तोत्रं नाम समन्ततं प्रतिदिनं भक्त्या पठेन्मानवः
स स्याद्वाक्पतिसन्निभो बहुवता देवी स्वयं यत्नराट् । (?)

सौन्दर्य्येण च मूर्त्तिमान् मनसिज ... ... ऌण्णोपमः
शक्त्या मत्सदृशो जवे पवनजश्चाम्ने ऌभेच्छङ्करम् ॥

Colophon. इति रुद्रयामले हरगौरीसम्वादे शिवसहस्रनामस्तोत्रं समाप्तम् ॥

विषयः। भगवतः शङ्करस्य सहस्रनामकथनम् ।

No. 216. शिवसूत्रविमर्शिनी. By श्रीक्षेमराजः. Substance, country-made paper, 9½ × 5½ inches. Folia, 14. Lines, 6 on a page. Extent, 600 çlokas. Character, Nāgara. Date, ? Place of deposit, Hātuā Mahārājā's Library. Appearance, new. Prose and verse. Incorrect.

Beginning. ॐ नमः शिवाय । ॐ गणाधिपतये । ॐ नमः ।
ॐ यद्रः चेतश्चवर्गः समुदयति यतो यत्र विश्रान्तिमश्चेद्
यत्र त्वं यस्य विश्वस्फुरितमयमियद्युग्मयं विश्वमेतत् ।
स्वाच्छन्द्यानन्दहन्दे ब्रह्मसहतमयानुत्तरस्यन्दतत्वं
चैतन्यं शाङ्करं तद् जयति यद्खिले द्वैतभासाद्वयात्म ॥
श्रासमं अप्यसाम्लोक्य इत्तोनामिह तत्वतः ।
शिवसूत्रं व्याकरोमि गुर्व्वाम्नायविचारतः ॥

End. तरत तरसा संसाराब्धिं विशत परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवप्रोक्तं सूत्रं रहस्यसमुज्ज्वलं
प्रसभविलसत् + + + समुत्प्रवदापि तत् ॥

Colophon. इति श्रीशिवसूत्रविमर्शिनी समाप्ता ॥ कृतिर्मंहामाहेश्वरराजानक-श्रीमदभि-
नवगुप्तपादपद्मोपजीविनो राजानकश्रीक्षेमराजस्येति शिवम् ॥ श्रीभास्करो
जयति । ॐ ।
श्रीगोविन्दपदारविन्दमकरन्दास्वादशुद्धाशयाः
संसाराम्बुधिमुत्तरन्ति सहसा पश्यन्ति पूर्णं महः ।
वेदान्तैरवधारयन्ति परमं श्रेयस्त्यजन्ति भ्रमं
द्वैतं स्वप्नसमं विदन्ति विमलां विन्दन्ति चानन्दताम् ॥ ॐ रामः ॐ ।

विषयः। शिवसूत्रस्य व्याख्यानम् ।

No. 217. शिवाद्वैततरङ्गिणी. By महादेवतीर्थः. Substance, country-made paper, 12×4 inches. Folia, 191. Lines, 8 on a page. Extent, 4,000 çlokas. Character, Bengali. Date, ? Place of deposit, Royāil, District Ḍhākā, Bābu Yogīndramohana Rāya. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
नत्वा गुरुपदद्वन्द्वं ब्रह्माद्यैरपि पूजितम् ।
संगृह्यते मया यत्नात् शिवाद्वैततरङ्गिणी ॥
नानापुराणादाहृत्य स्वचित्तपरिशुद्धये ।
शिवविष्ण्वाद्यभेदोऽत्र चिन्त्यते शास्त्रसम्मतः ॥
तत्रादावादित्यपुराणे ॐ
शुद्धस्फटिकसङ्काशं देवं निष्कलमक्षरम् ।
कारणं सर्व्वलोकानां सर्व्वलोकमयं परम् ॥ इत्यादि ॥

End. मायानिरसनात् सद्यो नश्यते च गुणत्रयम् ।
यदा गुणत्रयातीतो भवतीति स मुक्तिभाक् ॥
तस्माल्लिङ्गार्चनं भाव्यं सर्व्वेषामिव देहिनाम् ।
लिङ्गरूपी शिवो भूत्वा त्रायते सचराचरम् ॥
पुरा भवद्भिः पृष्टोऽहं लिङ्गरूपी कथं शिवः ।
तत्सर्वं कथितं विप्रा याथातथ्येन सम्प्रति ॥ * ।

Colophon. इति श्रीपरमहंसपरिव्राजकाचार्य्य-श्रील-श्रीमहादेवतीर्थस्वामिना विरचितायां श्रीशिवद्वैततरङ्गिण्यां नवमस्तरङ्गः समाप्तः ॥ श्रीश्रीहरिः ॥ * ।

विषयः । । १म २य तरङ्गयोः शिवपूजाविधिः । शिवपूजामाहात्म्यादिकथनम् । हरिहरादीनामभेदकथनम् । शिवलिङ्गपूजनविध्यादिः । शिवस्य मानसिकस्नानादिकथनञ्च । ३ये तरङ्गे ईश्वरगीता योगशास्त्रादिञ्च । ४र्थे तरङ्गे शिवपूजाया नित्यत्वादिकथनम् । निर्माल्यग्रहणविध्यादिञ्च । ५मे तरङ्गे देव्या अद्वैतादिकथनम् । दुर्गापूजामाहात्म्यादिकथनञ्च । ६ष्ठे तरङ्गे मोक्षप्राधान्यादिकथनम् । ७मे तरङ्गे मोक्षस्वरूपादिनिरूपणम् । ८मे तरङ्गे गङ्गामाहात्म्यादिकथनम् । ९मे तरङ्गे शिवस्य माहात्म्यादिकथनम् ।

No. 218. शुद्धिकारिका. By नारायणवन्द्योपाध्यायः. Substance, country-made paper, 14×3 inches. Folia, 18. Lines, 7 on a page. Extent, 350 çlokas. Character, Bengali. Date, Sk. 1774. Place of deposit, District Hugli, Kṛṣṇanagara, Paṇḍita Dharmmadāsa Çiromaṇi. Appearance, tolerable. Prose and verse. *Correct.

Beginning.

श्रीरामः ।

सर्व्वस्वरूपं श्रीरामं प्रणम्य भक्तवत्सलं ।
समुद्रे शुद्धितत्त्वस्य कश्चित् करोति कारिकाम् ॥
शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रस्तु त्रिंशता दिनैः ॥
स्वजात्युक्ताशौचमेतत् पूर्णाशौचञ्च कथ्यते ।
खण्डाशौचमतो न्यूनं न खण्डे खण्डमिष्यते ॥

अथ शौचाशौचयोर्लक्षणम् ।

शौचाभावो नचाशौचं वैपरीत्यं नवा तयोः ।
यौगपद्यविरोधाच्च घटतच्छाश्रयोर्यथा ॥
तस्मात् संस्काररूपत्वं धर्म्माधर्म्मवदिष्यते ।
अशौचं विहिते कार्य्येऽनर्हताप्रतिपादकम् ॥
शुद्धिस्तु तादृशे कार्य्ये योग्यताप्रतिपादिका ॥ इत्यादि ।

End.

अथ पुष्करयोगः ।

पुनर्व्वसूत्तराषाढ़ा कृत्तिकोत्तरफल्गुनी ।
पूर्वभाद्रं विशाखा च रविभौमशनैश्चराः ॥
द्वितीया सप्तमी चैव द्वादशी तिथिरेव च ।
एतेषामेकदा योगे भवतीति त्रिपुष्करः ॥

\+ + + + + + + +

अन्यत्र पूजाहोमकर्म्मणी करिष्ये इति विशेषः ।
इति सर्वमशौचेऽपि कर्त्तव्यं । यथा दक्षः —
शुद्धकालेत्विदं सर्व्वं सूतकं परिकीर्त्तितं ।
आपद्गतस्य सर्वस्य सूतकेऽपि न सूतकम् ॥
गयायां सर्वकालन्तु पिण्डं दद्याद्विचक्षणः ॥

इति वचनात् प्रेतपदोल्लेखेन प्रेतस्य गयायां पिण्डदानं कुर्य्यात् । यस्य सपिण्डीकरणान्तं प्रेतश्राद्धं न कृतं तस्य वर्षात् परं तर्पणं न कार्य्यं एकादशाहादौ चेत् श्राद्धं क्रियते प्रेतपदोल्लेखेनेति भद्रम् ।

Colophon. इति श्रीनारायणवन्द्योपाध्यायविरचिता शुद्धिकारिका समाप्ता ॥ ॐ नमो नारायणाय ॐ रामः । शकाब्दाः १७७४ । श्रीमधुसूदनवन्द्योपाध्यायस्य स्वाक्षरमिदम् ॥

विषयः। शौचाशौचयोर्लक्षणम्। स्पृश्यशौचनिरूपणम्। सपिण्डाद्यशौचनिरूपणम्। विदेशस्थाशौचनिरूपणम्। अथाङ्गास्पृश्यत्वाचारत्वव्यापित्वाशौचसङ्करसहगमनाशौचादिव्यवस्थाकथनम्। प्रेतक्रियाद्यधिकारिनिरूपणम्। पुष्करादियोगादिनिरूपणञ्च॥

No. 219. शुद्धितत्त्वकारिका. By रामभद्रन्यायालङ्कारः. Substance, country-made paper, 17 × 3 inches. Folia, 11. Lines, 6 on a page. Extent, 250 çlokas. Character, Bengali. Date, Sk. 1714. Place of deposit, District Hugli, Mollāigrāma, Paṇḍita Gopālacandra Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय।
सर्व्वस्वरूपं श्रीरामं प्रणम्य भक्तवत्सलम्।
कारिकां शुद्धितत्त्वस्य वितनोति यथामति॥
शुध्येद्विप्रो दशाहेन इत्यादि।

End. किन्तु एकादशाहादौ चेत् श्राद्धं क्रियते तदा प्रेतपदोल्लेखेन इति शिवं॥

Colophon. इति श्रीरामभद्रन्यायालङ्कारविरचिता शुद्धितत्त्वकारिका समाप्ता॥ *॥
शकाब्दाः १७१४॥

विषयः। ब्राह्मणक्षत्रियादीनामशौचव्यवस्थादिकथनम्।

No. 220. शुद्धिप्रकाशः. By श्रीकृष्णशर्म्मचक्रवर्त्ती. Substance, country-made paper, $20\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 26. Lines, 7 on a page. Extent, 600 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Post Office Kāligañja, grāma Dakṣiṇabhāga, Paṇḍita Rakṣākara Nyāyapañcānana. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय॥
श्रीश्रीटरायवचनादतियत्नतोऽयम्।
ज्ञात्वा मतं विविधतन्त्रकृतां मुनीनाम्॥
श्रीकृष्णशर्म्मकृतिभिः क्रियते प्रकाशः।
शुद्धेः शिशोर्भटिति बोधि इति चमध्वम्॥
अथ निर्गुणाशौचनिर्णयः॥ तत्र कूर्म्मपुराणे।
दशाहं प्राकृताशौचं सपिण्डेषु विपश्चितः।
मृतेषु वाथ जातेषु ब्राह्मणानां द्विजोत्तमाः॥

यथा मनुः । शुद्ध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुद्ध्यति ॥
ब्रह्मपुराणे । शौचाशौचं प्रकुर्व्वीरन् शूद्रवद्वर्णसङ्कराः । वर्णसङ्करा अपकृष्ट-वर्णेन उत्कृष्टवर्णस्त्रीषु जाता इति रुद्रधरः । एतेन जननमरणाशौचे ब्राह्मणानां दशाहेन शौचं शूद्राणां मासाशौचं वर्णसङ्कराणामपि मासाशौचं बोद्धव्यं ॥ शुद्धिस्तावदखिलविहितधर्म्माधिकारोपपादको धर्म्मविशेषः । अशुद्धिस्तु तद्विरोधी धर्म्मविशेषः । सपिण्डजन्मादिनिमित्तक इति रुद्रधरः । तन्न महापातकादौ व्रतादिजन्याशौचे चातिव्याप्तिः । तच्च उभयसाधारणाशौचलक्षणन्तु स्वनिमित्तव्यधिकरणत्वे सति सन्ध्याद्युपयोगविरोधिधर्म्मत्व मिति गुरवः । निमित्तव्यधिकरणत्वं निमित्तसम्बन्धिशरीरान्यशरीरावच्छिन्ना-धिकरणत्वमिति । अतो न पातकिसंसर्गजन्यसंस्कारनिमित्ताधिकरणशरीरा-नधिकरणेऽतिव्याप्तिः । नापि महापातके व्रते चातिव्याप्तिरिति । इत्यादि॥

End. ननु सूतकान्तादित्यत्र सूतकानामशौचानामन्तो दिवस इति वा सूतकस्यान्तो विनाशो यस्मादिति वा सूतकस्यान्तो वा यस्मिन्नित्यर्थः । आद्ये सूतकप्रथमदिनाप्रसिद्ध्यान्तत्वात् निरूपणात् सद्यः शौचदिनासंग्रहः । द्वितीयेऽपि तथा सद्यःशौचे तद्दिन एवाशौचनाशोत्पत्तिः न तत्परदिने । यतस्तृतीये दशमदिनाद्यसंग्रहः । सद्यःशौचेऽपि तद्दिन एव चौरादितत्कर्म्म-विधावव्याप्तिः । न चैवं स्वार्थहानेरावश्यकत्वात् सूतकान्तादूद्वितीयेऽह्नी-त्यनेन अशौचव्यपगम एवोपलक्ष्यतामिति वाच्यं । द्वितीयेऽह्नि इत्यत्र मुख्यार्थस्य मयाभ्युपगमात् सूतकान्त इति कृते सिद्धेऽधिकवैयर्थ्याच्च । अत्र कथ-मनशौचिनामाद्यश्राद्धाधिकार इति चेत्तेषां तदर्थं सद्यःशौचाङ्गीकारादि-त्यवेहि ॥ * ॥

Colophon. इति श्रीधीरश्रीनरसिंहात्मजचक्रवर्त्ति श्रीकृष्णशर्म्मविरचितोऽयं शुद्धिप्रकाशः सम्पूर्ण इति ॥ * ॥

विषयः । निर्गुणाशौचनिर्णयः । अङ्गास्पर्शः । जननाङ्गास्पर्शः । अशौचे विधिनिषेधौ । बालाद्यशौचम् । विदेशस्थाशौचम् । स्त्र्यशौचम् । अशौचसङ्करः । अपहृतिमदशौचम् । गर्भस्रावाशौचम् । सपिण्डाद्यशौचम् । सद्यः शौचादिकथनम् । शवसत्क्रिया । उदकदानादि-कथनम् । अचारस्नवणादिनिरूपणम् । अधिकारिकथनम् । उदकानर्हनिरूपणम् । सद्यः शौचेऽपि परदिन एवाद्यश्राद्धस्य कर्त्तव्यत्वकथनम् । ग्रन्थेऽस्मिन्नेते विषया वादार्थरीत्या सम्बद्धाः ।

No. 221. शुद्धिप्रदीपिका. By कृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यः. Substance, country-made paper, $17\frac{1}{2} \times 3$ inches. Folia, 50. Lines, 7 on a page. Extent, 1,200 çlokas. Character, Bengali. Date, Sk. 1773. Place of deposit, District Medinipura, Post Office Rādhānagara, Amarapura, Paṇḍita Guruprasanna Vidyāratna. Appearance, tolerable. Prose and verse. Correct.

Beginning. श्रीहरिः । अथ गर्भस्रावाशौचं ।
गर्भस्रावस्य कालस्तु मासानामष्टमावधि ।
तत्र षण्मासपर्य्यन्तं माससङ्ख्यं दिनं + + ॥
अधिकं वैदिके कार्य्यं विप्राणां दिनमेककं ।
शूद्राणां षड्दिनानि स्युः सूतकानामिदं स्मृतम् ॥
सप्तमाष्टमयोस्तासां स्वजात्युक्तमशौचकं ।
अहोरात्रं सपिण्डानां गर्भस्रावे भवेत्तथा ॥
गर्भस्य जीवदुत्पत्तौ जन्माद्धे मरणेऽप्यदः ।
जन्माद्यात्परमृत्यौ च जीवने नवमादिवत् ॥
जननमरणाशौचे कार्य्यं स्त्रीपुंसभेदतः ।
कन्यामृत्यौ तेन सार्द्धं सद्यः शौचं भवेत्तथा ॥
बालमृत्यौ तु जन्माद्यं तत्पित्रोरेव केवलम् ॥
अशौचे दिनमासादिकं सावनमेव ग्राह्यं । तत्र सावनदिनं सूर्य्योदयादपर-
सूर्य्योदयपर्य्यन्तं । मासश्च तत्त्रिंशत्तैवेति । इत्यादि ।

End. मुक्तिस्तु आत्यन्तिकी दुःखनिवृत्तिः । तथाच स्वसमानाधिकरणदुःख-
प्रागभावासमानकालीनदुःखध्वंसो मोक्षः । अथ मृतक्रिया । मृतस्वामि-
कत्वेन आरोपात्मकक्रिया मृतक्रिया सा तु त्रिविधा भवन्ति आद्या मध्यमा
उत्तरा च । तत्राद्या दाहादिजलायुधादिस्पर्शान्ता । मध्यमा आद्यश्राद्धादि-
सपिण्डीकरणान्ता । पितृदेवताकपार्वणसाम्वत्सरिकादय उत्तरा । तत्र
पूर्व्वासां परापेक्षया पूर्व्वाधिकारिणः प्राशस्त्यमतः पूर्व्वाधिकारिसत्त्वेऽपि
पराधिकृताः सिध्यन्ति न तु स्त्रीवादिकृते वा सिद्धा । तेन पूर्व्वाधि-
कारिणा पुनः पर्य्यनरदाहादिकं न करणीयं । तत्र पूर्व्वाः सर्व्वेऽधि-
कारिणोऽवश्यं कुर्य्युः ॥

Colophon. श्रीमद्बन्द्यघटीय–महामहोपाध्याय–श्रीयुतकृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यकृता
शुद्धिदीपिका समाप्ता ॥

शाकेऽग्निसप्तमुनिचन्द्रमिते दिनेशे-
युक्तं गते कृतविधुप्रमितेऽह्नि जीवे ।
श्रीकृष्णदेवकृतशुद्धिप्रदीपिकां श्री-
वैद्यादिरामकुसुरो व्यलिखन्मनोज्ञाम् ॥

विषयः। गर्भस्रावाशौचनिरूपणम् । बालाद्यशौचनिरूपणम् । स्त्र्यशौचनिरूपणम् । सपिण्डाद्यशौचनिरूपणम् । मातामहादिमरणेऽशौचनिरूपणम् । अग्निविषादिजनितमृत्युविशे-षाशौचनिरूपणम् । पतितमृतानां वर्णभेदेन प्रायश्चित्तभेदकथनम् । शवानुगमनाद्यशौच-निरूपणम् । अशौचसङ्करव्यवस्था । स्त्रीपुंसयोर्दोषकनिर्देशः । अशौचमध्ये वर्ज्यावर्ज्यकर्म-निरूपणम् । अताशौचव्यवस्थानिरूपणम् मृतकृत्यनिरूपणम् । प्रेतश्राद्धादिनिरूपणम् । अशौ-चान्तकृत्यनिरूपणम् । अथ वृषादिदानव्यवस्था । मासिकादिश्राद्धव्यवस्था । सपिण्डीकरण-व्यवस्था । अथ मृतक्रियानिरूपणम् ॥

No. 222. शूद्राह्नः कृत्यतत्त्वप्रयोगः . By रघुनन्दनभट्टाचार्य्यः . Substance, country-made paper, 17×3½ inches. Folia, 10. Lines, 6 on a page. Extent, 225 çlokas. Character, Bengali. Date, Sk. 1735. Place of deposit, Royāil District, Ḍhākā, Babu Yogindramohana Rāya. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य सच्चिदानन्दं शूद्राणां न्यायवर्त्तिनां ।
शूद्राह्नःकृत्यतत्त्वं वक्ति श्रीरघुनन्दनः ॥
अथाह्निककृत्यं । प्रमाणमाह्निकतत्त्वेऽनुसन्धेयं । तत्र प्रयोगः । ब्राह्मे मुहूर्त्ते
इत्यादि ।

End. रात्रौ एकशय्यायां न शयीयातां अन्ततावपि गर्भवत्स्येऽपि कामुकी-
मुपेयात् ॥ ० ॥

Colophon. इति श्रीरघुनन्दनभट्टाचार्य्यविरचितः शूद्राह्नःकृत्यतत्त्वप्रयोगः समाप्तः ॥ * ।
शाके शरामाद्रिरसाप्रमाणे ।

विषयः। शूद्राणां आह्निककृत्यनिरूपणम् । आचमनप्रयोगः । दन्तधावनप्रयोगः । तर्पणप्रयोगादिः । वैश्वदेवादिवह्निकर्मनिरूपणम् । भोजनविधिः । रात्रिकृत्यादिनिरूपणम् ।

No. 223. शुद्धिमुक्तावली ., By महामहोपाध्यायः भीमः . Substance, country-made paper, 15 × 3 inches. Folia, 12. Lines, 8 on a page. Extent, 400 çlokas. Character, Bengali. Date, ? Place of deposit, Amarapura, District Medinīpura, Post Office, Rādhānagara; Paṇḍita Guruprasanna Vidyāratna. Appearance, old. Prose and verse. Correct.

Beginning. ॐ नमो विश्वेश्वराय ।

संसारवासनाबन्धशृङ्खलाच्छिदुरो हरिः ।
योगिचित्तसरःकेलिराजहंसोऽवताज्जगत् ॥
ईदृशानां हि संक्षेपाच्छिर्गुणानामियं मया ।
चतुर्णामपि वर्णानां शुद्धिमुक्तावली कृता ॥
व्युत्पत्तिं कुरुतां कण्ठे मन्दानामर्पिता सती ।
मनोहरा च मन्वादिवचनादपि भूषिता ॥
प्रथमं सामान्येन वर्णचतुष्टयेष्वपि शौचविधायकं पारिजातकं वचनमाह ।
शुध्येद् विप्रो दशाहेन द्वादशाहेन भूमिपः ।
वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ॥
सामान्येनाभिधाय विशेषेण जन्मप्रभृति × × × × पर्य्यन्त-
मशौचमाह ।
दन्तजातेऽजाते च कृतचूड़े च संस्थिते ।
अशुद्धा बान्धवाः सर्वे सूतके च तथोच्यते ॥ अस्यार्थः ।
दन्तजाते बाले अजातदन्ते वा कृतचूड़े कृतोपनयने च संस्थिते सर्वे सपिण्डबान्धवाः समानोदकाश्चाशुद्धा अशौचिनो भवन्ति सूतके प्रसवे तथा अशुद्धाः सर्वे इत्यर्थः ॥ इत्यादि ॥

End. सपिण्डानान्तु अशौचिनामन्नभोजने न दोष एव भिन्नकुलजानां तदन्नभोजने अशौचमेव अशौचे सति पार्वणश्राद्धादौ पतिते सति अशौचान्ते तस्य कर्त्तव्यता नास्ति एकोद्दिष्टं यदि अशौचे पतितं तदा अशौचान्तदिने कर्त्तव्यमित्याह ।

दैवे पितॄणां श्राद्धे तु अशौचं जायते यदि ।
अशौचे तु व्यतीते वै तेषां श्राद्धं विधीयते ॥
शुचीभूतेन दातव्यं या तिथिः प्रतिपद्यते ।
सा तिथिस्तस्य कर्त्तव्या नतन्या वै कदाचन ॥

पितॄणां श्राद्धे देये देयकाले यद्यशौचं पतितं तदा तच्छ्राद्धं अशौचे व्यतीते कर्त्तव्यं । तच्छ्राद्धं केन देयमित्याकाङ्क्षायामाह शुचीभूतेनेति । सैव तिथिरस्य तेन श्राद्धेन × × × × भवतीत्यर्थः तत्वन्येति पतितत्वेन क्षयैकादश्यां तिथिविधानमस्मिन्नेव विषीदति ॥

Colophon. इति काश्यविशिष्टकुलाब्धौ + + महोपाध्याय श्रीमद्भीमकृता शुद्धि-
मुक्तावली समाप्ता ॥
रवौ दुःखं सुखं सोमे भौमे मृत्युर्बुधे धनम् ।
मानं हन्ति गुरोर्वारे शुक्रे शुक्रक्षयो भवेत् ॥
शनैश्चरे सर्वदोषो नराणां चौरकर्म्मणि ।
शुद्धिमुक्तावलीं सारां अलिखद्भुवनेश्वरः ॥

विषयः । सर्ववर्णानामशौचव्यवस्था । जननाशौचनिरूपणम् । मृत्यशौचनिरूपणम् । अशौचसाङ्कर्य्यनिरूपणम् । सत्यशौचे कार्य्याणां विधिनिषेधकथनञ्चेति ।

No. 224. श्यामासपर्य्याविधिः. By काशीनाथ भट्टाचार्य्यः. Substance, country-made paper, 12×5 inches. Folia, 248. Lines, 9 on a page. Extent, 6,000 çlokas. Character, Bengali. Date, ? Place of deposit, Boḍiyāgrāma, Post Office Pākuḍiyā, District Rājasāhi, Paṇḍita Çaçibhūṣana Ṭhākura. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
साष्टाङ्गं नमनं विधाय पदयोर्वंसाख्यपीठे गुरो-
श्चिन्मय्याश्चरणाम्बुजे विजयदे मोक्षास्पदे चाद्भुते ।
ज्ञात्वा तन्त्रचयं विचार्य्य बहुधा वन्द्योदितः श्रीयुतः
काशीनाथधरामरः प्रतनुते श्यामासपर्य्याविधिम् । इत्यादि ।

End. विष्णोर्नामसहस्राणां चिराष्टत्वेन यत् फलम् ।
तत् फलं लभते मर्त्यः कालीति सकृदुच्चरन् ॥ शिवरहस्ये ।
तथापि ते विचारः कः काली कात्यायनीश्वरी ।
काली कालीति कालीति चरमुद्रैरेयं लभेत् ॥
शाकेऽङ्कपक्षसम्मिते रसयुते चन्द्रे दिने भास्करे
मार्गे मासि सितेतरे हरतिथौ स्वार्थं सतां तुष्टये ।

काशीस्थाखिलतन्त्रमन्त्रविदुषामालोच्य सिद्धं मतं
श्यामार्चाविधिमद्भुतं सुकृतवान् सर्व्वार्थसम्पादकम् ॥

Colophon. इति निगमागमविद्याविद्योतितश्रीकाशीनाथभट्टाचार्य्यविरचिते सिद्धान्तसारात्मके श्यामासपर्य्याविधौ विद्यामाहात्म्यकथनं नाम सप्तमो विभागः समाप्तः ॥ * ॥ ॐ शुभमस्तु ॥

विषयः। १ मे विभागे प्रातःकृत्यादिविवरणम्। २ ये विभागे अन्तर्यजनादिकथनम्। ३ ये विभागे बहिर्यागादिविवरणम्। ४ र्थे विभागे महापीठपूजादिकथनम्। ५ मे विभागे कुलाचारादिविवरणम्। ६ ष्ठे विभागे नैमित्तिकार्चनकाम्यसाधनादिनिरूपणम्। ७ मे विभागे विद्यामाहात्म्यादिकथनञ्चेति ॥

No. 225. श्राद्धकालनिरूपणम्. By मधुसूदनवाचस्पतिः. Substance, country-made paper, 13×3 inches. Folia, 6. Lines, 7 on a page. Extent, 140 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna, Dhātrigrāma, Paṇḍita Ṣaṣṭhīdāsa Bhaṭṭācāryya. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः शिवाय।
नत्वा गुरुपदद्वन्द्वं तथा देवीं सरस्वतीम्।
पार्व्वणादिक्रियाकालं वक्ति श्रीमधुसूदनः।
पिण्डान्नाद्यार्थकं श्राद्धं चौथे राजनि शस्यते ॥ इत्यादि।

End. तस्मिन् वर्षे न श्राद्धान्तरं कर्त्तव्यं। तेनैव च सपिण्डनं तेनैवाब्दिकमिष्यते इति वचनात्।

Colophon. इति श्रीमधुसूदनवाचस्पति-भट्टाचार्य्यविरचितं श्राद्धकालनिरूपणं समाप्तम् ॥ ॐ गुरवे नमः।

विषयः। पार्व्वणकालादिनिरूपणम् ॥

No. 226. श्राद्धतत्त्वविवृतिः. By काशीरामवाचस्पतिः. Substance, country-made paper, 17×3½ inches. Folia, 39. Lines, 8 on a page. Extent, 1,150 çlokas. Character, Bengali. Date, ? Place of deposit, Amarapura, District Medinīpura, Post Office Rādhānagara, Paṇḍita Guruprasanna Vidyāratna. Appearance, tolerable. Prose and verse. Correct.

Beginning. ॐ नमो गोपालाय ।

नत्वा गुरोश्चरणपद्मरजांसि मूर्द्धा
श्रीकान्तकान्तचरणञ्च निधाय चित्ते ।
श्रीकाशिरामसुकृती कृतिनां हिताय
सुश्राद्धतत्त्वविवृतिं वितनोति यत्नात् ॥
स्मृतिशास्त्राम्बुधौ लीलाकृतसेतुं जगद्गुरुम् ।
विदितं त्रिषु लोकेषु नमामि रघुनन्दनम् ॥
स्वकर्त्तव्यग्रन्थसमाप्तिप्रतिबन्धकविघ्नसम्भावनास्ति अतः सम्भावितताद्दशविघ्न-
नाशार्थं ग्रन्थकारः परमेश्वरप्रणामरूपमङ्गलं कृतवान् तच्च शिष्यशिक्षार्थं-
मादौ निबध्नाति प्रणम्येति । सच्चिदानन्दं कर्म्मधारयसमासाश्रयणात् सत्य-
ज्ञानसुखरूपमित्यर्थः एतच्च वेदान्तिमते नैयायिकमते तु सन्तौ चिदानन्दौ
ज्ञानसुखे यस्य तं । वेदान्तविसृतं वेदान्तशास्त्रप्रकाशितं अनेन कृष्णस्य
सच्चिदानन्दत्वं स्थिरीकृतं नमस्यत्वञ्च सूचितम् । इत्यादि ॥

End. उभौ यदि व्यतीतौ तु जीवेच्च प्रपितामहः ।
पिण्डौ निर्वपणयात् पूर्व्वौ भोजयेत् प्रपितामहम् ॥
निर्वपणयात् निर्व्वपेत् । विष्णुश्च —
मातामहानामप्येवं श्राद्धं कुर्य्याद्विचक्षणः ॥
इत्येवं जीवत्पितृकश्राद्धे नानापक्षाः । छन्दोगपरिशिष्टं —
सपिण्डः पितृकृत्येषु अधिकारो न विद्यते ।
न जीवन्तमतिक्रम्य किञ्चिद्दद्यादिति श्रुतिः ॥
सपिण्डः जीवत्पितृकस्य ।
जीवन्तमतिदद्याद्वा प्रेतायान्नोदके द्विजः ।
पितुः पितृभ्यो वा दद्यात् स पितेत्यपरा श्रुतिः ॥

Colophon. (अतःपरं खण्डितम्) ।

विषयः । रघुनन्दनभट्टाचार्य्यकृतश्राद्धतत्त्वग्रन्थस्य व्याख्यानम् ।

No. 227. श्राद्धप्रकरणम् . By नरोत्तमशर्म्मा . Substance, country-made paper, 13 × 2½ inches. Folia, 16. Lines, 8 on a page. Extent, 500 çlokas. Character, Bengali. Date, ? Place of deposit, Royail-grāma, District Ḍhākā, Bābu Yogīndramohana Rāya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ शिवलक्ष्मणाभ्यां नमः ।
आदौ संज्ञां विनिर्णीय ततो राशिस्थनिर्णयम् ।
अवस्थानिर्णयं पश्चात् करिष्यामि समासतः ॥ इत्यादि ।

End. तर्पणात् प्राक् वस्त्रनिष्पीड़नेन पितृलोकात् पराक्षो भवति इत्यादि-ग्रन्थगौरवभयान्न लिखितम् ॥ * ॥

Colophon. इति नरोत्तमदेवशर्म्मणा विरचिते चूर्णके श्राद्धप्रकरणं समाप्तम् ॥ * ॥

विषयः । संक्रान्तिव्यवस्थादिनिरूपणमुखेन श्राद्धादिव्यवस्थाकथनम् ।

No. 228. श्राद्धविवेकव्याख्या . By रामकृष्णतर्कपञ्चाननः. Substance, palm-leaf, 18 × 2 inches. Folia, 28. Lines, 7 on a page. Extent, 1,400 çlokas. Character, Bengali. Date, ? Place of deposit, Vĕḍogrāma, Post Office Raghunāthapura, District Mānabhūma, Paṇḍita Veṇkaṭa Varadācāryya Gosvāmī. Appearance, old. Prose. Generally Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।
कृष्णे मनः सन्निवेश्य व्यक्तव्यायभोक्तरि ।
व्याख्या श्राद्धविवेकस्य रामकृष्णेन तन्यते ॥
प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयज्ञानं तदर्थमादावभिधेयनिरूपणं प्रतिजानीते । विलोक्येति । यद्यपि सर्व्वैरादौ मङ्गलं क्रियते तथाप्यनेन तन्न कृतं । विघ्नविरहनिश्चयात् कृतं वा न लिखितं । शिष्यशिक्षार्थत्वाल्लिखनस्य । प्रकारान्तरेण ज्ञास्यन्तीति । इत्यादि ॥

End. य एवं वेत्तीति श्राद्धविधिज्ञाने श्राद्धापदेशे श्राद्धकरणानुमतौ च श्राद्धफलं भवतीत्यर्थः । गभीरं बहनुसन्धानज्ञेयार्थकं तन्त्रं स्मृतिशास्त्रं तदेवार्णवः दुष्प्रवेशः तस्य पारदृश्वना तात्पर्य्यज्ञानवता । उल्लासयता हर्षयता सतां स्मृतिशास्त्रव्युत्पन्नमतीं । आरम्भश्लोकेऽस्पष्टीकृतं ग्रन्थनाम स्फुटयति श्राद्ध-विवेकेति श्राद्धविवेकाख्यः संग्रह इत्यर्थः ॥ * ॥

Colophon. इति रामकृष्णतर्कपञ्चानन-भट्टाचार्य्यविरचिता श्राद्धविवेकटीका समाप्ता ॥ ॥ * ॥ श्रीकृष्ण प्रसीद ॥

विषयः । संक्षेपेण शूलपाणिकृतस्य श्राद्धविवेकाख्यग्रन्थस्य व्याख्यानम् ।

No. 229. श्रीसूक्तभाष्यम्. By रामचन्द्रः. Substance, country-made paper, 7×3 inches. Folia, 5. Lines, 14 on a page. Extent, 60 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
श्रुतिकञ्जार्थलक्ष्मीं यो विकासयति चिद्गतः ।
स पायात् सच्चिदानन्दः सूर्य्यमण्डलगो हरिः । इत्यादि ।

End. अथ पद्मद्रश्री तां सखावहेति । इयमृग्व्याख्यातचरा । एतावांस्तु विशेषः ॥

Colophon. इति श्रीसूक्ते तृतीयो वर्गः ॥ इति श्रीमदृषिगोत्रोद्भूत-रामचन्द्रविरचितं वैदिकपाठानुकारि-श्रीसूक्तभाष्यं सम्पूर्णम् ॥

विषयः । श्रीसूक्तस्य व्याख्यानम् ।

No. 230. सङ्केतसारावली. By शिवरामशर्म्मा. Substance, palm-leaf, 15×1½ inches. Folia, 12. Lines, 3 on a page. Extent, 100 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Vikramapura Vidgã, Paṇḍita Ānandacandra Vidyālaṇkāra. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।
प्राचीनतन्त्राण्यवलोक्य यत्नाद्-
गुरूपदेशं हृदये निधाय ।
संक्षेपतः श्रीशिवरामशर्म्मा
सङ्केतसारावलिमातनोति ॥
सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगम् ।
तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥ इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । राशिस्वरूपकथनम् । राशीनां कालबलादिकथनम् । कालवेलादिकथनञ्चेति ।

No. 231. संक्षिप्तसारव्याख्या (सुबन्तपादः) (भावार्थदीपिकानाम्नी). By महेशपञ्चाननः. Substance, country-made paper, 16×3 inches. Folia, 17. Lines, 10 on a page. Extent, 700 çlokas. Character, Bengali. Date, Sk. 1812. Place of deposit, Dakṣiṇakhaṇḍa, District Bardhamāna, Post Office Ukhaḍā, Çrī Gauraguṇānanda Ṭhākura. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीकृष्णचैतन्यः। ननु षट् इत्यादिसिद्धपदे षकारटकारौ × × × × ककारादिवर्णा न स्थिताः किं ... ...। प्रकृतिप्रत्यये च स्थितम्। इत्यादि।

End. समास एतद्विधानमित्यस्य फलमाह असमासे त्वित्यादि। ननु पञ्चमी चेत्यत्र स्वरांशपत्या(?) इयत्करणं स्वीकृतं तर्हि पञ्चमी भवति कथं सप्तमीत्यत आह अथवेत्यादि।

Colophon. इति श्रीविद्यार्णवात्मजश्रीमहेशपञ्चाननविरचितायां संक्षिप्तसारटीकाभावार्थदीपिकायां सुबन्तपादटीका भावार्थदीपिका समाप्ता॥ शकाब्दाः १८१२।

विषयः। संक्षिप्तसारव्याकरणस्य सुबन्तपादस्य व्याख्यानम्।

No. 232. संक्षिप्तसारटीका (सन्धिपादः) (सारार्थदीपिकानाम्नी). By गोपालचक्रवर्त्ती. Substance, country-made paper, 14×3 inches. Folia, 29. Lines, 8 on a page. Extent, 750 çlokas. Character, Bengali. Date, ? Place of deposit, Dakṣiṇakhaṇḍa, District Bardhamāna, Post Office Ukhaḍā, Çrī Gauraguṇānanda Ṭhākura. Appearance, fresh. Prose. Correct.

Beginning. ॐ श्रीकृष्णचैतन्यः।

यः सर्व्वेषां मतमनुसरन् भाति तत्तत्स्वरूपो
दूरे वाचामपि च मनसां योऽन्तिकस्थोऽपि नित्यम्।
यस्माद्विश्वं जगदपि च स सच्चिदानन्दमूर्त्ति-
र्विश्वग्गतिर्जयति नितरां सर्व्वदो माधवः सः॥
शम्भोर्बद्धवपु र्विरिञ्चिजननी यचःस्वरूपा हरे-
र्या सर्व्वैरपि वन्दिताङ्घ्रियुगला स्तूते त्वशेषं जगत्।
वाणी वाङ्मयदेवताखिलमयी सर्व्वैरगम्यापि या
तां वन्दे निजभक्तकल्पलतिकां सच्चिन्मयीमम्बिकाम्॥

आलक्ष्य टिप्पनीसारं विज्ञाय गौरवं मतम् ।
गोपालस्तनुते स्वरिसुदे सारार्थदीपिकाम् ॥
वृन्दारकवृन्दपरिवन्दितपादारविन्दद्वन्द्वश्रीमत्त्रिपुरहरनमस्कार एव परम-मङ्गलमिति श्रीशिवप्रणामरूपमङ्गलं ग्रन्थकृदाचरति शिवमित्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । संक्षिप्तसारव्याकरणस्य सन्धिपादव्याख्यानम् ।

No. 233. संक्षेपज्योतिराकरः. By रामगोविन्दचक्रवर्त्ती. Substance, palm-leaf, 14×2 inches. Folia, 42. Lines, 3 on a page. Extent, 550 çlokas. Character, Bengali. Date, Sk. 1715. Place of deposit, Vidgā̃, District Ḍhākā, Vikramapura, Paṇḍita Ānandacandra Vidyālaṅkāra. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
दैवतायाः पदद्वन्द्वं प्रकृतेः पुरुषस्य च ।
श्रीगुरोः पादपद्मञ्च नत्वा श्रीरामकृष्णजः ॥
भूदेवो रामगोविन्दः शिशूनामाशुबुद्धये ।
शास्त्रं यौच्यातिसंक्षेपात् तनोति ज्योतिराकरम् ॥
अथ दिननिर्णयः ।
रविः सोमः कुजश्चैव बुधो जीवः सितः शनिः ।
एतेषां नामतो वाराः सप्तैव कथिताः क्रमात् ॥ इत्यादि ।

End. यात्रां विपक्षसम्प्राप्तात् पुनर्भद्रेण योजयेत् ।
केचिदिदं कस्तावाप्तौ यात्रा परिसमाप्यते ॥
इति यात्राविधिः ॥ * ॥

Colophon. इति श्रीरामगोविन्दचक्रवर्त्तिविरचितः अतिसंक्षेपज्योतिराकरः समाप्तः ॥ * ॥
बाणेन्द्वब्धौ तथा चन्द्रे शाकेऽतीते सुनिश्चितम् ।
काशीनाथद्विजेनेदं सम्यीकेनैव लिख्यते ॥ * ॥

विषयः । दिनकथनम् । तिथिनिरूपणम् । पापयोगादिकथनम् । विष्टिभद्रादिकथनम् । रविशुद्ध्यादिकथनम् । विवाहादिविहिततिथ्यादिकथनम् । जलाशयारम्भदिनादिकथनम् । रविसंक्रान्त्यादिनिरूपणम् । पताकीरिष्ट्यादिकथनम् । नाडिचक्रदशादिनिरूपणम् । यात्राविध्यादिकथनञ्चेति ॥

No. 234. सङ्गीतसारसङ्ग्रहः. Substance, country-made paper, 8 × 5 inches. Folia, 43. Lines, 8 on a page. Extent, 550 çlokas. Character, Bāngālā. Date, ? Place of deposit, Seyāḍasol, District Bardhamāna, Çrī Candrānanda Ṭhākura. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाय नमः ।
श्रीगोविन्दं प्रणम्यादौ गीतज्ञसुखहेतवे ।
संक्षेपाद्व वच्मेऽहं सङ्गीतसारसंग्रहम् ॥
अथ सङ्गीतोत्पत्तिमाह ।
पुरा चतुर्णां वेदानां सारमाकृष्य पद्मभूः ।
इदन्तु पञ्चमं वेदं सङ्गीताख्यमकल्पयत् ॥ इत्यादि ।

End. उत्तमो मध्यमः प्रोक्तो गुणैः कतिपयैरिति ।
गुणयुक्तोऽपि दोषोऽस्तु उच्यते सोऽपि पञ्चधा ॥
अतःपरं खण्डितम् ।

विषयः । सङ्गीतोत्पत्तिनिरूपणम् । मूर्च्छनादिनिरूपणम् । रागादिनिरूपणम् । गायकलक्षणादिकथनम् । भाषादिनिरूपणम् । वाद्यादिनिरूपणम् । अतःपरं खण्डितम् ।

No. 235. सत्क्रियासारदीपिका. By गोपालभट्टः. Substance, foolscap paper, 13 × 4½ inches. Folia, 72. Lines, 8 on a page. Extent, 2,300 çlokas. Character, Nāgara. Date, Sm. 1949. Place of deposit, Lohajanga, District Ḍhākā, Vikramapura, Bābu Mukunda Lāla Pāla Caudhurī. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीराधारमणो जयति ।
प्रणम्य सच्चिदानन्दं जगतां सेव्यमीश्वरम् ।
श्रीकृष्णं परमानन्दमनन्याभीष्टदायकम् ॥
वक्ति स्टश्चिद्विजातीनामनन्यानां विशेषतः ।
पद्धतिं तां विवाहादेः सत्क्रियासारदीपिकाम् ॥
श्रीमद्गोपालभट्टोऽयं साधूनामाज्ञया भृशम् ।
भगवद्धर्म्मरक्षार्थं भक्तानां वैदिकी तु या ॥
कृता याप्यनिबद्धेन भीमभट्टेन या कृता ।
... ... ॥

सङ्करान्त्यजादीनां म्लेच्छभक्तानां पितृदेवार्चनादिकं क्वापि वेदे लोके धर्म्मशास्त्रागमस्मृतिपुराणादौ च नास्ति तेषामेतत्कृत्ये सत्यपि सेवानामोऽपराधो जायते तत्र प्रथमं अथर्व्ववेदः श्रीनारायणोपनिषत् प्रमाणमाह । ॐ अथ पुरुषो वै नारायणोऽकामयत इत्यादि ।

End. तदा कर्म्मकारः पितृब्राह्मणाय दक्षिणां दद्यात् । अपरब्राह्मणेभ्यश्च दक्षिणां दद्यात् । तथा कार्य्यादिवैष्णवसेवा जीवसन्तर्पणञ्च कुर्य्यात् । अथवा अन्य आचार्य्यः । तदा तस्मै दक्षिणां दद्यात् ।

Colophon. इति श्रीसमावर्त्तनक्रमः समाप्तः ॥ संवत् १९४९ ॥ किशोरीलालकायस्थ वृन्दावननिवासी ॥

विषयः । द्विजशूद्रादीनां विवाहादिविधिस्तत्प्रयोगादिनिरूपणञ्च ।

No. 236. सत्स्मृतिसारः. By जानकीरामसार्व्वभौमः. Substance, country-made paper, 10 × 6 inches. Folia, 7. Lines, 14 on a page. Extent, 125 çlokas. Character, Bengali. Date, ? Place of deposit, Puṭhiyā, District Rājasāhi; Paṇḍita Guruprasāda Çiromaṇi. Appearance, old. Prose. Correct.

ॐ नमः श्रीकृष्णाय ।
आनन्दकन्दं दिविषद्विवन्द्यं
विवन्द्य गोविन्दपदारविन्दम् ।
श्रीजानकीराम × सार्व्वभौमः
समग्रहीत् सत्स्मृतिसारमेतम् ॥

End. खण्डितत्वात् शेषो नास्ति ।

विषयः । तिथि-गोवधप्रायश्चित्तादेर्व्यवस्थानिरूपणम् ।

No. 237. सनत्कुमारसंहिता (शिवपुराणीया). Substance, country-made paper, 14 × 5½ inches. Folia, 101. Lines, 11 on a page. Extent, 3,500 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. श्रीगणपतये नमः । अथ सनत्कुमारसंहिता लिख्यते ।
प्रपद्ये देवमीशानं सर्व्वज्ञमपराजितम् ।
महादेवं सर्व्वभूतानामनादिं विश्वतोमुखम् ॥

वेदादौ यः स्वरः प्रोक्त उकाराख्यो महेश्वरः ।
सृजते सर्व्वभूतानि पञ्चभूतैः सदाशिवः ॥
तस्य चिन्ताप्रभावेण ब्रह्मणा विहितं जगत् ।
तद्वत्या सम्प्रवक्ष्यामि पुराणं शिवभाषितम् ॥
नैमिशाख्याश्रमपदे पुण्ये पूर्व्वं मयोदिते ।
पराशरस्य दायादः श्रीमान् सत्यवतीसुतः ॥
ब्रह्मर्षिः स च धर्म्मात्मा काले योगविदांवरः ।
गुरुर्लोकस्य धर्म्मात्मा ब्रह्मचारी तपोनिधिः ॥
ऋषिसङ्घैः परिवृतः श्रुत्यर्थं योऽवदत् पुरा ।
भारते शतसाहस्रीं संहितायां कवीश्वरः ॥
तेषां सुखोपविष्टानां कथां कथयतां पराम् ।
तत्राजगाम धर्म्मात्मा ब्रह्मणस्तनयः शुभः ॥
... ... ।
दृष्टस्तु ऋषिभिस्तत्र ब्रह्मपुत्रो महामुनिः ॥
लिङ्गार्चनविधिश्चैव देवदेवस्य पूजनम् ।
प्रसादस्य च यत् पुण्यं देवदेवस्य धीमतः ॥
संवत्सरस्य यत् पुण्यं शिवस्य परमं सुखम् ।
आवर्त्तनविधिश्चैव पुनरावर्त्तिकं तथा ॥
मूर्त्तीनां प्रविभागस्य मन्त्रस्य परमं विधिम् ।
... ... रुद्रस्य तु महात्मनः ॥   इत्यादि ।

End. पितॄणामक्षयमिदं (?) श्राद्धे पठ्यमानमिदं शुभम् ।
दुष्ट + + दुष्कर्म्मकलि + + + नाशनम् ॥
अथ + + श्लोकं श्लोकार्द्धं वा समाहितः ।
श्रद्धया भक्तियुक्तो वा तस्य प्रीतो भवेत् शिवः ॥
ॐ शङ्कर + + + रुद्रम् ।

Colophon. इति श्रीसनत्कुमारप्रोक्तं शिवपुराणं समाप्तम् ॥

विषयः । इति श्रीशिवमहापुराणे चतुर्विंशतिसाहस्र्यां संहितायां सनत्कुमारसंहितायां प्रथमोऽध्यायः । द्वितीयोऽध्यायः । सप्तद्वीपवर्णनं नाम तृतीयोऽध्यायः । चतुर्थोऽध्यायः । भुवनकोशवर्णनं नाम पञ्चमोऽध्यायः । ब्रह्मगीतोपाख्यानं नाम षष्ठोऽध्यायः । सप्तमोऽध्यायः । अष्टमोऽध्यायः । नवमोऽध्यायः । शिववर्णने दशमोऽध्यायः । एकादशोऽध्यायः । शिवमाहात्म्ये द्वादशो-

ऽध्यायः । चयोदशोऽध्यायः । शिविभीषणसंवादे चतुर्दशोऽध्यायः । लिङ्गभूतो नाम । (अध्याय संख्या नास्ति) पुष्पदानमाहात्म्यम् । पुष्पादिदानसमावेशः । उपवासविधिर्नाम । अष्टमीविधिः । अष्टमीव्रतम् । दानधर्म्मः । नियमोपदेशः । यजनकीर्त्तनं नाम (?) भूतिकीर्त्तनं नाम । लिङ्गार्चनफलकं नाम । दुर्वासशोपनिषत् । नाडीसंवादः । दक्षपार्थिवरदानं नाम । पञ्चायतनवर्णनं नाम । अविमुक्तमाहात्म्यं नाम । नन्द्युपाख्यानम् । नन्द्यभिषेको नाम । नन्द्युपाख्याने नन्दिविवादः । नीलकण्ठोपाख्यानम् । चिपुरवधोपाख्यानम् । चिपुरदाहो नाम । ब्राह्मणमाहात्म्यम् । योगविधिकथनं नाम । इति श्रीसनत्कुमारप्रोक्तं समाप्तम् ।

No. 238. सनत्कुमारसंहिता. Substance, country-made paper, 10 × 3 inches. Folia, 84. Lines, 5 on a page. Extent, 550 çlokas. Character, Nāgara. Date, Sm. 1935. Place of deposit, Mahārājā's Library, Hātuā. Appearance, fresh. Verse. Correct.

Beginning. श्रीगणेशाय नमः । अथ श्रीसनत्कुमारसंहितायां पटल लिख्यते (?) ।

श्रीसनत्कुमार उवाच ।

भो ब्रह्मन् ब्रह्मतत्त्वज्ञ ब्रह्मज्ञानविशारद ।

त्वत्तोऽहं श्रोतुमिच्छामि रहस्यं परमाद्भुतम् ॥ इत्यादि ।

End. युष्माकं चैव संसिद्धिर्भविष्यति न संशयः ॥ * ॥

Colophon. इति श्रीसनत्कुमारसंहितायां सदाशिवसनकसंवादे पञ्चविंशः पटलः ॥ * ॥ संवत् १९३५ ॥

विषयः । अथ पटलाः पञ्च वर्ण्यन्ते तद्यथा ॥ १ ॥ इति श्रीसनत्कुमारसंहितायां शौनकसदाशिवसंवादे २१ शः पटलः ॥ २ ॥ इति श्रीस० सं० सदाशिवसनत्कुमारसंवादे २२ शः पटलः ॥ ३ ॥ इति श्रीस० सं० सदाशिवसनकसंवादे २३ शः पटलः ॥ ४ ॥ इति श्रीस० सं० २४ शः पटलः ॥ ५ ॥ इति श्रीसनत्कुमारसंहितायां सदाशिवसनकसंवादे पञ्चविंशः पटलः ॥

No. 239. सन्धिटीका (संक्षिप्तसारीया). By वंशीवदनः. Substance, country-made paper, 13 × 3 inches. Folia, 16. Lines, 13 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, ? Place of deposit, Kājoḍā *viâ* Aṇḍāl Çrī Muıā i Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो विघ्नेश्वराय ।
रामं नत्वा गुरुं तेषां मतान्यालोक्य यत्नतः ।
संक्षिप्तसारटीकार्थी नवकार्थं प्रकाश्यते ॥
ग्रन्थारम्भे सकलशिष्टैकवाक्यतया विषयत्वेन परिप्राप्तम् । इत्यादि ।

End. सर्व्वमनुकरणेनेति चमस्त्रिः अन्यथा सन्देहः स्यात् । नित्यसन्धिर्व्वकल्पसिद्धत्वात् विकल्पोदाहरणमाह किं अनेन इत्यादि ॥ • ॥

Colophon. श्रीवंशीवदनं विशिष्टनयनं विद्वज्जनप्रीणनं
सूते रायमती सती मतिमती श्रीमान् वशिष्ठः स्वयम् ।
व्याकारे क्रमदीश्वरेण रचिते श्रीनन्दिना शोधिते
गोयीचन्द्रकृते तु तद्विरचिते पादोऽयमादिर्गतः ॥
श्रीराधाकृष्णः ॥ * ॥

विषयः। संक्षिप्तसारव्याकरणस्य सन्धिपादस्य व्याख्यानम् ।

No. 240. सभाकौस्तुभः. By रामनारायणमिश्रदासः. Substance, country-made paper, 14×4 inches. Folia, 143. Lines, 9 on a page. Extent, 4,500 çlokas. Character, Bengali. Date, ? Place of deposit, Royāil, District Ḍhākā, Bābu Yogindramohana Rāya. Appearance, tolerable. Verse. Generally correct.

Beginning. या शब्दशक्तिरथ वाचकवाच्यरूपा
ज्योतिर्मयी त्रिगुणया विदधाति सूर्त्यां ।
श्रीरामनारायणमिश्रदासः
सानन्दमुन्मथ्य सुकाव्यसिन्धुम् ।
स्फुरत् सभाकौस्तुभमुत्तमं मुदा
सतां मुदे स प्रकटीकरोति ॥
नानाकाव्यविचारचारुचतुरैर्धीरैरुदारैः समम्
सत्काव्यानि विचार्य्य पद्यनिचयैः प्रोद्यत्सभाकौस्तुभः ।
विश्वामित्रकुलोद्भवेन सहसा सन्नीतिविस्फूर्जित-
स्तेनायन्त मया कयापिच हरौ भक्त्या समुन्नीयते ॥
आदिष्टोऽस्मि सकलजलधिवेलावलयितेनावलये तिलकायमाननिखिल-

भूपालमौलिमालाभिलग्नमुकुटतटनटन्मणिमरीचिमञ्जरीपुञ्जपिञ्जरितमञ्जुपादाम्बुज दिल्लीश्वरालमगीरश्रीमदौरङ्गजेवसाहा-देव-गौड़राज्यसाधाव्याभिषिक्तेन करालकलिकालकालकरालकवलितदैन्यदावानलदह्यमानजगतीपीयूषधाराधरेण प्रचण्डभुजदण्डचण्डिमाकर्षकुण्डलितकोदण्डच्छिद्यमानकाण्डप्रकाण्डताण्डवसमुत्सारितवैरिनिकरेण शौर्य्यौदार्य्यधैर्य्यदयादाक्षिण्यविनयाद्यनेकगुणगरिमसमुपचितसत्कीर्त्तिकर्पूरपूरपूरिताखिलदिङ्मण्डलेन विचित्रचित्रगुप्तादिविविधानवद्यविद्याविद्याधरीविहारागारोत्तरराढ़ीय-कायस्थकुलतिलकातिशयसहृदयहृदयकुशेशयप्रकाशनमित्र-मित्रवंशसदंशपवित्रविश्वामित्रगोत्रप्रवरयक्षेश्वरश्रीमत्श्रीहरिनारायणरायसदीश्वरेण यथावत् सामात्यवरानवरतश्रुतिस्मृतीतिहासपुराणादिसकलशास्त्रव्याख्याविचक्षणानुचणपरीक्षणनिपुणा ... ... तेषां भवतीति नीतिप्रभृतिसकलशास्त्राणां सारमाकलय्य सभाप्रस्तावोपयोगिसंग्रहमेकं विरचयेति मङ्गलादिमयूखैः मया सभाकौस्तुभः समुन्नीयते ॥ इत्यादि

End. प्राणः प्राणभृतामन्नमन्नं लोकोऽभिधावति ।
अन्नप्रसादात् सौकर्य्यं जीवितं प्रतिभा सुखम् ॥
तुष्टिः पुष्टिर्बलं मेधा सर्व्वमन्ने प्रतिष्ठितम् ।
लौकिकं कर्म्म यद्वृत्तौ स्वगतौ यच्च वैदिकम् ॥
कर्म्मापवर्गौ यच्चोक्तं तच्चाप्यन्ने प्रतिष्ठितम् ॥ * ॥

Colophon. इति श्रीदर्पनारायणरायसमुन्नीतसभाकौस्तुभे द्रव्यगुणमयूखः समाप्तः ॥ श्रीरस्तु शाकेन्दुखाक्षसप्ततुरगै(?)र्मासि तुलाराशिके गत्वा शम्भोः पदद्वयं लिपिरियम् ॥

विषयः । मङ्गलादिनिरूपणम् । धर्म्मादिनिरूपणम् । पातकादिनिरूपणम् । पण्डितादिप्रशंसा । गुणप्रशंसा । दुर्जनादीनां निन्दा । याचकनिन्दा । दरिद्रनिन्दा । मूर्खादीनां निन्दा । सदाचारादिनिरूपणम् । उपदेशादिकथनम् । रसादिनिरूपणम् । अलङ्कारनिरूपणम् । सम्भोगशृङ्गारादिकथनम् । तथा विप्रलम्भशृङ्गारादिकथनम् । राशिनक्षत्रादिनिरूपणम् । मृत्युयोगादिकथनम् । द्रव्यगुणादिनिरूपणञ्चेति ।

No. 241. समयाचारतन्त्रम् . Substance, country-made paper, 18×4 inches. Folia, 30. Lines, 7 on a page. Extent, 900 çlokas. Character, Bengali. Date, ? Place of deposit, Pākuḍiyā, District Rājsāhi, Paṇḍita Kālidāsa Ṭhākura. Appearance, old. Verse. Generally correct.

Beginning. ॐ परदेवतायै नमः । श्रीदेव्युवाच ।
भगवन् सर्व्वदेवेश चित्स्वरूप सदाशिव ।
कथितं सर्व्वतन्त्रेषु वैपुरं ज्ञानमुत्तमम् ॥
शिवशक्त्यात्मकं यत्तु समयाख्यं परात्परम् ।
परं ब्रह्मेति विख्यातं सर्व्वशास्त्रेषु गोपितम् ॥
अन्यत् किञ्चिन्ततो नास्ति निश्चितं मनसि प्रभो । इत्यादि ।

End. खण्डितत्वात् शेषो नास्ति ।

विषयः। १ मे पटले नित्यानन्दज्ञानादिकथनम् । २ ये रहस्ययोगादिकथनम् । ३ ये परमाविद्यावीजादिकथनम् । ४ र्थे विद्यासाधनादिप्रकारः । ५ मे पूजारहस्यादिकथनम् । ६ ष्ठे मुद्रादिकथनम् । ७ मे कुण्डहोमसाधनादिप्रकारः । ८ मे वीजादिसाधनप्रकारः । ९ मे भावनिर्णयश्च । अतःपरं खण्डितम् ।

No. 242. सर्व्वसाधारणप्रमाणतत्त्वम् . Substance, palm-leaf, $10 \times 1\frac{1}{2}$ inches. Folia, 34. Lines, 3 on a page. Extent, 350 çlokas. Character, Bengali. Date, ? Place of deposit, Āḍāihājār, District Ḍhākā, Paṇḍita Candrakānta Vidyālaṇkārā. Appearance, old. Verse. Incorrect.

Beginning. ॐ नमो गणेशाय । अथ सर्व्वसाधारणप्रमाणतत्त्वम् ।
मरणादेरकर्मण्ये संयोगो यस्य नाग्निना ।
दाहादूर्द्धमशौचं स्याद् यस्य वैतानिको विधिः ॥
प्रक्षिप्याग्निं स्वदारेषु परिकल्प्य द्विजं तथा ।
प्रविशेत् कार्य्यवान् ... ... यथैव न चिरं क्वचित् ॥
रात्रावेव समुत्पन्ने सूते ... ... सूतके ।
पूर्व्वमेव दिनं ग्राह्यं यावन्नैवोदितो रविः ॥
उदिते तु यदा सूर्य्ये नारीणां दृश्यते रजः ।
जननं वा विपत्तिर्व्वा यस्या ... ... शर्व्वरी ॥ इत्यादि ।

End. नोपतिष्ठति यः पूर्व्वां नोपास्ते यश्च पश्चिमाम् ।
स शूद्रवत् बहिष्कार्य्यः सर्व्वस्माद् द्विजकर्म्मणः ॥
ऊर्द्धान्तियो हि यो विप्रः चालयेचरणद्वयम् ।
तज्जलं पितृमुखे दद्यात् आत्मानं नरकं व्रजेत् ॥ (?)
सन्ध्या येन न विज्ञाता सन्ध्यां येनाप्युपासते ।

जीवन्नेव भवेच्छूद्रो मृतः स चाभिजायते ॥
ॐकारोच्चारणाद्दोषात् शालग्रामशिलार्चनात् ।
ब्राह्मणीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् ॥
... ... ।
सङ्कल्पो नैव कर्त्तव्यो स्वप्नये च कदाचन ॥
गृहीत्वौदुम्बरं पात्रं वारिपूर्णं गुणान्वितम् ।
दर्भत्रयं साग्रलूनं फलपुष्पसमन्वितम् ।
जलाशयारामकूपे संकल्पः पूर्व्वदिङ्मुखः ॥

Colophon. (समाप्तिसूचकं वाक्यं नास्ति ।)

विषयः । चूड़ोपनयनकालनिरूपणम् । पिण्डदानकाले रजस्वलायाः कर्त्तव्यनिरूपणम् । श्राद्धविघ्नप्रमाणकथनम् । सपिण्डीकरणात् परं मासिकानामकर्त्तव्यत्वकथनम् । तिलदानविधिः । सीरधावनादिकालनिरूपणम् । पञ्चश्राद्धादिविधिः । तिथिविशेषे कुष्माण्डादिनिषिद्धवस्तुनिरूपणम् । आचमनादिनिरूपणम् । चौरकर्म्मविधिः । भूम्यादिदाने फलविशेषकथनम् । रविसंक्रमणादिनिरूपणम् । नवान्नकालनिरूपणम् । सापिण्ड्यविचारः गोत्रप्रवरपितृमातृबन्धुनिरूपणम् । पूजाविधानम् । अग्रेर्नामकरणम् । चरणचालनविधिः । शूद्राणां शालग्रामादिपूजानिषेधकथनम् । सङ्कल्पपात्रनिर्णयश्चेति ॥

No. 243. सर्व्वानुक्रमणीवृत्तिः. By षड्गुरुशिष्यः. Substance, country-made paper, 10×3 inches. Folia, 102. Lines, 13 on a page. Extent, 3,340 çlokas. Character, Nāgara. Date, Sm. 1830. Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्रीगणेशाय नमः । अथ ऋग्वेदाम्नाये शाकलके सूक्तप्रतीक ऋक्संख्या ऋषिदैवतच्छन्दांस्यनुक्रमिष्यामो यथोपदेशम् । अथेति मङ्गले प्रस्तावे वा ऋगंशत्वाकृत्स्नादृग्वेदः । इत्यादि ।

End. ब्राह्मणारण्यकसूक्तगृह्यचतुर्थारण्यकेषु तु । प्रत्यध्यायसमाप्तावपि द्विर्वचनं दृष्टं वानुदिता भवति भवतीत्यादि ।

Colophon. इति षड्गुरुशिष्यविरचिता सर्व्वानुक्रमणीवृत्तिः समाप्ता ॥ शुभमस्तु । संवत् १८३० ।

विषयः । ऋग्वेदीयसर्व्वानुक्रमव्याख्या ।

No. 244. साङ्कर्षकाण्डभाष्यम् . Substance, country-made paper, 10 × 3 inches. Folia, 87. Lines, 9 on a page. Extent, 1,957 çlokas. Character, Nāgara. Date, Sm. 1864. Place of deposit, Benares City, Gobinda Bhaṭṭa Solāpurkār. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

एवं द्वादशभिरध्यायैः प्रकृतिविकृतिभेदेन कतिपयान् न्यायान् संशोध्य तैरेव न्यायैरितस्ततो विप्रकीर्णान् वेदवाक्यार्थानैदम्परेण सम्यङ्निष्कृष्य-निर्णेतुमेषा चतुरध्याय्यारभ्यते । इत्यादि ।

End. जैमिनेर्विमलसूक्तिलतटिन्यां
मग्नमाप शुचितां मम चेतः ।
तेन खेलतु पिनाकिपदाब्जे
येन जन्मनिबद्धो न पुनः स्यात् ॥

Colophon. इति श्रीसाङ्कर्षे भट्टदीपिकायां षोडशस्याध्यायस्य चतुर्थः पादः ॥ * ॥ संवत् १८६४ ।

विषयः । भाट्टदीपिकाख्यमीमांसाग्रन्थस्य साङ्कर्षकाण्डस्य व्याख्यानम् ।

No. 245. सारावली, By नारायणवन्द्योपाध्यायः . Substance, country-made paper, 16 × 3½ inches. Folia, 152. Lines, 6 on a page. Extent, 3,200 çlokas. Character, Bengali. Date, ? Place of deposit, District Huglī, Kṛṣṇanagara, Paṇḍita Bramhanārāyaṇa Vidyālaṇkāra. Appearance, tolerable. Prose. Correct.

Beginning. श्रीरामः शरणम् ।

श्रीरामं जगतामीशं प्रणम्य तस्य तुष्टये ।
सारावलीं प्रतनुते श्रीलनारायणः सुधीः ॥
वृद्धिरादैजाराल्लैजैचोऽचः । अचः स्थाने आत् ऐच् आर् आल् एच् ऐच् इत्येते आदेशा वृद्धिः परिभाष्यन्ते । अ इ उ ऋ ऌ ल क ए ओ ङ ऐ औ च प्रत्याहारार्थोऽयं निर्देशः स्रेनाजित्यनेन अ इ उ ऋ ऌ ए ऐ ओ औ ऐजि × × एवमन्ये। प्रत्याहारेषु च ह्रस्वोक्त्या दीर्घोऽपि गृह्यते। इत्यादि।

End. धातोस्तु । तुनायिका तुपादिका
त्यतनोस्तु । इष्टत्यिका दाचिणात्यिका

क्षीनियतस्याच । खङ्गिका खट्टाका ।

Colophon. इति श्रीनारायण-वन्द्योपाध्यायकृतौ सारावल्यां तद्धितपादः समाप्तः ॥

No. 246. साहित्यरत्नाकरः. Substance, country-made paper, 13 × 2½ inches. Folia, 30. Lines, 7 on a page. Extent, 850 çlokas. Character, Bengali. Date, ? Place of deposit, Kājoḍā grāma *viá* Aṇḍāl, Bābu Yatīndranātha Nāyek. Appearance, tolerable. Prose. Correct.

Beginning. ॐ श्रीरामचन्द्राय नमः ।

आलिङ्ग्य गाढ़मुदरं पितुरङ्गजाने
वत्सल्यवत्त्ववतु वालगजाननो नः ।
यत्कुम्भयोर्गिरिसुताकुचपार्श्वभाजोः
स्तन्यं पिपासति गुहस्त्रिभिराननाब्जैः ॥
श्रेयो मे विदधातु शारदशशिश्रीभासुरा भासुरा
धारासारनिवासकारिमधुरव्याहारिणी हारिणी ।
मुक्ताभूषणपोषणश्रितलसच्छ्रीसाधुना साधुना
लावण्येन निजेन निर्जितवनी रम्भावती भारती ॥
नुमः स्तुमः कर्द्दमदुर्द्दमाम्बुधिप्रनष्टचेष्टाखिलजन्तुसन्ततिम् ।
सोयं स्वप्रतिभादषन्निकषणप्रोद्दीप्तषड्दर्शनी-
रत्नसङ्ग्रयकन्धरो यदनुजो रामाह्वयः पण्डितः ।
तस्मात् पर्व्वतनाथसूरिजलधेः श्रीमल्लमम्भोविय-
द्भासद्भजुषो लसद्गुणमयेर्यस्योदयश्चन्द्रवत् ॥
सोऽहं धर्म्मसुधीर्गवां विलसितैः कर्त्तुं रसालङ्क्रिया
संस्फूर्त्तिं समुदच्चयेयमधुना साहित्यरत्नाकरम् । इत्यादि ।

End. अथ निजकुलकूटस्थस्य मार्त्तण्डस्य पुनःपुनर्मण्डलभेदो माभूदित्यभिसन्धानात्म-कस्यामरद्विषद्मारणकारणस्यार्थस्य गूढ़त्वाद्गाम्भीर्य्यम् । उक्तोदाहरणान्येव सौशब्द्यस्योदाहरणानि द्रष्टव्यानि ।

एवं सूक्ष्मधियां मार्गमाश्रित्योदाहृतं मया ।
माधुर्य्यौजःप्रसादास्तु सौशब्द्येन समन्विताः ॥
गुणाश्चत्वार एवैते मम सूक्ष्मतरेक्षितुः ।
नय इवेति वात्यर्थं मनसे रोचते मतम् ॥ * ॥

Colophon. इति श्रीमत्त्रिभुवनपवित्रचरितगौडावतंस-वाराणसीवंशपद्माकरप्रभातभानुना पद्मनाभसूनुना सकलकलाविज्ञानवता धर्म्मसंख्यावता विरचिते श्रीरघुकुल-तिलकगुणमणिधामनि साहित्यरत्नाकरनामन्यलङ्कारग्रन्थे गुणनिरूपणं नाम पञ्चमस्तरङ्गः ॥ अतः परं खण्डितम् ।

विषयः । १ मे तरङ्गे ग्रन्थारम्भसमर्थनादिः । २ ये तरङ्गे वाचकशब्दार्थादिनिरूपणम् । ३ ये तरङ्गे लक्ष्यशब्दादिनिरूपणम् । ४ र्थे तरङ्गे व्यञ्जकशब्दार्थादिनिरूपणम् । ५ मे तरङ्गे गुणनिरूपणम् ॥

No. 247. सिद्धिखण्डः (मन्त्रसारीयः) . By नित्यनाथसिद्धः. Substance, country-made paper, 17×6 inches. Folia, 13. Lines, 12 on a page. Extent, 325 çlokas. Character, Nāgara. Date, Sm. 1876. Place of deposit, District Medinīpura, Candrakoṇā, Mahānta Bharata Rāmānuja Dāsa. Appearance, tolerable. Prose. Incorrect.

Beginning. श्रीरामाय नमः । अथ गुटिका लिख्यते ।
सर्व्वविद्यासाधनं । अथ सकलजनवश्य होर ऐकचित्त मन्त्र जपिए वौसह आरवार देवदार चन्दन वरको जर पानीसो वाटिए विभूति सों संयुक्त कै माथे तिलक करे तो सर्व्वजन वश्य होय । पथरसगाको जर पुष्यनक्षत्रमो लिजे अश्वगन्धवन्नो लीजै अपजौको जर लीजे ॥ इत्यादि ॥

End. ॐ नमः ह्रूं ह्रां ह्रीं ठः ठः फ ट् स्वाहा जहा को चले तहा को यह मन्त्र पढ़ी लेइ । श्रीनित्यनाथो जयति ।

Colophon. इति श्रीपार्व्वतीपुत्र-नित्यनाथ-विरचिते सिद्धिखण्डे मन्त्रसारे अमृतसञ्जी-वनीनाम सप्तम उपदेशः सम्पूर्णः । समाप्तम् । शुभमस्तु मङ्गलं दद्यात् । संवत् १८७६ ।

विषयः । आकर्षणी-वशीकरणी-मोहकारिण्यमृतसञ्चारिण्यादिमन्त्राः । तत्तन्मन्त्रसाध-कद्रव्यादिनिरूपणञ्च ।

No. 248. सुभाषितम् . Substance, country-made paper, 7×4½ inches. Folia, 16. Lines, 8 on a page. Extent, 150 çlokas. Character, Nāgara. Date, ? Place of deposit, District Medinīpura, Candrakoṇā, Mahānta Bharata Rāmānuja Dāsa. Appearance, old. Verse. Generally correct.

Beginning. श्रीमते रामानुजाय नमः ।
ध्येयं सदा परिभवघ्नमभीष्टदोघं
तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्त्तिहं प्रणतपालभवाब्धिपोतं
वन्दे महापुरुष ते चरणारविन्दम् ॥
यतो यतो निवर्त्तन्ते विमुच्येत ततस्ततः ।
एकधर्मो न्वर्णा चेमशोकमोहभयापहः ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञश्च तर्पणम् ।
दैवहोमं बलि × × × पूजनम् ॥ इत्यादि ॥

End. ताम्बूलं कटुतिक्तमिष्टमधुरं चारं कषायान्वितम्
वातघ्नं कफनाशनं कृमिहरं दुर्गन्धि×नाशनम् ।
× × × × × कामाग्निसन्दीपनं
ताम्बूलस्य त्रयोदश गुणा स्वर्गेऽपि ते दुर्लभाः ॥ (?)
× × × × ×
त्यक्त्वा सुदुस्त्यजसुरेप्सितराज्यलक्ष्मीम्
धर्म्मिष्ठ आर्य्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावत्
वन्दे महापुरुष ते चरणारविन्दम् ॥

Colophon. इति श्रीसुभाषितम् सम्पूर्णम् । श्रीमते रामानुजाय नमः । रामः ।

विषयः । नानाविषयकश्लोकसङ्ग्रहः ।

No. 249. सुभाषितसारसङ्ग्रहः. Substance, country-made paper, 12 × 4 inches. Folia, 16. Lines, 15 on a page. Extent, 576 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ सुभाषितसारसंग्रहारम्भः । तत्रादौ मङ्गलम् ।
चलत्कर्णानिलोद्धूतसिन्दूरारुणिताम्बरः ।
जयत्यकाले विद्धजन् सन्ध्यामिव गजाननः ॥
वामाङ्गीकृतवामाङ्गः कुण्डलीकृतकुण्डलिः ।

आविरस्तु पुरोवाक्तु भूतिभूत्यम्बराम्बरम् । इत्यादि ।

End. द्दशमद्दारमार्गेण लक्ष्यं प्राप्य ततः परम् ।
द्वात्रिंशत्तत्त्वसंयुक्तः परमात्मनि लीयते ।

Colophon. इति सुभाषितसारसंग्रहः समाप्तः ।

विषयः । प्रसङ्गोपक्रान्तश्लोकानां सारसंग्रहः ॥

No. 250. सूक्तप्रतीकम् . Substance, country-made paper, 11 × 4 inches. Folia, 56. Lines, 15 on a page. Extent, 1,640 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, fresh. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अग्निमीड इति नवर्चस्य सूक्तस्य वैश्वामित्रो मधुच्छन्दा ऋषिः ॥ अग्निर्देवता गायत्रीच्छन्दः ॥ इत्यादि ।

End. तृतीयायास्त्रिष्टुप् शिष्टानां तिसृणामनुष्टुप् ।

Colophon. इति अष्टमाष्टके अष्टमोध्यायः ॥ इति दशमं मण्डलम् ।

विषयः । ऋग्वेदोक्त ऋचां प्रतीकादिनिरूपणम् ।

No. 251. सूर्य्यपञ्चाङ्गम् . Substance, country-made paper, 7 × 4 inches. Folia, 156. Lines, 5 on a page. Extent, 700 çlokas. Character, Nāgara. Date, ? Place of deposit, Mahārājā's Library, Hātuā. Appearance, new. Verse. Correct.

Beginning. ॐ श्रीगणेशाय नमः ।
ॐ श्रीशैलशिखरासीनं भैरवीपतिमीश्वरम् ।
भैरवं चन्द्रमुकुटं गणगन्धर्व्वसेवितम् ॥
पन्नगाभरणोपेतं जटामुकुटमण्डितम् ।
भस्माङ्गरागधवलं सूर्य्यं + + + + ॥
+ + + + +
गङ्गाधरं प्रसन्नास्यं स्मितानन्दपङ्कजम् ।
नन्दिरुद्रार्चितं शम्भुं दृष्ट्वा प्रोवाच भैरवी ॥

श्रीदेव्युवाच ।

देवदेव महादेव भक्तानामभयप्रद ।

त्वं शिवः परमेशानस्त्वं विष्णुस्त्वं प्रजापतिः ॥

+ + + +

वद शीघ्रं दयासिन्धो पञ्चाङ्गं पूर्व्वसूचितम् ।

देवदेवस्य सूर्य्यस्य + + + + + ॥ इत्यादि ।

End. अदातव्यमभक्ताय दातव्यञ्च महामुनिम् ।

गुह्या तिगुह्यगोप्त्रीत्वं सूर्य्यपञ्चाङ्गमुत्तमम् ॥

सर्व्वदा सर्व्वथा गोप्यं गोपनीयं स्वयोनिवत् ॥

Colophon. इति श्री रुद्रयामले तन्त्रे देवीरहस्ये परमादीपिकायां श्रीभगवत्सूर्य्यपञ्चाङ्गं समाप्तम् ॥

विषयः । रुद्रयामलतन्त्रीय-देवीरहस्यान्तर्गतम् श्रीसूर्य्यदेवस्य पटल-पूजापद्धति-सहस्र-नाम-कवच स्तवराजात्मकपञ्चाङ्गम् ।

No. 252. सूर्य्याथर्व्वशीर्षम् . Substance, country-made paper, 4×2 inches. Folia, 5. Lines, 7 on a page. Extent, 35 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ॥ ॐ ॥

सूर्य्याथर्व्वशीर्षं व्याख्यास्यामः ॥ ब्रह्मा ऋषिः । गायत्रीच्छन्दः । आदित्यो-देवता हंसाद्यग्निनारायणयुक्तं बीजम् ॥ इत्यादि ।

End. त्रिकालं जप्त्वा क्रतुशतफलं प्राप्नोति य एष आदित्यो जपति । स महापत्कं तरति स महापत्कं तरति य एवं वेद इत्युपनिषत् ॥

Colophon. श्री सूर्य्याथर्व्वशीर्षं समाप्तम् ।

विषयः । श्रीसूर्य्यनारायणस्तुतिः ॥

No. 253. सौरसूक्तम् . Substance, country-made paper, 5×3 inches. Folia, 11. Lines, 7 on a page. Extent, 88 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares City, Govinda Bhaṭṭa Solāpurkār. Appearance, tolerable. Prose. Correct.

Beginning. श्री गणेशाय नमः ॥

उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य कण्वः प्रस्कण्व ऋषिः सूर्य्योदेवता नवाद्या गायत्र्योऽन्त्यास्तस्रोऽनुष्टुभः ॥ इत्यादि ।

End. सूर्य्यस्यैव सायुज्यं सरूपतां सलोकतामश्नुते । नमः शौनकाय । नमः शौनकाय । सौरः समाप्तः ।

विषयः । भगवत्सूर्य्यनारायणस्तुतिविषयकं सूक्तम् ।

No. 254. स्तवामृतलहरी. By विश्वनाथचक्रवर्त्ती. Substance, country-made paper, 12 x 6 inches. Folia, 37. Lines, 12 on a page. Extent, 1,300 çlokas. Character, Bengali. Date, ? Place of deposit, District Bardhamāna Seyāḍasol. Çrī Candrānanda Ṭhākura. Appearance, tolerable. Verse. Generally correct.

Beginning. श्रीराधाकृष्णाभ्यां नमः ।

संसारदावानललीढ़लोक-
त्राणाय कारुण्यघनाघनत्वम् ।
प्राप्तस्य कल्याणगुणार्णवस्य
वन्दे गुरोः श्रीचरणारविन्दम् ॥
महाप्रभोः कीर्त्तन-नृत्य गीत-
वादित्रमाद्यन्मनसो रसेन ।
रोमाञ्च-कम्पाश्रु तरङ्ग-भाजो
वन्दे गुरोः श्रीचरणारविन्दम् । इत्यादि ।

End. नन्दसूनो कृष्ण गोविन्द दृश मयि दिश मयि ।
निजकृपया मां जीवय मन्दस्मितसुधया ॥
पीतवसन मम कलय मनो
नवनीलनलिनकमनीयतनो ।
व्रजवनगरावतंस विभो
व्रजभं मासुररीकुरु भोः ॥ * ॥

Colophon. समाप्तेयं स्तवामृतलहरी ।

विषयः । गुरुदेवाष्टकादिः । गुरुचरणस्मरणाष्टकम् । नरोत्तमप्रभोरष्टकम् । लोकनाथ प्रभोरष्टकम् । शचीनन्दनविजयाष्टकम् । स्वरूपविलासामृतम् । मदनगोपालदेवाष्टकम् ।

अनुरागवल्ली । राधिकाध्यानामृतम् । रूपचिन्तामणिनिरूपणम् । सङ्कल्पकल्पद्रुमकथनम् । सुरतकथामृतकथनम् । लब्धसंवादश्चेति ।

No. 255. स्नेहमालिका. Substance, English paper, 16×4 inches. Folia, 30. Lines, 8 on a page. Extent, 750 çlokas. Character, Bengali. Date, ? Place of deposit, Ḍhākā Paṭuāṭuli, Bābu Yādavānanda Gupta. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

अथ ज्वरस्य स्नेहमाह ।

अगुर्व्वेला हरिद्रे द्वे मुर्व्वा मुस्तकरेणुकम् ।

कटुकं मधुकं रास्ना चन्दनं शतपुष्पकम् ॥ इत्यादि ।

End. अग्निञ्च कुरुते दीप्तिं स्त्रीणां सन्यविशेषणम् । भद्रोत्कटाख्यं घृतम् ॥

Colophon. इति स्नेहमालिकायां बालरोगाधिकारः ।

समात्रेयमायुर्व्वेदसंग्रहीता स्नेहमालिकानाम्नी पुस्तिका ॥ * ॥

विषयः । नानाविध घृततैलादिकरणप्रकारादिकथनम् ॥

No. 256. स्मृतिकल्पद्रुमः राधावल्लभ कविवागीशः. Substance, country-made paper, 14×3 inches. Folia, 56. Lines, 6 on a page. Extent, 1,000 çlokas. Character, Bengali. Date, Sk. 1712. Place of deposit, District Bardhamāna, Post Office Ukhaḍā grāma Dakṣiṇakhaṇḍa, Çrī Gauraguṇānanda Ṭhākura. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ श्रीरामः ।

स्मृतिकल्पद्रुमाख्यानं ग्रन्थं प्राकृतभाषया

कुरुते कविवागीशो राधावल्लभसंज्ञकः ॥

সর্ব্বত্র শুচি তৎকালজীবী পুরুষাদি কর্ম্মাধিকারী হয়। অতএব প্রথমে শুদ্ধি নির্ণয় করিতেছি।

End. অপর অসমান জাতির তর্পণ না করিবেক। কিন্তু ভীষ্মের তর্পণ করিবেক ॥ * ॥

Colophon. इति श्रीमुकुन्दमिश्रतनूद्भव-कविवागीश-श्रीराधावल्लभशर्म्मविरचिते स्मृतिकल्पे आह्निकमञ्जरी समाप्ता ॥ * ॥

द्वादशाश्वीन्दुशकाब्दे मिते भानौ गते शुचौ ।
श्रीमद्द्विजो उमाकान्तशर्म्मा प्राखिखच्छ्राद्धमञ्जरीं ॥

विषयः । प्रथमा शुद्धिमञ्जरी । तत्र शुद्ध्यादिव्यवस्था । द्वितीया प्रायश्चित्तमञ्जरी । तत्र प्रायश्चित्तादिव्यवस्था । तृतीया तिथिमञ्जरी । तत्र तिथ्यादिव्यवस्था । चतुर्थी श्राद्धमञ्जरी । तत्र श्राद्धव्यवस्थादिश्चेति ।

No. 257. स्मृतिसंक्षेपः. By नरोत्तमदेवशर्म्मा. Substance, country-made paper, 12×2½ inches. Folia, 6. Lines, 8 on a page. Extent, 140 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Royāil grāma, Bābu Yogīndramohana Rāya. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमः परदेवतायै ।
अज्ञानतिमिरध्वंसि संसारार्णवतारकम् ।
मुक्तिप्रदं पदं यस्य नत्वा संदृश्यते मया ॥
चूर्णकेन सुबोधेन नरोत्तमद्विजेन वै ।
कथ्यते स्मृतिसंक्षेपो शृण्वन्तु द्विजसत्तमाः ॥ अथाशौचसंक्षेपः । इत्यादि ॥

End. कुलटा-षण्ढातिरिक्तादुष्कृतकर्म्मणोऽपि अयाचिताहृतं ग्राह्यं ॥ * ॥

Colophon. इति स्मृतिसंक्षेपेऽशौचव्यवस्था समाप्ता ॥ * ॥

विषयः । संक्षेपेणाशौचव्यवस्थादिकथनं ।

No. 258. स्मृतिसंक्षेपसारः. By रमाकान्तचक्रवर्त्ती. Substance, country-made paper, 17×3 inches. Folia, 15. Lines, 6 on a page. Extent, 375 çlokas. Character, Bengali. Date, ? Place of deposit, District Ḍhākā, Āḍāihājār, Paṇḍita Candrakānta Vidyālaṃkāra. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य कालीचरणारविन्दम्
ज्ञात्वा च तत्त्वस्य स्मृतेर्विशेषम् ।
वक्ष्यामि पुत्रस्य सुबोधहेतुम्
संक्षेपसारं खलु बालबोध्यम् ॥
अथोद्वाहस्मृतिसंक्षेपसारो निरूप्यते । अथोद्वाहलक्षणं यथा ॥

भार्य्यात्वसम्पादकग्रहणं विवाहः । तद्ग्रहणञ्च उत्सर्गानन्तरं वरस्य ममेयमिति ज्ञानरूपम् । तस्य समवायविषयताभ्यां सम्बन्धाभ्यां वरकन्ययोः सत्त्वाद् वरकन्ययोर्विवाह इति प्रतीतिरुपपद्यते । तस्य स्वीकाररूपज्ञानविशेषस्य समवायविषयतयोर्भेदाद्वरकन्ययोर्विवाहकर्तृत्वकर्म्मत्वे । अतएव कन्यापुत्र-विवाहेष्विति संगच्छते । इत्यादि ॥

End. मातृबन्धुसन्निपातव्यवस्था । एकतो मातृ-मातामहौ-तत्पितृ पितामह-प्रपितामहाः । अन्यतोऽपुत्रा मातामहीभगिनी तदा तत्पुत्रयोग्यतामवलम्ब्य तन्मातामह-प्रमातामह वृद्धप्रमातामहानां प्रत्येकं सन्ततिः पञ्चमीपर्य्यन्ता बन्धुकन्यादिकाः पञ्च वाधस्तना त्रिगोत्रान्तरिता नोद्वाह्याः ।

... ...

यदा तु पितामहीभ्रातापि नास्ति तदा तयोर्योग्यतामवलम्ब्य बन्धुपितामह-प्रपितामहानां प्रत्येकं सन्ततिः × × पर्य्यन्ता बन्धुभगिन्यादयः पञ्च वा त्रिगोत्रान्तरिता नोद्वाह्याः ॥

Colophon. इति मधुसूदनभट्टाचार्य्यात्मज श्रीरमाकान्तचक्रवर्त्ति-निरूपिते स्मृतिसंक्षेप-सारे सम्बन्धः पञ्चविध इत्यादि बन्धुसन्निपातान्तविवेचनं समाप्तम् ॥

विषयः । उद्वाह्यलक्षणम् । तत्र कन्यादानाधिकारिक्रमकथनम् । कन्याविवाहकालनिरूपणम् । गोत्रनिरूपणम् । कन्योत्सर्गवाक्ये प्रवराद्युल्लेखस्य कर्त्तव्यत्वकथनम् । यजुर्वेदिनां सामगेय-कन्यादानोत्सर्गपूर्व्वकमग्निस्थापनादिविवेचनम् । सपिण्ड-समानोदक-सगोत्र समानप्रवर-बान्धवभेदात् पञ्चविधसम्बन्धनिरूपणञ्च ।

No. 259. स्वत्वविचारः. Substance, country-made paper, 18 × 3½ inches. Folia, 13. Lines, 10 on a page. Extent, 300 çlokas. Character, Bengali. Date, ? Place of deposit, District Medinīpura, Post Office Khaḍāra-grāma Kurāṇa, Paṇḍita Ambikācaraṇa Vidyāsāgara. Appearance, new. Prose. Correct.

Beginning. श्रीहरिः पातु ।

स्वत्वं तावत् स्वत्वमुत्पन्नं विनष्टं नवस्वं ममस्वं देवस्वं ब्रह्मस्वमित्यादि-प्रतीतिसिद्धं पदार्थान्तरम् । तच्च वृत्तिनियामकविशेषेण सुवर्णादिनिष्ठं स्वर्ण-स्वत्वमिति प्रत्ययात् निरूपकत्वाख्यविशेषणताविशेषेण च स्वामिनिष्ठम् । अत्रास्य पुरुषस्य स्वत्वमिति प्रत्ययात् । नचैवमस्मिन् एतद्द्रव्यस्वामित्वमेतद्द्रव्यपति-त्वमिति कथं स्यात् निरूपकतासम्बन्धस्य वृत्त्यनियामकत्वात् । निरूपकता

सम्बन्धस्यापि प्रकृतिहृत्तिनियामकताभ्युपगमे अस्मिन् पुरुषे एतद्द्रव्यस्वामित्वमिति प्रतीतेर्दुर्व्वारत्वादिति वाच्यं। इत्यादि ॥

End. केचित्तु जलप्रक्षेपप्रतिपत्तिरूपपिण्डपित्र्ययज्ञवत् सर्व्वमेव श्राद्धं होमरूपमेव अग्नौ करणहोमस्याग्नौत्सर्गादेश्च तदङ्गत्वादित्याहुः। तदसत् अग्नौत्सर्गस्यैव श्राद्धत्वस्य सकलतान्त्रिकसिद्धस्यासति बाधके त्यागानौचित्यादिति दिक् ॥

Colophon. इति त्यागस्वरूपनिरूपणम् । स्वत्वविचारः समाप्तः ।
हेरम्ब-सूर-कमलापति-शङ्करोमा-वाणी-रमाभयवरप्रदकालिकानाम् ।
पादाम्बुजानि सुरदानवसेवितानि कुर्व्वन्तु शं प्रणमतो मम दैन्यभाजः ॥
यास्यति जलधरसमय स्तवापि च समृद्धिर्लघीयसी भविता ।
तटिनि तटद्रुमपातनपातकमेकं चिरस्थायि ॥
सुरचर रन्धनसमये मा रच मुरलीमतो मधुराम् ।
नीरसमेध्ये रसतनुतां कमलनुतां कमानुरेति ॥

विषयः। स्वत्वस्य विचारः। पुत्रस्वत्वकथनम्। दम्पत्योः पारस्परिकस्वत्वकथनम्। विषयादीनाञ्च स्वत्वकथनं त्यागस्वरूपकीर्त्तनञ्च ।

No. 260. स्वधर्म्मामृतसिन्धुः By श्रीसुकसुधीः. Substance, country-made paper. 10×5 inches. Folia, 245. Lines, 10 on a page. Extent, 4,500 çlokas. Character, Nāgara. Date, Sṃ. 1934. Place of deposit, Hātuā, Koyeladeva Maṭha. Appearance, new. Prose and verse. Correct.

Beginning. श्रीमन्निम्बार्काय नमः ।
End. केलीति। एवं केलिकलया क्रीड़ाकलया विशिष्टः सन् चिरं चिरकालं जीवन्मुक्तो भवति। तथा प्रतिजनुः प्रतिजन्म भोक्ता भवति। प्रतिजनुरिति जनुर्जनुः वीप्सयाव्ययीभावः। जनुर्जननजन्मानीत्यमरः। इति।

Colophon. यामाराध्य पितामहादिविबुधाः सृष्ट्यादिकं कुर्व्वते
यां ध्यायन्ति सदैव योगिनिवहा ब्रह्मस्वरूपां पराम्।
नत्वाऽज्ञानतमिस्रनाशतरणिं श्रीकालिकां तां द्विज-
टीकां रामकिशोरनामक इमां तस्याः स्तुते र्निर्म्ममे॥
मया विरचिता ह्येषा कर्पूरादिप्रबोधिनी।
तन्नोतु मुदमज्ञानां धीमतां वा कृपावताम्॥
अज्ञानाद्वा प्रमादाद्वा स्खलितं यद्बभूव मे।
कृतिभिः शोधनीयं तत् कृपया बहुदर्शिभिः॥
इति लोचनगोचरीकृतब्रह्महरिहरादिगीर्व्वाणगणदुर्ल्लभापारसकलकरणहतियोगिगणमनोगोचरभवानीपदारविन्दकानिर्व्वचनीयमहिमत्रिभुवनविदितसर्व्वविद्यासन्तति-श्रीरामकिशोरशर्म्मविरचिता शिवांशभूतभगवन्महाकालविरचित-श्रीमद्दक्षिणकालिकास्तुतिः कर्पूरादिप्रबोधिनी नाम सभाप्रिपद्माकृढा॥

विषयः। कर्पूरादिस्तवव्याख्यानम्।

No. 49. कर्म्मप्रकृतिटीका. Substance, country-made paper, 11×4 inches. Folia, 12. Lines, 11 on a page. Extent, 350 çlokas. Character, Nāgara. Date ? Place of deposit, Dikmaṇḍalācāryya Mahārāja Bālacandra Suri. Benares City. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो वीतरागाय।
प्रणम्य कर्म्मद्रुमचक्रनेमिं नमस्कराधीश्वमरिष्टनेमिं।
कर्म्मप्रकृत्याः कियतां पदानां सुखावबोधाय करोमि टीकाम्॥

End. इति विवरणप्रज्ञावकाशमाशङ्क्य मध्यापाध्ययप्रयोग्याः पुद्गलवर्गणाः प्ररूपयति।

Colophon. समपूर्णोऽयम् ।

विषयः । जैनकर्मप्रकृतिव्याख्या ।

No. 50. कलापव्याकरणोत्पत्तिप्रस्तावः By वनमालिद्विजः. Substance, country-made paper, 14×3 inches. Folia, 10. Lines, 5 on a page. Extent, 150 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrāma, Post office Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīça. Appearance, old. Verse. Generally correct.

Beginning. प्रणम्य शिवया सार्द्धं शिवं शिवप्रदायकम् ।
ज्ञानदं सर्व्वतत्त्वज्ञं सुरासुरनमस्कृतम् ॥
कलापाख्यं महाशास्त्रं विस्तृतं सर्व्वसम्मतम् ।
कुतः कथं कृतं तेन प्रस्तावमतिसुन्दरम् ।
तमेवाहं प्रवक्ष्यामि बालानामवबुद्धये ॥ इत्यादि ।

End. संक्षेपाद्रचितं किञ्चिद् गुरुपादप्रसादतः ।
आत्मगुणैर्बुधैः सर्व्वैर्ज्ञायतास्तु विशेषतः ॥

Colophon. इति श्रीवनमालिद्विजविरचिते कलापव्याकरणोत्पत्तिप्रस्तावे पञ्चमः परिच्छेदः समाप्तः ।
समाम्नेयं भुवनैकसारं हंसासनस्थं ××× स्वरूपम् ।
सुधांशुसूर्य्याग्निसमप्रदीप्तिं गुणत्रयात्मानमहं भजामि ॥
परात्पर जगद्बन्धो त्वदीयचरणाम्बुजे ।
स्थानं मे दीयतामन्ते कृपया करुणानिधे ॥

विषयः । आसीत् पुरा शातवाहनो नाम राजा स कदाचित् महादेव्या सह सरसि विहर्त्तुं गतवान् तत्रासौ महिषीं प्रति प्रीतिपरायणो जलोत्क्षेपं कुर्व्वन्नतिशयजलक्लान्तया महादेव्या "मोदकं देहि राजन्निति" पुनः पुनर्व्याहृतो वकशो महिषीप्रीतिमिच्छन् मोदकं दत्तवान् तेन च तयातिनिर्भयमतिनिष्ठुरं निर्भर्त्सितो राजा मा उदकं देहीति प्रकृतमर्थमननुसरन् नितरां लज्जापरवशो जीवितुमुत्सृष्टुमुपचक्रमे तत्र तथाविधमवलोक्य राजानं राज्ञी समानीय सर्व्वशास्त्राभिज्ञं कमपि पण्डितवरं प्रेषितवान् राज्ञः परिशान्तनाय स च सर्व्वशास्त्री अचिरेणैव कालेन राजानं व्याकरणसंस्कृतं कर्त्तुं प्रतिज्ञाय महादेवस्याराधनां कृतवान् देवस्य च शम्भोरनुज्ञया कार्त्तिकेयमाराध्य शिखिवाहनस्य शिखिनां कलापात् व्याकरणं संगृह्य राजानमल्पकालेनैव व्याकरणाभिज्ञं कृतवानित्यस्य कलाप इति नाम आसीदिति कथनं ।

No. 51. कवितारत्नाकरः. Substance, country-made paper, 14×3½ inches. Folia, 7. Lines, 11 on a page. Extent, 300 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post office Gurvetā, Grāma Bhaṭṭagrām, Paṇḍit Rāmhridaya Bhaṭṭachāryya. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीरामः । अथ कवितारत्नाकरः ।

माधवो माधवो वाचि माधवो माधवो हृदि ।
स्मरन्ति साधवः सर्व्वे सर्व्वकार्य्येषु माधवम् ॥
देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥
न माता शपते पुत्त्रं न दोषं लभते मही ।
न हिंसां कुरुते साधु र्न देवः सृष्टिनाशकः ॥
न चौरप्रचारिका पृथ्वी न विप्रो देवनाशकः ।
न धर्म्मनाशको राजा न देवः सृष्टिनाशकः ॥
जयोऽस्तु पाण्डुपुत्राणां येषां पक्षे जनार्द्दनः ।
यतः कृष्णस्ततो धर्म्मो यतो धर्म्मस्ततो जयः ॥ इत्यादि ।

End. भुक्त्वा राजवदासीत यावन्न विकृतिं गतः ।
ततः शतपदं गत्वा वामपार्श्वे तु संविशेत् ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्त्रस्तु स्थविरे काले स्त्रियो नास्ति स्वतन्त्रता ॥
पठतो नास्ति मूर्खत्वं जपतो नास्ति पातकम् ।
सर्व्वदा जप्तविद्यानां विद्या नातिप्रसीदति ॥
आसनं चालयेत् दृष्ट्वा पथि नारी विवर्ज्जिता ।
जागरणे भयं नास्ति कलिक्रोधो निवार्य्यते ॥ २१४ ।

इति कवितारत्नाकरः समाप्तः ।

रामचन्द्र तव यादृशी कृपा
वानरेषु न नरेषु तादृशी ।
साद्धके मयि वानराकृतौ
सा कृपा किमधुना न जायते ॥

विषयः । श्लोकावलीनां संग्रहः ।

No. 52. कातन्त्रपञ्जीव्याख्या . By रामकिशोर शर्मा . Substance, country-made paper, 10×3 inches. Folia, 29. Lines, 6 on a page. Extent, 550 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām, Post office Mehar Zilla, Comilla, Paṇdit Jagadbandhu Tarkavagis. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

भवानीचरणद्वन्द्वनखचन्द्रमरीचयः ।
उद्यन्तो हृदयेऽस्माकं नाशयन्त्वन्तरन्तमः ॥
नत्वा शिवपदं रामकिशोरेण यथामति ।
त्रिलोचनकृता-पञ्जी पञ्जीव्याख्यायते स्फुटम् ॥

तत्रादौ तावत् सकलशिष्टाचारप्राप्तस्य प्रारिप्सितग्रन्थसमाप्तिप्रतिबन्धक-विघ्नध्वंसकामनया कृतस्य शिवनमस्कारस्वरूपमङ्गलस्य शिष्यशिक्षायै निबन्धनं दुर्गसिंहोक्तकातन्त्रप्रदत्तदुर्गपदविवरणरूपचिकीर्षितवस्तुनिर्देशञ्च कुर्व्वन् पञ्जिकाकारः श्लोकद्वयं कृतवान् प्रथमेत्यादि ।

End. तथाच सति तन्निष्ठताद्यभाविप्रतिपत्तिविषयतानुकूलत्वाद्यपुरुषीयनिष्ठत्व-भाविप्रतिपत्तेर्विशिष्टसाधकत्वाभाववान् यत्ताद्यवचनशतकरणकोऽपि पूर्व्वो-क्तभाविव्यापार इत्याद्यन्वयबोधः ।

समाप्तेयं पञ्जी ।

विषयः । त्रिलोचनकृतायाः कातन्त्रीयसन्धिविषयिकाया वृत्तेर्व्याख्यानम् ।

No. 53. कामयन्त्रोद्धारः . Substance, country-made paper, 18×4 inches. Folia, 15. Lines, 7 on a page. Extent, 500 çlokas. Character, Bengali. Date, Sk. 1297. Place of deposit, District Dinajpur, Rájárampur Kālāpāda, Paṇdit Sitānātha Bhaṭṭācharyya. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो गगणगामिन्यैः ॥ अथ मातृकायन्त्रम् ॥ केशराद्यमष्टदलं पद्मं लिखित्वा कर्णिकायां वसौः इति बीजं लिखेत् इत्यादि ।

End. उदीरितं मन्मथयन्त्रमेतत् सौभाग्यलक्ष्मीविजयप्रदायि ॥
काश्मीररोचनालाक्षामृगेभमदचन्दनैः ।
विलिखेद्धेमलेखन्या यन्त्राण्येतानि देशिकः ॥

भूमिष्ठस्य गरस्थस्य दग्धनिर्माल्यसङ्गतम् ।
विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न कारयेत् ॥

Colophon. इति महामहोपाध्याय-सत्पण्डित-श्रीपरिव्राजकाचार्य्येण नानामूलादागमादाकृष्यकृतः काम्ययन्त्रोद्धारः समाप्तः ॥ शुभमस्तु ॥ शकाब्दाः १६९० ।

विषयः । मातृकादिशकयन्त्रलिखनविधिः ।

No. 54. कार्त्तिकमाहात्म्यम् (सनत्कुमारसंहितान्तर्गतम्). Substance, country-made paper, 14×5 inches. Folia, 38. Lines, 9 on a page. Extent, 1200 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rajvāti. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय । ऋषय ऊचुः ।
मुनिश्रेष्ठा वालखिल्याः सर्व्वलोकहितेच्छया ।
कलौ कलुषचित्तानां लोकानां दीनभाषिणाम् ॥
ज्ञानविज्ञानहीनानां शिश्नोदरसुखैषिणाम् ।
क्षयभङ्गुरवुद्धीनां स्वार्थतत्परमनसाम् ।
कथं प्रसन्नो भगवान् भविष्यति जनार्द्दनः ॥

End. भास्करस्य मुखात् श्रुत्वा ततस्तानभिवाद्य च ।
ययुः सूर्य्यस्य निकटे गायन्तो भास्करस्तुतिम् ॥
इत्येतत् सर्व्वमाख्यातं कार्त्तिकस्य व्रतोत्तमम् ।
यत्कृत्वा सर्व्वपापेभ्यो मुक्तो भवति तत्क्षणात् ।
अतः परं किं वक्ष्यामि तद्वदस्वैव सत्वरम् ॥

Colophon. इति श्रीसनत्कुमारसंहितायां कार्त्तिकमाहात्म्ये चतुर्नवतितमोऽध्यायः ॥ स्कन्दपुराणीय सनत्कुमारसंहितायां कार्त्तिकमाहात्म्यं समाप्तम् ॥ * ॥

विषयः । अत्र आदावेव एकसप्ततितमोऽध्यायः समारभ्य चतुर्नवतितमाध्यायं यावत् कार्त्तिकमाहात्म्यादिकथनम् ॥

No. 55. कालमाधव-संक्षिप्त-व्याख्या. Substance, country-made paper, 9×4 inches. Folia, 16. Lines, 3 on a page. Extent, 100 çlokas. Character, Nāgara. Date Sm. 1903. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

प्रथम (..) च— सांख्यमतमाश्रित्य कालशब्दवाच्यः कश्चिदर्थो नास्तीति पूर्व्वपक्षी (पक्षः) कृतः, वैशेषिकादिमतमाश्रित्य तत्तत्त्वं साधितम् इत्यादि ।

End. प्रसेति तदेवं निर्णीय तमेवार्थं संग्रहे अनुक्रम्योपसंहरति ईदृशमिति ।

Colophon. इति व्याख्या समाप्ता । सम्वत् १९०३ ।

विषयः । कालमाधवीयव्याख्या ।

No. 56. कालमाधवीय-कारिका-व्याख्या. By वैद्यनाथ सूरि. Substance, country-made paper, 12 × 4 inches. Folia, 37. Lines, 9 on a page. Extent, 740 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

नत्वा गजाननं देवमगजानन्दवर्द्धनम् ।

कालमाधवपद्यानि विवरिष्ये यथामति इत्यादि ॥

End. उपाकर्म्मणि चोत्सर्गे ग्रहवोधो न विद्यते ।

ईदृशं नियमं न्यायशास्त्राभ्यां कर्त्तुमुद्यमः ॥

Colophon. इति श्रीमदर्म्मशास्त्रपारावारीणरामचन्द्रभट्टात्मजभट्टवैद्यनाथसूरिकृते कालमाधवीयकारिकाव्याख्याने प्रथमं प्रकरणं सम्पूर्णम् ।

विषयः । कालमाधवीय-कारिकाव्याख्या ॥

No. 57. काव्यादर्शटीका. By त्रिभुवनचन्द्र. Substance, country-made paper, 14 × 4 inches. Folia, 57. Lines, 7 on a page. Extent, 2,000 çlokas. Character, Bengali. Date, Sk. 1758. Place of deposit, Dinajpur, Babu Giris Candra Cakravarttī. Appearance, tolerable. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

सर्व्वज्ञं सर्व्वद्वितं देवं श्रीवर्द्धमानमानम्य ।

त्रिभुवनचन्द्रेणेयं विविच्यते दण्डिपट्टीका ॥

विघ्नोपशमनपुण्यसम्भारभक्तिप्रकर्षं सम्प्रदायाविच्छेदलक्षणं फलमवलोक्य मङ्गलार्थं श्लोकमाह ।

चतुर्मुखमुखाम्भोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्व्वशुक्ला सरस्वती ॥

चतुर्मुखस्य मुखानि तान्येवाम्भोजानां वनानि तत्र हंसवधूः पितामह-वदनकमलकाननहंसीति रूपकालङ्कारेण शक्त्यो विशुद्धत्वात् सरस्वत्याश्च तन्मुखप्रसूतत्वादभिजनशुद्धिः प्रदर्शितेति । इत्यादि ॥

End. प्रकृतमुपसंहर्त्तुमाह ।

पन्था स एष विहृतः परिणामहृत्त्या ।
संक्षिप्यविस्तरमनन्तमलङ्क्रियाणम् ॥
वाचामति (... ...) ।
× × × × × × ॥

इत्यविषयं विवरीतुमलं विशेषेण अलङ्क्रियाणामनन्तपरिमितं विस्तरं स्वभावाख्यानादिरूपपरिणामहृत्त्या यः पूर्व्वाचार्य्यैरुपदिष्टः स एव पन्थाः ।
विवरीतुं समारोपि-
ष्यावर्त्तनपटीयसे ।
ॐ नमोवादिसिंहाय ।
नमः स्याद्वादवादिने ॥

Colophon. इत्याचार्य्य-श्रीवादिसिंहनामाङ्कितेन त्रिभुवनचन्द्रेण विरचितायां दण्ड्य-लङ्कारटीकायां अर्थालङ्कारविभागो नाम द्वितीयः परिच्छेदः ॥ ॐ नमः ॥
शकाब्दा १७५८ ॥

विषयः । दण्डिकृतकाव्यादर्शस्य व्याख्यानम् ॥

No. 58. काव्यप्रकाशटीका (रसप्रकाशः). By श्रीकृष्णशर्म्मा. Substance, country-made paper, 25 × 3½ inches. Folia, 19. Lines, 7 on a page. Extent, 600 çlokas. Character, Bengali. Date ? Place of deposit, Gram Bhadughar, Post Bramhanberia, Zilla Comilla, Paṇḍit Amar C. Nyāyaratna. Appearance, old. Prose. Correct.

Beginning. ॐ नमः स्वेष्टदेवतायै ।

सत्याश्रममनाः शुद्धद्विजेन्द्रविलसत्तनुः ।
मुरारिर्वा पुरारिर्वा पायान्नो वृजिनार्णवात् ॥

रसप्रकाशनामायं निबन्धः क्रियतेऽधुना ।
काव्यप्रकाशबोधाय श्रीमत् श्रीकृष्णशर्म्मणा ॥
ननु काव्यस्य धर्म्मादिचतुर्वर्गसाधनतया तन्निरूपणार्थं सुकुमार× × × × × × × × ×ग्रन्थ एव कर्तुमुचितः न तु × × × मङ्गलमित्याशङ्कामपनेतुं मङ्गलफलं दर्शयन्नेव तत्कारिकामवतारयति ग्रन्थारम्भ इत्यादि । इत्यादि ।

End. अयमर्थः भावः प्रतीतिमात्रसारं हि काव्यं न त्ववाग्निष्टोमादिवाक्यवत् सत्यार्थप्रतिपादनद्वारेण प्रवर्त्तनार्थं प्रामाण्यमन्विष्यते अतोऽत्र सत्यासत्यत्वनिरूपणमनुपयुक्तमेव तस्यैव ? विषयेषु विधिनिषेधकृत्यमितिसिद्धेरित्यास्तां विस्तरः ।

Colophon. इति श्रीश्रीकृष्णशर्म्मविरचिते रसप्रकाशे पञ्चमोऽध्यायः । एतावन्मात्रं श्रीकृष्णशर्म्मणा विरचितम् । श्रीहरिः ॥

विषयः । काव्यप्रकाशस्य व्याख्यानम् ।

No. 59. किशोरकौमुदी. Substance, country-made paper, 12×5 inches. Folia, 23. Lines, 9 on a page. Extent, 100 çlokas. Character, Bengali. Date ? Place of deposit, Saptagrām Kṛṣṇapurer Akdā (Monastery). Appearance, old. Verse. Generally correct.

Beginning. श्रीकृष्णाय नमः ।
जिज्ञासमानो जनको वासुदेवकथाद्भुतम् ।
समपृच्छत् सुसन्तुष्टो मुनिं कृष्णपरायणम् ॥
सनत्कुमारं भगवन् कथ्यतां मे कृपानिधे ।
गोविन्दस्य यदाश्चर्य्यं वसतो गोकुले विभोः ॥ इत्यादि ।

End. घनश्यामलगोविन्दपादपद्मोद्भूपा विभो ।
कार्ष्णा दुःखसागरं वै तरन्ति मम मानिनः ॥
नन्दवालन्तु गोपालं वालमेकोनषोडशम् ।
चिद्घनानन्दगोविन्दं चिन्तयामः प्रजापतिम् ॥

Colophon. इति श्रीकिशोरकौमुद्यां .... ॥ ० ॥

विषयः । गोकुललीलावर्णनम् । प्रेमादिकथनम् । नन्दादीनां परिणामकथनम् । भक्तानां परिणामकथनम् । ईश्वरस्वरूपनिरूपणम् । नाममाहात्म्यादिकथनम् ॥

No. 60. कुण्डकल्पद्रुमः. Substance, country-made paper, 12×5 inches. Folia, 38. Lines, 10 on a page. Extent, 800 çlokas. Character, Nāgara. Date, of composition Sk. 1577. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीशिवो जयति ।

ओमित्यक्षरमद्वितीयमम (.) तत्त्वद् यदन्तस्थितं ।
नत्वा(.)ति विभर्त्ति विश्वमखिलं यस्मिन् पुनर्लीयते ।
शास्त्रं वीक्ष्य समुद्धराम्यथ सतां श्रीमाधवोऽहं मुदे ।
निर्मथ्याङ्कसमुद्रमिष्टफलदं श्रीकुण्डकल्पद्रुमम् ॥ इत्यादि ।

End. करे दिङ्मिते सायकाश्च नागाः ।
भूर्भुजो शून्यमम्भोधयः पर्व्वपूर्व्वाः ।
भूजाः सूक्ष्मसूक्ष्माः स्मृताः चेषसिद्धौ ।
युगाश्चापि तुल्यानि तेषोत्तमानि ॥

Colophon. रविघनमितवर्षे १७१२ विक्रमाब्दे प्रयाते ।
नगनगतिथितुल्ये १५७७ शाककाले प्रवृत्ते ।
शरदि मनुजमाने मन्मथे नैषशुक्ले ।
फणितिथियुतचन्द्रे कुण्डकल्पद्रुमोभूत् ।

विषयः । यज्ञकुण्डविधानम् ॥

No. 61. कुण्डमण्डपविधानम् (आथर्वणसूत्रोक्तम्). Substance, country made paper, 8×3 inches. Folia, 38. Lines, 10 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

अथाथर्वणसूत्रोक्तकुण्डमण्डपविधानम् लिख्यते तत्रानि नैविद्यकानि आथर्वणिकानि वक्ष्यामः (.) मे शंकुमेकादशाङ्गुलं विधाय शङ्कुसंमितया

रज्वा मण्डलं परिलिख्य यत्र लेखयोः शङ्कुप्रच्छाया निपतति तत्र शंकुं निदन्ति सा प्राची इत्यादि ।

End. कुण्डाकारेण मेखलार्द्धेन विभाग दीर्घविस्तृता योन्यः सितादिना रचयेत् ।

Colophon. इत्याथर्व्वणस्तुत्योक्तकुण्डमण्डपविधानम् ।

विषयः । अथर्व्ववेदीयकुण्डमण्डपविधानम् ।

No. 62. कुण्डलीकवचम्. Substance, country-made paper, 11×3 inches. Folia, 3. Lines, 7 on a page. Extent, 90 çlokas. Character, Bengali. Date ? Place of deposit, Upalatā grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgis. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीगुरवे नमः । श्रीआनन्दभैरवुवाच ।

अथ वक्ष्ये महादेव कुण्डलीकवचं शुभम् ।
परमानन्ददं सिद्धसिद्धवृन्दनिषेवितम् ॥
यद्धृत्वा योगिनः सर्व्वे धर्म्माधर्म्मप्रदर्शकाः ।
ज्ञानिनां मानिनोऽ धैर्य्या विचरन्ति यथा तथा ॥
सिद्धयोऽप्यनिमाद्याश्च करस्थाः सर्व्वदेवताः ।
एतत् कवचपाठेन देवेन्द्रो योगिराड् भवेत् ॥
ऋषयो योगिनः सर्व्वे जटिलाः कुलभैरवाः ।
प्रातःकाले त्रिवारञ्च मध्याह्ने वारयुग्मकम् ॥
सायाह्ने वारमेकन्तु पठेत् कवचमेवच ।
पाठादेव महायोगी कुण्डली दर्शनं लभेत् ॥ इत्यादि ।

End. इत्येतत् कवचं देवि कुण्डलिन्याः प्रसिद्धिदम् ।
ये पठन्ति ध्यानयोगे योगमार्गव्यवस्थिताः ॥
ते यान्ति मोक्षपदवीमैहिके नात्र संशयः ।
वामा वामकरे धृत्वा सर्व्वाभीष्टमवाप्नुयात् ॥
स्वर्णे रौप्ये तथा ताम्रे रोपयित्वा प्रपूजयेत् ।
सर्व्वदेशे सर्व्वकाले पठित्वा सिद्धिमाप्नुयात् ।
स भूयात् कुण्डली पुत्रो नात्र कार्य्या विचारणा ॥

Colophon. ॐ इति रुद्रजामले उत्तरखण्डे कुलकुण्डलिनीकवचं समाप्तं ।

विषयः । कुण्डलीशक्तेः कवचकथनम् ।

No. 63. कुण्डलीस्तोत्रम् . Substance, country-made paper, 11 × 3 inches. Folia, 1. Lines, 7 on a page. Extent, 34 çlokas. Character, Bengali. Date ? Place of deposit, Upalatāgrām, Post Māhar, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgis. Appearance, fresh. Verse. Generally correct.

Beginning. अथ कुण्डलीस्तोत्रं ।

ॐ जन्मोद्धारिणी रचिणीह तरुणी वेदादिवीजादिमा ।
नित्यं चेतसि भाव्यते भुवि कदा सद्वाक्यसञ्चारिणी ।
मां पातु प्रियदा सदा सविपदं संख्यातमश्रीधरे ।
धात्री त्वं स्वयमादिदेववनिता दीनातिदीनं परं ॥
रक्ताभास्वतचन्द्रिका लिपिमयी सर्पाकृतिर्निद्रिता ।
आग्रदर्म्मसमाश्रिता भगवती त्वं मांशलोकाश्रयः । (?)
मांसोद्गन्धकगन्ध-दोषजडितं वेदादिवाक्यान्वितं ।
संपाद्याम्रतचन्द्रकोटिकिरणे नित्यं शरीरं कुरु ॥ इत्यादि ।

End. कुण्डलीशक्तिमार्गस्थं स्तोत्राष्टकं महाफलम् ।
यः पठेत् प्रातरुत्थाय स योगी भवति ध्रुवम् ॥
सर्व्वतेजःस्वरूपां मामनन्तकोटिविग्रहां ।
दरिद्रधनदां लक्ष्मीं नारायणमनोरमां ॥
सदा भावय शम्भो त्वं योगनायकपण्डितः ।

Colophon. ॐ इति रुद्रयामले उत्तरखण्डे कुण्डलीस्तोत्रं समाप्तम् ।

विषयः । कुण्डलीशक्तेः स्तवनं ।

No. 64. कुमारपलाचरित्रम् . By जिनमण्डनोपाध्याय . Substance, country-made paper, 12 × 5 inches. Folia, 85. Lines, 15 on a page. Extent, 1,980 çlokas. Character, Nāgara. Date of composition Sk. 1492. Place of deposit, Benares, Diŋmaṇḍalācāryya Mahārāja Bālacandra. Appearance, old. Verse. Incorrect.

Beginning. जीवोऽयं विमलस्वभावसुभगः सूर्य्योपलस्वद्यथा ।
धत्ते संगवशादनेकविकृतीं स्वं प्राप्तरूपस्थितिः ॥
यद्याप्नोति रवेरिवातिसुगुरोः सत्पादसेवाश्रयं ।
तज्जातोर्ज्जिततेजसीव कुरुते धर्मेन्धनं भस्मसात् ॥

End. प्रबन्धयोजितः श्रीमत्कुमारन्टपतेरयं ।
गद्यपद्यैः (...) कश्चित् × × × ।
कैश्चित् प्राग्यजनिर्मितैः ? × × × ॥
× × × × × × ॥
श्रीसोमसुन्दरशिष्येण यथाश्रुतानुसारेण श्रीजिनमण्डनगणिनाशक १४९२
वनु (...) वत्सरे रचितः श्रीजिनमण्डनोपाध्यायैः श्रीकुमारपालप्रबन्धात्
यथादृष्टानुसारेण योजितः ।

Colophon. इति श्रीकुमारपालचरित्रं सम्पूर्णम् ।

विषयः । कुमारपालचरित्रवर्णनम् ।

No. 65. कुमारसम्भवटीका . (ललिता) By भगीरथ . Substance, country-made paper, 18 × 3 inches. Folia, 75. Lines, 8 on a page. Extent, 300 çlokas. Character, Bengali. Date, Sk. 1678. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ।
ब्रह्मबीजां कलाधारे व्याकारेऽपारपल्लवां ।
वार्णी कल्पलतापाठपदार्थवतश्रितां ॥
यः पीतसुपिण्डकुलभूषणमग्रजन्मा ।
माघादिकाव्यनिबन्धस्य चकार टीकाः ॥
स श्रीभगीरथकविर्ल्ललिताभिधाना-
मेताञ्च मन्दमतिबोधकरीं करोति ॥
अस्युत्तरस्यामित्यादि । उत्तरस्यां दिशि उत्तरदेशभूमौ नगाधिराजः
पर्व्वतानां राजा इत्यादि ॥

End. केनापि प्रकारेण न दत्ता याचो वचनानि यया शयने शय्यायामपि
यास्तिष्ठन्ति ताः शयनसख्यः ताभ्यः शयनसखीभ्य इति विग्रहः प्रथमश्चासौ
सुखविकारश्चेति विग्रहः ॥

Colophon. इति पीतसुण्डीयभगीरथविरचितायां कुमारटीकायां सप्तमः सर्गः अष्टमसर्गस्तु भगवत्या जगन्मातुरम्बिकायाः शृङ्गारवर्णनं इति भयादुपेक्षितमस्माभिर्नव्याख्यात इति कुमारटीप्पनी सम्पूर्णा ॥ शकाब्दा १६७८ ॥

विषयः । कालिदासकृतकुमारसम्भवकाव्यस्य व्याख्यानम् ॥

No. 66. कुमारीतन्त्रम्. Substance, country-made paper, 18 × 4½ inches. Folia, 6. Lines, 8 on a page. Extent 300 çlokas. Character, Bengali, Date ? Place of deposit, Calcutta, Government of India. Appearance. old. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।
कैलासशिखरासीनं चन्द्रखण्डविराजितं ।
पप्रच्छ परया भक्त्या गौरी जगां वृषध्वजं ॥ इत्यादि ।

End. अप्लायुतं श्मशाने च शत्रूणां मारणं भवेत् ।
कालीकल्पमिदं प्रोक्तं गोपयेत् मातृजारवत् ॥
गोपने सर्व्वसिद्धिः स्यात् प्रकाशे मरणं ध्रुवं ॥

Colophon. इति श्रीकुमारीतन्त्रे परमरहस्ये कलियुगवर्षने पूर्व्वभागे कालीकल्पे नवमः पटलः ।

विषयः । १ पटले विद्योद्देशकथनं । २ पटले यन्त्रयोगविधिकथनं ॥ ३ पटले वह्नियोगकथनं । ४ पटले नैवेद्यनिश्चयादिकथनं । ५ पटले पुरश्चरणविधिकथनं । ६ पटले कुलाचारविधिकथनं । ७ पटले पूजाख्यानादिनिरूपणं । ८ पटले आचारविधिकथनं । ९ पटले कालीकल्पः ।

No. 67. कुरुक्षेत्रमाहात्म्यं. By रामचन्द्रसरस्वती. Substance, country-made paper, 10 × 5 inches. Date Sm. 1888. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smṛtibhuṣaṇa. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. श्रीगणेशाय नमः ।
प्रणम्य जगदीशानं तेन यान्तुसनामयं ? ।
× × × × × × ।
× × × × × × ।

अथ श्रीमद्रामचन्द्र-सरस्वत्याननाब्जच्युतोत्कटसुगन्धियाथार्थ्यमयमकरन्दा ? श्रीमत्कुरुक्षेत्रीयतीर्थवर्णनग्रन्थभ्रमभजत्सा अनेकपुराणेतिहाससुगन्धितमहाकमला संसारसागरोत्तितीर्षधिकारिजनहंसमण्डिततटा अस्य-कृत्या ग्रन्थात्मिकानुक्रमणिका हरिगिरिभिस्तरण ? विभ्राव्यते । तत्रानुबन्ध-चतुष्टये नाम अधिकारिविषयसम्बन्धप्रयोजनानि । तत्राधिकारी संयते न्द्रियत्वे सति तीर्थाभिगमनकामः उक्तञ्च वनपर्व्वणि इत्यादि ।

End. पूर्व्वोक्तकालदेशानुसार्य्यं पूर्व्वोक्तप्रमाणकसांगा ? संख्यातयाचितस्वस्वयाव्याख्-मेधजन्यपुण्याद्विनपरमेश्वरगतानन्तसन्तोषहृदये पूर्व्वोक्तविशेषः पूर्व्वोक्तविशे-षणाय सम्प्रददे । इत्यादि पूर्व्ववत् ॥

Colophon. इति श्रीकुरुक्षेत्रनामतीर्थमाहात्म्यं समाप्तं । संवत् १८८८ ॥

विषयः । कुरुक्षेत्रमाहात्म्यवर्णनमुखेन तत्तत्तीर्थ-कर्त्तव्यकर्म्मनिचयनिरूपणं ॥

No. 68. कृच्छ्रादिविधिः By अनन्तदेव. Substance, country-made paper, 8 × 4 inches. Folia, 7. Lines, 9 on a page. Extent, 105 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ कृच्छ्रादिलक्षणादिसंक्षेपः ॥ याज्ञवल्क्यः ।

एकभक्तेन नक्तेन तथैवायाचितेन च ।

उपवासेन चैवायं पादकृच्छ्रः प्रकीर्त्तितः ॥

End. अवादि स अनन्तेन कृच्छ्रादेर्लक्षणादिकं ।

देवेशः प्रीयतां तेन यस्य ज्ञानमयं तपः ॥

Colophon. इत्यनन्तदेवीय-कृच्छ्रादि-विधिः ।

विषयः । कृच्छ्रप्रायश्चित्तविधानम् ।

No. 69. कृष्णामृतमहार्णवस्तोत्रम् By आनन्दतीर्थ. Substance, country-made paper, 12 × 4½ inches. Folia, 10. Lines, 11 on a page. Extent, 250 çlokas. Character, Nāgara. Date ? Place of deposit, Benares Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीमद्वेदव्यासाय नमः ।

अर्च्चितः संस्मृतो ध्यातः कीर्त्तितः कथितः श्रुतः ।

यो ददात्यमृतत्वं हि स मां रक्षतु केशवः ॥

End. श्रीमदानन्दतीर्थाख्यसद्दशकिरणोच्छ्रिता ।

गीततिः सेव्या गीर्वाणैः सर्व्वदा शुद्धिदा भवेत् ॥

Colophon. इति श्रीमदानन्दतीर्थविरचितः कृष्णामृतमहार्णवः सम्पूर्णः ।

विषयः । माध्वसम्प्रदायस्य-वैष्णवानामाचारनिर्णयः ।

No. 70. कोकिलामाहात्म्यम्. Substance, country-made paper, 14×5 inches. Folia, 26. Lines, 10 on a page. Extent, 600 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur Rājavāṭi. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

एकदा नैमिषारण्ये ऋषयः शौनकादयः ।

सुखासीनं सूतमासीनं पप्रच्छुरिदमादरात् ॥

ऋषय ऊचुः ॥

सूत सूत महाप्राज्ञ छिन्ध्यस्मत्हृत्स्थसंशयं ।

यत् पृच्छामो वयं सर्व्वं सविस्तरमशेषतः ॥

कोकिलायास्तु माहात्म्यं महापातकनाशनमित्यादि ।

End. यदास्मरसि मां साधो स्नेहेन भृगुनन्दन ।

तदाहमागमिष्यामि सत्यमेतत् वदामि ते ॥

इदं पवित्रं विमलं विचित्रं स्वर्गापवर्गप्रदमीश्वरस्य ।

चरित्रमार्य्यं भृगुनन्दनाय संश्रावयित्वा हि जगाम सूतः ॥

Colophon. इति श्रीस्कन्दपुराणे कनकाद्रिखण्डे शिवनारदसंवादे कोकिलामाहात्म्ये एकत्रिंशोऽध्यायः ॥

विषयः । १ मे अध्याये शिवनारदसंवादकथनम् ॥ २ ॥ व्रतारम्भकथनम् ॥ ३–४ ॥ कोकिला-व्रतोत्सर्गादिकथनम् ॥ ५ ॥ सतीजन्मकथनम् ॥ ६ ॥ दक्षकोपवर्णनम् ॥ ७ ॥ दक्षस्य यज्ञनिश्चयकथनम् ॥ ८ ॥ यज्ञारम्भकथनम् ॥ ९ ॥ दक्षस्य समुद्वेगकथनम् ॥ १० ॥ शिववाक्यकथनम् ॥ ११ ॥ सत्या दक्षालयगमनम् ॥ १२ ॥ सत्या देहविसर्जनम् ॥ १३ ॥ वीरभद्रोत्पत्तिकथनम् ॥ १४ ॥ युद्धोद्वेगकथनम् ॥

१५ ॥ देवपराजयवर्णनम् ॥ १६ ॥ गोविन्दास्त्रप्रदानकथनम् ॥ १७ ॥ यज्ञविध्वंसकथनम् ॥ १८ ॥ भवस्य प्रतापकथनम् ॥ १९ ॥ सत्या वरदानकथनम् ॥ २० ॥ गौरीवरप्रदानकथनम् ॥ २१ ॥ ब्रह्मणोवर-प्रदानकथनम् ॥ २२ ॥ शतरूपादक्षयो र्वरप्रदानकथनम् ॥ २३ ॥ पुनर्दक्षयज्ञारम्भकथनम् ॥ २४ ॥ दक्षप्रबोधकथनम् ॥ २५—२६ ॥ गिरिवाक्यनिश्चयकथनम् ॥ २७ ॥ वरागमनवर्णनम् ॥ २८ ॥ उमा-महेश्वरोद्वाहवर्णनम् ॥ २९ ॥ उमामहेश्वरसङ्गमकथनम् ॥ ३०—३१ ॥ कुमारजन्मादिकथनम् ॥

No. 71. क्षेत्रविचारः Substance, country-made paper, 12 × 4 inches. Folia, 42. Lines, 3 on a page. Extent, 252 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Diŋmaṇḍalācāryya, Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. वीरं जयसेहर पय पडियं ।
पणमि जय सुगुरं च संकमि ।
समरयढाखित्तविरारापु ।
सुंच्छामि × × × × × × × ×

End. सक्कसंख विगण्येय ।
गदोविउ चित्तसहस युलसी र ॥
नरगच्छसमरय गोपुण ।
विठ्ठर सयढापि सहस्संको ॥

Colophon.
विषयः । क्षेत्राणां विचारः ।

No. 72. क्षेत्रसमासः. Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 10 on a page. Extent, 250 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Diŋmaṇḍalācāryya, Mahārāja Bálacandra. Appearance, old. Verse. Correct.

Beginning. चस्स प्रथमपङ्क्तिः कौटद्दश ।
जम्बुद्दीवा उया ।
सयम्भूवयणाय रायसा माउ ।
सव्वेविवसं रिरजा ।
दीवोदहानो तिरिय लोए ॥

End. एगां ओयण कोरीलकखा । ?

कयाल तीसर सबसुसा दोन्निसर ।

गुष वन्नच्चिया समय खेत्त सुपरि ।

× × × × × इत्तोमासि ।

Colophon.

विषयः । चचार्यां वर्णनम् ।

No. 73. गणपतिखण्डं (विनायकमाहात्म्यं). Substance, country-made paper, 14×5 inches. Folia, 37. Lines, 9 on a page. Extent, 1,100 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Rajavāṭi. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

स्कन्द उवाच ।

शिवराचौ महेशान सर्व्वज्ञसुखदायक ।

आख्यानानि सुपुण्यानि श्रुतानि त्वन्मुखाम्बुजात् ॥

विचित्राणि पवित्राणि सर्व्वाघशमनानि च ।

येषां श्रवणमात्रेण पलायन्ते महापदः ॥

अतस्त्वं कृपया ब्रूहि गणेशचरितं मम ।

अवतारान् सेतिहासान् सर्व्वकामप्रपूरकान् ॥

शरण्यानस्य लोकानां वक्तुमर्हसि शङ्कर ॥ इत्यादि ।

End. व्यास उवाच ।

शिवेन गदितं विप्रा स्कन्दाय पृच्छते ऽखिलं ।

विनायकीयो महिमा स भवद्भ्यो निवेदितः ॥

इति श्रीस्कन्दपुराणे विनायकमाहात्म्ये शिवस्कन्दसंवादे गणेशावतारवर्णनं नाम द्वाविंशतितमोऽध्यायः ॥

Colophon. समाप्तश्चायं ग्रन्थः ॥

विषयः । १ प्रथमाध्याये स्कन्दशङ्करसंवादे वक्रतुण्डावतारवर्णनम् ॥ २ ॥ द्वितीयाध्यायात् ८ अष्टमाध्यायं यावत् चिन्तामण्युपाख्यानम् । ९ नवमाध्याये पार्व्वतीवरप्रदानकथनम् ॥ १० दशमाध्याये गजासुरमुक्तिप्रदानकथनम् ॥ ११ एकादशाध्याये गजाननावतारकथनम् ॥ १२ द्वादशाध्याये सिन्दूरवधादिकथनम् ॥ १३ । १४ त्रयोदशचतुर्दशाध्याययोः विघ्नराजावतार-

कथनम् ॥ १५ पञ्चदशाध्याये वत्सासुरेनावर्णनम् ॥ १६ । १७ ॥ १८ षोड़शसप्तदशाष्टादशाध्यायेषु मयूरेशावतारवर्णनम् ॥ १९ ऊनविंशाध्याये भृगुसंवादकथनम् ॥ २० विंशाध्याये प्रमदामाधव-वर्णनम् ॥ २१ एकविंशाध्याये विद्रुमकलनकथनम् ॥ २२ द्वाविंशाध्याये धूमकेत्ववतारादिवर्णनम् ॥

No. 74. गायत्रीकवचं (गौतमतन्त्रीयं). Substance, country-made paper, 15×3 inches. Folia, 1. Lines, 9 on a page. Extent, 37 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Chandrakona, Ayodhyá Raghunathváti, Babu Chakrapáni Ráya. Appearance, old. Verse. Generally correct.

Beginning. श्रीश्रीदुर्गा शरणम् ।

अथ गायत्रीकवचं । अस्य श्रीगायत्रीकवचस्य ब्रह्मविष्णुमहेश्वरा ऋषयः ऋग्यजुःसामाथर्व्ववेदाश्छन्दांसि ब्रह्मवस्वप्रवस्वरूपा गायत्रीदेवता ॐ तद्बीजं भर्ग इति गायत्रीकीलकं ब्रह्मलोकप्राप्त्यर्थं जपे विनियोगः ।

गायत्रीपूर्व्वतः पातु सावित्री पातु दक्षिणे ।

ब्रह्मा रक्षतु मे पश्चात् उत्तरे मे सरस्वती ॥ इत्यादि ।

End. गोब्राह्मणवधादौ च पातकादतिपातकात् ।

मुच्यते सर्व्वपापेभ्यः परं ब्रह्माधिगच्छति ॥

Colophon. इति गौतमतन्त्रे गायत्रीकवचं सम्पूर्णं ॥

विषयः । गायत्र्याः कवचकथनम् ।

No. 75. गायत्रीकवचं (आगमसन्दर्भीयं). Substance, country-made paper, 11×3 inches. Folia, 2. Lines, 7 on a page. Extent, 58 çlokas. Character, Bengali. Date ? Place of deposit. Upalatāgrām, Post Mehar Zilla Comilla, Paṇḍit Jagadbandhu Tarkavágis. Appearance, fresh. Verse. Generally correct.

Beginning. अथ गायत्रीकवचं ।

श्रीदेव्युवाच ।

ॐ देवदेवमहादेव संसारार्णवतारक ।

गायत्रीकवचं देव कृपया कथय प्रभो ॥

श्रीमहादेव उवाच ।
मूलाधारे स्थिता नित्या कुण्डली तत्त्वरूपिणी ।
सूक्ष्मातिसूक्ष्मा परमा विषतन्तुस्वरूपिणी ॥
विद्युत्पुञ्जप्रतीकाशा कुण्डलाकृतिरूपिणी ।
परब्रह्मस्वरूपा सा पञ्चाशद्वर्णरूपिणी ॥
शिवस्य नर्त्तकी नित्या परब्रह्म प्रपूजिता ।
ब्रह्मणः सैव गायत्री सच्चिदानन्दरूपिणी ॥
तद्दुश्मावर्त्तवातोयं प्राणात्मा नित्यनूतनः ।
नित्यं तिष्ठतु सानन्दा कुण्डली तव विग्रहे ॥
अतिगोप्यं मच्छत् पुण्यं त्रिकोटीतीर्थसंयुतम् ।
सर्व्वयज्ञमयं देवि सर्व्वदानमयं सदा ॥
सर्व्वज्ञानमयं देवि परं ब्रह्ममयं सदा ।
कवचं कथयाम्यद्य पार्व्वति प्राणवल्लभे ॥ इत्यादि ।

End. इदं कवचमज्ञात्वा गायत्रीं प्रजपेत्तु यः ।
जप एव स एव स्यान्निस्तेजा न च सिद्धिदः ॥
यः पठेत् कवचं देवि सततं शिवसन्निधौ ।
सन्निधौ विष्णुदेवस्य कवचं शक्तिसन्निधौ ॥
तेजःपुञ्जमयो विप्रस्तत्त्वणाज्जायते ध्रुवं ॥ ॐ ॥

Colophon. इत्यागमसन्दर्भे ज्ञानदर्पणे गायत्रीब्राह्मणसर्व्वस्वे देवदेवीसंवादे गायत्रीकवचं समाप्तं । श्रीकाली ।

विषयः । गायत्र्याः कवचकथनम् ।

No. 76. गायत्रीविवरणम् By शङ्कराचार्य्य. Substance, country-made paper, 9 × 5 inches. Folia, 4. Lines, 7 on a page. Extent, 46 çlokas. Character, Nāgara. Date ? Place of deposit, Benares. Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose and Verse. Correct.

Beginning. अथ सर्व्वदेवतात्मनः सर्व्वशक्तेः सर्व्वावभासकतेजोमयस्य परमात्मनः सर्व्वात्मकत्वद्योतनार्थं सर्व्वात्मकब्रह्मप्रतिपादकगायत्रीमन्त्रस्य उपासनाप्रकारः प्रकाश्यते तत्र गायत्रीं प्रथमादिकां सप्रव्याहृत्युपेतां शिरःसमेतां सर्व्ववेदमातेरमिति वदन्ति । इत्यादि ।

End. यो देवः सवितास्माकं धियोधर्मादिगोचरः ।
प्रेरयत्तस्य तद्भर्गस्तद्वरेण्यमुपास्महे ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्य श्रीमच्छंकराचार्य्यकृतगायत्रीविवरणं समाप्तम् ।

विषयः । गायत्रीव्याख्या ।

No. 77. गुर्वावली-नाम-महाछन्दः By मुनिसुन्दर सूरि. Substance, country-made paper, 12 × 4½ inches. Folia, 17. Lines, 13 on a page. Extent, 510 çlokas. Character, Nāgara. Date, v. Sam. 1496. Place of deposit, Benares, Paṇḍit Diṇmaṇḍalācāryya, Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. श्रीगौतमाय ।
जयश्रियं रात जिनेन्द्रचन्द्रमाः ।
स वर्द्धमानप्रभुरद्भुतां सतां ।
निजाभिधानानुगुणा तनोति यः ।
सुतक्रम प (...) त मोक्षसंपदः ॥ इत्यादि ।

End. आद्याः पञ्चगणाश्च (...) तुल्या वृद्धाश्च सुश्राविकाः ।
सर्व्वाभीष्टफलप्रदः स जयति श्रीसंघकल्पद्रुमः ।
सम्पूर्णश्चेदं श्रीगुर्वावलीनाममहाच्छन्दः ।

Colophon. इति श्वेतपागच्छ-श्रीगुर्वावली इहती श्रीमुनिसुन्दरसूरिकृता । संवत् १४९६ आषाढ़ सुदि ।

No. 78. गौतमीसूत्रं (ज्ञानबोधप्रकाशकं). Substance, country-made, paper, 8 × 5 inches. Folia, 86. Lines, 9 on a page. Extent, 1,250 çlokas. Character, Nāgara. Date of Comp. v. Sam. 1715? Place of deposit, Calcutta, Çyāmapukura Viçvakoṣa office, Babu Nagendranāth Vasu. Appearance, old. Verse Incorrect.

Beginning. अरिहन्ता भगवन्त इन्द्रमहिता सिद्धाश्च सिद्धिस्थिताः ।
आचार्य्याजिनशासनोन्नतिकराः पूज्योपाध्यायकाः ।
श्रीसिद्धान्तसुपाठकमुनिवरा रत्नत्रयाराधकाः ।
पञ्चैते परमेष्ठिनः प्रतिदिनं कुर्व्वन्तु वो मङ्गलं ॥

विबुधकुमुदचन्द्रसर्व्वदुःखापहरं ।
त्रिभुवनपतिसेव्यं धर्म्मरत्नाकरं च ।
स्वपरहितमपारं सर्व्वमोक्षैकहेतुं ।
सकलगुणनिधानं तीर्थनाथं भज त्वं ॥
असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रं ।
सुरतरुवरशाखा लेखनी पत्रमुर्व्वी ।
लिखति यदि गृहीत्वा शारदा सर्व्वकालं ।
तदपि तव गुणानामीश पारं न याति ॥
जिनस्मरणमात्रेण शोकक्लेशभयादिकं ।
शाकिनीग्रहरोगादिदारिद्रञ्च विनश्यति ॥

End. सरस्वती महाभागे वरदे कामरूपिणी ।
विश्वरूपा विशालाक्षी देवी या परमेश्वरी ।
सरस्वती मया दृष्टा वीणापुस्तकधारिणी ।
हंसवाहनमारूढा देवी या परमेश्वरी ॥
ब्राह्मीचन्दनबालिका भगवती राजमती द्रौपदी ।
कौशल्या च मृगावती च सुरसा सीता सुभद्रा शिवा ॥
कुन्ती शीलवती नलस्य दयिता चोला प्रभावत्यपि ।
पद्मावत्यपि सुन्दरी प्रतिदिनं कुर्व्वन्तु वो मङ्गलं ॥
मङ्गलं भगवान् वीरो मङ्गलं गौतमप्रभुः ।
मङ्गलं स्थूलभद्राद्या जैनधर्म्मोऽस्तु मङ्गलं ॥
सर्व्वारिष्टप्रणाशाय सर्व्वाभीष्टार्थदायिने ।
सर्व्वलब्धिनिधानाय गौतमस्वामिने नमः ॥
वाणेन्दुवसुभूवर्षे श्रावणस्य सितेतरे ।
षष्ठी तु सौम्यवारे (.) न्निभकाख्यपुरे (?) शुभे ॥
सुशिष्यपठनार्थं च ज्ञानबोधप्रकाशके ।
शुक्लमुक्ता च शास्त्रं (?) भारामल्लिपिल्लतं ॥
मङ्गलं लेखकस्यापि पाठकस्यापिमङ्गलं ।
मङ्गलं सर्व्वलोकानां भूमिभूपतिमङ्गलं ॥
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मया ।
यदि शुद्धमशुद्धम् वा मम दोषो न दीयते ॥
शुभमस्तु ॥

विषयः । जैनधर्मप्रशंसामुखेन सिद्धगुणादिकथनम् ॥ धर्मपुण्यगुणद्वारादिकथनम् ॥ साधुगुणादिकथनम् ॥ तपोगुणकथनम् ॥ भावगुणकथनम् । आचार्य्यवाक्यं ॥ बुद्धिद्वारादिकथनम् । भवितव्यताद्वारादिकथनम् ॥ कर्मरेखाकुम्भरभावनीकन्याकथा ॥ आशीर्व्वादकथनम् ॥ स्वधर्मगुणद्वारादिकथनम् ॥ विवेकचतुर्द्वारादिकथनम् ॥ प्रस्ताविककथानिरूपणम् ॥ देशादिलक्षणं ॥ कुसङ्गतिद्वारकथनम् ॥ देवतादिद्वारकथनम् । नीचरागगुणद्वारकथनम् ॥ लेखनगुणादिकथनम् ॥

No. 79. **गोत्रप्रवरभास्करः** By **भट्टोजि.** Substance, country-made paper, 8×3 inches. Folia, 8. Lines, 9 on a page. Extent, 144 çlokas Character, Nāgara. Date, SM. 1774. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance old. Prose. Incorrect.

Beginning. श्रीगणेशाय नमः ।

सप्तर्षयोऽगस्त्यष्टमास्तदपत्यञ्च गोत्रम् प्रशियन्ते गोत्राध्वर्य्युभ्यामुत्कीर्त्यन्त इति
प्रवराः समानप्रवरां समानगोत्राञ्च नोद्वहेत् इत्यादि ।

End. श्रीभट्टोजिविरचितो गोत्रप्रवरनिर्णयः ।
गुणग्रन्थो बुधैः सोऽयमादरेण विभाव्यतां ॥
गोत्रप्रवरसन्देहतमःप्राप्तचेतसां ।
मोदं तनोतु विदुषां गोत्रप्रवरभास्करः ॥

Colophon. समाप्तोयं ग्रन्थः संवत् १७७४ वैशाखशुक्लतृतीयायां ।

विषयः । गोत्रप्रवरकथनम् ।

No. 80. **गोपालोत्तरतापनीविवृतिः** By **विश्वेश्वर, जनार्द्दनभट्ट, प्रबोध-यति,** And **जीवगोस्वामी.** Substance, country-made paper, 11×5½ inches. Folia, 24. Lines, 12 on a page. Extent, 850 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Paṇḍit, Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, fresh. Prose. Incorrect.

Beginning. श्रीराधाकृष्णः ।

अथ गोपालतापनीटीका ॥
क्लींकारादसृजद्विश्वं इति प्राह श्रुतेः शिवः ।
(... ... ...) ककाराज्जलसम्भवः ॥

इत्यादिभिः श्रीमता-गौतमेन भगवता श्रीयनन्तस्य प्रमाणता दर्शिता … … … गोपालतापन्याख्या श्रुतिरियं स्वप्रतिपाद्यं श्रीकृष्णमेव सर्व्ववेदान्तसम्मत्या सर्व्वोत्तमत्वेन प्रतिपादयन्ती नमस्करोति सच्चिदानन्द-रूपायेति। कृष्णाय नम इत्यन्वयः कृष्णाय देवकीनन्दनाय इति ब्रह्मणो देवकीपुत्र इति च॥ इत्यादि।

End. उपसंहरति इत्येति। तदेवं पुष्कलमामुत्तरतापनीरूपां श्रुतिं सर्व्वभूतानां कत्रृत्वं दत्वा अन्तर्हितवान् इत्यर्थः (… … … … …)
गान्धर्व्वीवरगान्धर्व्वगन्धवन्धुरशर्म्मणे।
वृन्दावनवनीवृन्दनन्दिने नन्दतां मनः॥
विश्वेश्वरकजनार्द्दनभट्टाभ्यां वैदिकाख्याभ्यां तद्वत्।
प्रबोधयतिना लिखितं चिन्तयित्वातारतम्येन॥
इत्युत्तरगोपालतापन्या विवृतिः सम्पूर्णा॥

Colophon. श्रीसनातनरूपस्य चरणाब्जसुधेन्दुना।
पूरिताटीप्पनी चेयं जीवेन सुखबोधिनी॥
श्रीश्रीनाथाय नमः॥

विषयः। गोपालोत्तरतापन्या व्याख्यानम्।

No. 81. गोपीप्रेमामृतं. आगमपुराणीयम् Substance, country-made paper, 8×2½ inches. Folia, 5. Lines, 4 on a page. Extent, 32 çlokas Character, Bengali Date ? Place of deposit, Zilla Midnapur, Post Chandrakonā, Ayodhyá Raghunáthváti. Appearauce, old. Verse. Generally correct.

Beginning. श्रीश्रीराधाकृष्णाभ्यां नमः। अर्ज्जुन उवाच।
त्रैलोक्ये के भवद्भक्ताः के त्वां जानन्ति मर्म्मणि।
केषु वा त्वं सदायत्तः केषु प्रेम तवातुलं॥
तन्मे वदस्व भगवन्नगतीनां गतिप्रद।
मयि चानुग्रहो यादृक् × × × परीक्षणं॥

श्रीभगवान् उवाच।

न तथा मे प्रियतमो ब्रह्मा रुद्रश्च × × ×।
न च लक्ष्मीर्नचात्मो(?)वा यथा गोपीजनो मम॥ इत्यादि।

End. श्रीभगवानुवाच ।

रत्नस्थानां रत्नसं यद्दुर्लभानाञ्च दुर्लभं ।

तत्ते वदाम्यहं पार्थ श्रुत्वा मनसि तत् प्रृणु ॥

गोपीभावेन ये भक्ता मामेव समुपासते ।

तेषु × × × तुष्टोऽस्मि सत्यं सत्यं न संशयः ॥

Colophon. इति आगमपुराणे श्रीकृष्णार्जुनसंवादे गोपीप्रेमामृतं समाप्तं ।

विषयः । गोपीनां भगवद्भक्तेरैकान्तिकथनं ।

No 82. गोविन्दवृन्दावनम् . Substance, country-made paper, 13×3 inches. Folia, 22. Lines, 6 on a page. Extent, 550 çlokas. Character, Bengali. Date BS. 1051. Place of deposit, Zilla Midnapur, Post Chandrakoná, Ayodhyá Raghunáthvâti. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमो राधामोहनाय ।

एकदा अक्रूरं द्रष्टुं सपुत्रं कृष्णतत्परं ।

तस्याश्रमं ययौ प्रीत्या भगवांश्चतुराननः ॥

ददर्श लोकनाथेशं ध्यायन्तञ्च जनार्दनं ।

प्रेमवारिसमाकीर्णं रोमाञ्चिततनुश्रियं ॥

तमुत्थाप्य प्रियं दोर्भ्यां कृष्णभक्तं पितामहः ।

पुलकावलिचित्राङ्गः सस्वजे स्नेहविक्लवः ॥

दृष्ट्वा देवो महाभक्त्या अक्रूरस्तु पितामहं ।

तस्याग्रे भगवद्बुद्ध्या दण्डवत् पतितो भुवि ॥

पाद्यार्घ्यमधुपर्काद्यै र्यथाविधि समर्पयेत् ।

विश्रान्तं सुखमासीनं पप्रच्छ स्वागतं ततः ॥

सम्पृष्टस्तमथोवाच महाभागवतः प्रभुः ।

नन्दपुत्रे भगवति कृष्णे वृन्दावनेश्वरे ।

किन्ते भक्तिः समुत्पन्ना सुदृढ़ा प्रेमलक्षणा ॥

धर्म्मार्थकाममोक्षेषु कच्चित्ते निस्पृहं मनः ।

कच्चित् कीर्त्तयसे ब्रह्मन् कृष्णनामानि सर्व्वदा ॥

गुरोः कारुणिकस्येदं श्रुत्वा च स च भाषितम् ।

विनयावनतो भूत्वा अक्रूरो वाक्यमब्रवीत् ॥ इत्यादि ॥

End.

श्रींकारं वह्निसंयुक्तं चनन्तं तदनन्तरं ।
नादविन्दुकलायुक्तं राधिकाये ततः परं ।
हृदयान्तं मयारेण्या मन्त्रमष्टाचरं विदुः ॥
यस्य स्मरणमात्रेण किं न सिध्यति साधनम् ॥
इदं स्तोत्रमिदं मन्त्रं यस्य वाचि प्रवर्त्तते ।
त्रैलोक्यसुन्दरी राधा चित्ते तस्य निरन्तरं ।
वाक्‌सिद्धिं लभते योगी योगिनामपि दुर्लभम् ।

Colophon. इति श्रीगोविन्दवृन्दावने श्रीराधाप्रादुर्भावः ॥ समाप्तश्चायं ग्रन्थः । श्रीगुरवे नमः । लिखितं श्रीमहेशघोषविश्वास । पुस्तकमिदं श्रीश्यामदास-सेनतन्त्रया ॥ सन १०५१ ... ... ॥

विषयः । इति श्रीनागरकृष्णदासविलिखित-श्रीकृष्णोपनिषद् ... ... गोविन्दवृन्दावन-रचनं । इति श्रीगोविन्दवृन्दावने वंशीप्रादुर्भावः । इति श्रीगोविन्दवृन्दावने त्रिभङ्गकारणं । इति श्रीगोविन्दवृन्दावने राधाप्रादुर्भावः ॥

No. 83. गौरीदिगम्बरप्रहसनम् By शङ्करमिश्र. Substance, country-made paper, 12 × 3 inches. Folia, 12. Lines, 5 on a page. Extent, 240 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rājārāmpur, Paṇdit Maheshchandra Tarkachūḍāmaṇi. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

दिद्दीन्दीन्दीदीधिधि कटनदन्नन्दि सुवर्जं ।
रखङ्गाखङ्गाय रणरणदघर्घररवं ॥
स्फुरत् फू फू फू फू फणिपतिफणा-फूत्कृतिशतं ।
शिवं भूयोभूयः प्रथमनटनायं दिशतु वः ।

(... ... ...) नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । आदिष्टोऽस्मि सकलवसुन्धरावलयवल्लमानपवित्रकीर्त्तिना परमपवित्राभिजनेन विनय-सदाचारविवेकेन परमपवित्रेण मिश्रश्रीभवनाथेन, यथा मत्तनूजस्य श्रीशङ्करस्याभिनवकृतिर्गौरीदिगम्बराभिधानं प्रहसनमभिनीयतामिति । तद्गृहिणीमाहूय सङ्गीतकमाचरामि ॥

End. गौरीं स्पृष्टे हला ।
तीव्रेण तस्मि तपसा फलितं भवत्या

मङ्गलमभेयफलमप्यधुनाविरासीत् ।
अन्योन्यसंघटनमित्यमभूदतस्त्वं
पुत्र' सभस्व द्विविधत्वरिषट्टरेण्यं ॥
वेन च,
श्रीमन्तःसन्तु सन्तः सपदि सुमनसां सौमनस्याय वक्रो
षट्कर्मण्यखिलसन्ध्यं स्वविरनुदिवसं जुह्वतु प्रीतिभाजः ॥
गावश्चाम्भोधरास्व प्रचुरमिह पयः किस मुञ्चन्तु नित्यं ।
राजानश्च प्रजास्तु प्रकृतिषु च सदा नीतिभाजो भवन्तु ॥
इति निष्क्रान्ताः सर्वे द्वितीया सिद्धिः ॥

Colophon. इति महोपाध्याय-श्रीशङ्करमिश्र-विरचितं गौरीदिगम्बरं नाम प्रहसनं सम्पूर्णं ॥

विषयः । हास्यरसप्रधाननिबन्धैः शिवपार्वत्योः परिणयवर्णनम् ।

No. 84. ग्रहपीठसाधनम् By आपदेव. Substance, country-made paper, 8×3 inches. Folia, 2. Lines, 12 on a page. Extent, 30 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीवरदं दत्तमदं भक्तजनेभ्यस्समदं, ।
देवतहन्दे सदयं (...) नमीड़े सदयं ।

End. श्रीवसिष्ठादिवाक्यानुसारां
लसद्दासनां खेटसत्पीठमालां ।
चकाराम्ब्र गोविन्दपौत्रेकराधिर्वि
नोदितो देव आपाभिधानः (?) ॥

Colophon. इति काशीस्थानवासि आपदेवकृतग्रहपीठसाधनम् ।

विषयः । ग्रहाणां पीठकथनम् ।

No. 85. ग्रहयागकौमुदी By रामकृष्ण. Substance, country-made paper, 12×4 inches. Folia, 18. Lines, 7 on a page. Extent, 365 çlokas. Character, Bengali. Date ? Place of deposit, Balihār, Rājdhāni Varadākānta Cakravartti. Appearance, old. Prose and verse. Generally correct.

Beginning. ॐ नमो गोविन्दाय ।

श्रीकृष्णं पञ्चरूपेण सूचयन्तं शुभाशुभं ।
प्रणम्य रामकृष्णेन तन्यते पञ्चकौमुदी ॥
नवाश्विन्यादिनक्षत्रावस्थानेन शुभाशुभसूचकदेवतात्वं पञ्चत्वं सूचकत्व-
मुद्बुद्धतादृशादृष्टानुमापकत्वं तद्बोधश्च कार्य्यं जनयितव्यं पञ्चकारिलाभः ।
न तु सुखदुःखकारकत्वं इत्यादि ।

End. ॐ कयानश्चित्र इत्यादि-राहुमन्त्रः । ॐ काण्डादित्यादि-केतुमन्त्रः ।

Colophon. इति श्रीरामकृष्णभट्टाचार्य्यकृता पञ्चयागकौमुदी समाप्ता ।

विषयः । पञ्चयागप्रयोगादिनिरूपणम् ।

No. 87. घटकर्परटीका (खण्डिता) By रमानाथ. Substance, English yellow paper, 6×4 inches. Folia, 3. Lines, 7 on a page. Extent, 50 çlokas. Character, Bengali. Date ? Place of deposit, Upalatagram, Post Mepar, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavasis. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

नत्वा गुरोः पादरजश्चिदाढ्यं
कामादिवैर्यं चिदिवस्य चेतुम् ।
विप्रो रमानाथ इमां तनोमि
टीकां प्रशस्तां घटकर्परस्य ॥
इदानीं श्रीकालिदासस्य प्रसादात् घटकर्परः कुम्भकारो यावीश्वदजल-
पानान्तरेण मनसि देवतानमस्कारं ग्रन्थान्तरे देवतार्पणञ्च कृत्वा वर्षासु
तद्दर्शनमारब्धवानिति किं वदन्तीति लोकमात्र निश्चितमितीत्यादि ।

End. क्षिप्रमित्यादि । कोऽप्यनिर्वचनीयगुणो जनः तानि कान्तामुखानि सम्प्रति
वर्षासमये क्षिप्रं शीघ्रं प्रसादयति प्रसन्नानि करोतीत्यर्थः ।

Colophon. (अतः खण्डितं) ।

विषयः । घटकर्परस्य व्याख्यानम् ।

No. 88. घटकर्परटीका By देवीदास. Substance, country-made paper, 9×3 inches. Folia, 13. Lines, 6 on a page. Extent, 42 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetágrám, Bhaṭṭágrám, Paṇḍit Rámhridaya Bhaṭṭácháryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय । ॐ नमः शिवादिपद्भ्यः ।

शिरो देविपदाम्भोजे सदेदं मम तिष्ठतु ।
देवि मह्यन्तु तज्ज्ञानं येनैषा पूरिता भवेत् ॥
घटकर्परनामा कश्चित् कविः शरदादौ गवे सति प्राहृषं दृष्ट्वा तद्वर्णनमकरोत् तत् किमित्याह निचितमित्यादि । तदेकविंशतिश्लोका मया व्याख्यायन्ते प्रत्येकेन यथा नीरं जलं तत् ददातीति नीरदः दः प्राचेत्यनेन घञ् ददचीत्यादिना चालुक् नीरदस्तै नीरदैर्मेघै चपेत्य आगत्य यं आकाशं निचितं व्याप्तं । इत्यादि ।

End. तत्र शरीरस्पर्शनमित्यस्योपलक्षणत्वादत्र वाचा अर्थविशेषज्ञानमपि शपथो भवति अथवा अत्रापि शरीरस्पर्शं × × × × न विद्यत एव तथाहि भावानुरक्तवनिता सुरतैः सह अयमर्थं जनः शपे × × चितं शरीरस्पर्शनं विद्यते × × × × इति कर्त्तरि विशेषणं भावानुरक्तवनिता सुरतैः सह संयोगात् भूषिता एव भवति इति भूषितेति विशेषणमुपादानम् ॥

Colophon. इति श्रीदेवीदासेन विरचितायां टीकायां घटकर्पराख्यं काव्यं सम्पूर्णम् ॥

विषयः घटकर्परस्य व्याख्यानम् ॥

No. 89. चण्डीवादार्थमाला By कृष्णकान्त. Substance, country-made paper, 16×4 inches. Folia, 5. Lines, 9 on a page. Extent, 225 çlokas. Character, Bengali. Date, SK. 1742. Place of deposit, Zilla Midnapur, Post Garvetagram Khunverá, Late Paṇḍit S'ripati Bhattácharyya. Appearance, fresh. Prose. Correct.

Beginning. श्रीदुर्गा ।

चण्डीत्वं किन्नावत् मार्कण्डेयप्रोक्तत्वे सति देवीमाहात्म्यत्वं । देवीमाहात्म्यं यथा रुद्रयामले पठेदारभ्य सावर्णिः सूर्य्यतनय आदितः समापयेत् तस्मान्नो सावर्णिर्भविता मनुः । एकाकी इत्यादि एकादाकिंशाध्याये

इति चाकिन् । सजातीयद्वयच्छदो बोध्यते येनाञ्चे सत्यपि न दोष इति माधवाचार्य्य-विद्याविनोद-उदीचिभट्टाचार्य्याः । इत्यादि ।

End. समावरचिरं दयान्मानवः सिद्धसन्निभ इति दर्शनात् केचित्तु ब्राह्मणस्यैव निन्दा नत्वन्येषामनन्तरञ्च मद्यं दत्वा ब्राह्मणस्तु ब्राह्मणादेव चीयत इति दर्शनात् ननु तथात्वे कस्तो वर्ण्यो द्विजातिभिरितिवक्तव्यवचनस्या-नर्थक्यादङ्कलस्यार्थं ज्ञेयं ॥

Colophon. इति श्रीकृष्णकान्तदेवशर्म्मणा संग्रहीता षष्ठीवादार्थमाला समाप्ता । शकाब्दाः १७४१ । ११ । २१ ॥

विषयः । षष्ठीस्वरूपनिरूपणं । द्वितीये सत्यपि वाजिनि एकाकिप्रभृत्यसम्बद्ध शब्दानां समर्थनञ्च ।

No. 90. चन्दनबाला चौपाई. Substance, country-made paper, 11 × 4½ inches. Folia, 10. Lines, 15 on a page. Extent, 1,754 çlokas. Character, Nāgara. Date, Saṃ 1754. Place of deposit, Benares, Dikmaṇḍalācārya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. ऐं नमः ।

दोहा प्रथम जिनेसर
पयनमी समरी
श्रीजिनवीर, श्रीजिनशासन
जय करच पय उपगायी ।

End. सीतसनमांगु श्रीसंघ
साचजि भाषासरस सुभिन्द,
सुननां गुणतां राग
धन्या भिरी सुखसंपति आनन्द ।

Colophon. इति चन्दनबाला चौपाई सम्पूर्णम् सम्वत् १७५४. माघमासे शुक्लपचे ।

विषयः । चन्दनबालानाम्न्याः कस्या अपि जैनधर्मावलम्बिन्याः श्रेष्ठिकन्यायाः कथा ।

No. 91. चयनप्रयोगः. By Substance, country-made paper, 11 × 4½ inches. Folia, 150. Lines, 12 on a page. Extent, 4,500 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. अग्निं वेध्यमानाः । अग्निरितीहकालन्तं स्थण्डिलमुच्यते मतृसंयोगात् क्रतुरप्यग्निरित्युच्यते तत्रयथा । तं वेध्यमानस्थण्डिलीनाग्निगुणकेन क्रतुना-यच्यमाण इत्यर्थः सोग्निः सोमाङ्गप्रकृतानुत्तरवेद्या नाभ्यामग्निप्रणयनं विहितं तस्यैष स्तोको यदुत्तरवेदिनाभिरिति श्रुतेः साग्निचित्ये क्रतौ ।

End. एके विंश उक्थ इत्यादि पशुकाले अन्वम्बदमालभते पूर्ववत् पत्नी-संयाजात पूर्ववद्वीनसंततयः ... ... इतो नास्ति ।

Colophon. ... ...

विषयः । चयनयागविधिः ।

(असम्पूर्णोऽयं ग्रन्थः) ।

No. 92. चातुर्ह्णनम् . Susbtance, country-made paper, 10 × 4½ inches. Folia, 24. Lines, 9 on a page. Extent, 660 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Incorrect.

Begininng. अग्निमीळे सुताः विश्वाद्धाना अञ्जोषा इन्द्रताः सोमपा इमा जुष्टा मतृपरा इषा इतसृष्टा यजथा द्रविणो दधानाः प्रभाः पञ्चदश. अग्निमीळे तु विज्ञातो दधाना इन्द्रे योगे अध्वमेध. धने ये इयते मङ्गे यज्ञे सुविज्ञो क्षियन्त स्तादश. य एकषष्टपवीनां कचीवन्तं य वेदित्र इति वर्जयित्वा ।

End. यथा काममवग्रह्या उक्तिं द्विपदं काये अवनीनस्पदं न दुर्वेयो इति दुर्वेयो जोष पतन्त्या विसर्गेण विश्वामित्रजमदग्नी इति दस्युषन्नमं मकारस्पदं नम इषोदत्तोकं कल्पयतु पिंगतु सुसन्तमिति ।

Colophon. इति बह्मादृकचातुर्ह्णनं समाप्तं ।

विषयः । ऋग्वेदसूक्तादीनां निरूपणम् ।

No. 93. चित्तामोदसिन्धुः. By षष्ठीदासकविराज. Substance, country-made paper, 16 × 4 inches. Folia, 9. Lines, 5 on a page. Extent, 140 çlokas. Character, Bengali. Date of composition SK. 1601. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇadāsa Smritibhūṣaṇa. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

अखिलभुवननाथं दुःखमातङ्गसिंहं
सुखशशिसितपक्षं नित्यमात्मन्य कृष्णं ।
अधमविषयचिन्तावह्निसन्तापराशि-
र्यथित सपदि चिन्तामोदसिन्धौ निमज्ज ।

× × × × × ×

End. किन्त्वस्माभिरुदीयाद्यकमलपदामोदसुग्धा जना ये ।
तेषां पादारविन्दे स्थिरतरमधुपे भाव्यमेवाचिरेण ॥
शाके वर्षे धरित्रीखरसशशिमिते वैदिको गौड़देशे ।
गङ्गापूरे ऽवतीर्णः सुकृतिगणयुते तर्कवागीशपुत्रः ॥
चिन्तामोदाख्यकाव्यं हरिमहिमसुधाविन्दुसम्पर्कमिदं ।
यशोदासो विपश्चित्तरलतरमनाश्चित्तशुद्ध्यामकार्षीत् ॥
इति यशोदासकविराजविरचितचिन्तामोदसिन्धुः समाप्तः ॥

Colophon. शाके तारकनाथकाननकुश्यत् कन्दर्पकोणे दिने ?
तारानायकनायके खरकरे कन्याङ्गके शोकति ?
... प्राज्ञिरघुनाथ नामक ... ...
× × × × श्लोकैककशान्तकं ॥

विषयः । कृष्णमाहात्म्य कथनम् ॥

No. 94. चिन्तामणिपार्श्वनाथकल्प. Substance country-made paper, 12 × 5 inches. Folia, 2. Lines, 25 on a page. Extent, 200 çlokas. Character, Nāgara. Date, SN. 1904. Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Prose and Verse. Incorrect.

Beginning. ॐ नमः श्री ॐ पार्श्वाई नमः ।

किञ्चिद् गुरूणां वदनारविन्दा-
न्निशम्य सम्यक् परमार्थसुद्धैः ।
विलिख्यते स्वान्यजनोपकृत्यै
श्रीपार्श्वचिन्तामणिमन्त्रकल्पः ॥

End. नट्ठ मयठाने पणठ कम्मठ णठ्ठ संसारे ।
परिमिठि पठि खठे खठ गणाधीसवं वन्दे ॥

अनेनवार १०८, अथवा २१ पुत्रादिक्रियात्मके चिन्त्यते मन्त्रैः अविस्मयो भवति ।

Colophon. इति चिन्तामणिपार्श्वनाथकल्पः सम्पूर्णः . संवत् १९०४ .

विषयः । चिन्तामणिपार्श्वनाथमन्त्रादि-कथनम् ।

No. 95. चैतन्यचन्द्रामृततरङ्गिनी . Substance, country-made paper, 12×5 inches. Folia, 28. Lines, 7 on a page. Extent, 700 çlokas. Character, Bengali. Date, ? Place of deposit, Dinajpur. Paṇḍit Kṛṣṇadāsa Smṛitibhūṣana. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीगोविन्ददेवो जयति ॥
श्रीमन्नित्यानन्दचैतन्यचन्द्रौ
द्वौमन्येऽपिपीयूषसान्द्रौ
विद्वद्वृन्दस्यन्दमानात्मतत्त्वौ
सत्त्वौदार्य्यात् सेवकाग्र्यः पुनीतां ॥
अथ सोऽयं विद्वत्कविद्वन्दवन्द्यचरणः प्रबोधानन्दनामा न्यासीन्द्रः श्रीकृष्णचैतन्यस्य भगवतो मङ्गलमहिमपुञ्जोन्मत्तः स चतुश्चिंशत्शततमेन ग्रन्थेन तं निजाभीष्टपादारविन्दं स्तोचयति तत्रैकेन पद्येन स्तुवन् सप्रयोजनं तस्य प्रादुर्भावं निरूपयति । स्तुमस्तमिति । तं व्रजपतिकुमारं स्तुमः कीदृशं चैतन्याकृतिं ।

End. तथापि वाक्याभावात् सर्वाल्पचापल्यादयं मल्लक्षणो जनो यथा तथा जल्पतु तथापि स गौरहरिर्मे प्रसीदतु प्रीणातु कौतुकप्रियत्वात् ईश्वरस्य इति भावः ॥
× × × × × ×
तथा व्याख्यातवानस्मि दारुयन्त्रोपमानकः ॥

Colophon. इति श्रीप्रबोधानन्दसरस्वतीविरचितस्य श्रीचैतन्यचन्द्रामृतस्य टीका चैतन्यचन्द्रामृततरङ्गिनी समाप्ता ॥

विषयः । प्रबोधानन्दकृतचैतन्यचन्द्रामृतस्य व्याख्यानम् ॥

No. 96. छन्दोदीपः . Substance, country-made paper, 12×2½ inches. Folia, 40. Lines, 3 on a page. Extent, 375 çlokas. Character, Bengali. Date of composition, SK. 1700. Place of deposit, Dinajpur, Rājārāmpur, Paṇḍit Çyāmāprasanna Vācaspati. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

गौरीशं वाङ्मयं चैव प्रणम्य विदुषां मुदे
छन्दसां सारमाहृत्य छन्दोदीपः प्रतन्यते ।

छन्दोमञ्जर्य्यां ।

पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसंख्यातं जातिर्मात्रा कृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ॥

End. एकैवातिकृतिः प्रोक्ता ख्याता श्रीचपदातु या ।
षड्विंशत्यक्षराण्येका कविभिः कथितोत्कृतिः
छन्दःशास्त्रे तु विख्यातं सा भुजङ्गविजृम्भितं ।
उक्थादिषड्विंशतिसंज्ञकेषु
छन्दःसु भेदा विधुनेत्रचन्द्राः
समाहृताः पिङ्गलनागसम्मता
मुदं वितन्वन्तु सदा मनीषिणां ॥

Colophon. इति छन्दोदीपे प्रकीर्णकः प्रकाशः समाप्तश्चायं छन्दोदीपः ।
शाके शून्याभ्रसप्तक्षितिपरिगणिते श्रीनवद्वीपनाथं ।
नत्वा राजेन्द्रदेवं द्विजनकुलवरं वाजपेयादियागैः ।
तस्य तस्य द्वितीयः सुत इममखिलं सारमाकृष्य यत्ना-
च्छन्दोदीपं प्रदीपं निखिलबुधमनोध्वान्तराशेरपूर्व्वं ।
फाल्गुनीमत्रिंशद्दिने प्रारब्धं शुभवत्सरे विधुवेदमिते श्रीयच्छन्दोदीपः
समाप्तः वाजपेयि-श्रीमन्महाराज-राजेन्द्राब्दाः पञ्चाशत्संख्यकाः ॥

विषयः । छन्दोनिरूपणम् ॥

No. 97. छान्दोग्योपनिषद्भाष्यम् . By आनन्दतीर्थ . Substance, country-made paper, 8×3 inches. Folia, 48. Lines, 12 on a page. Extent, 1,152 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

श्रीगुरुभ्यो नमः ।

Beginning. श्रीमदानन्दतीर्थभगवत्पादाचार्य्येभ्यो नमः ।
अत्युद्रिक्तविदोषसत्सुखमहाज्ञानैकतानप्रभा
सर्व्वप्राभवशक्तिभोगविभवसत्सानन्ददिव्याकृतिं,

रुद्धिस्थाननिरोधनित्यनियतिज्ञानप्रकाशादिति
ध्वान्तामोचविमोचदं हरिमहं नित्यं सदोपाश्रये ॥

End. आनन्दतीर्थं इति तु यस्य नाम द्वितीयकं ।
पूर्णप्रज्ञेन तेनेदं कृतं भाष्यं हरेः प्रियं ॥
नित्यानन्दो हरिः पूर्णो नित्यं संप्रीयतां मम ।
नमस्तस्मै नमस्तस्मै नमस्तस्मै च विष्णवे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादविरचिते श्रीमच्छान्दोग्योपनिषद्भाष्ये अष्टमोध्यायः ।

विषयः । माध्वमते छान्दोग्योपनिषद्व्याख्या ।

No. 98. छान्दोग्योपनिषद्भाष्यम् BY सायनाचार्य्य. Substance, country-made paper, 14×5 inches. Folia, 114. Lines, 11 on a page. Extent, 5,016 çlokas. Character, Nāgara. Date, ? Place of deposit, Benares, Paṇḍit Govinda Bhatta. Appearance, new. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं ।
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरं ।
तत् कटाक्षेण तद्रूपं दधत्बुक्कमहीपतिः ।
आदिशत् सायनाचार्य्यं वेदार्थस्य प्रकाशने ।
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसंग्रहात् ।
कृपालुः सायनाचार्य्यो वेदार्थं वक्तुमुद्यतः
सामवेदार्थमेषोत्र प्रकाशयति सादरं ।

End. ननु विस्तारे छान्दसे लिटि तनिपत्योश्छन्दसीत्युपधालोपः किद्व है ध्वघो अनुधर्षेण शौल्कसोम स त्वं वशीव कयचीव आयज असुरान् अहि . अपि या अन्तरश्मनि अस्या अन्तरश्मनि अस्या अन्तरश्मन् इति छन्दोगबह्वृचानां पाठभेदः . इति पञ्चमस्याध्यायस्य एकादशः खण्डः इति काकुभं समाप्तं ।

Colophon. वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमत्सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे छन्दोव्याख्याने पञ्चमोध्यायः ।

विषयः । छान्दोग्योपनिषद्व्याख्या ।

No. 99. जन्मरहस्यं (भविष्यपुराणीयम्). Substance, country-made paper, 12×4 inches. Folia, 5. Lines, 7 on a page. Extent, 82 çlokas. Character, Bengali. Date, SK. 1,740. Place of deposit, Zilla Midnapur, Post Garveta Grām Khunverá, Late Paṇḍit Rámtáran Siromani. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

नारद उवाच ।

अस्मिन्नेकार्णवे घोरे नष्टे स्थावरजङ्गमे ।
चन्द्रार्के गगने नष्टे ज्योतिषि प्रलयं गते ॥
अचिन्त्यभावमव्यक्तं योगनिद्रामुपागतं ।
नारदः परिपप्रच्छ भगवन्तं जनार्द्दनं ॥
केषु स्थानेषु द्रष्टव्यो भववंस्त्वं मया प्रभो ।
तन्मे कथय तत्त्वेन अनुग्राह्यो ह्यहं यदि ॥

श्रीभगवानुवाच ।

अहं ते कथयिष्यामि प्रादुर्भावं महामुने ।
यं पठित्वा द्विजाः सर्व्वे यास्यन्ति परमां गतिं ॥ इत्यादि ।

End. यः पठेत् प्रातरुत्थाय मम जन्मानुकीर्त्तनं ।
मर्त्त्यलोकं परित्यज्य मम लोकं स गच्छति ।
न च मृत्युभयं तस्य यः पठेन्मम कीर्त्तनम् ॥

Colophon. इति श्रीकृष्णनारदसंवादे भविष्यपुराणोक्तं जन्मरहस्यं समाप्तं ।
ॐ तत्सत् । शुभमस्तु शकाब्दाः १७४० ।

विषयः । भगवतोऽवतारनिचयकथनमुखेन श्रीकृष्णावतारस्य वृत्तान्तकीर्त्तनम् ।

No. 100. जलाश्रयोत्सर्गविधिः. Substance, country-made paper, 8×3 inches. Folia, 14. Lines, 9 on a page. Extent, 260 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanāc āryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ जलाशयोत्सर्गः ।

स चोदगयने माघादिपञ्चसु श्रावणवर्जनमासेषु वा शुक्लपचे द्वितीया-तृतीया-पञ्चमी-सप्तमी-दशमी-त्रयोदशी-पौर्णमासीषु तिथिषु बुधगुरुशुक्र-वारेषु रविसोमयोर्वेत्यादि ।

End. १०००-१०८-५०-१० वा विप्रान् संभोज्य भूयसीं दक्षिणां दत्वा कर्मेश्वरार्पणं कृत्वा सुहृद्युतो भुञ्जीत इति ।

Colophon. इति श्रीमन्नारायणभट्टसूरिसूनुरामकृष्णात्मजकमलाकरभट्टकृतो जलाशयोत्सर्गप्रयोगः समाप्तः ।

विषयः । जलाशयानां उत्सर्गविधिः ।

No. 101. (जातकपद्धतिटीका) भावार्थमञ्जरी By अच्युत. Substance, country-made paper, 10×3 inches. Folia, 44 (without 4–32). Lines, 8 on a page. Extent, 1,100 çlokas. Character, Bengali. Date, SK. 1571. Place of deposit Zilla Midnapur, Post office Garvetā Grām Khuverā, Late Paṇḍit Rāmtaran S'iromani. Appearance, old. Prose. Correct.

Beginning. नमोवृन्दावनचन्द्राय ।

कमलवदनारुणनयनं परमं परमार्थविदां रघूणां ।
सजलजलजलदश्यामं रामं सलक्ष्मणं वन्दे ॥
श्रीमद्रामनभट्टशेखरमणेः सत्कर्मवारां निधेः
सूनुः सागरचन्द्रमाः समजनि प्रख्यातकीर्तिच्छटः ।
नो दोषाकरतामुपैति न जड़ो नाङ्के × × लक्ष्यते
पूर्णश्चारुकलाभिरच कमलासेव्यं दधत्यद्भुतं ॥
व्याख्याताकाव्यसिन्धोरभिनवकवितापद्मिनीनां विकाशे
भास्वानुर्वेनभस्वानतिजय × × × प्राक्तनानां कृतानां ।
न्याये व्यासकृतौ कृती कृतधियासुर्वैविधाने विधि-
र्भक्तः श्रीरघुनाथपादयुगले श्रीसागरः × × × ॥
भावाभावविचारे जातकविद्विते × × × तत् सूनुः ।
ज्ञानी श्रीपतिटीकां कुरुते भट्टाचार्य्यतः श्रीमान् ॥ (?)
श्रीपतिव्याख्यानावच्युतविहितालङ्कृता नवीनापि ।
भावार्थमञ्जरीयं दयिता भावार्थविदो-भविता ॥

श्रीमिश्चिराचार्य्याच्युतभट्टेन श्रीपतिकृतजातकपद्धतिविवरणमारभ्यत इत्यादि ।

End. इदमेव प्रयोजनं ग्रन्थकारेण पूर्व्वग्रन्थानुसारेणोक्तं किन्तु सप्तवर्गजफलै रेतत् ज्ञातव्यं। खोचे रूपं चरणविंचितेनित्यादिप्रकारेण शुभं बुद्धा चनयोर्यदधिकं तद्‌पफलं ग्रहः परिपाचयति। शुभाधिक्ये शुभं चशुभाधिक्ये चशुभमिति।

इत्थं गौतमगोचेण श्रीयुताच्युतशर्म्मणा।

कृतं श्रीपतिपद्धत्यां चतुर्थाध्यायवर्णनम्॥

Colophon. इति चष्टकाध्यायविवरणं चतुर्थः।

शाकेऽक्ष्माश्वबाणेन्दौ १५७१ ध्याता कृष्णपदाम्बुजं।

लिलेख श्रीमहादेवेष्टकाद्याच्युत शर्म्मणः॥ ?

विषयः। श्रीपतिभट्टकृतजातकपद्धतेर्विवरणम्।

No. 102. जिनचैत्यनमस्कारः. Substance, country-made paper, 11 × 4½ inches. Folia, 2. Lines 11 on a page. Extent, 44 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Verse. Incorrect.

Beginning. स (...) न्या देवलोके रविशशिभवने व्यन्तराणां निकाये।

नक्षत्राणां निवासे ग्रहगणपटले तारकाणां विमाने।

पाताले वा नगेन्द्रे स्फुटमणिकिरणे ध्वस्तशान्ताऽन्धकारे,

श्रीमत्तीर्थंकराणां प्रतिदिवसमहं तत्र चैत्यानि वन्दे।

End. तेषां श्रीतीर्थयात्राफलमतुलमलं जायते मानवानां

कार्य्यं सिद्धिस्तथोच्चैःप्रभृति च सततं चित्तमानन्दकारे।

Colophon. इति श्रीजिनचैत्यनमस्कारः समाप्तः।

विषयः। जैनतीर्थंकरचैत्यनमस्कारकथनम्।

No. 103. जीवत्‌पितृककर्त्तव्यनिर्णयः By बालकृष्णभट्ट. Substance, country-made paper, 8 × 3 inches. Folia, 8. Lines, 9 on a page. Extent, 150 çlokas. Character, Nāgara. Date, SN. 1785. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः।

सत्पद्मचक्रादियुतं प्रसन्नं पीताम्बरं कौस्तुभभूषिताङ्गं

यशोदयालिङ्गितपूर्व्वदेहं सत्यव्रतं कृष्णमहं भजामि।

End. श्रीबालकृष्णरचितात् जीवत्पितृककनिर्णयात्
भागीरथीमौलिमालः शश्वत्तुष्यति सर्व्वदा ।

Colophon. इति श्रीमद्गङ्गोजिभट्टात्मजबालकृष्णभट्टविरचितो जीवत्पितृककर्त्तव्यनिर्णयः समाप्तः । संवत् १७८५ ।

विषयः । जीवत्पितृककर्त्तव्यकथनम् ।

No. 104. वास्तुरत्नकोशः. Substance, country-made paper, 11 × 3 inches. Folia, 137. Lines, 7 on a page. Extent, 2,000 çlokas. Character, Bengali. Date SM. 1847. Place of deposit, Calcutta, Viçvakoṣa office, Babu Nagendranath *Basu*. Appearance, fresh. Verse. Incorrect.

Beginning. श्रीगणेशाय नमः ।

अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्व्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥
चतुर्मुखमुखाम्भोजवनहंसवधू र्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥

श्रीविश्वकर्म्मोवाच ।

श्वेताच ब्राह्मणी भूमीरक्ता वै क्षत्रिया स्मृता
पीतवर्णा भवेद्वैश्या शूद्रा कृष्णानुवर्णिनी । इत्यादि ।

End. विंशत्यासनकनिष्ठानि ज्येष्ठां तदांशवर्द्धना,
एकमादौ भवेन्मानं त्रिविधं मानमेव हि ।
आसनस्योद्भवा पीठा क्रमेणापि क्रमोद्भवा ।
शिलासनकेशान्तप्रमाणमेव सम्भवं ।

Colophon. इति श्रीअपराजितपृच्छायां प्रतिमाप्रमाणं द्विशताये नवमसूत्रं समाप्तं ॥
संवत १८४७ ॥

विषयः । भूमिवर्णादिनिरूपणम् ॥ मठापीठलक्षणादिकथनम् ॥ चतुष्प्रकारपीठलक्षणकथनम् ॥ प्रासादमानकरणादिनिरूपणम् ॥ वर्द्धमानाद्यष्टमण्डपनिरूपणम् ॥ मण्डपलक्षणादिकथनम् ॥ दारमानादिकथनम् ॥ प्रतिमाप्रमाणादिकथनम् ॥

No. 105. ज्ञापकसमुच्चयः By पुरुषोत्तमदेव. Substance, country-made paper, 10×4 inches. Folia, 60. Lines, 4 on a page. Extent 500 çlokas. Character, Bengali. Date? Place of deposit, Bhāṇḍārapur, Disṭ Vaguḍā, Babu Kāliçaraṇa Cakravartti. Appearance old. Prose. Incorrect.

Beginning. ॐ नमो गणेशाय ।

यच्चक्रे परिभाषाणां वृत्तिं वृद्धसुसम्मतां ।
पुरुषोत्तम आरेभे स ज्ञापकसमुच्चयं
तरप्तमब्विधावेतौ सदिति तौ यस्मादीढ्ः ? × × × × इति
वा यत्नार्थे प्रकरणापकर्षे तरप्तमपौ स्त इति ज्ञापयति प्रकर्षार्थमन्तरे-
णापि कचित् स्वार्थे तरबस्तीति ।

End. अ अ इति शास्त्रान्तरे विवृतप्रत्यासत्तिवचनं ज्ञापयति व्याकरण-
प्रक्रियायामकारस्य विवृतोपदेशः । आकारग्रहणेनार्थं इति ॥

Colophon. इति श्रीमहामहोपाध्याय-श्रीपुरुषोत्तमदेव-विरचिते ज्ञापकसमुच्चये ऽष्टमो-
ऽध्यायः ॥ समाप्तश्चेदं पुस्तकम् ॥

विषयः । संक्षेपतः पाणिनीयप्रत्ययादिकथनम् ।

No. 106. ज्योतिष्कणिका By कृष्णानन्दचक्रवर्त्ती. Substance, country-made paper, 12×3 inches. Folia, 70. Lines, 6 on a page. Extent, 1,200 çlokas. Character, Bengali. Date SK. 1687. Place of deposit, Balihār Rājadhāni, Babu Varadākānta Cakravartti. Appearance, tolerable. Prose and Verse. Generally correct.

Beginning. ॐ श्रीगुरवे नमः ।

नमामि परमात्मानम् सर्व्वलोकेश्वरेश्वरं ।
अविचिन्त्यमहाशक्तिं भक्तिकारुण्यवारिधिं ॥
असत्यमपि संसारं यद्भक्तिः सत्यतां नयेत् ।
× × × × × ×
हे जना यदि कृत्स्नादि संक्षेपाज्ज्ञातुमिच्छथ ।
सुज्योतिष्कणिका यत्नात् गृह्यतां कर्मपावनी ॥
समालोक्य बहूनग्रन्थान् कृता श्रीकृष्णशर्म्मणा ।
सुगमा स्वल्पबुद्धीनां झटिति ज्ञानहेतवे ।

अथ राशिसंज्ञा ॥

मेष-वृष-मिथुन-कर्कट-सिंहाः ...

... ... इति च राशयः कथिताः ।

सप्तविंशतिभैर्ज्योतिश्चक्रं स्तिमितवायुगं

तदर्कांशो भवेद्राशिर्नवर्क्षचरणाङ्कितः ॥ इत्यादि ।

End. ॐ नमस्तेति प्रत्येकस्थापनक्रमेण विसृज्य अच्छिद्रावधारणम् कुर्य्यात् इति नवग्रहपूजापद्धतिः ॥ इति ज्योतिष्कथिकायामष्टमः परिच्छेदः ॥

ज्योतिःशास्त्रसंसाधनानि बहुशः सन्ति प्रशस्तानि वै

सन्तो मत्कृतिमल्पिकामपि परिष्यन्तो गुणग्राहिणः ।

अम्भोधौ परिलभ्यरत्ननिवहेऽचास्त्येव एवम्बिधं

यत् कृत्येपि तदेव रत्नममलं लब्धाप्युपेक्षिष्यते ॥

श्रीविक्रमादित्यचम्पकयष्टिश्रीकृष्णशर्म्मा चक्रवर्त्ती ।

चकार यत्नात् सुगमं कृतीनामज्ञप्रबोधार्थमिमं निबन्धं ॥

Colophon. इति श्रीकृष्णानन्दचक्रवर्त्तिविरचिता ज्योतिष्कथिका समाप्ता ॥ श्रीकृष्ण-गोविन्दशर्म्मणः पुस्तकमिदं शकाब्दाः १६८७ ॥

विषयः । राशिसंज्ञाकथनम् ॥ राशिनक्षत्रविभागकथनम् ॥ राश्युदयलग्नमानादि-कथनम् ॥ द्रेक्काणादिकथनम् । नवांशादिकथनम् ॥ दिक्पतिकथनम् ॥ ग्रहाणां शत्रुमित्रादि-कथनम् ॥ ग्रहसञ्चारशुभाशुभफलकथनम् ॥ नक्षत्राधिपादिकथनम् ॥ तिथिफलादिकथनम् ॥ योगादिकथनम् ॥ वारवेलाकालवेलादिकथनम् ॥ रव्यादिशुद्धिकथनम् । कालशुद्धि-कथनम् । विवाहविहितनक्षत्रादिकथनम् ॥ गर्भाधानविहितनक्षत्रादिकथनम् ॥ पुंसवनादि-विहितनक्षत्रकथनम् ॥ बीजवपनादिविहितदिनादिकथनम् ॥ लग्नकथनम् ॥ अभिजित्-क्षणकथनम् । उपायोगादिकथनम् ॥ संक्रान्तिनिरूपणम् ॥ वारुणादिनिरूपणम् ॥ तिथि-भङ्गादिकथनम् । रव्यादीनां भोग्यवर्षादिकथनम् ॥ नवग्रहपूजादिकथनम् ॥

No. 107. ज्योतिःसंक्षेपः By लक्ष्मणदासशर्म्मा. Substance, country-made paper, 18×3 inches. Folia, 46. Lines, 6 on a page. Extent, 1,150 çlokas. Character, Bengali. Date SK. 1725. Place of deposit, Balihār Dist Rājasāhī, Paṇḍit Kālī Çandra Bhaṭṭācārya. Appearance, tolerable. Prose and Verse. Correct.

Beginning. ॐ नमो गणेशाय ।

यन्मण्डले ब्रह्मणि दैवतानि तेजः स्वरूपेण सदा वसन्ति ।

सर्व्वात्मकं कारणमीश्वरं तं मुक्तिप्रदं सूर्य्यमहं नमामि ॥

गुरुं नत्वेष्टदेवांश्च श्रीकृष्णदासशर्म्मणा ।
अभ्यासार्थं बालकानां ज्योतिःसंक्षेप उच्यते ॥
तत्र प्रथमतो वक्ष्ये वारादीनां स्वरूपकं ।

× × × × × ×

उदयादोदयं भानोर्भौमसावनवासराः ।
इति सूर्य्यसिद्धान्तोक्तेन सूर्य्योदयावधि सूर्य्योदयान्तरं यावत् दिनाधि-
पस्य रव्यादेर्भौम्यो दिवारात्रिस्वरूपः षष्टिदण्डात्मकः कालो वार इति ।

End. अथ यात्राप्रत्यागमनं ।

तिथावरिक्ते शुभदे शुचन्द्रे
पापेषु केन्द्राष्टमवर्ज्जितेषु ।
सौम्ये स्थिरे वा जनिते सुलग्ने
गृहं विशेत् यानिवृत्तभूपः ।

कुल्लाचारयुक्तो दिनपुरविषयो योऽस्ति लब्धप्रतिष्ठ-
सम्भूतग्रामवासी द्विजगुरुविबुधप्रीतिदः सुप्रतिष्ठः ।
नानाशास्त्रार्थदानप्रथितशुभयशाश्चक्रवर्त्त्युपाधि-
र्वारेन्द्रः सत्कुलाढ्यो जयति पटुवरः श्रीयुतो रामचन्द्रः ॥

सुतस्तदीयो द्विजकृष्णदासः ।
प्रणम्य पित्रोश्चरणारविन्दं
बालावबोधार्थममुं चकार
ग्रन्थं ततो नोपहसन्तु विज्ञाः ॥

Colophon. इति श्रीयुतरामचन्द्रचक्रवर्त्ति-तनय-श्रीकृष्णदासशर्म्म-विरचितो ज्योतिः-
संक्षेपः समाप्तः ॥

रामशाक्सुन्दरेणाश्रुगद्वनमनोज्ञाक्षुग्माचलैके
शाके लेखीनमेनं झटिति सुघटुना तन्तु नत्वाचलैके ।

× × × × × × । १७२५ । २ । ५ । २० ॥

विषयः । वारादिकथनम् ॥ वारफलादिकथनम् । वारवेलादिकथनम् । तिथ्यादि-
निरूपणम् । नक्षत्राधिपादिकथनम् । राश्यादिनिरूपणम् ॥ लग्नादिनिर्णयः । अष्टवर्गादि-
कथनम् । नक्षत्रशूलादिकथनम् ॥ संक्रान्तिनिरूपणम् । शनिराहुचक्रादिकथनम् । ग्रहणादि-
निरूपणम् । विवाहविहितनक्षत्रादिकथनम् । द्विरागमनादिकथनम् । पुंसवन-सीमन्तोन्नयन-
जातकर्म्मोपनयनादिसंस्कारकर्म्मविहितदिनादिनिरूपणम् ॥ यात्रिकदिनादिकथनम् ॥

No. 108. ज्योतिःसंक्षेपसारः (खण्डितः) By कृष्णचन्द्र. Substance, country-made paper, 12×3 inches. Folia, 6. Lines, 5 on a page. Extent, 90 çlokas. Character, Bengali. Date ? Place of deposit, Upalatá Grám, Post Mehár, Zilla Comilla. Pandit Jagadbandhu Tarkavágis. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमः शिवाय ।

प्रणम्य नव रव्यादीन् कृष्णचन्द्रेण शर्म्मणा ।
ज्योतिःसंक्षेपसारोऽयं तन्यते बालकप्रियः ॥
अथदिननिर्णयः ।
रविः सोमो मङ्गलश्च बुधो जीवः सितः शनिः ।
एतेषां नामतो वाराः सप्तैव कथिताः क्रमात् ॥ इत्यादि ।
रिष्टिं भुजङ्गमाकारां केचिदिच्छन्ति सूरयः ।
भुजङ्गस्य मुखे मृत्यु र्न तु पुच्छे कदाचन ॥
आनने पञ्चनाचस्तु वक्षःस्थाने चतुर्द्दश ।
क्रोड़े चाष्टौ तथा ज्ञेयः पुच्छे तिस्रः प्रकीर्त्तिताः ॥
आनने धननाशः स्याद्वक्षःस्थाने महाभयं ॥
(अतः परं खण्डितं ।)

विषयः । संक्षेपतो ज्योतिर्व्वचनसङ्ग्रहः ।

No. 109. ज्योतीरहस्यं By हरिहरन्यायालङ्कार. Substance, country-made paper, 13×2 inches. Folia, 46. Lines, 5 on a page. Extent, 640 çlokas. Character, Bengali. Date SK. 1592. Place of deposit, Dinajpur, Babū Giriçacandra Cakravartti. Appearance, old. Verse. Generally correct.

Beginning. ॐ नमस्तारिण्यै ।

स्रष्टिस्थितिप्रलयहेतुरहेतुरीशो
विश्वस्य यस्तमभिवन्द्य जगत्स्फुटाय ।
ज्योतिःसमुद्रतरणे तरणिं तनोमि
ज्योतीरहस्यममलं सुधमस्य धीरः ॥
ज्योतिर्व्विदः पुष्ठकरो विनयं विधाय
श्रीमानहं हरिहरः प्रतिपादयामि

× × × × × ×

कालाङ्कबाधायवनिभिश्च युक्तः
शाको भवेदब्द इह प्रवक्ष्ये ।
कालाङ्कधाधायवनितोपि युक्त-
स्तदाब्दमुग्णेश्वयितोच शोध्यः ॥ इत्यादि ।

End. अन्नं खण्डितं ॥

विषयः । अब्दाद्यानयनम् ॥ अहर्गणनादिकथनम् ॥ सर्व्वग्रहाणां स्फुटानयनम् ॥ ग्रहाणां भुक्त्यानयनम् ॥ दिवसपञ्चानयनम् ॥ दिनमानाद्यर्थकथनम् ॥ चन्द्रादीनां दिनादिभुक्तिप्रकटनम् ॥ अतःपरं खण्डितं ॥

No. 110. ज्योतिःसारसंग्रहः By श्रीपति. Substance, country-made paper, 14 × 4 inches. Folia, 280. Lines, 7 on a page. Extent, 6,800 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Rājārāmapur. Pandit Çyāmāprasanna Vācaspati. Appearance, old. Verse. Incorrect.

Beginning. ॐ सूर्य्याय नमः ।

श्रीरामं श्रीपतिं नत्वा श्रीमत्श्रीपतिशर्म्मणा ।
क्रियते सुखबोधाय ज्योतिषां सारसंग्रहः ॥
अथ कालपुरुषस्याङ्गविभागः ॥
शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसंज्ञकानि ।
उरुजानुजङ्घे चरणाविति राशयोऽजाद्याः ॥
अथ मेषादयो यथासंख्यं कालपुरुषस्य शीर्षादयः स्युः वस्तिनाभेरधो भागः । मेषाद्या इति यदुक्तं तदुपलक्षणं । किन्तु जातकस्य लग्नादेव शीर्षादयः कल्प्या इति ॥ इत्यादि ।

End. रविबुधशुक्रजीवैः सप्तमः । रविबुधजीवशौरैरष्टमः । रविबुधशुक्रशौरैर्नवमः । रविजीवशुक्रहद्दैर्दशमः । भौमबुधजीवशुक्रैरेकादशः । अतःपरं खण्डितं ॥

विषयः । कालपुरुषस्याङ्गविभागकथनम् ॥ राशिनिर्णयः ॥ राशिदेवतादिकथनम् ॥ सामान्यविशेषादिराशिसंज्ञाकथनम् ॥ लग्नमानादिकथनम् ॥ ग्रहभोगकालादिकथनम् ॥ ग्रहसंज्ञादिकथनम् ॥ जात्यधिपादिकथनम् ॥ अमृतयोगादिकथनम् ॥ उत्पातादिकथनम् ॥ करकचादियोगकथनम् ॥ पापयोगापवादकथनम् । मासदग्धादिकथनम् ॥ सामान्ययोगादिकथनम् ॥ नक्षत्रनिर्णयः । नक्षत्रदेवतादिकथनम् ॥ ऊर्द्धमुखपार्श्वादिगणकथनम् ॥ भद्राकार-

निर्णयः ॥ योगादिप्रतीकारकथनम् ॥ वारादिकथनम् ॥ शुभयष्ठस्थितिफलादिकथनम् ॥ निरंशादिदिननिषेधकथनम् ॥ मलमासास्तगतादिनिषेधकथनम् ॥ कालशुद्धिकथनम् ॥ त्रिविधोत्पाततच्छान्त्यादिकथनम् ॥ नवग्रहोत्पातशान्त्यादिकथनम् ॥ राहुदर्शनविचारः । वक्रातिचारादिकथनम् । विवाहनिषेधकालादिकथनम् ॥ यामित्रादिवेधकथनम् ॥ चन्द्रशुद्ध्यादिकथनम् ॥ संक्रान्तिनिर्णयः । जन्मनक्षत्रजन्मतिथिफलं तथा वारादिफलञ्च ॥ सामान्यतो ग्रहशुद्धिकथनम् । अष्टवर्गशुद्ध्यादिकथनम् ॥ जन्मनक्षत्रे ग्रहपदर्शनादिनिषेधकथनम् । उदयास्तादिग्रहणफलं ॥ उल्कादिपतनफलं ॥ उपग्रहादिनिर्णयः । शतपदचक्रकथनम् ॥ विवाहकालादिकथनम् ॥ योटकविचारः ॥ अन्नप्राशनचूडोपनयनादिकालकथनम् ॥ यात्राविहितकालादिकथनम् ॥ कृषिकर्मकथनम् ॥ वास्तुप्रकरणम् । शल्योद्धारकथनम् ॥ दिक्पालपूजाविधिप्रयोगादिकथनम् ॥ कार्त्तिकादिवर्षज्ञानम् ॥ चोराभिजित्फलकथनम् ॥ अयनांशादिविचारः । लग्नफलकथनम् ॥ शकुनप्रकरणं ॥ जातकप्रकरणं ॥ जन्मनक्षत्रादिफलकथनम् ॥ तुङ्गादिफलकथनम् ॥ सूर्य्यादिरिष्टिकथनम् ॥ भावफलादिकथनम् ॥ पञ्चस्वरामते योगरिष्ट्यादिकथनम् ॥ आयुर्दशान्तर्दशादिनिरूपणम् ।

No. 111. ज्योतिःसारः By धर्म्मखान. Substance, country-made paper, 18 × 3 inches. Folia, 67. Lines, 5 on a page. Extent, 980 çlokas. Character, Bengali. Date S.K. 1670. Place of deposit, Dinajpur, Pandit Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, tolerable. Verse. Incorrect.

Beginning. श्रीकृष्णचन्द्रचरणकमलमधुव्रताय साधवे
नमो जगत् सख ? गद वनं नलाजं जगद्गन्तकं ।
पूर्व्वशास्त्रं समाहृत्य ज्योतिःसारं ब्रवे ध्रुवं
आज्ञाजैनातिथलेन प्रेरितोऽत्र क्रमेण तु ।
संक्षेपव्यवहारार्थं सोऽहं व्याहर्तुमुत्सहे ।

अथ दिनलक्षणं ॥

आदौ वारस्तिथिः पश्चात् नक्षत्रं तदनन्तरं ।
करणञ्च तथा योगो दिनं स्यात् पञ्चलक्षणम् ॥

End. रोहिणीश्रवणमूलाख्यं तथा भाद्रपदाद्वयं
पुष्याश्लेषोत्तराषाढाफल्गुनी संयुता तथा
विक्रये सर्व्ववस्तूनां अनुराधा तथा परा
भवन्ति सर्व्वलाभाय श्रीवराहोदितं यथा ॥
इति ज्योतिःसारे नवमः परिच्छेदः समाप्तः ।

Colophon. गगनव्योमार्णवसिन्धुनीरजमिते संवत्सरे निर्म्मले
मासे माधवसंज्ञके बुधदिनः सन्तोषदं ज्ञानदं ।
पुत्रप्रेमभरादिमं व्यरचयत् ग्रन्थं प्रयत्नात् स्वयं ।
राठाभूषणसिंहवंशप्रभवः श्रीधर्म्मखानः सुधीः ॥
शकाब्दाः १९७० ॐ गुरवे नमः ॥

विषयः । १ पः दिन-वार-नक्षत्रादिनिरूपणम् । विष्ट्यादिकथनम् । राश्यादिनिरूपणम् ।
१ पः वारवेलाकालरात्र्यादिकथनम् । नन्दादितिथिकथनम् । योगादिकथनम् । ३ पः
ग्रहगोचरादिफलकथनम् । ४ पः नववध्वागमनादिदशजातकप्रकरणं । ५, ६, ७ पः
विवाहादिविहितनक्षत्रादिनिरूपणम् । यात्रादिनिरूपणञ्च । ८ पः कृषिकर्म्मवास्तुप्रकरणं
९ पः वर्षाधिपादिकथनम् ॥

No. 112. ठाणाङ्ग सूत्रवृत्तिः By अभयदेव. Substance, country-made paper, 11 × 4½ inches. Folia, 262. Lines, 17 on a page. Extent, 11,124 çlokas. Character, Nagara. Date ? Place of deposit, Benares, Dikmaṇḍālācary-Mahāraja Bālacandra. Appearance, old. Prose. Incorrect.

Beginning. अस्य प्रथमतः ५५ पत्राणि न सन्ति ।
यथा इन्द्रेन्द्रो भावेन्द्रकारणतां प्रतिपद्यते तथा प्रयोगापेक्षायामपि
तदुपयोगतामासादयत्यवाप्तवांश्च न तथा नामस्य (...) न्द्रावित्ययं
विशेष इति ।

End. तदेवं निगमितमनुगमद्वारांशभूतं सूत्रस्पर्शिकनिर्युक्तिद्वारं शेषद्वाराणि तु
सर्व्वाध्ययनेषु प्रथमाध्ययनवत् अनुगमनीयानीति ।

Colophon. श्रीमदभयदेवसूरिविरचिते स्थानाख्यतृतीयाङ्गविवरणे दशस्थानकाख्यं
दशमाध्ययनं समाप्तम् ।

विषयः । ठाणाङ्गसूत्रव्याख्या ।

No. 113. ठालसागरः. Substance, country-made paper, 11 × 4½ inches. Folia, 225. Lines, 10 on a page. Extent, 4,500 çlokas. Character, Nagara. Date SM. 1846. Place of deposit, Benares, Dikmandalācāryya Mahārāja Bālacandra. Appearance, old. Verse. Correct.

Beginning. दुहा श्रामायाणे ।
श्रीजिन श्रादि जिनस्य श्रादितन उकरतार,
धर्माधर्मधिकरण, वरतावण विवहार ।

End. हरिवंश गायो शुजस पायो ज्ञानवुद्धि प्रकाशनो,

पापकठोगयोनाठो पूण्य छायो छा .

कारणपुत्र कलत्र कमला पढ़त शुनत शुद्दाशनो,

पुण्य श्रीगुण स्वरूपं परसाङ्गराङ्ग वधमणो :

Colophon. इति श्रीदामसागरहरिवंशप्रबन्धे नवमोधिकारः सम्पूर्णः । संवत् १८४९ ।

विषयः । हिन्दीभाषया हरिवंशकथनम् ।

No. 115. णकारप्रदीपः सटीकः By सरस्वतीकण्ठाभरण. Substance, country-made paper, 12×3½ inches, Folia, 5. Lines, 9 on a page. Extent, 200 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, post Garvetá, Gram Khunverā, Babu Vaikuṇṭhanāth Cakravarti. Appearance, fresh. Verse. Correct.

Beginning. ॐ काली ।

विरिञ्चिवागीशकवीन्द्रमुख्या

वागम्बुराशिं यदनुग्रहेण ।

सुदुस्तरं गोष्पदवत् तरन्ति

वाग्देवतां तां प्रणमामि नित्यं ॥

मूर्द्धण्यवर्गान्तयुताश्च शब्दाः

स्वभावसिद्धाः कृतिभिर्यं उक्ताः ।

बालावबोधाय सतां मुदे च

प्रदीपवत्तानिह दर्शयामि ॥

वर्षीयसां सत्स्वपि शासनेषु नव्ये न कार्ये मदतामुपेक्षा ।

अतोऽस्मम: × × × × प्रकाशं न किं प्रदीपे भवति प्रयत्नः ॥

वाणी-गणेणा गुण-गोणि-वाणास्तूणीर-वेणी भुषवेणु-घोणाः ।

माणिक्य-वीणा-शण-शाण-शोणाः सकिङ्किणीकाः कण-काण-कोणा ॥ इत्यादि

End. नत्वा चरणौ सरस्वत्याः कण्ठाभरणः श्रीमान् ।

निजकृतणकारप्रदीपटीकां समाचष्टे ॥

Beginning of Comm: ग्रन्थारम्भे शिष्टपरम्पराप्राप्ततया विघ्नविनाशाय × × × × × ब्रह्मादीन् शास्त्रकर्तॄन् स्तुवन् ग्रन्थकारो वागधिष्ठातृदेवतां प्रणमति विरिञ्चीत्यादि ।

Colophon. प्रदीपश्चरयकारं सरस्वतीकण्ठाभरणः श्रीमान् ।
छतिकुलहृदयकुतूहलकलाकलापात् सुखं यनक्ति ॥
इति श्रीसरस्वतीक्षतो यकार प्रदीपः समाप्तः ॥
इदानीं पूर्व्वोक्तामुपसंहरति । सरस्वती कण्ठाभरणं यस्य स यकारः प्रदीप इव व्यक्तीकरोति यनक्ति विपूर्व्वादिनजुधातो र्लेटि रूपं । इति श्रीकण्ठाभरणसरस्वतीक्षता यकारप्रदीपटीका समाप्ता ॥

विषयः । मूर्द्धण्यणकारवच्छब्दानां संग्रहः ।

No. 116. तत्त्वचिन्तामण्यालोकपरिशिष्टं By देवनाथ. Substance, country-made paper, 14 × 2 inches. Folia, 143. Lines, 6 on a page. Extent, 4,000 çlokas. Character Bengali. Date L.S. 443. Place of deposit, Dinajpur Babu Giriśa Candra Cakravarti (Vakil). Appearance, very old. Prose. Generally correct.

Beginning. ॐ नमः कृष्णाय ।

हरविकटजटान्तस्तुङ्गगङ्गान्तरङ्ग-
व्यतिकरितभवानीकेशवेणीचिवेणी ।
जनयतु मनसो मे गाहमानस्य गूढं
विपदपनयदीक्षासाक्षिणी मङ्गलानि ॥
देवनाथेन गोविन्दचरणाम्बुजसेविना ।
चिन्तामणौ यदालोके परिशिष्टं तदुच्यते ॥
समाप्तिहेतुतामिति निष्फलाचरणं मा प्रसज्यतामित्युपोद्घात इव सङ्गतिरिति कश्चित् ॥ खल्विति यद्यपि निषेधे वाक्यभूषायां खलु स्यादवधारणे इत्यभिधानाद्वाक्यालङ्कारत्वाविपि तस्य विशेषस्योपस्थितिं विना नान्वयसम्भवः तथापि छन्दादिपदवत् भिन्नैव शक्तिरस्येति तत्त्वं वस्तुतः कालिकविचारविषयत्वमेवालङ्कारः । न तावदित्यादौ तावत् पदवदिति बोद्धव्यं शब्द एवालङ्कार इति कश्चित् । ननु सकलसम्प्रतिपत्तीनामेकत्र समाधानाभावात् कथं तासामाचारहेतुत्वं किञ्च कस्यचित् क्वाचित् संप्रतिपत्तिरपि नैत्यत आह अविप्रतिपत्तिरिति । यद्यपि समाप्तेः प्रस्तुतत्वेन तत्परत्वमेवोक्तं, कारणतान्तरस्य मङ्गलेऽन्वयव्यतिरेकगम्यत्वात् तथापि विचारस्यापि प्रस्तुतत्वमेव अतएव साहय्यं प्रमाकरणमित्यादौ

मदेवार्थं इति भावः ॥ वस्तुतः कारणताज्ञानं व्यभिचारानुपात्तमे भवत्यवेति बाध इत्यन्यथा व्याचष्टे तन्वेति ॥

End. किञ्चाभावाभावत्वं प्रतियोगित्वमज्ञातमेव प्रकारत्वादनन्तरं तदुच्छेदाभावात् किञ्चाज्ञातस्याभावस्याप्रकारत्वेऽप्रसिद्धसाध्यकत्वमिति × × × × × × × अभावत्वज्ञानाभावात् अनुमितेरापत्तौ चनत्वायोगात् इति दिक् । यदपि विशेषणज्ञानत्वेनाधिकरणज्ञानादीनां साधारण्येन कारणता नत्वसाधारणीति तदपि न, अन्वयव्यतिरेकेणाधिकरणज्ञानत्वादिनैव हेतुत्वात् । अन्यथाधिकरणाद्यविशेषणकाभावत्वादिविशेषणान्तरविशिष्टबुद्धेरपि प्रसङ्गात् । ... ... वस्तुतस्त्विति । अवच्छेदपदव्याहृत्ति-विषयत्वानियतमित्यन्वयः । यथेत्यादि दृष्टान्तः । संयोगावच्छेदको व्याप्यावच्छेदकश्च इति द्वन्द्वः । अवच्छेदकज्ञानानन्तरमवच्छेद्यज्ञानात् तद्विषयत्वा-नियमवेति भावः । तदवच्छेदकमिति शून्यत्वरूपविशेषणावच्छेदकमित्यर्थः । यद्वा स्वानधिकरणव्याहृतबोधजनकतावच्छेदकमित्यर्थः । एवञ्च प्रति-योगितावच्छेदकेत्यत्र विरहरूपत्वमिति पाठः ? । अनुदेश्येति दन्तौत्यादौ साध्यत्वेनानुदेश्यायामदन्तव्याहृत्तिरित्यर्थः ॥ व्यवच्छिन्नत्वेन व्याहृतत्वेन तथा च यद्न्वितत्वेत्याद्यविकल्पमित्यर्थः ॥

पक्षपातममालम्ब्य चिन्तामणिगुणगौरवं ।
देवनाथो यथावस्तु परिशिष्टमचिन्तयत् ॥

Colophon. ल सं ४४३ चैत्र वदि एकादश्यां चन्द्रे महामहोठक्कुर श्रीदेवनाथमहाशयानुशासनात् राघवेन लिखितं ॥

विषयः । चिन्तामण्यालोकानुक्तपदार्थनिर्वचनम् ॥

No. 117. तत्त्वप्रकाशिकाविवरणम् By जयतीर्थ. Substance, country-made paper, 10 × 2½ inches. Folia, 25. Lines, 5 on a page. Extent, 350 çlokas. Character, Nagara. Date ? Place of deposit, Tikāri, District Gayā, Paṇdit Çāstri. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ श्रीवेदव्यासाय नमः ।

रमाया रमणं नत्वा गुणमाणिक्यमण्डनं ।
तत्त्वप्रकाशिकाव्याख्यां करिष्यामो यथामति ॥
परमात्मनोऽत्यन्तभिन्नस्य स्वतश्चिदानन्दाद्यात्मकस्यापि जीवस्यानाद्यविद्या-

कामकर्म्मादिनिमित्तोयं परमार्थं स्वान्यथाकारी दुःखाद्यनर्थो न परमेश्वर-प्रसादादन्तेऽपगच्छति न चासाक्षात्कृतोऽसौ प्रसीदति न चाविदितस्वरूपः शक्यते साक्षात् कर्त्तुमिति ॥ इत्यादि ।

End. नानन्दः स्वरूपमात्रेण पुरुषार्थं इत्यतो नित्यानन्देति विशेषणं ॥ भोजनं भोग अनुभव इति यावत् ।
सदा सुरशिरोरत्नप्रभाशुचि नखत्विषि ।
कमलाकमितुः पादपद्मयुग्मे रतिरस्तु मे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचित-तत्वप्रकाशिकाविवरणं जय-तीर्थभिक्षुविरचितं समाप्तं ॥

विषयः । आनन्दतीर्थकृतोपाधिखण्डनस्य व्याख्यानम् ॥

No. 118. तत्त्वविवेकटीका By जयतीर्थ. Substance, country-made paper, 10 × 2½ inches. Folia, 13. Lines, 5 on a page. Extent, 260 çlokas. Character Nagara. Date ? Place of deposit, Tikāri, District Gayā, Paṇḍit Çāstri. Appearance, tolerable. Prose. Correct.

Beginning. प्रणम्य रमणं लक्ष्म्याः पूर्णबोधान् गुरूनपि ।
व्याख्यां तत्त्वविवेकस्य करिष्यामो यथामति ॥
ननु परमपुरुषादितत्वानां विवेकः शास्त्रे
एव कृतस्तत् किमनेन प्रकरणेन ॥ इत्यादि

End. तथापि परमपुरुषाधीनतयावगतं भवत्येव मोक्षसाधनमित्येतत् द्वे विद्ये वेदितव्ये इत्यादि श्रुतिसिद्धमिति हि शब्देन सूचयति ॥
करतलमिलितामलकप्रख्यं यस्याखिलं विश्वं ।
कमलापरिदृढममलं वन्दे तं वन्द्यपदाब्जम् ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादोद्धृततत्त्वविवरणं जयतीर्थभिक्षुविरचितं समाप्तम् ॥
पुरे वाराणसीक्षेत्रे बिन्दुमाधवसन्निधौ ।
पीताम्बरेण लिखितं रमामाधवप्रीतये ॥

विषयः । आनन्दतीर्थकृततत्त्वविवेकस्य व्याख्यानम् ॥

No. 119. तत्त्वसंख्यानविवरणम् By जयतीर्थ. Substance, country-made paper, 9 × 2 inches. Folia, 13. Lines, 5 on a page. Extent, 325 çlokas. Character, Nāgara. Date ? Place of deposit, Tikāri, District Gayā, Pandit Çastri. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीवेदव्यासाय नमः ॥

लक्ष्मीपतेः पदाम्भोजयुगं नत्वा गुरोरपि ।
करिष्ये तत्त्वसंख्यानव्याख्यानं नातिविस्तरं ॥
मुमुक्षुणा खलु परमात्मा जगदुदयादिनिमित्तत्वेनावश्यमवगन्तव्य इति सकलशास्त्राणामविप्रतिपन्नोऽर्थः । इत्यादि ॥

End. सकलसत्त्वादेस्तदधीनत्वात्तदस्तु निमित्तमात्रमेव ।
स्वातन्त्र्येण तु विष्णुरेवास्येश्वर इति ॥
पद्मापद्मासनानन्तप्रभृतीदं यदिच्छया ।
तत्त्वादि सम्भवेत् देवः प्रीयतां श्रीपतिः स मे ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादविरचिततत्त्वसंख्यानविवरणं जयतीर्थभिक्षुकविरचितं समाप्तम् ॥

विषयः । आनन्दतीर्थकृततत्त्वसंख्यानस्य व्याख्यानम् ॥

No. 120. तत्त्वसुधानिधि By आनन्दतीर्थ. Substance, country-made paper, 11 × 5 inches. Folia, 9. Lines, 9 on a page. Extent, 300 çlokas. Character, Nāgara. Date ? Place of deposit, Hatuya, District Chāprā, Bābu Girīndranāth Datta. Appearance, fresh. Prose. Generally correct.

Beginning. श्रीहयग्रीवाय नमः ॥

अथापरोक्षज्ञानस्वरूपं निरूपयितुं तदुत्पत्तिं प्रथमतः कथयति ।
यद्दैवं वैराग्यातिशयदृढया भक्तिधुरया
हरेरक्तोपास्या किल सपरिवारस्य भवति ॥
तदा नित्याव्यक्तोऽपि तु निजमहिम्नैव कमला-
निलोपेतः साक्षात् क्रियत इह सर्वैरपि हरिः ॥ इत्यादि ।

End. एवमपरोक्षज्ञानस्य मोक्षोत्तरफलं सप्रपञ्चं निरूप्य मोक्षाख्यं फलं वदन्नुपसंहरति ॥

मोक्षाभिधं फलमुदेत्यपरोक्षभाजा-
मारब्धकर्मविगमे क्वचिदन्यथा न ।
एवं प्रसन्नहृदयः सदशा रमेशो
मोक्षादिकात्मविषये श्रमयत्नवर्थान् ॥

Colophon. इति बुधवरोपाध्यायोपदर्शितदर्शनाखिलसरणिना तज्जेनानन्दतीर्थमनीषिणा रचितोचितार्थश्रेणिभाजि सुधानिधौ चरिहम्नि तरङ्गोयं साङ्गं समुद्रं समेयिवान् । इति तत्त्वसुधानिधौ अपरोक्षज्ञानतरङ्गः ॥

विषयः । अपरोक्षज्ञानस्वरूपादिनिरूपणम् ॥

No. 121. तन्त्रकोषः. Substance, country-made paper, 8×5 inches. Folia, 4. Lines, 13 on a page. Extent, 53 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशं महेशानं भारतीमीश्वरं शिवं
नत्वा वक्ष्ये मातृकाया निघण्टं बालबुद्धये ।
चतुर्वर्गारम्भिहृद्धा वेदादिस्सारकोऽव्ययः ।
प्रणवश्च त्रिमात्रोऽपि ॐकारो ज्योतिरादिषः ॥
अ. श्रीकण्ठः केशवश्चापि निष्टत्तिश्च स्वरादिकः ।
अकारोमातृकादिश्च वात इत्यभिधीयते ॥

End. संवर्त्तको ध्वसिंहश्च हृदयान् सुखसंस्थितः ।
अनन्तः परमात्मा च यज्ञकायोऽक्षिमः स्मृतः ॥

Colophon. इति तन्त्रकोषः समाप्तः ॥

विषयः । अकारादिवर्णानां यथायथमर्थकथनम् ॥

No. 122. तन्त्रमणिः By काशीश्वरः. Substance, country-made paper, 18×4 inches. Folia, 87. Lines, 6 on a page. Extent, 2,000 çlokas. Character, Bengali. Date ? Place of deposit, Bhāṇḍārpur, District Baguḍā, Paṇḍit Kāliçarana Cakravartti. Appearance, old. Prose and verse. Incorrect

Beginning. ॐ गुरवे नमः ॥

भर्त्तुरुत्संगे तमसो निवृत्त्यै शम्भोर्जटाजूटतटे निषण्णाम् ।
कन्दर्पकोटिद्युतिदेहकान्तिं कामारदंसीमिव चन्द्रलेखाम् ॥

\+ + + + +

तन्त्रमर्यि मयत् गुह्यं वक्ति काशीश्वरः सुधीः ।
तत्र गुरुपदकाद्य शिवतन्त्रे ॥
गकारात् ज्ञानसम्पत्तौ रेफोऽपि तत् प्रकाशकः ।
उकाराच्छिवतादात्म्यं दद्यादिति गुरुः स्मृतः ॥ इत्यादि ।

End. वां वटुकाय नम इति मन्त्रेण वायव्ये बलिं दद्यात् ।
ॐ यां योगिनीभ्यो नम इति मन्त्रेण मध्ये बलिं दद्यात् ।
ॐ यां क्षेत्रपालाय नम इति अग्निकोणे बलिं दद्यात् ।

Colophon. इति बलिदानविधिः । इति तन्त्रमयौ मद्दागोपनीये चतुर्थः पटलः ॥
अतःपरं खण्डितम् ॥

विषयः । १ पटले गुरुशिष्यलक्षणादिकथनम् ॥ कुलाकुलचक्रविचारः ॥ राशिचक्रादिकथनम् ॥ दीक्षामासादिनिरूपणम् ॥ मालासंस्कारादिकथनम् ॥ पुरश्चरणादिकथनम् ॥ दीक्षाप्रयोगादिकथनम् ॥ सकलमन्त्रगायत्रीकथनम् ॥ सामान्यपूजापद्धतिः ॥ २ पटले सकलमन्त्रबीजादिकथनम् ॥ ३ पटले तारापूजाप्रयोगादिकथनम् ॥ यन्त्रादिकथनम् ॥ ४ पटले मन्त्रसिद्धेरुपायादिकथनम् ॥ बलिदानविध्यादिकथनम् ॥

No. 123. तन्त्रराजः By काशीरामवाचस्पतिः. Substance, country-made paper, 15 × 3½ inches. Folia, 5. Lines, 7 on a page. Extent, 180 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur. Post Garvetā, Grām Khunverā, Late Paṇḍit Sripati Bhaṭṭācārya. Appearance, fresh. Prose and verse. Correct.

Beginning. ॐ नमः सरस्वत्यै ॥

प्रणम्य सूक्ष्मां प्रकृतिं निर्गुणं पुरुषं तथा ।
श्रीकाशीरामसत्नुते मन्त्रराजं सतां मुदे ॥
तत्र गुरुलक्षणम् ॥
शान्तो दान्तः कुलीनश्च विनीतः शुद्धवेशवान् ।
शुद्धाचारः सुप्रतिष्ठः शुचिर्दक्षः सुबुद्धिमान् । इत्यादि ।

End. वस्तुतस्तु इदं प्रशंसापरं विचारस्य तु सर्व्वथावश्यकत्वं दुरदृष्टवशात् कदाचित् वैरिमन्त्रस्य स्वप्नादौ प्राप्तौ तत्तद्दोषस्य दृष्टत्वादिति तु साम्प्रदायिकाः ॥

Colophon. इति श्रीकाशीरामवाचस्पतिभट्टाचार्य्यविरचितः शेषरचितस्तन्त्रराजः समाप्तः ॥

विषयः । गुरुलक्षणकथनम् ॥ शिष्यलक्षणकथनम् ॥ दीक्षाप्रकरणविधिकथनम् ॥

No. 124 तन्त्रसारपरिशिष्टम् By यतिवर. Substance, country-made paper, 17×3 inches, Folia, 83. Lines, 6 on a page. Extent, 2,000 çlokas, Character, Bengali. Date ? Place of deposit, Dinajapur, Rājārampur, Paṇḍit Çyāmāprasanna Vācaspati. Appearance, fresh. Verse. Correct.

Beginning. ॐ नमः शिवाय ॥

गुरुगणेशरविशक्तिशङ्करान्
हृदि विचिन्त्य जनजपादिहेतवे ।
तन्त्रसारपरिशिष्टसंज्ञकं
यतिवरेण मतिपरेण तन्यते ॥

तत्र गुरुकथने वृद्धवर्म्मपुराणम् ॥

तस्माद्गुरोर्व्वंशजातं वयोऽल्पमपि पण्डितं
गुरुं कुर्य्यात् तु दीक्षायामविचार्य्य गुरोः कुलं
ब्राह्मणो ज्ञानवृद्धो हि कनिष्ठोऽपि गुरुर्भवेत् ॥ शाक्तस्य सर्व्वमन्त्रगुरुत्वस्य ॥

तत्रैव देवीवाक्यम् ।

वैष्णवानान्तु सर्व्वेषामहं दैवतमेव हि ।
तस्मात् ममोपासकः स्याद्विष्णुदीक्षाविधौ गुरुः ॥ इत्यादि ।

End. अथ घटार्गलयन्त्रम् ॥

पूर्व्वार्द्धे दक्षिणार्द्धे च रेखे कुर्य्यात् विचक्षणः ।
ईशानात् कोणपातञ्च रेखायुग्मं प्रकल्पयेत् ।
वह्नितो वायुकोणान्तं रेखायुग्मं ततः क्रमात् ॥

अतःपरं खण्डितम् ॥

विषयः । वयोऽल्पगुरुकरणम् ॥ दीक्षाकालविचारः ॥ मन्त्रविचारादिकथनम् ॥ वाद्यान्तर्दशसंस्कारादिकथनम् ॥ आगमतत्त्वविलासोक्तदीक्षाविधिः ॥ मन्त्रचैतन्यादिकथनम् ॥ मन्त्रेन्द्रिय-

ज्ञानकथनम् ॥ सप्ताङ्गपुरश्चरणकथनम् ॥ गन्धद्रव्यव्यवस्थादिकथनम् ॥ कलौ होमनिषेधकथनम् ॥ निधिनक्षत्रयोगादीनां पुरश्चरणकथनम् ॥ निशितावारादिकथनम् ॥ गुरुध्यानकथनम् ॥ गायत्रीध्यानादिकथनम् ॥ तान्त्रिकसन्ध्याया नित्यत्वकथनम् ॥ पूजाविशेषकथनम् ॥ अन्तर्यागादिकथनम् ॥ मुद्राविशेषकथनम् ॥ तान्त्रिकलिङ्गपूजाकथनम् ॥ काम्यपूजादिकथनम् ॥ दीपान्वितापूजाव्यवस्थादिकथनम् ॥ रटन्तीपूजाव्यवस्थाकथनम् ॥ अजपामन्त्रप्रयोगादिकथनम् ॥ सीताराधादीनां मन्त्रकथनम् ॥ गुरुस्तोत्रकवचादिकथनम् ॥ महादुर्गाजयदुर्गादीनां स्तोत्रकथनम् ॥ ताराष्टकस्य व्याख्यानम् ॥ कवचादिकथनम् ॥

अतःपरं खण्डितम् ॥

No. 125. तन्त्रसारसंग्रहः By आनन्दतीर्थ. Substance, country-made paper, 12×4 inches. Folia, 31. Lines, 18 on a page. Extent, 620 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

Beginning. श्रीवेदव्यासाय नमः ॥

जयत्यजभवेशेन्द्रवन्दितः कमलापतिः,

अनन्तविभवानन्दशक्तिज्ञानादिसंगुणः ।

विधिं विधाय सर्गादौ तेन प्रोक्तस्तोत्रमः,

आवक्ष्ये (...) मोक्षहरविस्तसत्वादपत्रवः ॥

End. अशेषदोषोज्झितपूर्णसद्गुणं

सदा विशेषोपगतोरुरूपम् ।

नमामि नारायणमप्रतीपः

सदाप्रियेभ्यः प्रियमादरेण ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्यविरचिते श्रीमत्तन्त्रसारसंग्रहे चतुर्थोध्यायः समाप्तः ॥

विषयः । माध्वसम्प्रदायानां पूजादिविधिः ॥

No. 126. तन्त्रसारसंग्रहटीका By नरसिंहाचार्य. Substance, country-made paper, 12×6 inches. Folia, 48. Lines, 11 on a page. Extent, 1,056 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

सहस्रनाममसहस्रष्टोत्तरसमाकुलम् ॥
तारामन्त्रतन्त्रमयं तारकं लोकतारकम्
ब्रह्मविद्यामयं साक्षात् कल्पद्रुमलतामयम् ॥
सर्व्वमन्त्रतन्त्रसारं सारात्सारं परात्परम् । ... ...
सूक्ष्मात् सूक्ष्मतरं सारं तारिणीस्तवराजकम् ॥
सिद्धिविद्या सिद्धिमयं सर्व्वसाम्राज्यदायकम् ।
यद् त्वं कृपया नाथ यदि स्नेहोऽस्ति मां प्रति ॥ इत्यादि ।

End. सर्व्वेषामुदयं जयं जयकरं योगेन्द्रयोगान्तरं
सारात्सारतरं परं स्तुतिपरं कैवल्यधामाकरम् ।
यः स्तौति प्रयतः शुचिः प्रतिदिनं प्रातर्निशि प्रोक्षल्लं
स स्यादाद्यगणाधिपो विभुरिव श्रीमण्डले संवसेत् ॥
तारिण्याः कूटनाम्ना विरचितमखिलं कोटिकोटिप्रधाना
सर्व्वेर्षां पाठकाले कुलपतिरतुलां सिद्धिमाप्नोति धीरः ।
प्रत्यक्षं प्राप्नुवन्तो सकलरिपुगणान् तारकं पालयन्तो
मुद्राणां दिव्यमालाविकसितहृदया ध्यायते कौलपद्मे ॥
त्वत्पादाम्भोजयुग्मोज्ज्वलरुचिविगलत्प्रेमधारा विशाला
पानीयन्मुण्डखण्डोत्कटघटरुधिराक्तादचित्तप्रकाशा ।
मायाबीजस्त्रबीजप्रभवषट्गणास्त्रैकवर्णं विभर्त्ति
त्वं श्रीदेवेन्द्रराज्यं कुरु कुरु सततं मोक्षसन्तोषदायी ॥

Colophon. इति श्रीनीलतन्त्रे उत्तरखण्डे सिद्धिविद्याप्रकाशे श्रीकृष्णमुखपङ्कजनिर्गत-तारिणीतारकब्रह्मकूटाष्टोत्तरशतसहस्रनामस्तोत्रराजकवचन्यासो नाम चय-स्त्रिंशः पटलः ॥ ॐ श्रीतारा ॥

विषयः । ताराया स्वकाराद्यष्टोत्तरशतसहस्रनामकथनम् ॥

No. 130. तिथिवादार्थः. Substance, country-made paper, 15 × 3½ inches. Folia, 24. Lines, 10 on a page. Extent, 1,200 Çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā Bhaṭṭagrām, Paṇḍit Rāmhridaya Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ॥

प्राचीनमते विघ्नविध्वंसद्वारा प्रारिप्सितपरिसमाप्तिं प्रति मङ्गलस्य हेतुत्वे

निर्विघ्नपुरुषव्यासादेर्मङ्गलाचरणे विघ्नाभावेन ध्वंसाभावात् विघ्नाभावद्वारा प्रारिप्सितपरिसमाप्तिं प्रति मङ्गलस्य हेतुत्वं वाच्यं तत्र निर्विघ्नपुरुषे व्यासादौ विघ्नात्यन्ताभावः तस्य व्यापारस्वीकारस्तु चैमिकजन्यतास्वीकारेण सविघ्न-पुरुषे विघ्नध्वंसद्वारा इत्यभावपदमुभयपरं चात्मगौरवं प्राचीनमते। नव्यमते विघ्नध्वंसं प्रति मङ्गलस्य हेतुत्वं तत्र सविघ्नपुरुषे विघ्नध्वंसः निर्विघ्नपुरुष-स्थले मङ्गलाचरणरूपकारणसत्वेपि ध्वंसस्य कारणविघ्नरूपप्रतियोगिनो-ऽभावात् न विघ्नध्वंसः॥ इत्यादि।

End. अमार्कपातश्रवणैर्युक्ता चेत् पौषमाघयोः।
अर्द्धोदयः स विज्ञेयः कोटिसूर्य्यग्रहैः समः॥
इति स्मार्त्ताः। सौरपौषस्यामावस्यायां श्रवणाया असम्भवात् चान्द्रपौषस्य ग्रहः ननु तर्हि चान्द्रमासस्यामावस्यायां श्रवणायाः कथं सम्भवः। उ। यदा फाल्गुणस्य चतुर्थदिवसे चतुर्दण्डात्मिका श्रवणा तदनन्तरं धनिष्ठा समुदायदिनव्यापिनी चामावास्या तदा रवेरेकराश्यवस्थानं सुघटमिति सुधीभिर्भाव्यं। दिवैव योगः प्रशस्तोऽयं न तु रात्रौ कदाचन इति स्मार्त्ताः अयं योगः दिवैव रात्रौ कदाचन न इत्यन्वयः अयं योगः दिवैव प्रशस्त इत्यर्थं × × × रात्रावपि अप्रशस्त योगः स्यात् इदानीन्तु अप्रशस्त-मपि न भवतीति भावः॥ (अतःपरं नास्ति)।

Colophon.

विषयः। तिथितत्त्वोपवादावलीनां सम्यग्विचारः॥

No. 131. तिथ्यर्कप्रकाशः By दिवाकर. Substance, country-made paper, 8×4½ inches. Folia 111. Lines, 10 on a page. Extent, 2,800 çlokas. Character, Nāgara. Date ? Place of deposit, Tikāri, District Gayā, Paṇḍit Sāstrī. Appearance, tolerable. Prose and Verse. Correct.

Beginning. श्रीगणेशाय नमः॥
जानकीनयनयुग्मगोचरं मानिनां नयनयोरगोचरं।
नीलमेघरुचिरच्छविं सदा भावये मनसि राघवं मुदा॥
... ...
श्रीरामेश्वरसूरिसूनुरभवन्नारायणाख्यो महान्
येनाकार्य्यविमुक्तये सुविधिनाविश्वेश्वरस्थापनम्।

तत्पुत्रो विबुधाधिपः क्षितितले श्रीशङ्करस्तत्सुतो
जातो भाट्टनयेऽतुलः पृथुयशाः श्रीनीलकण्ठो बुधः ॥
भारद्वाजकुलेऽमले समभवत् श्रीबालकृष्णाभिधः
साहित्याम्बुनिधिरिरार्चिरपरः सर्वस्य जातः प्रभुः ।
तत् सूनुः प्रथमोऽपरो मतिरिव श्रीमान्महादेव इत्यां-
श्रीदेवपुरोहितामलमतिर्न्यायाब्धिपारङ्गतः ॥
तत्पुत्रेण दिवाकरेण विदुषा श्रीनीलकण्ठप्रभो-
दौहित्रेण बुधैः सुधारस समास्वाद्यः परेषां कृते ।
तिथ्यर्कःक्रियते प्रणम्य पितरं बालां तथामातरं
श्रीकान्तं तपनं शिवं पशुपतिं वाचं महादेवतां ॥
अथ विधुक्तकर्मानुष्ठानकालज्ञानार्थं तदङ्गत्वेन षोडशतिथीनां निर्णयः
संक्षेपेणोच्यते । अत्यन्ताप्राप्तप्रापणं हि विधिः ॥ इत्यादि ।

End. इत्यचिन्तामणौ शास्त्रे ॥
नरो दोलागतं दृष्ट्वा गोविन्दं पुरुषोत्तमं ।
फाल्गुन्यां संयतो भूत्वा गोविन्दस्य पुरं व्रजेदिति ॥
पौर्णमासी गुरुवारेण विद्धा । मन्देन विद्धा । षोडिश्यच वायव्यामिति
पौर्णमासीनिर्णयः ॥

Colophon. इति श्रीमद्दिविष्करोमणिभारद्वाजमहादेवभट्टात्मजसकलविद्यानिधानदिवा-
करविरचिते तिथ्यर्कप्रकाशे षोडशतिथीनां निर्णयः समाप्तः ॥

विषयः । प्रतिपदादिषकलतिथिकृत्यादिनिरूपणम् ॥

No. 132. तिथ्यर्कप्रकाशानुक्रमणिका By वैद्यनाथ. Substance, country-made paper, 8×4½ inches. Folia, 27. Lines, 10 on a page. Extent, 650 çlokas. Character, Nāgara. Date Sm. 1856. Place of deposit, Tikāri, District Gayā, Paṇḍit Çāstrī. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. अथेष्टिकालस्य निर्णयः ॥
तत्रेष्टिः पर्वप्रतिपत्सन्धौ कार्या ॥ इत्यादि ।

End. सामान्यो प्रमथनमेव क्षिताक्षितविभीतनं ।
श्रौतेषु विशेषस्तु गभिन्यादि निषेधनम् ॥

सङ्ख्या प्रतिनिधीनानु द्वीपस्थामे ग्रतस्य चि ।
नैमित्तिकः पुण्यकाल इत्येवं कथितः क्रमः ॥
इत्थं दिवाकरसुतेन कनीयसा श्रीरामानुजेन गुरुभक्तिपरायणेन ।
श्रीतातपादरचिते सुजनप्रिये ऽस्मिन् ग्रन्थे क्रमोल्लिखित एकगुरु प्रसादात् ॥

Colophon. इति दिवाकरसूरिसूनु-वैद्यनाथकृता तिथ्यर्कप्रकाशानुक्रमणिका समाप्ता ॥ * ॥
संवत् १८५६ ॥ श्रीः ॥ । ॥

विषयः । दशादिकालनिरूपणम् । तथा तिथ्यर्कप्रकाशस्थतत्तत्स्थानुष्ठानकथनम् ॥

No. 133. तृचभास्करः. Substance, country-made paper, 14 × 5 inches. Folia, 10. Lines, 14 on a page. Extent, 350 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, fresh. Prose and verse. Correct.

Beginning. अथ धारणमात्रेण रोगनाशन फलकयन्त्रप्रकारः कथ्यते स चोक्तो यन्त्रसारे-
प्रणवं साध्यसमेतं विलिख्य षट्कोणकर्णिकामध्ये ॐ ह्रीं हंसः सोहं षड्दीर्घान्
आलिखेच्च कोणेषु, केशरविलसद्गौरचतुर्वर्णं दलचतुष्टये चापि । इत्यादि ।

End. इत्यादिकन्तु न्यासविद्भिरूहितुं शक्यमेवेत्यलं विस्तरेणेति सर्वं शिवं । ...
... आचचाराणिकमाचि कौतुके
यत्कृते भवत्सुपत्रपचतो ।
भास्करेण कृच भास्करः कृतो
भास्करावधि स जीवतु चितौ ॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारावारीणधुरीणसर्वतन्त्रस्वतन्त्रश्रीमद्गम्भीरराज-
भारतीदीक्षितात्मजभास्कररायोन्नीततृचभास्करः सम्पूर्णतामगमत् ।

विषयः । अथ धारणमात्रेण रोगनाशनफलकयन्त्रप्रकारः । अथ पूजाप्रयोजनतिलकार्घ-
प्रकारः । अथ ध्यानं । अथ न्यासः । अथ सौराष्टाचरयन्त्रं । अथ समस्तयन्त्रोपयोगी यन्त्र-
सामान्य-विधिः । अथ पीठप्रमाणं । अथ लेख्याचराणि । यन्त्राष्टविंशतिकं ।

No. 134. तैत्तिरीय उत्सर्जनोपाकरणम्. Substance, country-made paper, 10 × 5 inches. Folia, 7. Lines, 12 on a page. Extent, 1,262 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

सुमुखश्च इत्यादि देशकालौ संकीर्त्य श्रीपरमेश्वरप्रीत्यर्थं उत्सर्जनपूर्व्वं (......) ध्यायोपाकर्माङ्गभूतं मृत्तिकास्नानं करिष्ये ।

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे,

शिरसा धारयिष्यामि रक्षस्व मां पदे पदे ।

End. तथोपाकरणे उत्सर्जनं करिष्ये । स्नानादिहोमान्तं कृत्वा तथैव स्वाध्यायं विसर्जेत् । उत्सृष्टाः वै वेदाः । तथो जयति ।

Colophon. इत्युत्सर्जनं । इति तैत्तिरीयानां उत्सर्जनोपाकरणम् ।

विषयः । तैत्तिरीयशाखीयानां यज्ञोपवीतधारणविधिः ।

No. 135. तैत्तिरीयसंहिता-होमपद्धतिः. Substance, country-made paper, 12 x 5 inches. Folia, 37. Lines, 10 on a page. Extent, 740 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

ओम् । गणानां त्वा गण, पादनंस्वाहा । इषेत्वोर्जे, पाहि स्वाहा । १ । यज्ञस्य, गमनमसि स्वाहा । २ । प्रादध्वं, रक्षस्व स्वाहा । ४ ।

End. प्रत्याहुतिचयं दशांशेन यथाशक्ति ब्राह्मणान् भोजयेत्, पयसाच सुखं पूपोदनव्यञ्जनादि औपचारिकमिति ज्ञातव्यम् । इति ।

Colophon. — — — — — — ।

विषयः । तैत्तिरीयशाखोक्तमन्त्रेण होमविधानम् ।

No. 136. त्रिसूत्रीनिबन्धव्याख्या By शङ्करमिश्र. Substance, country-made paper, 13 x 2 inches. Folia, 123. Lines, 5 on a page. Extent, 2,500 çlokas. Character, Bengali. Date ? Place of deposit, Dinajpur, Babu Giriś Candra Cakravartti. Appearance, very old. Prose. Incorrect.

Beginning. ॐ नमो नारायणाय ॥

पितुर्वाक्यं कृत्वा मनसि भवनाथस्य कृतिन-

श्चतुर्थन्थीग्रन्थादपमिव विमोक्तुं व्यवसितः ।

तदेतस्मिन् कर्म्मण्यतिगुरुणि गौरीपरिवृढे
दृढा भक्तिः शक्तिं जनयतु यथा स्यामवहितः ॥
प्रकाशदर्पणोद्यत्तद्विर्याख्या कृतोज्ज्वला ।
तथापि योजनामात्रबुद्धिस्थार्थं ममोद्यमः ॥
मातरिति एष टीकां व्याचिकीर्षुरहं हे सरस्वति पुनःपुनस्त्वां नत्वा किमपि विज्ञापयामि निवेदयामि तद्वेदि जानीहि किं विज्ञापयामि इति विज्ञाप्यमाह समयाच्चे वाङ्मनसयोस्तथा सारमानय यथा एते वाचस्पते-र्वचसि न स्खलतो न प्रमाद्यत इति तन्वाराधना गौरवितप्रीतिहेतुक्रिया विश्वपदार्थस्य न लीश्वरस्य सा सम्भवतीत्यत आह विश्वेति ॥ इत्यादि ।

End. ननु सन्देहो यदि विषयगतो विवक्षितस्तदा वह्निं प्रतीत्यादि-टीकाविरोध इति विषये संशयमपास्य प्रामाण्ये शब्दानुमानयोः संशयमुपपादयति सपदेश इति वक्तावपीति प्रामाण्यसंशयस्य विषयसंशयोत्पादकत्वादित्यन्यत् । नन्विति तत्त्वज्ञानमेव न संप्रति व्यवस्थापनस्य फलमत आह एकदेशेति नन्वेतदेव कुत इत्यत आह प्रत्यक्षफलेति चैनुमानादिष्विति अनुमानं लिङ्गोपहितं शाब्दः शब्दोपहितः प्रत्यक्षं तु नोपधायकं किञ्चित् किन्तु साक्षादेव विषयमिन्द्रियसन्निकृष्टमित्यतस्तद्भावादिति आकाङ्क्षानिहत्ते-र्भावादित्य ... ... विशेषणमाह द्वितीयेति ।

Colophon. इति महामहोपाध्याय-सन्मिश्रभवनाथात्मज-मिश्रश्रीशङ्करकृतत्रिसूत्री-निबन्धव्याकारः समाप्तः ।
पित्रा यद्भवनाथेन व्याख्यातं तद्दिहालिखं ।
व्याख्यान गुणदोषाभ्यां सम्बन्धो मपितुर्न मे ॥

विषयः । गौतमसूत्रीयत्रिसूत्रीभाष्यस्य व्याख्यानम् ॥

No. 137. त्वरितरुद्रविधिः . Substance, country-made paper, 12×5 inches. Folia, 4. Lines, 10 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. अथ त्वरितरुद्रविधिः । तत्र कालः सिद्धामृतयोगः । नाशः, आयुः । लाभः, अर्थः । संशयः, शुभः । लाभः, मोक्षः वशः । चैत्रादिक्रमेण तिथिषु

द्वितीया-पञ्चमी-सप्तमी-त्रयोदशी-पञ्चदशी-प्रशस्ताः । नक्षत्रेषु अश्विनी-रोहिणी-मृगार्द्रा-पुष्य-त्रिचोत्तरा-हस्त-चित्रा-स्वात्यनुराधा-विशाखा-श्रवणा-धनिष्ठा-रेवत्यः प्रशस्ताः । अथ प्रयोगः देशकालौ संकीर्त्त्य अमुकनामा अमुककामनासिद्ध्यर्थं अमुकसङ्ख्याकत्वरितरुद्रजपमहं करिष्ये ।

End. होमो ब्राह्मणभुक्तिश्च पुरश्चरणमुत्तमं ।
यदि होमेष्वशक्तः स्यात् पूजायां तर्पयेऽपि वा ॥
जपेद्दशांशहोमस्य तद्दशांशेन तर्पणं ।
मार्जनं तद्दशांशेन तद्दशांशेन भोजनम् ॥

Colophon. इति त्वरितरुद्रविधिः ।

विषयः । त्वरितरुद्रपूजादिविधानम् ।

No. 138. त्वरितरुद्रविधिः. Substance, country-made paper, 8 × 3 inches. Folia, 1. Lines, 16 on a page. Extent, 40 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācārryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ त्वरितरुद्रमन्त्रस्याथर्व्वण ऋषिस्त्वरितरुद्रदेवतानुष्टुप् छन्दः नमः इति बीजं अस्मिति शक्तिः, क्षिप्रं कार्य्यसिद्ध्यर्थे विनियोगः ।

End. इष्टिकामोऽजपेल्लक्षं तिलैर्होमो घृतेन च ।
वह्निपूजा तु कर्त्तव्या शिवस्य वरुणस्य च ॥

Colophon. इति त्वरितरुद्रविधिः समाप्तः ।

विषयः । त्वरितरुद्रपूजादिविधानम् ।

No. 139. दत्तकविधिः By वाचस्पतिमिश्रः. Substance, country-made paper, 17 × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 195 çlokas. Character, Bengali. Date S.K. 1778. Place of deposit, Dinajpur, Paṇḍit Kṛṣṇa-dāsa Smṛtibhūṣaṇa. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।
प्रणम्य शम्भुं ब्रह्माणं लक्ष्मीशं जगतां पतिं ।
श्रीवाचस्पतिमिश्रेण दत्तके विधिरुच्यते ॥

End. अमुकगोत्रायामुकदेवशर्म्मणे तुभ्यमहं सम्प्रददे इति दक्षिणां दद्यात् ॥

Colophon. इति महामहोपाध्याय-वाचस्पतिमिश्ररचितं दत्तकपुत्रेष्टियागविधिप्रकरणं समाप्तं ॥ शकाब्दा १७७८

विषयः । दत्तकग्रहणविधिप्रयोगादि-कथनम् ॥

No. 140. दशपच्चखाखानविचारः. Substance, country-made paper, 10×4 inches. Folia, 2. Lines, 13 on a page. Extent, 60 çlokas. Character, Nāgara. Date Sm. 1904. Place of deposit, Benares, Dikmaṇḍalācāryya Mahārāja Bālacandra. Appearance, new. Prose. Correct.

Beginning. अथ दशपचखाखान का विचार लिखे हैं ।

तिहां प्रथम चउदेनैमसंभारे,
सोहसतरे पचखाखानकरे ।
उग्गं ए सूवेनमोक्कार सहिय
यं सुन्चर्ठी पचखाखामि ।
चउव्विहंपि आहारं ।
असनं, पानं, खादमं सादमं ।

End. आगार वाहथ, तथा अभिग्रह पचखाखानकैविधेपिथ ए हि । आगार वाहणा, पांचमो वोलय प (...) गारेथं, सो साधुके होय ।

Colophon. इति पचखाखानविचारः । संवत् १९०४ ।

विषयः । जैनमते दशविधप्रत्याख्यानव्याख्यानम् ।

No. 141. दाक्षायसप्तकम्. Substance, country-made paper, 8×3 inches. Folia, 6. Lines, 5 on a page. Extent, 50 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. ओम् कोपोद्रेकातितिर्य्यङ् निखिलपरिचरत्तारचारप्रभूत-
ज्वालामालाप्रदग्धस्मरतनुशकलं त्वामहं सानुवेशं,
याचे त्वत्पादपद्मप्रणिहितमनसं द्वेष्टि मां यः क्रियाभि-
स्तस्य प्राणप्रयाणं परमशिव ! भवतः शूलभिन्नस्य तूर्णं ।

End. इति गुह्यं महावीर्य्यं परमं रिपुनाशनं ।
भानुवारे समारभ्य मङ्गलान्ते जपेत् सुधीः ॥
यत्क्रत्यं तन्न क्रतं, यदक्रत्यं क्रत्यवत्तदाचरितं ।
उभयोः प्रायश्चित्तं शिव तव नामाचरद्वयोचरितं ॥

Colophon. इत्याकाशभैरवतन्त्रे उमामहेश्वरसंवादे द्वाचत्वारिंशत्पटलक संपूर्णं ।

विषयः । शिवमहिमवर्णनम् ।

No. 142. दिव्यानुष्ठानपद्धतिः . Substance, country-made paper, 8 × 3 inches. Folia, 14. Lines, 10 on a page. Extent, 300 çlokas. Character, Nāgara. Date Sm. 1787. Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ तुलादिव्यविधिः ।
तच सावष्टम्भाभियोग एव, न तु शङ्किताभियोगे,
साक्षिकपचसहस्रन्यूनद्रव्यविवादे च न भवति ।

End. अयं च दिव्यविशेषप्रयुक्तो दण्डः ।
निह्नवे भवितोदायाहनं राज्ञे च तद्धनम् ॥
इत्यादिविशेषप्रयुक्तदण्डेन समुच्चीयते इत्यादि ज्ञेयम् ।

Colophon. भट्ट रामेश्वरसुतो भट्टनारायणः सुधीः ।
अनुष्ठानसुखार्थमिमां कृतवान् दिव्यपद्धतिम् ॥
इति श्रीविद्वन्मुकुटमाणिक्य-श्रीरामेश्वरभट्टात्मज-नारायणभट्टकृता दिव्यानुष्ठानपद्धतिः समाप्ता संवत् १७८७ ।

विषयः शपथविधि-कथनम् ।

No. 143. दुर्गोत्सवविवेकः By श्रीनाथाचार्य्यचूडामणिः . Substance, country-made paper, 13 × 2 inches. Folia, 12. Lines, 5 on a page. Extent, 240 çlokas. Character, Bengali. Date ? Place of deposit, Dinājapur, Rājārāmapur, Paṇḍit Çyāmāprasanna Vidyāvācaspati. Appearance, tolerable. Prose and verse. Correct.

Beginning. अथ कालविवेकोक्तदुर्गोत्सवविधिः ।
चान्द्रमासे ऽश्वयुजि साधितं पूर्व्वं ।

आरोपार्थमनिर्गमसमहस्त्वाज्ञोष्यतामधुना ॥
तत्र भगवतीपुराणम् ।
कन्यायां कृष्णपक्षे च नवम्यामार्द्रभे दिवा ।
नवम्यां बोधयेद्देवीं गीतवादित्रनिस्वनैः ॥ इत्यादि ।

End. तथा तत्रैव नवम्यां पूजां नृत्यगीतादिना जागरणश्चोक्ता फलमुक्तं ।
सर्व्वपापविनिर्म्मुक्तो दिव्यतेजोमयस्तथा ।
मोदते दुर्गया सार्द्धं दुर्गा-लोके महीयते ॥

Colophon. इति महामहोपाध्याय-श्रीकरात्मज-श्रीश्रीनाथाचार्य्यचूडामणिकृत-दुर्गोत्सव-विवेकः समाप्तः ॥

विषयः । दुर्गोत्सवविध्यादि-कथनम् ।

No. 144. देवताब्राह्मणभाष्यम् . Substance, country-made paper, 15 × 5 inches. Folia, 5. Lines, 11 on a page. Extent, 220 çlokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थ-महेश्वरम् ॥
तत्कटाक्षेण तद्रूपं दधद्बुक्कमहीपतिः ।
आदिशत्सायणाचार्य्यं वेदार्थस्य प्रकाशने ॥
ये पूर्व्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात् ।
कृपालुः सायणाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥
व्याख्यातावृग्यजुर्वेदौ सामवेदेऽपि संहिता ।
व्याख्याता ब्राह्मणानान्तु व्याख्यानं संप्रवर्त्तते ॥

End. अग्न्यादिदेवताकर्माश्रयाणामपि छन्दसामेतद्दैवतम् । एता अग्न्यादि-देवता भवितुं युक्ताः सन्तीत्यर्थः ।

Colophon. इति श्रीदेवताख्ये पञ्चमे ब्राह्मणे द्वितीयः खण्डः ।

विषयः । सामवेदान्तर्गतदेवताब्राह्मणव्याख्या ।

No. 145. देवीमाहात्म्यटीका (श्लोकार्थदीपिका) By केवल. Substance, country-made paper, 13×4 inches. Folia, 5. Lines, 9 on a page. Extent, 140 çlokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garbetā, Grāma Bhaṭṭagrām, Paṇḍit Rāmahridaya Bhaṭṭācāryya. Appearance, tolerable. Verse. Correct.

Beginning. श्रीश्रीहरिः शरणम् ॥

या चाम्बिका प्रतिगृहे जननीकुलश्री
र्यां पद्मयोनिप्रमुखाः शिवसेविताङ्घ्रिः ।
या जिष्णु-विष्णु-नलिनीभव-भक्ति-तुष्टा
सा मां पुनातु सततं त्रिदशैकमाता ॥
भगवति तव लीला मामनाथं प्रसन्नं
यदि यदि जगतां का त्वदन्या समाप्ति ।
अनुदिनमनुभक्तः कर्मपाशावकाश-
स्त्रिभुवनमुपलब्धौं त्वामहं चिन्तयामि ॥
जीवो जीवं प्राह देहप्रभेदात् कस्त्वं विप्रो ब्रूहि तत्त्वं मुवेत्त्वम् ।
जीवोद्धारः कर्मसत्वादनित्यात् तन्मे मिथ्या वाक्चयं किं शृणोषि ॥
अथ किल तदुपदेशात् कलुषाकुलः श्रीकेवलः स्तौति ।
ब्रह्मेशविष्णुजननीं स्थितिस्थित्यन्तकारिणीम् ।
स्वर्गापवर्गदां नित्यां भजे स्त्रिग्धानुरूपिणीम् ॥
पुण्यान्यनेकानि भवन्ति भूमौ येषां प्रशस्ताः स्तुतयः शुभाख्याः ।
सा त्वं स्तुतीनां प्रवरासि चण्डी यस्याः सुपाठात् सकलार्थसिद्धिः ॥
श्रीदुर्गाचरणाम्भोजं स्मरतामङ्घ्रिसेविना ।
दिजानाञ्चैव माहात्म्यप्रकाशः क्रियते मया ॥
नत्वा विनोदं सकलगुणवतामपि सन्तोषशीलं ?
श्रीगोपालं प्रणम्य प्रकटितरचनाशालिनं नौमि धीरं ।
ये चान्ये वा सुपुण्या दिजकुलमुकुटास्तानहं दण्डपातै
र्युष्माकं पादरेणुः प्रचुरकरुणया रचयीयो रसायाम् ॥
चण्डी गुप्तार्थभावार्थौ शब्दार्थश्चापि कुत्रचित् ।
प्रकाश्यते पूर्वटीकाकाराज्ञाकारिणानिशम् ॥ इत्यादि ।

End. इति मार्कण्डेयपुराणे इत्यादि सूर्यकस्य ।
सत्त्वपयोग्यमाहात्म्यादुर्द्धमासीद् वधादिकं ।

सावर्णिकेऽष्टममन्वन्तरे तत्प्रतिपादितम् ॥
मार्कण्डेयपुराणेऽत्र चूर्णकेन सुकर्मुकः ।
व्यवस्थितं श्रीमतात्र व्यासेन जनरञ्जकम् ॥
इत्यस्मिन् चण्डिकापाठे सर्व्वधर्म्मविवर्द्धके ।
संशयच्छेदकाः श्लोकाः भवन्तु गुणिनां मुदे ॥
यत्र श्रीकनकेश्वरी विजयते तत्पादपद्माश्रये
वासो मे बकुवत्सरं भगवती मातेव शम्भुप्रिया ।
एष श्रीयुतकेवलेन कृतिना श्रीविप्रपादाम्बुजं
नत्वालेखि सुदुष्कृतं कुरुत मे मन्दस्य धीराः शिवम् ॥
ब्राह्मणेभ्यो नमस्कृत्य चण्डिकायै नवीम्यहं ।
कुपुत्रकठिनारम्भः पित्रोर्दुःखाय चाभवत् ॥
सतां मुदेऽर्भकाणाञ्च ज्ञानाय संशयच्छिदे ।
श्लोकार्थदीपिका व्याख्या समाप्ता ब्राह्मणाशिषा ॥
रससिन्धुशशाङ्कमितेऽतिशुभे
शुभ भाद्रपदे सितपक्षयुते ।
हरिवासरतारकपुष्यतिथौ
विद्मेति समाप्तमतं × × ॥ (?)

Colophon. इति श्रीदेवीमाहात्म्यप्रकाशे श्लोकार्थदीपिका समाप्ता ॥

विषयः । देवीमाहात्म्यीयापाततो जटिलश्लोकानां व्याख्यानम् ।

No. 146. देवीमाहात्म्यटीका (सुबोधिनी) By माधवशर्म्मा . Substance, country-made paper, 13×3 inches. Folia, 7. Lines, 5 on a page. Extent, 170 çlokas. Character, Bengali. Date Sk. 1531. Place of deposit, Dacca, Sonārgā Krisṇapura. Paṇḍit S'arat Candra Bhaṭṭācāryya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमश्चण्डिकायै ॥

प्राक् किल भगवान् वादरायणान्तेवासी जैमिनिर्महाभारतविषयेषु केषुचित् पदार्थेषु सन्दिहानो मार्कण्डेयमहर्षिमुपगम्याप्राक्षीत् अथ नायमस्माकं कथाचण इति सर्व्वार्थाभिज्ञान् विन्ध्याचलनिलयान् चतुरः पक्षिणः पृच्छेति मुनिनोपदिष्टोऽसावपि तथाकार्षीदिति पुनर्जैमिनिप्रश्नानुरोधात्

मार्कण्डेयभागुरिसंवादात्मकमितिहासमनुवर्णयन्नः पश्चिष्य ऋचुः मार्कण्डेय उवाचेति चातुर्भुजी । इदानीं स मनोः कथानन्तरं कौषिकिं मुनिं सम्बोध्य कथां कथयति मार्कण्डेय उवाचेति । इत्यादि ।

End. एवं प्रकारेण सुरथः देव्या वरं लब्ध्वा सूर्याज्जन्म समासाद्य सावर्णिर्मनुर्भविता चत्रियर्षभः चत्रियश्रेष्ठः सावर्णिर्भवितामनुरिति पुनरावृत्तिः समाप्तिं द्योतयति तथा न्यायादिति चतुर्भुजेन लिखितमिति ॥

Colophon. चन्द्रेताग्निवाणचन्द्रशाकेऽकारि सुबोधिनी ।
सुधियां हृदये साक्षां श्रीमन्माधवशर्म्मणा ॥

विषयः देवीमाहात्म्यव्याख्यानम् ।

No. 147. द्वारकाखण्डम् . Substance, country-made paper, 14×5 inches. Folia, 92. Lines, 9 on a page. Extent, 2,300 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Rājavāṭi. Appearance, fresh. Verse. Correct.

अथातः सम्प्रवक्ष्यामि रसलौहादिसंस्कृतिं ।
यद्विज्ञानेन भिषजो न मुह्यन्ति चिकित्सिते ॥

End. कान्तिं चिरस्थितं देहं सम्यक्पथ्यसमाचारात् सर्व्वरुजो हन्ति किं बहुना ।
+ + + । मुनिरचितशास्त्रपारं गत्वा सारं ततः समुद्धृत्य निबन्ध-
वान्यथानामुपकृतये × को × षट्कर्म्मा ह्यमृतसारलौहं ॥
तन्त्रार्णवान् विनिर्म्मथ्य नरसिंहेन सद्गुणैः ।
गुडपाकविषं त्यक्त्वा रत्नमाला समुद्धृता ॥
लौहमहौषधघटिता मालेयं रत्नपूरिता नरणैः ।
× × × × × × ॥
यद्यपीयं न हि भवेत् पुराणभिषजः प्रिया ।
तथापि नववैद्यानामानुकूल्यं करिष्यति ॥ * ॥

Colophon. इति दाक्षिणात्यवैदिकमहोपाध्यायनीलकण्ठभट्टात्मजरामकृष्णभट्ट-परिचारक
श्रीनरसिंहकविराजविरचितारसरत्नमाला समाप्ता ।
शुभमस्तु संवत् १७३१ ॥

विषयः । रसशोधनादिकथनम् । रसकर्पूर-रससिन्दूरादि-कथनम् । रसबन्धनादि-कथनम् । रसमारणादि-कथनम् । अभ्रमारणादिकथनम् । स्वर्णादिमारणकथनम् । रत्नगिरि-ज्वरपञ्चाननादिरसकथनम् । प्रतापलङ्केश्वररसादिकथनम् । महोदधिकनकसुन्दरादिसकल-रसकथनम् । पञ्चामृतपर्पटीकथनम् । विजयपर्पटीकथनम् । अग्निमुखलौहादिकथनम् । पञ्चामृतवटीकथनम् । कृताशादिवटीकथनम् । राजयक्ष्मादिचिकित्साकथनम् । कासादि-चिकित्साकथनम् । स्वरभेदचिकित्साकथनम् । मूर्च्छादिचिकित्साकथनम् । वातव्याधिचिकित्सा । आमवातचिकित्सानिरूपणम् । उदावर्त्तचिकित्सा । गुल्मादिचिकित्सा । शोथादिचिकित्सा-निरूपणम् । कुष्ठादिचिकित्साकथनम् । स्त्रीरोगादिचिकित्सा । साध्यसाधनपरिमाणविधिकथनम् । स्वाल्लीपाक-पुटनादिविधिकथनम् । अमृतसारलौहादिकथनम् ॥

No. 247. सारमञ्जरी (राघवपाण्डवीय टीका). By जितामित्र. Substance, country-made paper, 12 × 2½ inches. Folia, 44. Lines, 7 on a page. Extent, 1500 slokas. Character, Bengali. Date S.K. 1749. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Rāmhṛdaya Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

Beginning. श्रीश्रीरामः ॥

विघ्नविध्वंसशूरं तत्कन्दमानन्दसंप्लवैः ।
मुरारेश्चरणाम्भोजमम्बिकाया अपि स्तुमः ॥
टीकायां विततां व्याख्या इत्यालोच्य समासतः ।
जितामित्रेण धीरेण क्रियते सारमञ्जरी ॥
कर्त्तव्यविघ्नशान्तयेऽभिमतदेवतां नमस्कुर्व्वन् रघुगुणत्वेन प्रथमं ब्रह्माणं प्रथमश्लाघ । श्रेति । इत्यादि ।

End. चरीणां वानराणां विसर्जनं प्रस्थापनं पक्षे कृष्णविसर्जनं तीर्थभूयात् उपाध्यायरूपात् कवेः वाल्मीकेः कुम्भभुवोऽगस्त्याच × × × × × पक्षे कवेरिति कुम्भभुवो विशेषणं । श्रिया । स रामः भरतसम्मन्त्रिन्या श्रिया जुष्टः पक्षे × × × × तत्काव्यकारयितुः राज्ञोप्येवं ।

Colophon. इति श्रीराघवपाण्डवीयटीकायां सारमञ्जर्य्यां श्रीजितामित्र-कृतायां चयोदशः सर्गः समाप्तः । शकाब्दाः १७४९ ।

काम्ते कथं कमलकोरकयुग्ममेतद्-
वक्षस्थितं समधुपं न तव प्रफुल्लं ।
सिन्दूरपूरकिरणे सति भालदेशे
शङ्के समीपसुखचन्द्रमयूखमग्रम् ॥
काकः कृष्णः पिकः कृष्णो न भेदः पिककाकयोः ।
वसन्ते पुनरायाते काकः काकः पिकः पिकः ॥
श्रीश्रीसीतारामाभ्यां नमोनमः ।

विषयः । राघवपाण्डवीयकाव्यस्य व्याख्यानम् ॥

No. 248. राजधर्म्मकौस्तुभः. By अनन्तदेव. Substance, country-made paper, 10 × 4 inches. Folia, 29, Lines, 11 on a page. Extent, 720 slokas. Character, Nāgari. Date ? Place of deposit, Bibihāṭi, Benares City. Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ॥

उपनिषद्भिरगतं रूपं मुनयो मनसा भजन्त्यरूपं यत् ।
कृष्ण धृतोत्कण्ठको × विजय × मनो जयति ।
यशःकर्पूरेण सर्व्वाशाः परिपूरयन्,
लज्जाजलनिधौ सर्व्वान् योऽचिपन्नृपतीन् परान् ॥

End. अथ यजमानो गवादिदक्षिणा । आचार्य्याय अन्येभ्यश्च भूयसीं दक्षिणां दत्वा यथाशक्ति ब्राह्मणान् भोजयित्वा परमेश्वरार्पणं कुर्य्यात् । इति संक्षेपप्रश्नलक्षणविधिः ।

Colophon. इति श्रीमन्महाराजाधिराज-श्रीवाजबाहादुर-खण्डराजाप्रकृत्तेनापदेवसुता-नन्तदेवविदुषा कृते राजधर्मकौस्तुभे पूर्णपद्धतिगोचरद्वितीयदीधितेः पूर्व्वार्द्धं समाप्तम् ।

विषयः । जलाशयोत्सर्गकथनम् ।

No. 249. राधाष्टमीपूजाविधिः (ब्रह्मवैवर्त्तपुराणीयः). Substance, country-made paper, $15 \times 3\frac{1}{2}$ inches. Folia, 3. Lines, 7 on a page. Extent, 750 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakoṇā, Ayodhyā, Raghunātha-vāṭi, Babu Cakrapāni Rāya. Appearance, old. Generally correct.

Beginning. श्रीनारायणाय नमः ।

अथ राधाष्टमीपूजाविधिः ।

तत्रादौ स्वस्तिवाचनपूर्व्वकं संकल्पं कुर्य्यात् । श्रीविष्णुरों तत्सदद्य भाद्रमासि शुक्ले पक्षेऽष्टम्यान्तिथौ अमुकगोत्रः श्रीअमुकदेवशर्म्मा श्रीराधाकृष्णपादान् अर्चयिष्ये इति सङ्कल्प्य यज्ञापन इति पठेत् ॥ इत्यादि ।

End. प्रथमावरणे देवकन्या, द्वितीयद्वारे किङ्किनी, तृतीये अवक्री, चतुर्थे कामधेनुः, पञ्चमे मन्दारवृक्षमूले रत्नसिंहासने प्रद्युम्नः, × × × सप्तमे मुनिगणसहितः कृष्णवर्णो विष्णुः, दक्षिणे चन्द्रकुण्डः । इति सप्तावरणं समाप्तम् ।

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे प्रकृतिखण्डे श्रीराधिकापूजापद्धतिः समाप्ता ।

विषयः । श्रीराधायाः पूजाविधानकथनम् ।

No. 250. राधाष्टमीव्रतकथा (भविष्योत्तरीया). Substance, country-made paper, 15 × 3 inches. Folia, 5. Lines, 7 on a page. Extent, 140 ślokas. Character, Bengali. Date S.K. 1708. Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā Raghunātha-vāṭi, Babu Cakrapāṇi Rāya. Appearance, old. Prose. Generally correct.

Beginning. ॐ नमो राधायै ॥

श्रीशौनक उवाच ।

आराधनानां सर्व्वेषां विष्णोराराधनं परं ।
ततोऽप्यधिकमस्त्यान्याराधनं चेद्वदस्व मे ॥

श्रीसूत उवाच ।

शृणुध्वं मुनयः सर्व्वे व्रतमेतत् सुगोपितं ।
कृष्णनारदसंवादं यच्छ्रुत्वा भक्तिमान् भवेत् ॥

श्रीनारद उवाच ।

श्रुताः सर्व्वावताराश्चे कृष्णविष्णो सनातन ।
राधिकायाः महादेव्याः प्रादुर्भावं वदस्व मे ॥ इत्यादि ।

End. सूत उवाच ।

श्रुत्वैतत् कृष्णवचनं नारदो मुनिसत्तमः ।
चकारैतद्व्रतं भक्त्या वैष्णवाख्यापयिच्छया ॥
अथ दामोदरं स्तुत्वा राधया सहितं मुदा ।
प्रणम्य दण्डवद्भूमौ ययौ × × × × मुनिः ॥

Colophon. इति श्रीभविष्योत्तरे श्रीकृष्णनारदसंवादे श्रीराधाष्टमीव्रतकथा समाप्ता ।
ॐ नमो राधिकायै । शक० १७०८ ।

विषयः । श्रीराधाष्टमीव्रतकरणे फलकथनम् । श्रीराधाया जन्मादिविवरणकथनञ्च ।

No. 251. राधास्तोत्रम् (ऊर्द्ध्वाम्नायतन्त्रोक्तम्). Substance, country-made paper, 16 × 4 inches. Folia, 1. Lines, 8 on a page. Extent, 16 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Telivāni, Paṇḍit Nīlkamal Gosvāmī. Appearance, fresh. Verse. Correct.

Beginning.

ॐ श्रीराधिकायै नमः ।
अथ राधास्तोत्रम् ।
शिव उवाच ।
ॐ नमस्ते परमेशानि ब्रह्मरूपधराव्यये ।
ब्रह्मविष्णुशिवादीनां प्राणेशीः परमेश्वरि ॥
राधा करोतु कुशलं दारादिषु धनादिषु ।
यस्याः पादसरोजस्य देवा भौमिमधुव्रताः ।
अभीष्टमधुधाराभिस्तृप्यन्त्येव न संशयः ॥
इन्द्रादिदिविषद्वृन्दवन्दितं पादपङ्कजं ।
यस्याः कचसमूहेन निर्जितं चामरं तथा ।
तां नमामि हरेः कान्तां स्मेराननसरोरुहाम् ॥ इत्यादि ।

End.

एतत् स्तोत्रं पठेद् यस्तु सर्व्वपापप्रणाशनं ।
तस्य मुक्तिः करगता सत्यं सत्यं वदाम्यहम् ॥
महार्णवे महारण्ये सिंहव्याघ्रभयानके ।
वारमेकं पठेद् यस्तु तस्य भीतिर्न जायते ॥
× × × × × × ।
पुत्रवृद्धिकरं स्तोत्रं धनवृद्धिकरं तथा ।
न प्रकाश्यमिदं देवि न देयं यस्य कस्यचित् ॥

Colophon. इति ऊर्द्ध्वाम्नाये महातन्त्रराजे परमरहस्ये शिवशिवासंवादे श्रीराधास्तोत्रं समाप्तं ॥

विषयः । श्रीराधायाः स्तुतिकथनं तस्य फलकथनञ्च ।

No. 252. राधिकाजन्मरहस्यम् (ब्रह्मवैवर्त्तीयम्). Substance, country-made paper, 15 × 3½ inches. Folia, 3. Lines, 7 on a page. Extent, 80 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā Raghunātha-vāṭi. Babu Cakrapāṇi Rāya. Appearance, old. Verse. Generally correct.

Beginning.

अथ कथा ।
शौनक उवाच ।
व्रतेन केन तपसा सर्व्वकामार्थसाधनं ।
गुह्याद्गुह्यतरं नाम राधिकाया व्रतं × × × ॥

सर्व्वंतन्त्रेषु मन्त्रेषु गोपनीयं महाद्भुते ।
तत् सर्व्वं श्रोतुमिच्छामि कथयस्व मयि प्रभो ॥ इत्यादि ।

End. पूजयेद्गन्धपुष्पाद्यैर्धूपदीपविधानतः ।
मिष्टान्नं क्षीर + + + नैवेद्यं विविधानि च ॥
मधुपर्कंचाचमनं वस्त्रालङ्कारभोजनैः ।
+ + + + + सर्व्वं पृथिव्यां कामचारतः ॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे श्रीराधिकाया जन्मरहस्यं सम्पूर्णं ।

ॐ गुरवे नमः ।
शाके मुनिव्योमयुगेन्दुगण्ये
पुण्ये तथा फाल्गुणपौर्णमास्यां ।
त्रैलोक्यभाग्योदयपुण्यहेतुः
प्रभुः शचीनन्दन आविरासीत् ॥

विषयः । राधाष्टमीव्रतप्रसंगे श्रीराधाया जन्मादिविवरणकथने फलकथनं ॥

No. 253. श्रीरामसहस्रनामस्तोत्रं (रुद्रयामलीयं) Substance, country-made paper, 9×4 inches. Folia, 17. Lines, 7 on a page. Extent, 225 slokas. Character, Nāgara. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Babu Vaikunṭhanāth Cakravartī. Appearance, tolerable. Verse. Generally correct.

Beginning. नमः श्रीमते रामानुजाय ।

कैलासशिखरे रम्ये नानाधातुविचित्रिते ।
नानाद्रुमसमाकीर्णे नानापक्षिगणावृते ॥
नानापुष्पलतागुल्मवेष्टिते भ्रमरावृते ।
देवदानवगन्धर्व्वकिन्नरैरुपशोभिते ॥
मन्दमारुतसंवीते पार्व्वतीपरमेश्वरौ ।
उपविश्य कथां चक्रे शश्वदेव मुदान्वितौ ॥
भक्त्या शम्भुं प्रणम्याथ पार्व्वती परिपृच्छति ॥

पार्व्वत्युवाच ।

देवदेव महेशान सर्व्वागमविशारद ।

त्वमेव शरणं नाथ त्राहि मां दुःखसागरात् ।
नाम्नां सहस्रं रामस्य शुचि मे प्रमथाधिप ॥ इत्यादि ।

End. रामेति रामचन्द्रेति रामभद्रेति वा स्मरन् ।
नरो न लिप्यते पापैर्भुक्तिं मुक्तिं च विन्दति ॥

Colophon. इति श्रीरुद्रयामले हरगौरीसंवादे श्रीरामसहस्रनामस्तोत्रं सम्पूर्णं ॥

विषयः । श्रीरामस्य सहस्रनामकथनं ॥

No. 254. रामाख्डारे नवमःप्रश्नः. Substance, country-made paper, 12×5 inches. Folia, 80. Lines, 11 on a page. Extent, 1930 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. उक्ता अविधेयाः, अथ अविधेया उक्ताः पूर्वं सौत्रामन्यपि पशुबन्धत्वात् उक्तप्रायेति अविधेया इत्यविशेषोक्तेः तेषु प्रायश्चित्तमवश्यम्भवि दैवात् कालेऽपि इत्यादि ।

End. सर्व्वेषां सत्रप्रयोग आश्रयनीय एव उपदेशस्त्वेकैकया आहुत्यैकैकस्मिन्नग्नौ पूर्ववद्धोमं कुर्यादिति दिक्षितपाठः प्रश्नपरिसमाप्त्यर्थः.

Colophon. समाप्तः प्रश्नः.

विषयः । आपस्तम्बप्रायश्चित्तसूत्रभाष्यवृत्तिः ।

No. 255. रामानुजमतखण्डनम्. Substance, country-made paper, 12×5 inches. Folia, 8. Lines, 11 on a page. Extent, 240 slokas. Character, Nāgara. Date ? Place of deposit, Bahuvallbaha Cattarji, Pātāleśvar, Benares city. Appearance, new. Prose and verse. Correct.

Beginning. जयति श्रौतधर्मार्कः स्मार्त्तधर्मादयोदयः ।
सत्पुरारिद्दश्यमानः पाषण्डध्वान्तनाशकः ॥

इदानीं बहवो मुग्धा जना रामानुजीयानां दम्भमत्याचारं चाविलोक्य तैर्विप्रलब्धाः सन्तः शास्त्रसम्मतमपि स्वकुलधर्ममपहाय तन्मार्गे प्रविशन्ति स च मार्गः श्रुतिस्मृत्यादिमूलविधुरोऽत्यन्तनीचजात्युद्भूतपुरुषप्रवर्त्तित इति तत्र प्रविष्टा वर्णाश्रमधर्माधिकारच्युता भवन्तीतीत्यादि ॥

End. तदा द्विजैः सर्व्वजगद्धितार्थं
सद्धर्मरत्नाकरपत्रमेतत्, ।
प्रकाशितं तस्य विलोकनेन
रामानुजीयाश्चकिता बभूवुः ॥
निवृत्तराधीवदनाः स्वकीयं
विहाय पाषण्डमतं निकृष्टं
स्वीकृत्य सर्व्वं द्विजभाषितं ततो
गताश्छिदण्डादय इत्यमेतत् ॥

Colophon. श्रीरामानुजीय-मत-खण्डनम् ।

विषयः । रामानुजाचार्य्य-प्रवर्त्तितमतखण्डनम् ।

No. 256. रुद्रपद्धतिः. By विश्वनाथ देव. Substance, country-made paper, 12×5 inches. Folia, 25. Lines, 11 on a page. Extent, 550 ślokas. Character-Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीमहागणपतये नमः ।
जयति जगति रामो जानकीजानिरेको
दशरथकुलदीपः सच्चिदानन्दरूपः
दशमुखमुखशत्रूच्छेदविच्छेददक्षो
भृगुकुलतिलको × × ख्यानचानिप्रवीनः ।

End. अनन्तरं यजमानेन इ + × × यद्रा × × × ति मन्त्रेण देवदक्षिणहस्ते जपनिवेदनं ततः पीठदेवताविसर्जनादिकं कुर्य्यात् ।

Colophon. इति श्रीमन्माध्यन्दिनीयशम्भुदेवतनयरामदेवानुजविश्वनाथदेवविरचितायां रुद्रपद्धतौ जापकृत्यं रुद्रविधानाख्यं द्वितीयप्रकरणं समाप्तम् ।

विषयः । रुद्रानुष्ठानम् ।

No. 257. रुद्राक्षफलं. Substance, country-made paper, 11×3 inches. Folia, 3. Lines, 5 on a page. Extent, 30 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, old. Verse. Generally correct.

Beginning. ॐ परमदेवतायै नमः ।

ईश्वर उवाच ।

रुद्राक्षस्य फलं वक्ष्ये त्रिषु लोकेषु विश्रुतं ।
लक्षं सन्दर्शनात् पुण्यं स्पर्शनात् कोटिरुच्यते ॥
दशकोटिसमं पुण्यं धारणाल्लभते नरः ।
दशकोटिसहस्राणि दशकोटिशतानि च ॥
जपित्वा तु लभेत् पुण्यं नात्र कार्य्या विचारणा ॥
हस्ते बाह्वौ तथा कण्ठे मूर्द्ध्नि रुद्राक्षधारणात् ।
अवध्यः सर्व्वभूतानां रुद्रवद् विचरेद् भुवि ॥
देवासुराणां सर्व्वेषां वन्दनीयो यथा शिवः ।
उच्छिष्टो वा विकर्म्मस्थो युक्तो वा सर्व्वपातकैः ॥
मुच्यते सर्व्वपापेभ्यो रुद्राक्षधारणान्नरः ॥
रुद्राक्षकण्ठमाश्रित्य श्वापि वा म्रियते यदि ।
सोऽयं रुद्रत्वमाप्नोति किं पुनर्मानवादयः ॥ इत्यादि ।

End. अतःपरं सुखाधिक्यं रुद्राक्षं लभते यदि ।
फलमेतद्भृशं देवि लभते नात्र संशयः ॥
विना मन्त्रेण यो धत्ते रुद्राक्षं भुवि मानवः ।
स याति × × × × ×
अतः परं खण्डितं) ॥

Colophon. — — — — —

विषयः । रुद्राक्षधारणेन फलादि कथनम् ।

No. 258. लक्षणमञ्जरी. By गङ्गेश. Substance, country-made paper, 14×3 inches. Folia, 4. Lines, 6 on a page. Extent, 95 ślokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Babu Girishchandra Cakravarti. Appearance, tolerable. Prose. Correct.

Beginning. ॐ नमो गणेशाय ॥

नत्वा गुरुपदाम्भोजं परं ब्रह्मस्वरूपकं ।
क्रियते लक्षणमञ्जरी गङ्गेशेन च धीमता ॥

नियन्त्रितविषयाद्वशेषत्वं पारिशेष्यत्वं । क्रियारम्भकत्वादिविशिष्टपरम-
कालपर्य्यन्तव्यापकाव्याप्यत्वं वर्त्तमानत्वं ॥

End. पदार्थानां साधने शक्तिर्योग्यता । एकपदार्थाविलम्बितोच्चारितत्वं सन्निधि-
मत्वं । बाधविरहश्च योग्यता । समाप्तश्चायं ग्रन्थः ॥ * ॥

Colophon. — — — — — —

विषयः । समवायादिसम्बन्धनिरूपणं । धातुविभक्त्यादिकथनं । करणाधिकरणादिकथनं ॥
आकाङ्क्षायोग्यतादिनिरूपणं ॥

No. 259. लक्षणातत्वं. By गङ्गेश . Substance, country-made paper, 15 × 3 inches. Folia, 3. Lines, 6 on a page. Extent, 60 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally incorrect.

Beginning. ॐ नमोगणेशाय । ॐ सरस्वत्यै नमः ।
नत्वा गुरुपदद्वन्द्वं परं ब्रह्मस्वरूपकं ।
क्रियते लक्षणातत्वं गङ्गेशेन सुधीमता ॥

No. 260. लक्षहोमकारिका . By नारायणभट्ट. Substance, country-made paper, 8 × 3 inches. Folia 2. Lines, 11 on a page. Extent, 34 ślokas. Character, Nāgara. Date Ṣaṃvat 1783. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ लक्षहोम कारिका
वैश्वसंगं पुरा × × × इत्वाचार्य्यसद्विजः ।
कुम्भोर × सचार्य्यत्विक् भद्रं मन्त्रं प्र × × द्विशेत् ॥

Colophon. सर्व्वकर्मसमाप्तिं च विप्राशीर्वचनानि च,
अयुतात् ये प्रश्नमखे षड्डादौ वासमण्डपे ॥
संकेतश्चारड्डाख्येण भट्टनारायणेन च ॥

End. इति खरडोपनामकनारायणभट्टकृतः संक्षेपतो प्रश्नयागः समाप्तः संवत् १७८३ .

विषयः । प्रश्नयागविधिकथनम् .

No. 261. लघुसंक्षेपशारीरककुतूहलम् . By महादेव . Substance, country-made paper, 12×4 inches. Folia, 23. Lines, 9 on a page. Extent, 460 ślokas Character, Nāgara. Date Saṃvat 1766. Place of deposit, Benares City, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Verse. Incorrect.

Beginning. इत्थं समन्वयश्रोक्त्या वाक्यतो ब्रह्मगोचरः ।
जातोपि बोधमानेन भेदकेन निपीड्यते ॥
मज्जत्यहाव्धमु शिलासरन्तीत्यादि वाक्यतः ।
जाताबुद्धिर्यथा बाध्याऽद्वैतबुद्धिस्तथात्मनि ॥
प्रत्यक्षो मम संसारो वाक्यमात्र विमुक्तता ।
एवं वाक्यापरिज्ञाने दुर्निवाराह्यबाधता ॥
मम कर्तृत्वभोक्तृत्वे चात्र कर्मविधिर्महान् ।
वेदान्तानिर्विशेषत्वमाकः सत्प्रतिपक्षवत् ॥

End. धनेन बन्धुभि दारैः किन्ते यत्नं करिष्यसि ।
गुहां प्रविष्टमात्मानं विजानीहि ह्यतःपुरा ॥
धनमूलं दमो दण्डं धर्ममूलं ह्यलक्षमे ।
काममूलं वयोरूपं मोक्षमूलमुपारमः ॥

Colophon. वेदान्तिनामहादेवशर्मणा निर्मितेऽद्भूते,
तृतीयलघुसंक्षेपशारीरककुतूहले ॥
संवत् १७६६ पौष शुक्लपक्षे ।

विषयः । ब्रह्मविद्योदयकथनं ।

No. 262. "लघुसंग्रहणीटीका" . Substance, country-made paper, 13×5 inches. Folia, 5. Lines, 11 on a page. Extent, 175 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍālācāryya Mahārāja Bālacandrasūri. Appearance, old. Prose. Correct.

Beginning. सकलवाचकोपाध्यायेभ्यो नमः ।
प्रणम्य परयाभक्त्या जिनेन्द्रचरणाम्बुजं ।
लघुसंग्रहणीटीकां करिष्येऽहं सुदाम्बरं ॥ इत्यादि ।

End. तिस्रो दृष्टयः प्राप्त × × ते कोर्थः षोड़शदण्डकेषु तिस्रो दृष्टयो भवन्तीत्यर्थः । इत्यमं दृष्टिद्वारं व्याख्यातवत्समुच्चयार्थः ॥ (इतो नास्ति.)

Colophon. — — — — — —

विषयः । जैनसिद्धान्तसारलघुसंग्रहणीव्याख्या ।

No. 263. लोकनालद्वात्रिंशिका. Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 12 on a page. Extent, 60 çlokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalacāryya Mahārāja Bālacandrasūri. Appearance, old. Verse. Correct.

Beginning. जिनं दंसनं विनाजं लोयं पुरंतु जम्म मरणे खिं ।
उकत जिणोनन्तभवे तस्स सरूवं किमवि वुच्छं ॥

End. इययरिक्खिय वग्गिय सं वड्डिया
लोगसार सुबलभ्य सूयधम्म किज्जिय
नच जयच जहा उसहप इच डिसं ॥

Colophon. इति लोकनाल द्वात्रिंशिका ।

विषयः । जैनमते चतुर्दशलोकानां वर्णनम् ।

No. 264. लोकनालिकावचूर्णिः. Substance, country-made paper, 12 × 4½ inches. Folia, 7. Lines, 13 on a page. Extent, 160 ślokas. Character, Nāgara. Date Saṃvat 1651. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandrasūri. Appearance, old. Prose. Correct.

Beginning. श्रीगुरुभ्योनमः ।
श्रीजिन सम्यक् प्राप्तभावदर्शनं विना जी × × यं चतुर्दशरज्ज्वात्मक-लोकं पूरयन् षड्विधपुद्गलपरावर्त्तं व्यति की × × तस्य लोकस्य स्वरूपं किमपि ब्रुवे ।

End. इह षट्पञ्चाशत्संज्ञितपैः प्रदरे लिखितः स च व × × तच वर्गीकृतः स × × तच बुध्या सर्व्वतः समचतुरस्रीकृतः। स च लोकस्य तस्य सारस्वरूपं उपलभ्य ज्ञात्वा तथा यतत इह न भ्रमन्ति इत्यर्थः।

Colophon. इति लोकनालिद्वात्रिंशत्यचूर्णिः.

विषयः। लोकनालिकाव्याख्या।

No. 265. वाञ्छाकल्पलतामनुविधानम्. Substance, country-made paper, 12× 6 ½ inches. Folia, 2. Lines, 16 on a page. Extent, 52 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. पार्वत्युवाच।

भगवन् सर्व्वमन्त्राश्च भवता मे प्रकीर्त्तिताः।
तच विद्या गणेशस्य वाञ्छाकल्पलता मनुः॥ १॥
सूचितः कृपया देव संगुप्तो न प्रकाशितः।
इदानीं श्रोतुमिच्छामि सर्व्वलोकहिताय वै॥ २॥

End. असाध्यं साधयेल्लोके अवशं वशमानयेत्।
किमच बहुनोक्तेन सर्व्वान् कामानवाप्नुयात्॥

Colophon. इति कुमारसंहितायां वाञ्छाकल्पलतामनुविधानं दशमः पटलः।

विषयः। गणेशार्चनविधानं.

No. 266. वाञ्छाकल्पलताविधिः. Substance, country-made paper, 10×5 inches. Folia, 5. Lines, 12 on a page. Extent, 125 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, new. Prose. Correct.

Beginning. अस्य श्रीविद्यागणपतिमहामन्त्रस्य दक्षिणामूर्त्तिर्ऋषिरनुष्टुप् छन्दः श्रीमहाविद्यागणपतिर्देवता ऐं बीजं क्लींशक्तिः सौ कीलकं मम चतुर्विधपुरुषार्थसिद्ध्यर्थं वाञ्छाकल्पलतायाः पूर्व्वं षोडशाष्टत्रिमूलमन्त्रजपे विनियोगः।

End. आथर्वणचये लक्ष्मीः पञ्चाशत्तो जगद्गुरं ।
दशाशत्तो शिवादीनां देवानां शक्तिभाग्भवेत् ॥
लक्षाशत्तो सार्व्वभौमो दरिद्रोऽपि भवेन्नरः ।
नार्थवादोऽथर्वैवाच वशिष्ठस्य वचो यथा ॥

Colophon. इत्याथर्वणरहस्ये वाञ्छाकल्पलतानिविधिश्चतुर्थः पर्य्यायः ॥

विषयः । महाविद्यागणपतेः पूजादिविधानं .

No. 267. वास्तुप्रदीप. Substance, country-made paper, 9 × 4½ inches. Folia, 21. Lines, 9 on a page. Extent, 400 slokas. Character, Nāgara. Date Saṃvat 1572. Place of deposit, Calcutta, Visvakoṣa office, Babu Nagendranāth Vasu. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

विद्वच्छाब्दिकसङ्गतोक्तिरचनैर्यद्वास्तुविद्यावता
मानन्दाभिगमो भवेन्मुनिमतः सज्ज्योतिषद्योतितः ।
तत् सम्प्रत्यपि वासुदेवसुधिया वास्तु प्रदीपाभिधो
ज्योतिर्वेदविदां विधीयत इति प्रत्यक्षदृग्बुद्धये ॥

End. सौम्येऽर्थलाभः शिवगेऽर्थसिद्धि
र्गमि पुंन र्गमितस्तथैव ।
ग्रामेऽथवा यत्र पतङ्गस्तनुः
पीडाकरोदद्विरशाद् द्वयोस्तु ॥
यत्रानिष्टफलः सौरिस्तत्र पूज्यः प्रयत्नतः ।
चेत्रभात् चेत × × देशभात् देशकर्मकं ॥
कराङ्गिघवैः १५७१ प्रमिते शकाब्दे लिखे सिते चन्द्रदिने दशम्यां
वास्तुप्रदीपो रचितः स्वबुद्ध्या श्रीवासुदेवेन मगद्विजेन ॥ १० ॥

Colophon. इति श्रीवासुदेवपण्डितविरचितो वास्तुप्रदीपः समाप्तिमगमत् ॥

विषयः । गृहादिनिर्म्माणविधिकथनं तथा गृहद्वारादीनां फलकथनं ॥

No. 268. वास्तुशान्तिपद्धतिः. Substance, country-made paper, 8 × 3 inches. Folia, 30. Lines, 10 on a page. Extent, 600 slokas. Character, Nāgara. Date Saṃvat 1834. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ वास्तुपद्धतिः ।

नत्वा गुरुं गणपतिं वास्तुपशमपद्धतिः ।

नानानिबन्धानालोक्य यथामतिरिहोच्यते ॥

तत्रादौ वास्तुफलं मात्स्ये ॥

End. व्रतकाये मांसवर्षिरोपि × × × × × × × × × अत्र निषिद्धग्रामसूकरादिमांसव्यतिरिक्तानि मांसानि ग्राह्याणि, तथाभलाभे पिष्टाद्य माषभक्तम् ।

Colophon. इति ऋषियादीनां पौराणवास्तुशान्तिप्रयोगः । संवत् १८३४ ।

विषयः । वास्तूनां शान्तिप्रयोगकथनम् ॥

No. 269. विधिरसायनम्. Substance, country-made paper, 12 × 5 inches. Folia, 30. Lines, 11 on a page. Extent, 720 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa, Appearance, old. Prose. Correct.

Beginning. उद्घाट्य योगकलया हृदयाब्जकोषं

धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।

यः प्रस्फुरत्यविरतं परिपूर्णरूपः

स मे समादिशतु शाश्वतिकं मुकुन्दः ॥

जन्मस्थे सलयं समस्तजगतां यस्यैव लीलायितं

यस्मिन्नापतवे भवस्थिरमहापाशव्ययः प्राणिनां,

तद्ब्रह्मादिभिरप्यगम्यविभवं विश्वाधिकं शाश्वतं

धाम्नं ब्रह्मरसात्ममूलरसिकं पश्येयमन्तर्दृशां ।

यत् कुमारिलमतानुसारिणा निर्मितं विधिरसायनं मया,

यद्यद्रूपमनतिस्फुटाशयं तत् सुखावगतये विविच्यते ।

End. इति लभ्यते, तदेतत् सर्व्वं दशमे ऐन्द्रवायव × × × प्रवचनादादितः (इतो नास्ति) ।

Colophon. × × × × × × ।

विषयः । कुमारिलभट्टमतानुसारतो मीमांसादर्शनव्याख्या ।

(असम्पूर्णोऽयं ग्रन्थः)

No. 271. विल्वोपनिषत्. Substance, country-made paper, 12 × 5 inches. Folia, 2. Lines, 11 on a page. Extent, 40 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. ओम् अथ वामदेवः परमेश्वरं सृष्टिस्थितिलयकारणमुमासहितं स्वशिरसा प्रणम्यैनमुवाच । अधीहि भगवन् सर्व्वविद्यां सर्व्वरहस्यवरिष्ठां सदा सद्भिः पूज्यमानां निगूढ़ां ।

End. ओम् सह नाववतु, सह नौ भुनक्तु । सह वीर्य्यं करवावहै तेजस्विनावधीत-मस्तु मा विद्विषावहै । ओम् शान्तिः शान्तिः शान्तिः ।

Colophon. इति विल्वोपनिषत् समाप्ता ।

विषयः । विल्वेन शिवार्चनविधिकथनं ।

No. 272. विवाह्यवादार्थः । Substance, country-made paper, 12 × 3 inches. Folia, 3. Lines, 7 on a page. Extent, 84 slokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

Beginning. अथ विवाह्यवादार्थः । चरमसंस्कारानुकूलव्यापारो विवाहः । अत्र चरमत्वं स्वावच्छेदकशरीरावच्छिन्नस्वाधिकरणवृत्तिसंस्कारप्रागभावसमानकालीनत्वं तेन न नामकरणादावतिव्याप्तिः । अत एवान्यदीयसंस्कारमादायासम्भववारणाय स्वाधिकरणवृत्त्यन्तं । अवच्छिन्नान्तनिवेशाच्च जन्मान्तरीयसंस्कारमादाय नाव्याप्तिः । इत्यादि ।

End. स्वरूपसता विवाह्यजन्यतारूपविशेषणघटितेन विवाह्यजन्यतावच्छेदकी-भूतसंस्कारनिष्ठविलक्षणधर्म्मेण विशेषणत्वेन स्वीकारव्यावर्त्तकत्वेनेत्यर्थः । शाखान्तरत्यागानन्तरं तादृशग्रहणमेव विवाह इति चेन्न तादृशज्ञानासमर्थ-बालकादेर्विवाहेऽव्याप्तिरिति ।

Colophon. इति विवाक्यवादार्थः समाप्तः ।

विषयः । विवाक्यस्य तात्पर्य्यग्राहकवचनपुरःसरं सम्यगर्थप्रकाशनं ।

No. 273. विष्णुतत्वनिर्णयटीकाविवरणम् ॥ Substance, country-made paper, 10×3 inches. Folia, 85. Lines, 11 on a page. Extent, 2,000 slokas. Character, Nāgara. Date ? Place of deposit, Tikāri Fort, Paṇḍit Śāstrī. Appearance, very old. Prose. Incorrect.

Beginning. श्रीवेदव्यासाय नमः ॥

यो ह्येतत् सकलं जगत् प्रकृतिमुपादाय रजसा ।
सृजति तदनुप्रविश्य सकलं सत्वेन संरचति ॥
यो ह्येदं सकलं गुणेन तमसा संहर्तुमुद्योतते ।
तं क्रीड़ादिगुणं परं प्रियतमं वन्दे श्रियासंयुतं ॥
सज्जनाभीष्टमज्ञानविनाशायाकरोद्बुधः ।
भाष्येदं तमहं मध्वाचार्य्यं वन्दे गुरुं परं ॥

श्रीमज्जयतीर्थपूज्यचरणो ग्रन्थादौ मङ्गलमाचरति विश्वस्येति ॥ श्रियं रमावल्लभं वन्द इत्यर्थः ग्रन्थारम्भे व्याख्यापारम्भापेक्षितत्वात् तस्य वन्दनस्यावश्यकर्तव्यत्वात् पार्थक्येन वन्दने व्यातन्त्र्यप्रतीतिः स्यात् तदर्थं रमावल्लभमित्युक्तं ।

End. अतएव रजतत्वविशिष्टस्य रजतस्य शुक्तावारोप इति रजतत्वं तत्र मुख्यं तत्वौपचारिकमिति प्रसिद्धमितिभावः । प्रादुर्भावस्योत्पत्तिशब्दार्थत्वं गौणात्वस्येत्याह प्रादुर्भाव इति ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचितस्य विष्णुतत्वनिर्णयस्य टीकायाविवरणं द्वितीयः परिच्छेदः ॥

विषयः । आनन्दतीर्थकृतविष्णुतत्वनिर्णयस्य टीकाया व्याख्यानं ।

No. 274. विष्णुतत्वप्रकाशः Substance, country-made paper, 12×5 inches. Folia, 85. Lines, 11 on a page. Extent, 2,800 slokas. Character, Nāgara. Date ? Place of deposit, Tikāri Fort, Paṇḍit Vāmācāri Śastrī. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीकृष्णाय नमः ॥

श्रीर्यत्पादयुगे यदङ्घ्रिकमलं संधातुकामा सदा
यस्याज्ञां शिरसा वहन्ति विबुधा ब्रह्मेशशक्रादयः
योगीशा मनसार्चयन्ति यमजं संशोधितेनानिशं
गोप्यावद्ध उलूखले तिवशोऽव्यक्तोमुकुन्दोद्धि सः ।
श्रीव्यासं भारतं वन्दे मयि मद्‌नदीक्षितं ।
जयाख्यं तान्त्रिकाचार्य्यं तथान्यान् सात्वतां वरान् ॥
पादाब्जं श्रीगुरोर्नत्वा आश्वयं वनमालिना ।
विष्णुतत्वप्रकाशोऽयं प्रीतये कमलापतेः ॥
इह निखिल श्रुतिस्मृतीतिहासपुराणानि तात्पर्य्यनिर्णायकोपक्रमादि-लिङ्गोपेतानि सपरिवाराचापुनर्भवमिच्छतां पुंसां ध्येयं ज्ञेयं रमापतिमेक-मत्येनामनन्ति । इत्यादि ॥

End. वर्षे वर्षे महादेवि परानारी पतिव्रता शिवरात्रौ महादेवं नित्यं भक्त्या प्रपूजयेदिति वीप्साश्रुतेर्नेदं व्रतं नित्यमिति चेन्न अत्रहि शिवरात्रौ शिव पूजैवोक्ता न तु व्रतमित्यनित्यमेव व्रतमिति ॥ * ।
प्रकाशे विष्णुतत्वस्य रचिते वनमालिना ।
परिच्छेदो द्वितीयोऽयं समाप्तश्चाच्युतेच्छया ॥ * ॥
श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग् दिशि
क्रोशानां त्रितये पुरे द्विजवरा उवैर्भरद्वाजजाः
श्रीमन्नारसुतो वसन्ति सुकुले तेषां प्रसूतेन वै
पूर्वैः श्रीवनमालिना विरचितो विष्णुप्रकाशोमुदा ॥
× × × × × ×
क्रियात्सुवैभवं वाचामघराशेश्च शोषणं ॥

Colophon. — — — — —

विषयः । १ परिच्छेदे श्रुतिस्मृतीतिहासपुराणवचनादिभिः शिवादितो विष्णोर्भेदकथनेन तन्माहात्म्यादिकथनं ॥ २ परिच्छेदे सर्व्वदेवेषु विष्णोराराधनीयत्वकथनेन पञ्चरात्रविधानादि-कथनं ॥ विप्राणां त्रिपुण्ड्रधारणे दोषकथनं ॥ एकादशीश्राद्धे दोषकथनं ॥ शिवरात्रिव्रता-नित्यत्वकथनेन तस्मिन् वैष्णवानामनधिकारकथनं ॥

No. 275. विष्णुतत्त्वविनिर्णयः. Substance, country-made paper, 10 × 4½ inches. Folia, 26. Lines, 9 on a page. Extent, 400 ślokas. Character, Nāgara. Date ? Place of deposit, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीवेदव्यासाय नमः ।

सदा गणैकविज्ञेयं समतीतक्षराक्षरं ।
नारायणं सदावन्दे निर्दोषाशेषसद्गुणम् ॥
विशेषणानि यानीष कथितानि सदुक्तिभिः ।
साधयिष्यामि तान्येव क्रमात् सज्जनसंविदे ॥

End. अनन्तायाखिलेशाय निर्दोषगुणरूपिणे ।
प्रेयसे मे सुपूर्णाय नमो नारायणाय ते ॥

Colophon. इति श्रीमदानन्दतीर्थभगवत्पादाचार्य्यविरचिते श्रीमद्विष्णुतत्त्वविनिर्णये तृतीयः परिच्छेदः समाप्तः ।

विषयः । माध्वमते विष्णोर्यथार्थनिर्णयकथनम् ॥

No. 276. विष्णुसहस्रनाम (कुलानन्दसंहितीयं) । Substance, country-made paper, 15 × 3½ inches. Folia, 6. Lines, 9 on a page. Extent, 200 ślokas. Character, Bengali. Date S.K. 1778. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāran S'iromaṇi. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमो भगवते वासुदेवाय । श्रीदेव्युवाच ।

भगवन् सर्व्वतन्त्राणि भवता मे प्रकाशिताः ।
चतुःषष्टिश्च तन्त्राणि मातृणामुत्तमानि च ॥
कङ्कालं कालसारं तथान्यत् कुलिकामतं ।
भामान्तरञ्च वीणाख्यं तोमलं तोमलोत्तरं ॥
... ... ।
भवतोक्तानि मे देव सर्व्वज्ञानमयानि च ॥
विष्णोर्नामसहस्रञ्च मया दृष्टं मुहुर्मुहुः ।
न कथ्यते कथं देव जगन्मोक्षप्रदायकं ॥ इत्यादि ।

End. इतीदं कथितं देवि विष्णोर्नामसहस्रकं ।

अहं सदाशिव श्रीमो यतः सर्व्वप्रवर्त्तको ॥

× × × × × ×

नामैव विद्यां मनसि कृत्वा शङ्करमागता ।
सर्व्वं हृत्तमशेषेण शङ्कराय न्यवेदयत् ॥
तच्छ्रुत्वा परमप्रीतो देवो देवीञ्च सस्नजे ।
रहस्यंकथितं सर्व्वं भैरवि प्रायमक्षमे ॥

Colophon. इति कुलानन्दसंहितायां चत्वारिंशत्‌साहस्र्यां भैरवभैरवीसंवादे महाप्रकृतिनिवर्क्तं श्रीविष्णोर्नामसहस्रं समाप्तं ॥ ॐ तत्सत् । लिपिरियं श्रीरामतारणशर्म्मणः । वीरभूमौ चित्तद्विपासे त्वरया यत्नेन लिखितमिदं । शकाब्दाः १०७८ श्रावणस्य ११ दिवसे ।

विषयः । श्रीविष्णोः सहस्रनाम कथनं ।

No. 277. विष्णुसहस्रनामभाष्यं। Substance, country-made paper, 16×3 inches. Folia, 50. Line, 8 on a page. Extent, 1,200 slokas, Character, Bengali. Date S.K. 1778. Place of deposit, Zilla Midnapur. Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāraṇ S'iromaṇi. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमः श्रीकृष्णाय ।

सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।
नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे ॥
कृष्णद्वैपायनं व्यासं सर्व्वलोकहितेरतं ॥
वेदान्तभास्करं वन्दे समाधिनिलयं मुनिं ॥

सहस्रमूर्त्तेः पुरुषोत्तमस्य
सहस्रनेत्राननपादबाहोः ।
सहस्रनामस्तवनं प्रशस्तं
निरुच्यते जन्मजरादिशान्त्यै ॥

श्रीवैशम्पायनो जनमेजयमुवाच । श्रुत्वाधर्म्मानित्यादि ॥ इत्यादि ।

End. इमं स्तवमित्यादिना सहस्रशाखाश्रेन भगवता कृष्णद्वैपायनेन साक्षान्नारायणेन कृतमिति सर्व्वैरर्षिभिः सादरं पठितव्यं सर्व्वफलसिद्धये इति दर्शयति ।

प्रमादात् कुर्व्वतां कर्म्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद्विष्णोः सम्पूर्णः स्यादिति स्मृतिः ॥
आदरेण यथा स्तौति धनवन्तं धनेच्छया ।
तथाचेद्विश्वकर्त्तारं को न मुच्येत बन्धनादिति ॥
सहस्रनामसम्बन्धिव्याख्या सर्व्वसुखावहा ।
श्रुतिस्मृतिन्यायमूला रचिता हरिपादयोः ॥
चक्रायुधस्य नामानि सदा सर्व्वत्र कीर्त्तयेत् ।
नाशौचं कीर्त्तने तस्य स पवित्रकरो यतः ॥
सहस्रनामव्याख्येयं ब्रह्मज्ञानप्रदीपिका ।
शङ्कराचार्य्यभगवत् पादाचार्य्येण निर्म्मिता ॥

Colophon. इति श्रीगोविन्दभगवत्पूज्यपादशिष्यश्रीशङ्करभगवत्कृतौ श्रीविष्णोः सहस्रनामभाष्यं सम्पूर्णं । शुभमस्तु शकाब्दाः १७१८ ।

विषय । श्रीविष्णोः सहस्रनामव्याख्यानं ।

No. 278. बीजवर्णाभिधानटीका. BY गौरमोहनभट्टः. Substance, country-made paper, 14×4 inches. Folia, 4. Lines, 9 on a page. Extent, 110 ślokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Medrā, Babu Pārvati Caraṇa Bhaṭṭāchāryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमः परदेवतायै ।

आदौ प्रथमतः बीजवर्णानां बीजानिच वर्णाश्च ते × × × × × × × × स्फुटं व्यक्तं यथा स्यात् तथा उच्यते कथ्यते तत्र × × × ग्रन्थं प्रवर्त्तयेत् प्रवर्त्तयतीत्यर्थः तु अन्तो यस्य स लन्तः अथ आदौ यस्य सोऽयादिः लन्तोऽयादिश्च न पूर्व्वभाक् पूर्व्वं न भजतीत्यर्थः । प्रतिज्ञावचनानन्तरं सामान्याचरनामाद्यष्टवर्ग-लचणमाह वर्णोऽचरमित्यादि वर्णाद्यान्तचतुष्कं सामान्याचरे स्वरादि-द्वयं स्वराचरे ककारादिमकारपर्य्यन्तं पञ्च पञ्च भूत्वा वर्गाः स्युः परं यादिवान्तचतुष्कं शादिहान्तचतुष्कञ्च क्रमेण वर्गद्वयं स्यात् । इत्यादि ।

End. मायाया बीजत्वेन कामबीजं वा कामादीनां वर्णतया तत् साम्यपर्य्यात् मायाया तृतीयस्वरत्वपाठाच्च परन्तु गुरूपदेशवचनान्तरैकवाक्यत्वेन

तात्पर्य्यमवगत्य यथयर्णत्वं अन्यथा "लक्ष्मीः परा × × × योनि-
गुता च शक्ति"रितिषोडश्याः परापदेन वा न परावीजं मायावीजं वा
ग्राह्यं इत्यत्र न नियामकः स्यात् ।

Colophon. इत्युपेन्द्रभट्टवंशीयश्रीगौरमोहनभट्टरचिता वीजवर्णाभिधानटीका समाप्ता ।

विषयः । वीजवर्णाभिधानस्य व्याख्यानं ।

No. 279. वीरमाहेन्द्रकाण्डं. Substance, country-made paper, 14×5 inches. Folia, 10. Lines, 10 on a page. Extent, 370 slokas. Character, Bengali. Date ? Place of deposit, Dinājpura Rāj Vāṭī. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ॥
अथ वाचं निशम्यायं स्कन्दस्यां गुरुणोदितां ।
मौच्छ्येनं कथयादश्या तिष्ठेत्याह तदा द्विजाः ॥

End. गत्वा तु मधुना तात जित्वा सर्व्वानिमान् क्षणात् ।
बद्धा तं सत्वरैनाभिः प्रापयिष्यामि ते ऽन्तिकं ॥
निशम्यैवं वचःप्रोक्तं सुपुत्रेण महासुरः ।
सन्तुष्टो विससर्ज्जैनं वनायासुरनायकः ॥ * ॥

Colophon. इति श्रीस्कन्दपुराणे शङ्करसंहितायां शिवरहस्यखण्डे वीरमाहेन्द्रकाण्डे सप्तमोऽध्यायः ॥ * ॥ वीरमहेन्द्रकाण्डं समाप्तं ॥

विषयः । असुरादीनां वीरत्वप्रकटनं ।

No. 280. वृत्तरत्नावली. By चिरंजीव. Substance, country-made paper, 13×4½ inches. Folia, 11. Lines, 8 on a page. Extent, 187 slokas. Character, Nāgara. Date Śaka 1653. Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. तमोगुणविनाशिनी सकलकामसूद्योतनी ।
धरातलविहारिणी जडसमाजविद्वेषिणी ॥
कलानिधिसहायिनी लसदलोलसौदामिनी ।
मदन्तरवलम्बिनी भवतु कापि कादम्बिनी ॥ १ ॥

श्रीगोवर्द्धनभूपनन्दन तव प्रोद्दाम वीरस्फुरत्
संग्रामे यशवन्तसिंहमहिमारम्भातिसंभावनां ॥
सद्यश्छिन्नकबन्धकन्धरगलद्धाराभरामोदिता ।
साचष्टी सहयोगिनीभिरभितः सम्वर्द्धयत्याशिषा ॥ १ ॥

End. द्वैताद्वैतमतादिभिन्नेयविधिप्रोद्बुद्धबुद्धिः सुतो ।
भट्टाचार्य्यशतावधान इति यो गौड़ोत्भवोभूत् कविः ॥
नानाशास्त्रविदात्मजेन सुचिरंजीवेन दत्ता मुदे ।
गौडश्रीयशवन्तसिंहन्नृपतेः श्रीवृत्तरत्नावली ॥

Colophon. इति श्रीचिरंजीवेन शतावधानभट्टाचार्य्यात्मजेन विरचिता वृत्तरत्नावली समाप्तिमिता । शकाब्दाः १६५१ .

विषयः । छन्दोग्रन्थः .

No. 281. वृद्धिश्राद्धपद्धति. By अनन्तदेव. Substance, country-made paper, 12×5 inches. Folia, 61. Lines, 10 on a page. Extent, 1220 slokas. Character, Nāgara. Date Saṃvat 1764. Place of deposit, Bibihāṭí, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीमन्महागणपतये नमः ।

नत्वा श्रीगुरुपादाब्जं वृद्धिश्राद्धस्य पद्धतिं ।
उद्धवस्य तनुजोऽहं करोमि शिष्टसम्मतां ॥
विविधः + + + संप्रदायमतं तथा ।
माध्यन्दिनीयविधिना शोधयन्तु धिया बुधाः ॥

End. श्रीशम्भोश्चरणद्वन्द्वमाधाय हृदयाम्बुजे
श्रीउद्धवतनूजेन विश्वेशपुरवासिना ।
रचितोऽनन्तदेवेन वृद्धिश्राद्धविनिर्णयः
गुरवः + + तुष्यन्तु विद्वांसश्च तथा मयि ॥

Colophon. इति श्रीमद्द्विवेद्युद्धवात्मजानन्तदेवकृतं आभ्युदयिकनिरूपणं समाप्तिमगमत् . संवत् १७६४ . आषाढ़शुक्लाष्टम्याम् ।

विषयः । वृद्धिश्राद्धविध्यादिकथनम् ।

No. 282. वृन्दावनकाव्यटीका. By रामनारायण. Substance, country-made paper, 13×3½ inches. Folia, 10. Lines, 9 on a page. Extent, 250 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Rāmhṛdaya Bhaṭṭācāryya. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीदुर्गायै नमः ।

नत्वा नन्दव्रजानन्दपरं गोपालरूपिणं ।
परमानन्दसन्दोहकरं गोपधरं हरिं ॥
यमकश्लेषचित्रार्थपताकाश्चान्द्रशेखरिः । (?)
रामनारायणः श्रीमान् जयेत् यट्टीकयाकरोत् ।
वृन्दावनाख्यकाव्यार्थं स्फुटं मानाङ्कभाषितं ॥
रामनारायणो याच्ञो बुधैर्न दोषचिन्तया ।
नहि सर्व्वार्थवित् कश्चित् जायते मानुषोभुवि ॥

मानाङ्कनामा कविः श्रीकृष्णस्य वृन्दावनलीलां विविधयमकश्लेषवर्णनेन प्रकाशयन् वृन्दावनाख्यकाव्यनामतया निदर्शनीकृत्य काव्यविघ्नविनाशनरूपतया तन्मुखवन्धतयाच प्रथमं कृष्णरतिरूपमङ्गलमाह । वरदायेति । इत्यादि ।

End. स प्रसिद्धो हली बलरामः तं प्रसिद्धं पीतवाससं श्रीकृष्णं इति वचनमाह कथितवान् कुर्वेत्याह पद्मसतां गोपानां × × × × रटद्दे हली कीदृक् आयतनैवः दीर्घचक्षुः तं कीदृशं कंसासुरादनुद्विग्नं चशङ्कितमिति यावत् पुनः कीदृक् किं कुर्व्वन् या हसितानां विमलतया दशनेर्न्दर्न्तैर्जाजानां (यद्) इति प्रसिद्धानां कायां कान्तिं किरन्निव क्षिपन्निव कीदृशानां सद्लीलाजानां लीलया सद्जातानां ॥

Colophon. बाणपक्षरसचन्द्रमितिते
कृष्णचन्द्रपरचान्द्रशेखरिः ।
कल्पासु तर्केन्दुमिते शकाब्दे
श्रीरामनारायण देवशर्म्मा ॥
टीकां समुद्रयय्य करोति यत्ने-
राषाढमासस्य मुदा समर्पा ।
श्रीरामनारायण देवशर्म्मा
काव्यार्थमालोक्य करोति यत्नं ॥

नचात्र दोषः कविभिर्विमृग्यः ।
सन्तःसतां जीवनमाङ्ग × × ॥ श्रीदुर्गा ॥

विषयः । मालाङ्कृतश्रीकृष्णलीलामयवृन्दावनकाव्यस्य व्याख्यानं ॥

No. 283. वेदस्तुतिभावार्थदीपिकादीपनं By राधारमणदास. Substance, country-made paper, 11 × 5½ inches. Folia, 19. Lines, 13 on a page. Extent, 700 slokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Paṇḍit Krisṇadāsa Smṛtibhūṣaṇa. Appearance, new. Prose. Correct.

Beginning. श्रीकृष्णचैतन्यचन्द्राय नमः ।
श्रीचैतन्यं नृसिंहं मुरारिं
विद्वद्वर्य्यं श्रीधरं भक्तमुख्यं ।
मिश्रं चन्द्रं गोकुलोपाधिकञ्च
नत्वा कुर्व्वे व्याकृतिं व्याकृतेस्तां ॥
राधारमणदासेन राधारमणसेविना ।
श्रुतिस्तुतेः स्वामिटीकाव्याख्यानं क्रियते ऽद्भुतं ॥ इत्यादि ।

End. उपनिषद्भिर्विराजिते पदाम्बुजे यस्य तं, कर्म्मिणो भजनेन भोगप्रदं, नचस्य योगप्रदं, "ददामि बुद्धियोगं तं येन मामुपयान्ति" । इति गीतोक्तेः ॥
गोवर्द्धनोपालस्य पुत्रः श्रुत्यर्थसम्भवं ।
राधारमणदासोऽयं व्याख्यानमकरोन्मुदा ॥
कृष्णगोविन्दमिश्रेण राधारमणदासेन दीपिकादीपनं कृतं ॥

Colophon. इति श्रीभागवते दशमस्कन्धे श्रुतिस्तुतौ भावार्थदीपिकादीपने सप्ताशीतितमोऽध्यायः ॥

विषयः । स्वामिकृत-भागवतदशमस्कन्धीय-श्रुतिस्तुतिव्याख्याया भावार्थदीपिकाया व्याख्यानं ।

No. 284. वेदान्तसिद्धान्तमुक्तावली By वनमाली. Substance, country-made paper, 9 × 4½ inches. Folia, 146. Lines, 12 on a page. Extent, 4,500 slokas. Character, Nāgara. Date S.M. 1873. Place of deposit, Ṭikāri, District Gayā, Paṇḍit Vāmācārī. Appearance, tolerable. Prose. Correct.

Beginning. प्रथमपत्रं नास्ति तेन द्वितीयपत्रप्रारम्भो लिखितः ॥

तदर्थं विचारविशेषैर्विषयादिकं न सम्भवति तत्र सम्भवति, तदर्थं विषयीभूतब्रह्म जीव एव उतान्यदिति । यदि प्रत्यग्भूतो जीवस्तदा तस्य निश्चितत्वेन विषयाभावादनारम्भणीयं शास्त्रं यद्यन्यद्ब्रह्म तदा तस्यानिश्चितत्वेन विषयसम्भवाच्छास्त्रमारम्भणीयमिति ॥ इत्यादि

End.

कृतनिगमविभागं योगिभिः सेविताङ्घ्रिं
धृतमुनिवरवेषं वासुदेवांशमीड्यं ।
यतिगुणमदर्दं श्रीमदानन्दतीर्थं
मतिनिधिजयतीर्थं व्यासतीर्थञ्च वन्दे ॥
श्रीगोविन्दविहारभूषितभुवो वृन्दावनात् प्राग्दिशि
क्रोशानां त्रिगुणे सुभुविये? विप्रा भरद्वाजजाः ।
श्रीसन्नाथसुघो वसन्ति सुकुले तेषां सुजातेन वै
वर्णिश्रीवनमालिना श्रुतिनये वृत्तिः समाप्ता कृता ॥

Colophon. इति श्रीवनमालिविरचितायां वेदान्तसिद्धान्तमुक्तावल्यां चतुर्थाध्यायस्य चतुर्थः पादः ॥ शुभमस्तु संवत् १८७३ ॥

विषयः । जीवब्रह्मनिरूपणं ॥ जीवब्रह्मणोरभेदज्ञाने मुक्तिरित्याद्युपन्यासेन मुक्तिस्वरूपादिनिरूपणं ॥

No. 285. वेदिपद्धतिटीका By मयूरेश. Substance, country-made paper, 10×3 inches. Folia, 20. Lines, 13 on a page. Extent, 520 slokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

ढुण्ढिं विश्वेश्वरं विष्णुं नत्वा दैशिककारिकां ।
मयूरेशः प्रकुरुते वेदिपद्धतिकारिकां ॥ टीकामिति शेषः ॥

End. यथामति कृता व्याख्या सुबोधा वेदिपद्धतेः ।
विचार्य्य साध्वसाध्वत्र शोधनीयं प्रयत्नतः ॥

Colophon. इति श्रीमौद्गल्यगोत्रान्वयदूपनमोघेलुपनामकशोपाख्योपाध्यायसुतपुरुषोत्तमोपाध्यायात्मज मयूरेश्वरोपाध्यायविरचिता स्वकृता वेदिपद्धतिटीका सम्पूर्णा।

विषयः । यज्ञवेदिनिर्माणपद्धतिव्याख्या ।

No. 286. वैद्यकसारः (शंकराख्यः) By रामचन्द्र. Substance, country-made paper, 6×5 inches. Folia, 9. Lines, 15 on a page. Extent, 180 slokas. Character, Nāgara. Date S'aka 1725. Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।

स्वाख्यां लोके शरणममलं देववैद्याश्विनौ तौ ।
रोगग्रस्तो वदति कृपया पाहि मां रोगसिन्धौ ॥
तस्मै दद्यादभयमिति तं वैद्यधन्वन्तरित्वं ।
मत्वा रामोऽखिलसुखकरं शंकराख्यं प्रचक्षे ॥
दूतः प्रश्नो हृदयकलना नाड़िकारोगलक्ष्म ।
मद्यं द्राक्षो वमनविमलं लोचनं स्वेदनं च ॥

End. गायन्तो शतश्रृङ्गशैलशिखरे श्रीचण्डिका संस्तुतैः ।
श्लोकै वैद्यकसंज्ञकैः सुललितैर्छन्दोविचित्रैः शतैः ॥
भक्तानां मदनाशनाय विमलस्तुत्या मया प्रार्थिता ।
दत्तं शास्त्रमिदं युतन्तु यशसा श्रीशंकराख्यं शुभं ॥

Colophon. इति रामचन्द्रविरचिते शंकराख्यवैद्यकसारः समाप्तः ।

विषयः । संक्षेपेण साधारणरोगाणां उपशमोपायकथनं ।

No. 287. वैयासिकन्यायमाला, सटीका, (वेदान्ताधिकरणमाला) By भारतीतीर्थमुनि । Substance, country-made paper, 11×5½ inches. Folia, 76. Lines, 12 on a page. Extent, 3,000 slokas. Character, Nāgara. Date Samvat 1814. Place of deposit, Ṭikāri, District Gaya, Paṇḍit Vāmācāri Šāstri. Appearance, tolerable. Prose and verse. Generally correct.

Beginning. प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं ।
वैयासिकी न्यायमाला श्लोकैः संगृह्यते मया ॥
एको विषयसन्देहपूर्व्वपक्षावभासकः ।
श्लोकोऽपरस्तु सिद्धान्तवादी सङ्गतयःस्फुटाः ॥
शास्त्रेऽध्याये तथापादे न्यायसङ्गतयस्त्रिधा ।
शास्त्रादिविषये ज्ञाते तत्तत् सङ्गति रुह्यताम् ॥ इत्यादि ।

श्रीगणेशाय नमः ।

प्रणम्य परमात्मानं श्रीविद्यातीर्थरूपिणं । इत्यादि ॥

प्रारीप्सितस्य ग्रन्थस्य निर्विघ्नेन परिसमाप्तये ।

× × × प्रणम्येति व्यासेन प्रोक्ता वैयासिकी × वेदान्तवाक्यार्थ-निर्णायकान्यधिकरणानि न्यायास्तेषामनुक्रमेण ग्रथनं माला ॥ इत्यादि ।

End. स्वभावप्रकृतत्वेन स्वतन्त्रता नास्ति योगिनाम् ।

स्वाराज्यमीशेभोगाय ददौ मुक्तिञ्च विद्यया ॥

ईश्वरो ह्युपासनया तोषितस्तेषां भोगमात्रसिद्धये

स्वाराज्यं ददौ, मुक्तिञ्च तत्त्वविद्योत्पादनेन ददौ ।

तस्मात् जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोस्तेषां स्वातन्त्र्यमस्ति ॥

Colophon. इति श्रीमत् परमहंसपरिव्राजकाचार्य्य-श्रीभारतीतीर्थमुनिप्रणीतायां वैयासिकन्यायमालायां चतुर्थाध्यायस्य चतुर्थः पादः ॥ समाप्ता वेदान्ताधिकरणमाला । संवत १८१४ ॥ * ॥

विषयः । श्लोकेन ब्रह्मसूत्रस्याधिकरणादिनिरूपणं ॥ निरूपिताधिकरणस्य व्याख्यानञ्च ॥

No. 288. वैश्वदेवप्रयोगः By ढुण्ढि. Substance, country-made paper, 10×4 inches. Folia, 2. Lines, 10 on a page. Extent, 35 ślokas. Character Nāgara. Date Saṃvat 1855. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ वैश्वदेवप्रयोगः ।

पञ्चमहायज्ञानामत्र वैश्वदेवमिति कर्म्मनामधेयं, एतच्च पञ्चमहायज्ञेभ्यः पृथग्भूतमिति चरदत्तः, तन्न प्रकरणभेदात् संज्ञाभेदः ; यथा, तत् तथाचैतदिति सुदर्शनाचार्य्यः । इत्यादि ।

End. तत्र श्लोकः.

द्वावेकं द्वौ च चतुरः प्रत्येकं तु त्रयं दश ।

प्रत्येकमेकमेकं तत् परिषिञ्चेद्दृचवल्लीनिच ॥ इति .

Colophon. इति वैश्वदेवपञ्चमहायज्ञानां प्रयोगो दत्तपुत्रिढुण्ढिविरचितः समाप्तः । संवत् १८५५ । पौषवदि ।

विषयः । वैश्वदेवविधिः.

No. 289. वैश्वानरोपनिषद्. Substance, country-made paper, 9 × 4½ inches. Folia, 2. Lines, 11 on a page. Extent, 65 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ वैश्वानरः प्रपद्ये जातवेदा मम शान्तिं प्रयच्छतु। दारेषु पुत्रेषु धनेषु हस्त्यश्वरथमनुष्येषु गोषु ग्रामेषु नगरेषु स सप्तार्चिः सप्तजिह्वः सद्गिसुखः स ध्रुवधारी सर्व्वदेवानां मुखं स सर्व्वभुक् स विष्णुः स ब्रह्मस्वरूपश्च शुक्ल-भास्वररूपश्च शान्तिं करोति। इत्यादि

End. एतदुपनिषदधीयानः सर्व्वान् कामानवाप्नोति सर्व्वान् पापान् नाशयति ब्रह्महत्यायाः पूतो भवति सुरापानात् पूतो भवति दीर्घायुराप्नोति धनधान्येन सम्बद्धो भवति सर्व्वं वशतामाप्नोति। ॐ तत् सत्।

Colophon. इति वैश्वानरोपनिषत् समाप्ता।

No. 290. वैष्णवचन्द्रिका. By रामानन्द and वनमाली। Substance, country-made paper, 11 × 3 inches. Folia, 4. Lines, 7 on a page, Extent, 130 ślokas. Character, Bengali. Date ? Place of deposit. Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarka-vāgīśa. Appearance, fresh. Verse. Generally correct.

Beginning.

संसारार्णवमज्जमानपुरुषत्राणाय गोलोकतो।
ह्याविर्भूत इह स्वयं सुपरमे वृन्दावने लीलया॥
श्रीकृष्णः सह राधया परिचरै र्नन्दादिभिर्यः कलेः।
सर्व्वो मद्धृदये सदा निवसतात् कारुण्यमालम्ब्य सः॥
श्रीराधाकृष्णयोरादौ स्वस्वरूपप्रदर्शनं।
कारणञ्चावतारे तत् प्रापणे भक्तिलक्षणं॥
भक्तानां लक्षणं पश्चात् प्रहत्तादिप्रभेदतः।
पुराणादिकशास्त्रेभ्यस्तन्त्रसारादिसंग्रहात्॥
समुद्धृत्य मतात् कृत्स्नात् संक्षेपात् तद्विरच्यते।
न्यायवागीशविख्यातश्रीरामानन्दशर्म्मणा॥ इत्यादि।

End.

देवान् पितॄन् विप्रगणान् प्रणम्य
प्रातः समुत्थाय गुरोः पदाब्जं।

ध्यात्वाच्युदन्तर्हरिनाम कीर्त्तयन्
सानन्दचित्तोविहरेत् चितौ गृही ॥
धर्म्मानशेषान् परिहाय वैष्णवस्त्यक्ताश्रमः श्रयदनाथ नाथं ।
गोलोकनाथं सह राधया च्युदा विभाव्य दास्यं परतोऽस्य याति सः ॥
स्नत्योः प्राग्दिवसे समाप्तिमगमत् सत्यावशिष्टः क्रिया
रामानन्दविपश्चिता तदनु तच्छात्त्रेण यत्नादयं ।
ग्रन्थः श्रीवनमालिनामयतुना कार्य्योऽवशिष्टस्ततो
द्वाभ्यां वैष्णवचन्द्रिकाद्भुतमयी सम्पूर्णता मागता ॥

विषयः । वैष्णवकर्त्तव्यक्रियाकलापनिरूपणम् ।

No. 291. व्यवस्थासंग्रहः By अनिरुद्ध. Substance, palm leaves, 13×2 inches. Folia, 108. Lines, 5 on a page. Extent, 1,700 ślokas. Character, Bengali. Date ? Place of deposit, Dinājpur, Babu Giris Candra Cakravartti, Pleader. Appearance, very old. Prose and Verse. Correct.

Beginning. प्रणम्य पुण्डरीकाक्षं पूर्व्वाचार्य्यप्रवर्त्तिताः ।
व्याख्या मन्वादिशास्त्राणां समालोच्य विविच्यते ॥
विशुद्धिरनिरुद्धेन स्वबोधविभवावधि ।
बोधार्थमल्पबुद्धीनां प्रबुद्धानाञ्च × × × ॥
मनुः ॥
जातदन्तेऽनुजाते च कृतचूड़े च संस्थिते ।
अशुद्धा बान्धवाः सर्व्वे सूतके च तथोच्यते ॥
जातदन्तादनुपश्चाज्जातोऽनुजातदन्त इत्यर्थः ॥

End. खन्तं खण्डितं ।

विषयः । जननमरणाद्यशौचव्यवस्थाकथनं ॥ श्राद्धविधिकथनं । तदधिकारिनिरूपणञ्च ॥

No. 292. व्यवस्थासारसंग्रहः By रामनाथ. Substance, palm leaves 15×1½ inches. Folia, 84. Lines, 2 on a page. Extent, 750 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgisa Appearance, old, Prose and verse. Generally correct.

Beginning. ॐ नमो गुरवे नमः ।

नत्वा कृष्णपदद्वन्द्वं श्रीरामनाथशर्म्मणा ।
क्रियते ऽतिप्रयत्नेन व्यवस्थासारसंग्रहः ॥

अथ सामान्यतः सर्व्वतिथिव्यवस्था । यद्यपि रात्र्यादिपर्य्युदस्त × × कालोऽपि कर्म्मयोग्यस्तथापि मुख्यकाललाभे प्रशस्तत्वात् स एव नियामकः । मुख्यकालस्तु दैवकृत्ये त्रिधाविभक्तदिनस्य पूर्व्वाह्णः । मनुष्यकृत्ये मध्याह्नः । पितृकृत्येऽपराह्णः । तिथेः पूर्व्वकालापेक्षा तु विधेयकर्म्मण्येव निषिद्धकर्म्मणि तु तिथिमात्रापेक्षा यत्र तु उभयदिने कर्म्मकाले तिथिलाभोऽलाभो वा तत्र तत्तिथिविहितं पूजादिकं कुत्र कर्त्तव्यमिति सन्देहे युग्मादिना व्यवस्था । इत्यादि ।

End. परचक्रोपघातांश्च ।

यथा शस्त्रप्रहाराणां कवचं विनिवारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणं ॥

शान्तिधर्म्मद्वारा ऐहिकानिष्टस्य त्वरितनिवृत्तिरितिदर्शनान्मलमासेऽशौचे च स्वस्त्ययनं कार्य्यं ।

शूद्रान्नं शूद्रसम्पर्कं शूद्रेण च सहासनं ।
शूद्रविद्यागमः कश्चिज्ज्वलन्तमपि तापयेत् ॥
पितृश्राद्धे तु शूद्राणां यो भुङ्क्ते ब्राह्मणाधमः ।
सुरापो ब्रह्मघाती च पितृदेवार्चनाद्बहिः ॥
तावद्भवति शूद्रान्नं यावन्न स्पृशति द्विजः ।
द्विजानां करसंस्पर्शात्तदन्नं हविरुच्यते ॥ हरये नमः ।

Colophon. अतः परं खण्डितत्वात् समाप्तिसूचकं वाक्यं नास्ति ।

विषयः । व्यवस्थासारसंग्रहेऽस्मिन् सन्ति केचन जटिलव्यवस्थानां संग्रहाः तत्र प्रथमे तिथिव्यवस्था सा पुनर्युग्मायुग्मभेदेन द्विविधा । संक्रान्तिव्यवस्था अशौचव्यवस्था सपिण्डीकरणादि-व्यवस्था शान्तिकर्म्मव्यवस्था च ।

No. 293. व्यवहारसूत्रं. Substance, country-made paper, 12 × 5 inches. Folia, 46. Lines, 7 on a page. Extent, 1,000 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Suri. Appearance, old. Verse. Correct.

Beginning. श्रीशान्तिजिनाय नमः ।

जो भिक्खु मासियं परिहारं ठाणं
परिसेवित्ता आलोएज्जा अपलिउ
चियं अलोएमाणस्समासियं पलिउचियं
आलोच माणस्सदो मासियं ।

End. साधम्मिय वेयावच्चं करेमाणे समणे निग्गन्थे महानिज्जरे महापज्जवसाणे भवइ ।

Colophon. ववहारस्स दसमो उद्देसो सम्मत्तो । ववहारसूत्रं समाप्तम् ।

विषयः । जैनसाधूनां व्यवहारकथनम् ।

No. 294. व्रतोद्यापनोपयोगिपदार्थनिर्णयः. Substance, country-made paper, 10×3 inches. Folia, 20. Lines, 9 on a page. Extent, 380 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

श्रीमहाकाली-महालक्ष्मी-महासरस्वतीभ्यो नमः । श्रीसीतारामचन्द्राभ्यां नमः । अथ व्रतोद्यापनविषये किञ्चिदुच्यते, तत्रोद्यापनं नाम तत्तद्व्रते परिपूर्णे अपूर्णे वा कल्पोक्तं हवनदानब्राह्मणभोजनरूपः कर्मविशेषः ।

End. गीतायामपि ।

यत् करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम् ।

Colophon. इति व्रतोद्यापनोपयोगिविषयः समाप्तः ।

विषयः । व्रतोद्यापनोपयोगिपदार्थकथनम् ।

No. 295. व्रात्यस्तोमपद्धतिः By माधवाचार्य्यः. Substance, country-made paper, 8×3 inches. Folia, 5. Lines, 12 on a page. Extent, 100 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose and verse. Correct.

Beginning. नमस्कृत्याम्बिकां पूर्व्वान् ग्रन्थानालोच्य यत्नतः ।
व्रात्यस्तोमस्य सरणिं कुरुते माधवोऽधुना ।
व्रात्यशब्देनात्र पतितसावित्रीको दृश्यते ॥

End. प्रभूणां वसुरामाणां मुदे तत्कृपजीविकः ।
माधवः प्राकरोत् काम्यां व्रात्यस्तोमस्य पद्धतिम् ॥

Colophon. इति माधवाचार्य्यशर्म्मप्रणीता व्रात्यस्तोमसरणिः समाप्तिमगमत् ॥

विषयः । व्रात्यानां संस्कारविधिः ।

No. 296. शक्रादिमाहात्म्यस्य विष्णुपक्षे व्याख्यानम् . Substance, country-made paper, 20 × 3 inches. Folia, 4. Lines, 8 on a page. Extent, 132 ślokas. Character, Bengali. Date ? Place of deposit, Grām Bhadughar, Post Brāhmanberia, Comilla, Paṇḍit Amarcandra Nyāyaratna. Appearance, tolerable. Prose. Generally correct.

Beginning. श्रीदुर्गा । ॐ नमः कृष्णाय ।

तस्मिन् दुरात्मनि अतिवीर्य्ये कंसासुरे सैन्ये च देव्या कृष्णेण निहते सति शक्रादयः तां पालकं कृष्णं तुष्टुवुः । देव्या इति दिवधातोर्विजीगिषार्थाद्व्यञ्जनान्ता × × × देव्यः प्रभावात् कंसेन जेतुमिष्टः स चासावस्चेति देव्या तृतीयैकवचने आधातोरित्याकारलोपः धातोरित्यशब्दोपलक्षणत्वात् आकारो वासुदेवः स्यादित्येकाक्षरकोषः । तासि तायृ सन्तानपालनयोः तायतीति क्विप् यवोर्व्यञ्जन इति यलोपः । इत्यादि ।

End. यद्वा भद्रं कं शुभं श्रीलक्षस्येति भद्रकाली रघुवेर्लशुतिरिति । अन्तर्ह्निता अन्तर्द्धानं प्राप्तः अन्तर्ह्नितं अयत इति क्विप् अन्तर्धानमन्तर्ह्नितं तदयतेगत्यर्थत्वात् अयधातोः क्विप् यलोपश्च सा असुरान्तकारी × × × × × × × × अनधातोः क्विप् सम्भूतं प्राप्तः देवी क्रीड़ावान् देवशरीरेभ्यः गोपगोपीरूपेण शरीराण्युत्पद्य लव्लोपे पञ्चमी जगत्रयच्छितैषिणी च्छितैषिणोभाव एवमादित्वादन् क्वचिदधिकारात् टचिनलोपाभावः तद्विद्यते यस्य इन् प्रत्ययः जगत्रयच्छितैष्यावान् पुनश्च गौरीदेवासा पुनर्गौरीदेवपरिग्रहणेन असदीप्तादानयोरसनं अः क्विप् भावे, सम्भूता पूर्व्ववत् उत्पत्तिं प्राप्तः उपकारिणी उपकारित्ववान् उपकारिणोभाव-एवमादित्वादन् क्वचिदधिकाराट्टचिनलोपाभावः ।

Colophon. इति शक्रादिमाहात्म्यीयविष्णुपदव्याख्यानं सम्पूर्णं ।

विषयः । देवीमाहात्म्यीयशक्रादिमहात्म्यस्य विष्णुपदे व्याख्यानं ।

No. 297. शङ्करसंहिता. Substance, country-made paper, 14×5 inches. Folia, 59. Lines, 10 on a page. Extent, 1,100 çlokas. Character, Bengali. Date ? Place of deposit, Dinājpur Rajbāḍi. Appearance, new. Verse. Generally correct.

Beginning. ॐ नमो गणेशाय ।

ॐ कारनिलयं देवं गजवक्त्रं चतुर्भुजं ।
पिरिच्छिंतमचं वन्दे सर्व्वविघ्नोपशान्तये ॥
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
× × × × × ॥
षोड़शैतानि नामानि यः पठेत् शृणुयादपि ।
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा
संग्रामे सर्व्वकार्य्येषु विघ्नस्तस्य न जायते ॥

End. सूत उवाच ।

जयन्तु सम्भवाख्यस्तु कान्तो वेदार्थसम्मतिः ।
कथितः श्रेयसामेव निदानं विदुषां सतां ॥ * ।

Colophon. इति श्रीस्कन्दपुराणे शङ्करसंहितायां शिवरहस्यखण्डे सम्भवकाण्डे पञ्चाशत्तमोऽध्यायः ॥ सम्भवकाण्डं समाप्तं ॥

विषयः । १ सूतमुनिसंवादकथनं ॥ २ ग्रन्थमानकथनं । ३ तृतीयाध्यायात् पञ्चाशत्तमाध्यायं यावत् तारकासुरोपाख्यानवर्णनेन कुमारोत्पत्तिवर्णनादि ।

No. 298. प्रातकल्याणस्तवनम्. Substance, country-made paper, 12×5 inches. Folia, 3. Lines, 12 on a page. Extent, 72 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Dikmaṇḍālacāryya Mahārāja Bālacandra Suri. Appearance, new. Verse. Incorrect.

Beginning. श्रीजिनाय नमः ।

दुरिय रय समीरं मोहपङ्कोघनीरं ।
पणमिय जिनवीरं चिज्जियाघक्कवीरं ॥

भवभङ्गपङ्किकुलं सम्मगुकस्तानु × × लं ।
चरियमिहसमूलं कि × × किमे निमूलम् ॥

End. एवं वीरजिने सने सयसमं मोहान्धविध्वंसनं
भव्यं भोयसकेह सोह जनयम् दोसाय रूच्छेयणम् ।
सोउं जं कुमलानुवन्धिकुमलं पत्तोमिकिञ्चित् चो जा
यजानिजयवङ्गदि (..) सया पाय पणामि तुह ॥

Colophon. इति महावीर शतकषट्कल्याणिकनिबन्धं स्तवनं समाप्तं ।

विषयः । मातुरन्यमातृगर्भे गमनम् । गर्भः । जन्म । दीक्षा । केवलज्ञानम् । निर्वाणम् ।

No. 299. शब्दवादः. Substance, yellow paper, 12×3 inches. Folia, 9. Lines, 8 on a page. Extent, ? ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

इति शब्दो हि द्विविधः । लिङ्गार्थाविभावकः पदार्थाविभावकश्च । लिङ्गार्थाविभावकः पदार्थाविभावकश्चेति शब्दस्यानुकरणविषय एव प्रयोगः स्वाभाव्यात् लिङ्गः स्वरूपार्थस्याभिधायको लिङ्गार्थाविभावकः । पदप्रति पाद्यसंख्यान्वितविशेष्यीभूतशब्दस्वरूपार्थस्याभिधायकः पदार्थविभावकः यथा हचेति ॥ इत्यादि ।

End. एवञ्चेदिति शब्दाभावोपि भूमलायामित्यादौ तदध्याहारात् शब्दस्याभिधेय-शून्यत्वं कल्प्यं यत् तेनाध्याहारस्तच लक्षणया स्वरूपोपस्थापने प्रथमैवेतिदिक् । इति शब्दवादः समाप्तः इति ।

Colophon. श्रीकालीचरणोपान्ते भक्तिरस्तु सदा मम ।

विषयः । लिङ्गार्थाविभावकत्वपदार्थाविभावकत्वप्रकाशकप्रकृतिप्रत्ययादिना शब्दानां स्वरूपत्वनिरूपणम् ।

No. 300. भ्रान्तिशतकटीका By विद्याविनोदाचार्य्यचूड़ामणिः. Substance, country-made paper, 18×3 inches. Folia, 22. Lines, 6 on a page. Extent, 500 ślokas. Character, Bengali. Date S.K. 1676. Place of deposit, Dinājpur, Paṇḍit Kṛṣṇadāsa Smṛtibhūṣaṇa. Appearance, tolerable. Prose. Correct.

Beginning. आदौ पचद्वयं नास्ति । इदानीमात्मनः पाण्डित्यं निन्दयन् ऐश्वर्य्यं कटाक्षयति क्लेति । ते क्षौणीभुजः राजानः वयमपि विद्वांसः क्षौणीभुजः इत्यादि ।

End. तेषामावश्यकता जन्मजरावियोगं मरणं दृष्ट्वा स्थितस्य चासौ नोत्पद्यते न जायते यतःजन्म उत्पत्तिः जरा वार्द्धक्यं वियोगः इष्टविच्छेदः मरणं दशाविशेषः समाहारद्वन्द्वः सर्व्वद्वन्द्वो विभाषयैकवद्भवतीति ॥ *

Colophon. इति श्रीविद्याविनोदाचार्य्यचूड़ामणिकृतशान्तिशतकटीकायां चतुर्थपरिच्छेदः ॥ समाप्तश्चायं ग्रन्थः ॥ शक १६७६ ॥

विषयः । शान्तिशतकस्य व्याख्यानं ।

No. 301. शिक्षाभाष्यं or शिक्षाप्रकाशः. Substance, country-made paper, 15×5 inches. Folio, 9. Lines, 9 on a page. Extent, 180 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Gobinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. ज्योतिर्व्याकरणं छन्दः कल्पशिक्षानिरुक्तयः ।
नेत्रास्यपादो नः कर्णावस्य तं सततं नुमः ॥
व्याख्याय पिङ्गलाचार्य्यसूत्राण्यादौ यथायथं ।
शिक्षां तदीयां व्याख्यास्ये पाणिनीयानुसारिणीं ॥

End. स्वर्गं व्याप्नोति वा । द्विर्वचनं शिक्षाध्यायसमाप्त्यर्थं । विकृतिछन्दस्य × × × समसपरयक्तं इत्तं अर्द्धसमा अर्द्धं इत्यभिकृत्य अपरवक्तं × × × औच्छादिति लक्षणस्त्वनात् ।

Colophon. इति शिक्षाप्रकाशः समाप्तः ।

विषय । वर्णानामुच्चारणप्रकारकथनम् ।

No. 302. शिवशतनामस्तोत्रं (महालिङ्गेश्वरतन्त्रोक्तं). Substance, country-made paper, 10×2½ inches. Folio, 6. Lines, 6 on a page. Extent, 75 slokas. Character, Bengali. Date, S.K. 1776. Place of deposit, Zilla Midnapur, Post Garveta, Grām Khunverā, Paṇḍit Hārānchandra Tarkavāgīśa. Appearance, fresh. Verse. Generally correct.

Beginning. श्रीरामः ।

ॐ अस्य श्रीशिवशतनाममहास्तोत्रस्य श्रीनारद ऋषिरनुष्टुप्छन्दः श्रीसदाशिवो देवता ॐ नमः शिवायेति महाबीजं ह्रीं शक्तिः नमः कीलकं मम सर्व्वाभीष्टसिद्ध्यर्थे जपे विनियोगः । इत्यादि ।

End.

एतज्ज्ञानं महेशानि पाषण्डे मा वदेत् क्वचित् ।
मूर्खाय भक्तिहीनाय दुष्टाय सुदुरात्मने ॥
शिवभक्तिविहीनाय शक्तिनिन्दापराय च ।
न प्रकाश्यं महादेवि प्रकाशाच्छिवहा भवेत् ॥
शिष्याय भक्तियुक्ताय शिवविष्णुपराय च ।
शतनाममहास्तोत्रं तस्मै देयं महेश्वरि ॥

Colophon. इति महालिङ्गेश्वरतन्त्रे श्रीशिवपार्व्वतीसम्वादे शिवस्य शतनामस्तोत्रं समाप्तं ॥ ॐ तत् सत् ॥

यदक्षरं परिभ्रष्टं मात्राहीनञ्च यद् भवेत् ।
पूर्णं भवतु तत् सर्व्वं त्वत्प्रसादान्महेश्वरः ॥

शकाब्दाः १७७६ । ११ । १९ । लिपिरियं श्रीरामतारणशर्म्मणः ॥

विषय । श्रीमहादेवस्य स्तुतिकथनं ।

No. 303. शिवसहस्रनामस्तोत्रं (उमायामलीयं). Substance, country-made paper, 16×4 inches. Folio, 3. Lines, 10 on a page. Extent, 120 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇdit Rāmtāraṇa Siromaṇi. Appearance, fresh. Verse. Correct.

Beginning. श्री श्री ॐ नमः शिवाय ।

देव्युवाच ।

ॐ देव देव महादेव ज्ञानसिन्धो कृपामय ।
यानि नामानि गुह्यानि पवित्राणि शुभानि च ।
तन्मे कथय मे देव यदि स्नेहोऽस्ति मां प्रति ॥

श्रीशिव उवाच ।

तानि ते कीर्त्तयिष्यामि भुक्तिमुक्तिकराणि च ।
गोप्यानि सर्व्वतन्त्रेषु न देयानि पृथग्जने ॥ इत्यादि ।

End.

क्रूररोगा घोरसत्वा अलक्ष्मीः कालकौर्यका ।
पठनाद् यस्य नश्यन्ति साधकस्य न संशयः ॥
वारमेकन्तु योऽधीयादश्वमेधफलं लभेत् ।
अपि होमे तथा दाने यदि देवार्च्चने तथा ॥

Colophon. इति उमायामले हरगौरीसंवादे परमशिवसहस्रनामस्तोत्रं समाप्तं ।
ॐ तत् सत् ।

विषय । शिवस्य सहस्रनामस्तुतिकथनं ॥

No. 304. शुकरहस्योपनिषत् . Substance, country-made paper, 11×4½ inches. Folio, 3. Lines, 12 on a page. Extent, 100 slokas. Character, Nāgara. Date ? Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance, new. Prose and verse. Correct.

Beginning. अथातो रहस्योपनिषदं व्याख्यास्यामः । देवर्षयो ब्रह्माणं संपूज्य प्रणिपत्य पप्रच्छुः भगवन्नस्माकं रहस्योपनिषदं ब्रूहि इति सोऽब्रवीत् ।

पुरा व्यासो महातेजाः सर्व्ववेदतपोनिधिः ।
प्रणिपत्य शिवं साम्बं कृताञ्जलिरुवाच ह ॥

End.

पुत्रेण सहितः प्रीत्या परानन्दमुपेयिवान् ।
यो रहस्योपनिषदमधीते गुर्व्वनुग्रहात् ॥
सर्व्वपापविनिर्मुक्तः साक्षात् कैवल्यमश्नुते ॥

इत्युपनिषत् ॥

Colophon. इति शुकरहस्योपनिषत् समाप्ता ।

विषय । व्यासशुकसंवादमभिमुखीकृत्य ब्रह्मविद्योपदेशः ।

No. 305. शुद्धिदीपिकाप्रकाशः By विष्णुदासदत्त . Substance, country-made paper, 13×3 inches. Folia, 86. Lines, 7 on a page. Extent, 2,000 slokas. Character, Bengali. Date S.K. 1636. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Śripati Bhaṭṭācārya. Appearance, old. Prose. Generally correct.

Beginning.

ॐ नमो गणेशाय ।
श्लिष्यमाणं कमलया वन्दे कमलशायिनं ।
हरिं हेम्नः प्रयत्नस्य तुल्यं मरकताश्मनः ॥

नभोनदीकोकनदं जनानां ।
नेवापश्चत्योरपचारकाञ्चनं ॥
सरोजशोभाकरकान्तिमण्डलं ।
दिवापतेर्मण्डलमाश्रयामि ॥

शिष्टानामयमाचारो यदभिमतदेवतानमस्कारपुरःसरमभिमतार्थसिद्धिं वाञ्छन्ति तदयमपि मद्दीप्तापनीयाचार्य्यश्रीश्रीनिवासो ज्योतिःशास्त्रस्य सूर्य्यैकर्तृकत्वात् ग्रहराजत्वाच्च सभासदाशीर्वादव्याजेन रविं स्तुवन्नाह त्वष्टेति । इत्यादि ।

End. अधुना स्वग्रन्थस्यान्यग्रन्थादुपादेयत्वमाह । सुविस्तरादिति । अतिविस्तर-ज्योतिर्ग्रन्थात् श्रीश्रीनिवासनाम्नाचार्य्येण उद्धृतां संक्षेपेण रचितां इमां शुद्धिदीपिकां सुशिक्षिता अभियुक्ताः शिष्या विधतु धारयन्तु । × × × × × × × × × × × × × ×

तथाहि हृज्जातके जातकविचार एव । अत्र ग्रन्थे तु सर्व्वकर्म्मविधानं संक्षिप्योक्तमिति ।

कुतूहलाद्वा कविदर्शनतो वा
मिथ्याद्यवस्तुश्रुतिगोचराद्वा ।
वितन्यमानां कवयः कृतिं मे
चेतःप्रदानेन पवित्रयध्वं ॥

Colophon. इति श्रीविष्णुदासदत्तकृतायां दीपिकाप्रकाशाख्यायां यात्रादिनिर्णयो नामाष्टमोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

रसकालर्तुभूसंख्ये शकाब्दे चापगे रवौ ।
लिखिता पुस्तिका ह्येषा भुवनेश्वरशर्म्मणा ॥

विषयः । श्रीनिवासकृतशुद्धिदीपिकाया व्याख्यानं ।

No. 306. शुल्वप्रदीपविवरणं By सुन्दरराज. Substance, country-made paper, 12 × 4 inches. Folia, 25. Lines, 11 on a page. Extent, 825 slokas. Character, Nāgara. Date, Samvat 1817. Place of deposit, Benares City, Gobinda Bhaṭṭa. Appearance old. Prose. Correct.

Beginning. आपस्तम्बेन योयं व्यरचि भगवता शुल्वसंज्ञोगभीरः,
प्रश्नार्थं तस्य भाष्यप्रभृतिषु कथितं विस्तृतं वीक्ष्य सत्यं ।

संक्षिप्योद्बोधनार्थं कुशिककुलनिधिर्माधवार्य्यस्य सूनुः,
पुत्रः शुल्वप्रदीपं विवरणमधुना सुन्दरो निर्मिमीते ॥
विहारयोगान् व्याख्यास्यामः, विहारो विहरणं, चतुरस्रादिरूपेण भूमेः करणं, तस्य योगाः उपायाः ।

End. पूर्व्वेषां क्रमत्वात् व्यक्तिस्तैनत् बोधायनेन । अश्वमेधः प्राप्नुयेत् आहार ऊर्द्धविधामभ्यसेत् ? नेतरदाद्रियते । आदितश्चेदाहरेत् आहृत्य क्रतान्तात् प्रत्याहरतीति ॥

Colophon. इति सुन्दरराजीये शुल्वविवरणे शुल्वप्रदीपे षष्ठः पटलः शुभमस्तु संवत् १८१७ माघशुक्लप्रतिपदि—गुरौ जयरामेण लिखितं ।

विषयः । आपस्तम्बविनिर्मितशुल्वसूत्रव्याख्या ।

No. 307. ऋग्वेदीयश्राद्धप्रयोगः. Substance, country-made paper, 10×4 inches. Folia, 19. Lines, 7 on a page. Extent, 190 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Paṇḍit Vāmanācāryya. Appearance, old. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।

ओम् आचम्य पवित्रपाणिः प्राणानायम्य पवित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्य्येषि विश्वतः । अतप्त तनूर्न तदामो अश्नुते, शृतास इद्वहन्तस्तत् समाशत ऊर्द्धकेर्म्मी ।

End. वषट् ते वाम आकृणोमि तन्मे जुषस्व × × × पिविष्टश्वर्य्यं वर्द्धन्तु त्वासुष्टुतयोगिरो मे यूयं पात स्वस्तिभिः सदा नः ।

Colophon. इति श्राद्धयज्ञप्रयोगः समाप्तः ।

विषयः । ऋग्वेदीयश्राद्धकथनम् ।

No. 308. श्राद्धवादार्थः. Substance, country-made paper, 15×3½ inches. Folia, 25. Lines, 7 on a page. Extent, 800 slokas. Character, Bengali. Date S.K. 1800. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Bhaṭṭagrām, Paṇḍit Ramhṛdaya Bhaṭṭācāryya. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

प्रणम्येत्यादि मङ्गलाचरणविशेषविचारस्तु प्रायश्चित्तवादार्थेऽनुसन्धेयः । पार्व्वणादिश्राद्धतत्त्वं पार्व्वणादिप्रतिपादकस्मृतिवचनस्य तात्पर्य्यविषयीभूतार्थं वक्ति निरूपयतीत्यर्थः । ननु पार्व्वणस्य स्वशब्देन निर्द्देशः आभ्युदयिकादेः कथं आदिपदेन निर्द्देशः । उ । सकलश्राद्धमध्ये पार्व्वणस्य प्रधानत्व-ज्ञापनार्थं पार्व्वणस्य स्वशब्देन निर्द्देशः । अन्येषामपि आदिपदेन तेन पार्व्वणः प्रकृतिः अन्यो विकृतिः यत्र तु श्राद्धकरणमुक्तं तत्र पार्व्वणं कर्त्तव्य मितिभावः । इत्यादि ।

End. अत्र केचित् एकोद्दिष्टं नान्यद्वारा कारयितव्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयमित्युक्तावपि न कदाचित् सगोत्रायेति विशेषणात् सगोत्रै-कोद्दिष्ट × अगोत्रजद्वारा, मातामहादेरेकोद्दिष्टन्तु अगोत्रद्वारापि करणीयमित्याहुः । अपरेतु वचने सगोत्रायेति विशेषण × × वपि एकोद्दिष्टं नान्यद्वारा कारयितव्यमित्यत्रापि गोत्रजेतरत्वेन विशेषणीयमिति स्मार्त्त-व्याख्याने सामान्यैकोद्दिष्टनिवेशात् मातामहादेरेकोद्दिष्टमपि अगोत्रजद्वारा न कार्य्यमित्याहुः वस्तुतस्तु पूर्व्वमतं समीचीनं वचनबलादिति गुरुचरणाः पार्व्वणादिश्राद्धन्तु गोत्रजागोत्रजद्वारा कर्त्तव्यमित्युभयमतसिद्धं ॥

Colophon. इति श्राद्धवादार्थः समाप्तः । शकाब्दाः १८०० तारिख १० श्रावण ।

विषयः । श्राद्धतत्त्वीयवादावलीनां सम्यग्विचारः ।

No. 309. श्रीकृष्णकवचं. Substance, country-made paper, 15×3 inches. Folia, 2. Lines, 12 on a page. Extent, 70 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Candra-konā, Ayodhyā, Raghunathvāṭi, Babu Cakrapāṇi Rāya. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ रामः । अथ कृष्णकवचं ।

भगवन् सर्व्वधर्म्मज्ञ कवचं यत् प्रकाशितं ।
त्रैलोक्यमङ्गलं नाम कृपया कथय प्रभो ॥

सनत्कुमार उवाच ।

शृणु वक्ष्यामि विप्रेन्द्र कवचं परमाद्भुतं ।
नारायणेन कथितं कृपया ब्रह्मणे पुरा ॥

ब्रह्मणा कथितं मह्यं परं स्नेहाद् वदामि ते ।
अति गुह्यतरं तत्त्वं ब्रह्ममन्त्रौघविग्रहं ॥ इत्यादि ।

End.

कवचस्य प्रसादेन जीवन्मुक्तो भवेन्नरः ।
त्रैलोक्यं क्षोभयत्येव त्रैलोक्यविजयी भवेत् ॥
इदं कवचमज्ञात्वा भजेद् यः पुरुषोत्तमं ।
शतलक्षप्रजप्तोऽपि न मन्त्रः सिद्धिदायकः ॥

Colophon. इति सनत्कुमारतन्त्रे त्रैलोक्यमङ्गलं श्रीकृष्णकवचं समाप्तं ॥

विषयः । श्रीकृष्णस्य कवचं ॥

No. 310. श्रीकृष्णस्तोत्रं. Substance, country-made paper, 16×4 inches. Folia, 10. Lines, 6 on a page. Extent, 300 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grām Telivani. Appearance, fresh. Verse. Correct.

Beginning.

श्रीगोपालाय नमः ।
यं वेद वेदविदपि प्रियमिन्दिराया
यन्नाभिनीरदहगर्भस्रष्टो न धाता ।
गोपालबालललना वनमालिनं तं
गोधूलिधूसरशरीरमरीरमन्त ॥
कनककमलभालः केशिकंसादिकालः
समरभुवि करालः प्रेमवापीमरालः ।
अखिलभुवनपालः पुण्यवल्लीप्रवालः
स्तव भवतु विभूत्यै नन्दगोपालबालः ॥ इत्यादि ।

End.

अद्वैतवीथिपथिकैरुपास्याः
स्वानन्दसिंहासनलब्धदीक्षाः ।
शठेन केनापि वयं शठेन
दासीकृता गोपवधूविटेन ॥
न वयं कवयो न तार्किका
न च वेदान्तनितान्तपारगाः ।
न च वादनिरासकाः परं
कपटाभीरकिशोरकिङ्कराः ॥

अयि मनो दुराचार विषयानुपसेवसे ।
गोविन्दे परमानन्दे मुकुन्दे किं न लीयसे ॥

Colophon. इति वैद्याचूड़ामणिमहामहोपाध्यायश्रीविल्वमङ्गलभूदेववरविरचितं श्रीकृष्णस्तोत्रं समाप्तं ॥

विषयः । श्रीकृष्णस्य स्तुतिकथनं ।

No. 311. श्रीविद्याया ऐश्वर्य्यादिस्वरूपाख्यं स्तोत्रं. Substance, country-made yellow paper, 12 × 3 inches. Folia, 4. Lines, 5 on a page. Extent, 120 ślokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīśa. Appearance, fresh. Verse. Generally correct.

Beginning. ॐ नमः परमदेवतायै ।

ऐश्वर्य्यं अर्य्यहीनं प्रथमवरलसितं बीजमत्यन्तगुह्यं
अज्ञोवा मूर्खो वा यदि जपति जनः प्रत्यहं शुद्धचेताः ।
जिह्वाग्रे तस्य वाणी विहरति च सदा गेहमध्ये च लक्ष्मी-
श्चिरञ्जीवन्मुक्तः स भवति सहसा त्वत्प्रसादाद् भवानि ॥ (?)
प्रचण्डाख्यं मातर्वसुमतिसहितं वैष्णवी अर्कयुक्तं
सुगुप्तं मन्त्रेशं यदि लभति कश्चित् पुण्यवान् शुद्धचेताः । (?)
धरण्यां धन्योपि प्रवसति च सदा कामिनीं कामसक्तां
स दीर्घायुः श्रीमान् त्रिभुवनविजयी सौख्यमोक्षं लभेच ॥ इत्यादि ।

End. समस्तं कस्यापि त्वमसि परमात्मा परतरा ।
जगत्प्राणो मातस्त्वमसि गगनं त्वं हुतवहः ॥
धरित्री त्वं दुर्गे धरणिधरकन्ये वनमयी- ।
स्तुतिः का ते मातस्त्रिभुवनमखिले सुन्दरि परे ॥
महापुण्ये कन्ये धरणिधरकन्ये मनुमये ।
जगद्वन्द्ये सन्ध्ये सकलगुणहीने गुणमये ॥
अयि तारे सारे वरहृदयहारोज्ज्वलकरे ।
कृपापारावारे मयि वितर दीनेऽस्त्वमपि ॥

Colophon. इति श्रीक्रमे श्रीश्रीविद्याया ऐश्वर्य्यादिस्वरूपाख्यं स्तोत्रं समाप्तं ।

विषयः । श्रीविद्याया ऐश्वर्य्यादिख्यापनं ।

No. 312. **श्रीसूक्तन्यासः.** Substance, country-made paper, 8×3 inches. Folia, 1. Lines, 16 on a page. Extent, 40 slokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

अथ श्रीसूक्तन्यासो लिख्यते ओम् हिरण्यवर्णमिति पञ्चदश × × सूक्तस्य श्रीर्देवता कर्दमानन्दचिक्लीतेन्दिरासुता ऋषयः आद्यास्तिस्रोऽनुष्टुभः, ततः एकाप्रस्तारपंक्तिः ।

End. आनन्दकर्दमश्चैव चिक्लीत × × श विश्रुताः ऋषयः ते त्रयः पुत्राः त्वं श्रीर्देवी × × × देवता । श्रीवर्चस्वं इति श्रीसूक्तन्यासः समाप्तः ।

Colophon. × × × × ×

विषयः । ऋचीसूक्तमन्त्रन्यासः ।

No. 313. **श्रौतोपयोगिकारिका.** Substance, country-made paper, 10×4 inches. Folia, 14. Lines, 9 on a page. Extent, 252 slokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācāryya. Appearance, old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ॥

अग्निहोत्रं मुनिश्रेष्ठ यस्मिन् देशे प्रवर्त्तते ।
दशयोजनविस्तीर्णं काशीक्षेत्रं तदुच्यते ॥

End. कुलालचक्रघटितं आसुरं मृण्मयं स्मृतं ।
तदेव चक्रघटितं स्थाल्यादि खलु दैवतं ॥

Colophon. इति श्रौतोपयोगिकारिका समाप्ता ।

विषयः । श्रौतकर्मण्युपयोगिपदार्थकथनम् ।

No. 314. **षट्कर्म्मलक्षणं.** Substance, country-made paper, 11×3 inches. Folia, 3. Lines, 7 on a page. Extent, 50 slokas. Character, Bengali. Date ? Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavagīśa. Appearance, fresh. Verse. Generally correct.

Beginning. अथ षट्कर्म्मलक्षणं । शारदायां ।

अथाभिधास्ये तन्त्रेऽस्मिन् सम्यक् षट्कर्म्मलक्षणं ।
सर्व्वतन्त्रानुसारेण प्रयोगफलसिद्धिदं ॥
शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटनस्तथा ।
मारणं तानि शंसन्ति षट्कर्म्माणि मनीषिणः ॥
तद्देवतादिक्पालादीन् ज्ञात्वा कर्म्माणि साधयेत् ।
रती-वाणी-रमा-ज्येष्ठा-दुर्गा-काली यथाक्रमात् ॥
षट्कर्म्मदेवताः प्रोक्ताः कर्म्मादौ कर्म्मसिद्धये ॥ इत्यादि ।

End. सर्व्वकार्य्येषु सौवर्णं क्रूरे स्यात् प्रेतकर्पटं ।
चितङ्गं शान्तिके प्रोक्तं पद्मगव्यन्तु वश्यके ॥
सर्व्वकार्य्येऽष्टगन्धः स्यात् क्रूरे चाष्टविषानि च ।
शान्तिके लेखनी दूर्व्वा वश्यादौ शिखिपुच्छिका ॥
गृहेषु शान्तिकर्म्म स्यात् वश्यञ्च चण्डिकागृहे ।
देवालयेषु सर्व्वाणि श्मशाने क्रूरकर्म्म च ॥
सर्व्वर्णाः प्रथमे यामे शान्तिकर्म्म समारभेत् ।
तदा शान्तिं लभेद्धीमान् सत्यं हि सुरवन्दिते ॥

Colophon. इति षट्कर्म्मलक्षणं समाप्तं ।

विषयः । तान्त्रिकप्रसिद्धशान्तिवश्यादिषट्कर्म्मणाम् लक्षणनिरूपणं तेषां देवतादिनिर्देशः तेषां प्रयोगक्रमश्च ।

No. 315. षष्ठ्यवतिश्राद्धनिर्णयः. Substance, country-made paper, 8×3 inches. Folia, 2. Lines, 7 on a page. Extent, 30 ślokas. Character, Nagari. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācāryya. Appearance, new. Prose. Correct.

Beginning. अथषष्ठवतिश्राद्धनिर्णयः ।

तानि च अमामनुयुगक्रान्तिव्यतिपातमहालयाः ।
अन्वेष्टयं च पूर्व्वेद्युः षणवत्यः प्रकीर्त्तिताः ।

End. अथ तर्पणं, अष्टकान्वष्टिका पूर्व्वेद्युः श्राद्धेषु षोड़शदिनव्यापिमहालयेषु श्राद्धान्ते इतरथादौसंपाते तु श्राद्धेनैव तर्पणनिर्णयः अन्यत् सर्व्वमन्यतो ऽवगन्तव्यमिति संक्षेपः ।

Colophon. × × × × ×

विषयः । अष्टवर्गिश्राद्धविधिः ।

No. 316. संहितासूत्रं. Substance, country-made paper, 10×5 inches. Folia, 13. Lines, 10 on a page. Extent, 150 slokas. Character, Nāgari. Date, Samvat 1855. Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. अथनूनं यादो अर्थं गन्तानूनं असामिभिमदतः गन्तानो यज्ञं आगन्तामारि-अन्यता आनो अद्य स मनस इति षट्पदकाले गन्तात्रृस्वरेण । नान्या-युवत् । एतं ते स्तोमं तु विजातविप्रः यक्षेय भद्रा विरश्मिने वज्रिणे चत्वारि अतचं मकारेण चतुर्थं अकारवर्जं ।

End. विश्वां क्षिरसि मानुषीणां अन्यत्र मानुषाणां . येनाजुवां न्यूद्दतुः ।

Colophon. इति संहितासूत्रं समाप्तं संवत् १८५५ ।

विषयः । संहितालक्षणानि विस्तारेण उक्तानि ।

No. 317. संहितोपनिषद्विवरणं. Substance, country-made paper, 16×5 inches. Folia, 61. Lines, 11 on a page. Extent, 2100 slokas. Character, Nāgari. Date ? Place of deposit, Benares City, Govinda Bhaṭṭa. Appearance, old. Prose. Correct.

Beginning. एषपन्था इत्याद्या बह्वृचब्राह्मणोपनिषत् तस्या इदं विवरणं अल्पग्रन्थं सुखावबोधार्थमारभ्यते । उपनिषदित्युपनिपूर्व्वस्य सदेः क्विबन्तस्य विशरण-गत्यवसादनार्थस्य रूपमाचष्टे । विशेषेण चोपनिषच्छब्दवाच्यान्तविद्या, तादर्थ्यात् ग्रन्थोऽप्युपनिषत् ।

End. अथानन्तोवासिलविशेषणात् संवत्सरवासिनोऽर्थप्राप्तं शिष्यत्वं इति, तथापि प्रवक्तुरशिष्यस्यैव नित्यप्राप्तिस्तथाच । यो वाल्लं विज्ञातुं स्वान्मेधाविने तपस्विने वेतीत्येवं आचार्य्याः विद्याप्रवक्तारो मन्यन्ते द्विर्वचनं त्वशेषोप-निषत्समाप्तिदर्शनार्थं ।

Colophon. इति श्रीमच्छंकरभगवत्कृतौ संहितोपनिषद्विवरणं समाप्तं ।

विषयः । संहितोपनिषद्व्याख्या ।

No. 318. संक्षिप्तसारे कृदन्तटिप्पनी. Substance, country-made paper, 15×3 inches. Folia, 25. Lines, 8 on a page. Extent, 800 slokas. Character, Bengali. Date S.K. 1742. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Paṇḍit Hārāucandra Tarkavāgīsa. Appearance, fresh. Prose. Generally correct.

Beginning. ॐ नमः शिवाय ।

शतुःशकारकरणमायच्छदिति सिद्धये ।
ऋधातुङ्कादिरस्य स्यादच्छादेशः परे × × ॥
नयातीति न कर्त्तव्यं शीष्ठ इत्यत्र दूषणात् ।
तिष्ठन्तीति तदा न स्याद् यदि च स्यात्तकारवान् ॥
शाला × × × × च्छानः शीले विज्ञेय एव दिक् ॥

दिशिति यथात्र आनः क्लतः स्यात् तदा चार्थेः शानः स्यादीदित्यत्र लिङ्गदतिदिष्टस्यापि अत्रयस्यादित्यर्थः । इत्यादि ।

End. मध्या । मध्यत्व तत् दिनश्चेति कर्म्मधारय इति ननु वर्णस्य वर्णेनेत्यत्र अवयवहत्तिसमुदायहत्त्योः समासावयमेव निराकरिष्यति । तत् कथमेतदिति नचैव व्याख्यास्यामः । × × तैश्च पूर्व्वात् पातात् अस्मिन्नेव प्रत्यय इति न प्रत्यय इत्यर्थः । शाने । एकाजि अन्तादित्यतोऽम् कथं नानुवर्त्तते सन्निहितत्वात् । इत्यादि ।

Colophon. समाप्तेयं कृदन्तटिप्पनी । श्रीश्रीरामः शरणं । श्रीदुर्गा ॥ शकाब्दा १७४२ तारिक २म भाद्र ।

विषयः । संक्षिप्तसारीयकृदन्तप्रकरणव्याख्याया व्याख्यानं ।

No. 319. संक्षिप्तसारे व्याकरणादर्शे सुबन्तपादविवरणं By वंशीवदन. Substance, country-made paper, 16×4 inches. Folia, 32. Lines, 6 on a page. Extent, 850 slokas. Character, Bengali. Date S.K. 1243. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Sripati Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

Beginning. श्रीश्रीराधाकृष्णाय नमो जयति ।

श्रीरामं जलदश्यामं जितकामं तनूश्रिया ।
रत्नसिंहासनासीनं ज्ञानमुद्राकरं भजे ॥

खश ॥ मतुः शकारकरणमित्युक्तदिति सिद्धये
स्वधातुकादिरस्य स्यादन्त्यादेशः परे भिति ।
तत्रातीति न कर्त्तव्यं गोष्ठ इत्यत्र दूषणात्
तिष्ठतीति तदा न स्याद् यदि च स्यात्तुकारवान् ॥ इत्यादि ।

End. स्यादौ । खादित्यऽक्रत्याऽदितिक्षते प्रथमं सन्निकार्य्याभावे खट्टाभिरित्यत्र भिस् ऐसादेशः स्यात् प्रसिद्धास्तु अत्र अद्य परत्वात् × × × × स्थाने खादिधानाभावे खट्टाभिरिति न स्यादित्यपि दोषमाहुः । तन्न यदत्र × × स्थानी स्यात्तदा × × पीत्येके इत्यनेन खाद्वेतिपदं न स्यात् किन्तु खाद्वतीति । अत्र । प्रियाखाभिति टीकायां नाव्रीप्रकृतिदीर्घा-दिति तु निषेधः ।

Colophon. इति वंशीवदनकविचन्द्रविरचिते व्याकरणादर्शे सुवन्तपादविवरणो नाम षष्ठः किरणः ।

चिन्त्यं प्रमादमुत्सृत्य पुस्तिकेयं सुसङ्गता ।
कृता श्रीकविचन्द्रेण वंशीवदनशर्म्मणा ॥
शकाब्देऽनलवेदमितविमिते मासे तथाषाढ़के ।
पक्षे चापितु कृष्णके शुभतिथौ वारे तथा भूमिजे ॥
नत्वा राघवपादपद्मयुगलं श्रीजानकीसेवितं ।
ग्रन्थं संलिखति क्रमेण सुकृती श्रीरामचन्द्रः सुधीः ॥

विषयः । संक्षिप्तसारीयसुवन्तपादव्याख्याया व्याख्यानं ।

No. 320. संक्षिप्तसारीयकारकपादटिप्पनी By वंशीवदन. Substance, country-made paper, 13×3 inches. Folia, 25. Lines, 8 on a page. Extent, 800 slokas. Character, Bengali. Date S.K. 1748. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Srīpati Bhaṭṭāchāryya. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

× × × × × कल्पद्रुकल्पजल्पनं ।
× × दूर्व्वादलश्यामं श्रीरामं प्रणमाम्यहं ॥
क्रिया सर्व्वकारकाणां निरूपिका ।
प्रवृत्तौ च निवृत्तौ च कारकाणां य ईश्वरः ।

अप्रयुक्तः प्रयुक्तोवा स कर्त्ता नाम कारकं ॥

इतीश्वरत्वेन च प्रधानत्वात् कर्त्तुः प्रथमं लक्षणमाह विभक्तिविभजनोपायतया कर्त्तादिलक्षणानां व्याकरणाङ्गत्वमित्यादि ।

End. अतएव यत् × × × × × भावकर्म्मणोरात्मने इति क्वचिद्दृश्यते तल्लिपिकरप्रमादादेव । अनुदा × × आत्मनेपदमित्यतस्तत्रानुवृत्तिरिति ॥

श्रीवंशीवदनं विशिष्टविनयं विद्वज्जनप्रीणनं ।
सूते रायमती सती मतिमती श्रीमान् वशिष्ठः स्वयं ॥
व्याकारे क्रमदीश्वरेण रचिते श्रीनन्दिना शोधिते ।
गोयीचन्द्रकृते च तद्विरचिते पादो गतः पञ्चमः ॥
शकाब्दाः १७४८ ।

विषयः । गोयीचन्द्रकृतकारकटीकाया व्याख्यानम् ॥

No. 321. संक्षिप्तसारकारकपादटिप्पनी (सारार्थदीपिका) By गोपालचक्रवर्त्ती. Substance, country-made paper, 16×3 inches. Folia, 34. Lines, 8 on a page. Extent, 1,500 slokas. Character, Bengali. Date S.K. 1747. Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Late Paṇḍit Sripati Bhaṭṭācāryya. Appearance fresh. Prose. Correct.

Beginning. ॐ नमो रामाय ।

क्रिया ॥ ननु प्रकृतिप्रत्ययादिविभागपरिकल्पनया शब्दशासनं व्याकरणं । तद्भिन्नत्वात् कथं क्रियासुत्रप्रयोजकादेर्व्याकरणत्वं अचोच्यते सुप्रत्ययत्वविधायकं लक्षणं विधास्यमानं कर्त्तादिसंज्ञां विना न सम्भवतीति तद्धितत्वात् कर्त्तादिलक्षणानामपि व्याकरणत्वं एवं सत्यधिकारप्राप्तस्य नाम्न एव कर्त्तादिसंज्ञां विदधत् कर्त्रधीनव्यापारत्वात् कारकाणां कर्त्तुः प्राधान्यमतस्तल्लक्षणमेव प्रथममभिदधाति । क्रियानिमित्तं कारकमिति । इत्यादि ॥

End. षष्ठी । क्वचित्पदोपादानात् अर्थान्तरे च परे इत्याद्यर्थं सप्तम्यादिविषये लक्षणाभावाद्व्यवस्थापको विधिरयं वाच्यः ॥

गोयीचन्द्रकथासुधामतितरामास्वाद्य यत्नाच्चिरा
दालोक्याखिलटिप्पनीं गुणसतं सम्प्रविभा × × × ॥

श्रीलश्रीकविचन्द्रपादकमलध्यानेकतानो × × ।
कारकटिप्पनीं कृतिमुद्दे गोपालचन्द्रः सुधीः ॥

Colophon. इति श्रीकविचन्द्रचरणारविन्दानन्दित × × × × श्रीगोपाल-चक्रवर्त्तिविरचितायां सारार्थदीपिकायां कारकटिप्पनी समाप्ता ।

श्रीश्रीजाने दयाधाने चरणाब्जयुगे तव ।
श्रीचन्द्रधरकृतिना लिपिरेषा समर्पिता ॥
शकाब्दाः १७४७ ॥

विषयः । कारकटीकायाः व्याख्यानं ॥

No. 322. संक्षिप्तसारटिप्पनी (सारार्थदीपिका) (तिङन्तपादस्य). Substance, country-made paper, 14×4 inches. Folia, 99. Lines, 8 on a page. Extent, 2150 ślokas. Character, Bengali. Date S.K. 1743. Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Paṇḍit Harāṇa Candra Tarkavāgīśa. Appearance, fresh. Prose. Correct.

Beginning. ॐ नमः शिवाय ।

यस्मिन्नसज्जगदिदं सदिवावभाति ।
भोगीव × सकलोपधितोपि × ॥
यस्तद्गुणैः खमिव चिन्मय एक एतत् ।
तस्मै नमोऽद्भुतमयाय महेश्वराय ॥

सकलविषयव्यापकत्वात् सन्धिपादमभिधाय पदसाधनं व्याकरणमिति श्रवणात् सकलपादानां धातुमूलकत्वात् धातुप्रत्ययमारभमाणस्तिङो वाक्य समापकत्वेन प्राधान्यात् तिङन्तमेवाभिदधत् वर्त्तमानकालस्य पुरोवर्त्तितया सान्निध्यात् तिङ्शब्देनाख्यातत्वप्रसिद्धा लडादयो व्यपदिश्यन्ते इति मत्वा-भवेति वर्त्तमानकालीन-लट्-लक्षणमाह । धातोरित्यादि । इत्यादि ॥

End. ग्रन्थ × × × × × कर्त्तरि विहितो ×× कर्म्म कर्त्तरि भवत्येवेति पूर्व्वं × × × × × कर्म्मकर्त्तरि कर्त्तृत्वस्य विद्यमानत्वादिति भावः ।

विशेषविज्ञानपरा मत्सरा (?)
व्याख्यानमेतत् कलयन्तु सन्ततं ।
मया पुनस्तेषु कृतोऽयमञ्जलि
र्दृष्ट्वा वचोनेत्थविभाव्य मामकं ॥ (?)

श्रीमद्भिः कविचन्द्रपादकमलैराचार्य्यपञ्चाननै-
रन्यैर्वा यदवाचि कुत्रचिदथो विद्याविनोदेन च ॥
तत् सर्व्वं कलयन्तु निर्म्मलधियः सन्तोऽत्र संक्षेपतो
यत्तन्यद्विहितं मयेदमखिलं ग्टह्णन्तु सारार्थिनः ॥
युक्तं नोक्तमिदं पूर्व्वैरितीर्षाकलुषं वचः ।
को हि शब्दाम्बुधेः पारमगादेकं विनेश्वरं ॥

Colophon. इति श्रीकविचन्द्रचरणारविन्दनिःस्यन्दमानमकरन्दमधुव्रतगयघड्वन्द्यघटीय-कुलप्रसूत श्रीगोपालचक्रवर्त्तिविरचितायां सारार्थदीपिकायां द्वितीय-त्रिलन्तपादः समाप्तः × × × × × × × शकाब्दा १७४१ ।

विषयः । संक्षिप्तसारीयतिङन्तप्रकरणव्याख्याया व्याख्यानं ।

No. 323. संक्षिप्तसारसुबन्तटीकाटीधितिः By रामेश्वरतर्कालङ्कार. Substance, country-made paper, 15×3 inches. Folio, 24. Lines, 11 on a page. Extent, 1000 slokas. Character, Bengali. Date ? Place of deposit, Zilla Midnapur, Post Garvetā, Grāma Khunverā, Late Paṇḍit Srīpati Bhaṭṭācāryya. Appearance, old. Prose. Correct.

Beginning. ॐ नमो गणेशाय ।

लुक् ॥ अथास्य सकलविषयव्यापकत्वात् ग्रन्थादौ करणं युक्तमितिचेन्न स्वतन्त्रेच्छोर्नियन्तुमशक्यत्वादिति केचित्, वयन्तु कारकपादे नाम्नः कर्य्यादि संज्ञाविधानपूर्व्वकं प्रथमादिसप्तविभक्तीनां प्रथमपुरुषादेश्च विधानमुक्त मित्यादि ।

End. सदाद्याभिर्वर्त्तते इति नन्वत्र संख्यानष्टत्वात् कथं बहुवचनं अतएव समासे पूजार्थत्वतिवर्ज्जमित्यस्य प्रत्युदाहरणमेव दर्शयिष्यति । ऊ । एक-शेषात् बहुवचनमिति गुरवः तथाच चतुर्विंशत्यधिकशतमित्यर्थे अपरं आचार्य्यटिप्पन्यादौ बोध्यं ।

Colophon. इति श्रीरामेश्वरतर्कालङ्कारकृता सुबन्तटीकाटीधितिः समाप्ता ॥

विषयः । संक्षिप्तसारीयसुबन्तप्रकरणव्याख्याया व्याख्यानं ॥

No. 324. सङ्गीतरघुनन्दनः By विश्वनाथसिंह (स्वकृतटीकासहितः). Substance, country-made paper, 10 × 5 inches. Folia, 52. Lines, 13 on a page. Extent, 1900 ślokas. Character, Nāgarī. Date ? Place of deposit, Ṭikāri Rāṇiganja, District Gayā, Paṇḍit Raghunātha Tripāṭhī. Appearance, tolerable. Prose and verse. Incorrect.

Beginning. श्रीजानकीवल्लभाय नमः ॥

मूलस्य । रामप्रेमपयोधिवर्द्धनविधुः शृङ्गारसारास्पदं
संसारार्णवपारतारणतरिः मायातमोदीपिका ।
विद्युद्धा सुखछन्दवर्षणकरी कादम्बिनी काप्यसौ
भवतु कुशलनिवासिनीविजयतां श्रीजानकी सर्वदा ॥
श्रीसीतेविश्व रिपुगजसिंहो जयसिंहो राजसिंहोस्ति ।
तनुते तस्य तनुजो ग्रन्थं सङ्गीतरघुनन्दनाख्यं ॥ इत्यादि ॥

टीकायाः । श्रीगणपतये नमः ॥
वन्दे तत् पदकमलं यस्य मकरन्दं पुनाति जगदखिलं ।
× × × × × × × ॥
नत्वा गौरीशपादाब्जं टीका व्यङ्गार्थचन्द्रिका ।
श्रीरामरासरसिकविनोदाय विधीयते ॥

End.

मूलस्य । ससखी सीता सङ्गीतेषणसुखितभिरः × × स्तौ ।
विश्वनाथ × × निन्द्यते समदमदन × × ॥ * ॥
इति श्रीमन्महाराजकुमार-श्रीविश्वनाथसिंहविरचिते सङ्गीतरघुनन्दने श्री-
जानकीरघुनन्दनयोरानन्दस्थत्यवर्णनं नामैकादशः सर्गः ॥
अतः परं खण्डितं ।

टीकायाः । श्रीजानकीरघुनन्दनस्य परमदिव्यरासवर्णनरसासवं निपीय कथनानर्हमपि-
विरहवर्णनं करोमीति ॥ * ।

Colophon. इति सिद्धि-श्रीमन्महाराजाधिराजविश्वनाथसिंहकृतायां व्यङ्गार्थचन्द्रिका-
ख्यटीकायामेकादशः सर्गः ॥ अतः परं खण्डितं ।

विषयः । १ सर्गे मङ्गलाचरणं ॥ २ रामचन्द्रस्य स्टहरासवर्णनं ॥ ३ रामचन्द्रस्य वसन्त-रासवर्णनं ॥ ४ जानकध्यानाधानवर्णनं ॥ ५ कामवसन्तिकागमनवर्णनं ॥ ६ चारुशीलाकृत-मानानुनयवर्णनं ॥ ७ जानकीसमागमवर्णनं ॥ ८ जानकीभूषणविधानवर्णनं ॥ ९ दोलावर्णनं ॥ १० सर्व्वाङ्गशोभावर्णनं ॥ ११ सर्गे जानकीरघुनन्दनसम्मीलनानन्दजनितस्थत्यादिवर्णनं ॥

No. 325. सन्देहदोलावलीप्रकरणम् [मागधी]. Substance, country-made paper, 12×5 inches. Folia, 9. Lines, 11 on a page. Extent, 225 çlokas. Character, Nāgari. Date, Samvat 1594. Place of deposit, Benares City, Dikmaṇḍalācārya, Mahārāja Balacandra Sūri. Appearance, old. Verse. Correct.

Beginning. पद्दिविम्मियपयय जयं जसुसं, चिरत्थोरमतरमाश्वामो,
चयनागयं वनजद्दतं नमो जिनेसरं वीरं ।

End. इयकथं वयसंसयपयपव्यूहरमयरणं समावेन लिखियं,
जगपवरागमजिनवल्लभसूरिसिसेण ।

Colophon. इति सन्देहदोलावली प्रकरणं । संवत् १५९४. आश्विन सुदि दशमी ॥

विषयः । आत्मोपदेशच्छलेन आत्मसन्देहकथनम् ।

No. 326. संन्यासिव्यासपूजा. Substance, country-made paper, 9×5 inches. Folia, 6. Lines, 12 on a page. Extent, 120 ślokas. Character, Nāgari. Date ? Place of deposit, Bibihāṭī, Benares City, Paṇḍit Vāmanācārya. Appearance old. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
आषाढ्यां पौर्णमास्यां प्रातःस्नानं कृत्वा चौरं विधाय स्नानं कृत्वा मध्याह्ने
स्नानं कुर्य्यात्, सन्ध्यां विधाय व्यासपूजास्थानं गच्छेत् ।

End. निवसन्तु सुखेनात्र गमिष्यामः कृतार्थतां,
यथा शक्तिश्च शुश्रूषां गमिष्यामो वयं मुदा ॥
यज्ञेन यज्ञमयजन्निति परेशुर्विसर्जनं ॐ तत्सत् ब्रह्मार्पणमस्तु ।

Colophon. इति व्यासपूजा समाप्ता ।

विषयः । संन्यासिनां गुरुपादुकापूजनम् ।

No. 327. सप्तपदीप्रयोगः By नागोजीभट्ट. Substance, country-made paper, 14×5 inches. Folia, 22. Lines, 11 on a page. Extent, 500 ślokas. Character, Nāgar. Date Saṃvat 1810. Place of deposit, Benares, Paṇḍit Govinda Bhaṭṭa. Appearance, old. Prose. Incorrect.

Beginning. सा सविधि श्राद्धये उप यः कामयेत पुन र्न प्रत्याजायेयमिति × ×
पुनर्भुवमधिकृत्य तदानुसन्धेयोऽस्या मन्त्र उक्तः रात्रिं प्रपद्ये पुनर्भूमयो

भूकन्यां × × × वक्ष्यां युवतिं कुमारिणीमादित्यचतुर्थे वातः प्रांशाद्य सोमो × × × इत्यिष्ठे शरीरमिति । अस्य रात्रौ जपमानात् सिद्धिः अस्यफलं × × × ज्ञानं परं सकलं तु मोक्ष इति तन्नैवोक्तं अथत्र देवीविषयो मन्त्रः ।

End. अथ रहस्यत्रयस्य त्रयोऽध्यायाः × × × । तत्तत्कात्यायनीतन्त्रविरोधादिति ध्येयं । अत्र निष्कदक्षिणा दरिद्राणां चतुःसुवर्णदक्षिणा समर्थानां ॥

Colophon. इति श्रीशिवभट्टसूनो नागोजीभट्टकृते मार्कण्डेयपुराणान्तर्गत-सप्तशतीव्याख्याने चण्डीस्तोत्रप्रयोगविधिः । संवत् १८१० ।

विषयः । चण्डीपाठक्रमकथनं देवीछन्नादिव्याख्यानञ्च ॥

No. 328. सप्तसंस्थाप्रयोगः By अनन्तदीक्षितः. Substance, country-made paper, 10×4 inches. Folia, 42. Lines, 10 on a page. Extent, 840 ślokas. Character, Nāgar. Date ? Place of deposit, Benares City, Bibihāṭi, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

नमामि पार्वती [illegible] भक्तानां सिद्धिदायकं ।
क्रियते उपकाराया वशिष्टा सप्तसंस्थका ॥

अवष्टाकर्माद्या इत्यर्थः । इदानीं अवष्टाकर्माद्याः सप्तावशिष्टा उच्यन्ते ।

End. हस्तिकादिषु काम्यश्राद्धं हस्तिकारमतेनाष्टमीश्राद्धवत् सर्व्वं कार्य्यं । यद्वा-शौनकोक्तरीत्या वृद्धिश्राद्धवत् इत्यष्टकाविकृतिश्राद्धप्रयोगः ।

Colophon. इति श्रीमद्युयज्ञोपवीताभिधान-श्रीविश्वनाथसूनुना दीक्षितानन्तेन सर्वोपकारायावशिष्टसमन्त्रकअष्टाकर्माद्यपाकसंस्थाप्रयोगः समाप्तः ।

विषयः । अष्टाकर्मादिसप्तपाकयज्ञसंस्थाकथनम् ।

No. 329. सप्तपाकसंस्थाप्रयोगः (प्रयोगसारीयः) By विश्वनाथ. Substance, country-made paper, 10×5 inches. Folia, 23. Lines, 9 on a page. Extent, 460 ślokas. Character, Nāgari. Date Samvat. 1908. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

इदानीमवशिष्टाः सप्तपाकसंस्था उच्यन्ते । आसां × × × × × × × एताः कार्य्या नवेत्युक्तं प्राक् प्रायश्चित्तप्रकरणे × × ×. स्थालीपाके प्रमाणमप्युदाहृतं तत्र ।

End. श्राद्धं समाप्य पवित्रं ग्रन्थिं विस्रस्य शुचिदेशे विपेदाचम्य तद्दूरेव वर्गत्रयस्य तिलतर्पणं कुर्य्यात् । अनुमन्त्रणादिपिण्डप्राशनान्तसर्व्वमन्त्रेषु अनूहः ज्ञेयः ।

Colophon. इति अतिसंक्षिप्तश्रवणाकर्मादिसप्तपाकयज्ञसंस्थाप्रयोगाः ।
इति श्रीमत् आर्तवंशोत्पन्नाल्पज्ञानश्रीविश्वनाथकृते प्रयोगसाराख्ये सप्तपाकसंस्थाप्रयोगः समाप्तः । संवत् १९०८ वैशाखकृष्णाष्टम्याम् ।

विषयः । संक्षेपेण श्रवणादिसप्तपाकयज्ञसंस्थाकथनम् ।

No. 330. सप्तसंस्थाप्रयोगः (प्रयोगरत्नीयः) By नारायणभट्ट. Substance, country-made paper, 8 × 5 inches. Folia, 22. Lines, 9 on a page. Extent, 400 ślokas. Character, Nāgari. Date Saṃvat 1777. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

आश्वलायनमाचार्य्यं प्रणम्य पितरं गुरुं,
भट्टरामेश्वरसुतो भट्टनारायणः सुधीः,
पञ्चविंशतिसंस्कारेषूत्क्रष्टा दशसंस्कृतीः
पाकयज्ञान् सप्त शिष्टान् वक्ति शिष्टेष्टतुष्टये ।

End. कृत्तिकादिषु काम्यश्राद्धं कृत्तिकारम्भेन अष्टमीश्राद्धवत्सर्व्वं कार्य्यं, यद्वा-शौनकोक्तरीत्या वृद्धिश्राद्धवत् ।

Colophon. इति रामेश्वरभट्टसुतनारायणभट्टकृते प्रयोगरत्ने अष्टकाविकृतिश्राद्धप्रयोगः ।
इति सप्तसंस्थाप्रयोगः समाप्तः । संवत् १७७७, कार्त्तिककृष्णैकादशी ।

विषयः । द्विजातीनां सप्तविधसंस्कारकथनम् ।

No. 331. समन्त्रकयजुर्वेदिग्रहयज्ञाग्निस्थापनविधिः (कपिलपद्धरोक्तः). By वृद्धमिश्र. Substance, country-made paper, 15×3 inches. Folio, 20. Lines, 8 on a page. Extent, 500 ślokas. Character, Bengali. Date S.K. 1725. Place of deposit, Zilla Midnapur, Post Garvetā, Grām Khunverā, Late Paṇḍit Rāmtāraṇa S'iromaṇi. Appearance, old. Prose and verse. Correct.

Beginning. ॐ नमः श्रीसूर्य्याय ।

अथ वृद्धमिश्रप्रणीतकपिलपद्धरोक्तसमन्त्राग्निस्थापनसहितग्रहयज्ञपद्धति लिख्यते । तत्र ग्रहदोष-नराधिप-प्रबलशत्रु-दुःसहरोगादिनिमित्तं नित्य-कामशान्तिकं मलमासादिसमयाशुद्धावपि कार्य्यं । स्त्रीपुत्रादिरूपकाम्य-साधकाशककर्म्मणि मलमासादीतरशुद्धकालोऽपेक्षितः । तत्र रविसोमबुध-वृहस्पतिशुक्रवासरेषु चित्रानुराधाश्रवणशिरोरेवतीपुष्याश्विनीहस्तारोहिण्यू-त्तराचयेषु चन्द्रतारानुकूले शुभलग्ने वैधृति-व्यतीपात-विष्टि-रिक्तातिथि-निरंशादिरूपप्रतिकूलसमयेतरस्मिन् काले यज्ञमारभेत । इत्यादि ।

End. एवं ग्रहविप्रानपि भोजनादिना परितोष्य स्वयमपि बान्धवैः सह सानन्दं भुक्त्वा स्वच्छन्दं विहरेदिति ॥

Colophon. इति कपिलपद्धरोक्तवृद्धमिश्रप्रणीतसमन्त्रकयजुर्वेदिग्रहयज्ञाग्निस्थापन-विधिः समाप्तः । लिखितं श्रीरामलोचनदेवशर्म्मणा आत्मनः पाठार्थं । शकाब्दाः । १७२५ । १० । ५ ।

विषयः । यजुर्वेदिनां अग्निस्थापनग्रहयज्ञविधिकथनं ॥

No. 332. सरस्वतीसूत्रटीका (लघुभाष्यं). Substance, country-made paper, 15×6 inches. Folia, 127. Lines, 15 on a page. Extent, 5715 slokas. Character, Nāgara. Date, S.M. 1858. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. उभये स्वराः, अकारादय एकारादयश्च स्वरसंज्ञाः स्युः । संज्ञाप्रदेशा इयं × × × × इत्यादयः । अथ उभयग्रहणं किमर्थं, अकारादीनां एकारादीनाञ्चानुवृत्त्यैव लब्धत्वात् । उच्यते ।

End. अन्योक्तेः कर्मणीत्यादिशब्देन विधानात् प्रथमा कारकविभक्तिर्भवतीदं च

यास्तिकस्तदाशयं विवरितुं प्रकरणान्ते श्रीसरस्वत्या × × प्रथमेति सूत्रं स्तनमिति दिक् ।

Colophon. षाटकेश्वपुरस्थायी विनायकसुतोऽकरोत् ।
रघुनाथाभिधोव्याख्यां × × यथामति ॥
इति कारकप्रकरणं । संवत् १८५६ कार्त्तिककृष्णपक्षे ।

विषयः । सारस्वतसूत्रव्याख्या ।

No. 333. सरस्वतीसूत्रटीका (लघुभाष्यम्). Substance, country-made paper, 15×6 inches. Folia, 25. Lines, 15 on a page. Extent, 875 ślokas. Character, Nāgara. Date, S.M. 1898. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः । श्रीरघुनाथाय नमः ।
समासश्चान्वये नाम्नां, अत्र योगद्वयं, समास इत्याद्यो योगः । संज्ञाधिकारश्चायं, अन्वर्थाचेयं संज्ञा, समानि एकीभूतानि पदानि यत्रां आसते यस्मिन् आधारे × × × । अथवा । इत्यादि ।

End. इत्यच वेदान्तव्याकरणयोरेक एव सिद्धान्त इति दिक् ॥
षाटकेश्वपुरस्थायी विनायकसुतोऽकरोत्,
रघुनाथाभिधोव्याख्यां सज्ञानाय्येव नागरः ॥

Colophon. इति सरस्वतीसूत्रविवरणे लघुभाष्याख्ये रघुनाथकृतौ पूर्व्वार्द्धं समाप्तं । संवत् १८९८ चैत्र कृष्णपक्षे ।

विषयः । सारस्वतसूत्रव्याख्या ।

No. 334. सर्व्वदेवप्रतिष्ठाप्रयोगः By वासुदेव. Substance, country-made paper, 10×3 inches. Folia, 160. Lines, 4 on a page. Extent, 1280 ślokas. Character, Nāgara. Date, Samvat 1908. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose and verse. Correct.

Beginning. श्रीगणेशाय नमः ।
अथ स्थावरविष्णुशिवादिप्रतिष्ठोच्यते ।
तत्रादौ मूर्त्तिनिर्माणप्रकारः । सत्यरत्नाकरे । इत्यादि ।

End. अन्यतरकुण्डाग्निनाम्ने आचार्य्यकुण्डादग्निरयम्यः ।
आचार्य्यकुण्डाग्निर्यावत् समाप्तिं विशेषतो रक्षणीय इति ॥

Colophon. इति वासुदेवकृतायां प्रयोगमालायां विष्णुप्रतिष्ठादिसर्व्वदेवप्रतिष्ठाप्रयोगः ।
संवत् १९०८ ।

विषयः । सर्व्वदेवानां प्रतिष्ठाकथनम् ।

No. 335. सर्व्वदेवप्रतिष्ठाप्रयोगः By **माधवाचार्य्य.** Substance, country-made paper, 10×3 inches. Folia, 127. Lines, 9 on a page. Extent, 2032 ślokas. Character, Nāgara. Date, Samvat 1911. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।

उदगयने माघादिपञ्चसु मासेषु शुक्लपक्षे चतुर्थी-षष्ठी-नवमी-चतुर्दशी-व्यतिरिक्तासुबुधगुरु मङ्गलान्यतमस्मिन् वारे भौमभिन्नसर्व्ववारेषु वा अश्विनीरोहिणीमृगपुनर्वसुपुष्योत्तरा(हस्ता)स्वात्यनुराधाश्रवणाश्लेषामूलधनिष्ठा रेवत्याद्यन्यतमस्मिन् नक्षत्रे सुलग्ने प्रतिष्ठा कार्य्या ।

End. स्थिरलक्ष्मी-कीर्त्तिलाभ-शत्रुपराजय-सर्व्वपापनिरसन-विष्ण्वादिलोकप्राप्त्यर्थं विष्णुमूर्त्तिप्रतिष्ठां करिष्ये ।

Colophon. सर्व्वदेवप्रतिष्ठाप्रयोगः समाप्तः । संवत् १९११ ।

विषयः । सर्व्वदेवप्रतिष्ठाकथनम् ।

No. 336. सर्व्वानन्दतरङ्गिणी By **शिवनाथभट्टाचार्य्य.** Substance, country-made paper, 15×3 inches. Folia, 16. Lines, 6 on a page. Extent, 500 ślokas. Character, Bengali. Date, Sam. 1256. Place of deposit, Upalatā Grām, Post Mehār, Zilla Comilla, Paṇḍit Jagadbandhu Tarkavāgīś. Appearance, fresh. Verse. Generally correct.

Beginning. नत्वा श्रीगुरुपादाब्जं तनोति गुरुकिङ्करः
श्रीसर्व्वानन्दनाथस्य सर्व्वानन्दतरङ्गिणीं ॥
सूक्ष्मं तेजस्तथास्थूलं विविधं शिवभाषितं ।
तदारम्भे गुरुः सूक्ष्मं सर्व्वकारणकारणं ॥ (?)

शिवशक्त्यात्मकं ब्रह्म चंस इत्यचरद्वयं ।
तद्रूपं योगिभिर्ध्येयं चन्द्रे पचद्वयं यथा ॥
ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्त्तिं ।
द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यं ॥
एकं नि × × × मचलं सर्व्वदा साचिभूतं ।
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥ इत्यादि ।

End. अत एव हि शाक्तानां सुरापानं प्रशस्यकं ।
कथं निन्दसि नो दृष्टिन् विचार्य्यं शरणं व्रज ॥

Colophon. इति श्रीसर्व्वानन्दात्मज-श्रीशिवनाथभट्टाचार्य्यविरचिता सर्व्वानन्दतरङ्गिणी-समाप्ता ॥ सन १२५६ ।

विषयः । सर्व्वानन्दनाथस्य मेहारवासिनस्य साचात्कृतभवानीचरणयुगस्येतिहासवर्णनं । कदासौ प्रादुरासीदिति नास्ति निश्चयः परन्तु मेहारे राज्यं कुर्व्वति दासाभिधे राजनि सर्व्वानन्द आसीदित्येवाच श्रूयते ।

No. 337. साग्निकापस्तम्बदाह्यविधिः. By बालकृष्णः Son of आपदेवः. Substance, country-made paper, 12×3 inches. Folia, 21. Lines, 7 on a page. Extent, 315 ślokas. Character, Nāgara. Date ? Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः ।
श्रीरामं मोचिनी राजपितरं मातरं तथा ।
आपदेवं गुरुं चापि प्रणिपत्य यथाक्रमम् ॥
आपस्तम्बमुनिं नत्वा दृष्ट्वा तत्सूत्रवार्त्तिकं ।
निबन्धांश्च तथाचारं शिष्टानां चैवपद्धतीः ॥

End. सुतेन आपदेवस्य बालकृष्णेण सूरिणा ।
ग्रन्थाननेकानालोक्य कृताहिताग्निपद्धतिः ॥

Colophon. इति श्रीमदापदेवसुतबालकृष्णरचितः-साग्निकापस्तम्बसुतदाह्यविधिः समाप्तः ॥

विषयः । साग्निकापस्तम्बीयसुतदाहनविधानम् ।

No. 338. सामवेदीयसंस्कारपद्धतिः By वीरेश्वर. Substance, country-made paper, 9×5 inches. Folia, 147. Lines, 8 on a page. Extent, 2352 slokas. Character, Nāgara. Date, Samvat 1879. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, old. Prose. Correct.

Beginning. श्रीगणेशाय नमः । श्रीसरस्वत्यै नमः ।

देवादित्यकुले जातः × × त्रैलोक्यसंसदि

पद्धतिं विदधे श्रीमान् श्रीमद्वीरेश्वरः स्वयं ।

End. गौरी पद्मा शची मेधा सावित्री विजया जया ।

देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥

धृतिः पुष्टिस्तथा तुष्टिस्तथा मे कुलदेवता ।

इतिगणपतिसहितमातृपूजा ।

Colophon. श्रीकृष्णाय नमः । संवत् १८७९ ।

विषयः । सामवेदीयानां संस्कारविधिः ।

No. 339. सामायकटीकावार्त्तिकं (मागधी-संस्कृत-गुर्ज्जरभाषासु). Substance, country-made paper, 16×6 inches. Folia, 21. Lines, 22 on a page. Extent, 1386 slokas. Character, Nāgara. Date 1827. Place of deposit, Benares City, Dikmaṇḍalācāryya Mahārāja Bālacandra Sūri. Appearance, old. Prose. Correct.

Beginning. श्रीवीतरागाय नमः ।

परिक्कमामि भन्ते इरियिया वहियिया ए विराहणा ए षम × × ।

ते षह गमणे डाम गमने चक्कमने पाणे गमणे विज्जगमने हरिदुगमणे ॥

इत्यादि ।

End. समाधिध्यानके वि × × × म्हवारो मरण होय बहरि जिन गुण सम्पत्तिहो उत्तमभ्यं कहिये ।

जिनेश्वर देवका गुणनकैं केवलदर्शन षर केवलज्ञान तिहि कीन्हारे प्राप्ति होय ।

Colophon. इति श्रीशास्त्रानुसारव्याख्यातं भव्यानां मुक्तिदं सामयिकं सर्व्वकर्मक्षयार्थं शास्त्रमङ्गलं दिशतु इति । संवत् १८२७ फागुणसुदि ।

विषयः । जैनमते सामायकसमाध्यनख्या नाम व्याख्या ।

No. 340. सामुद्रिकचिन्तामणिः By माधवः. Substance, country-made paper, 6×13 inches. Folia, 102. Lines, 18 on a page. Extent, 2500 slokas. Character, Nāgara. Date ? Place of deposit, Ṭikāri, Baith Bighā, District Gayā, Paṇḍit Mahāvīrā prasād Missra. Appearance tolerable. Verse. Generally correct.

Beginning. आद्यं खण्डितं ।

End. भोजनकाले यश्च कश्चिद्दयवाचनं दृष्णिनं वा पश्येत् सोऽपि सद्यो मरिष्यति ।
प्रकीर्णकेशां नग्नां वा स्त्रियं वा पाशधारिणीं ।
पश्येत् भोजनकाले यः सोऽपि सद्यो मरिष्यति ॥
भुञ्जमानस्तदात्मीयमन्नरन्ध्रेषु पश्यति ।
यः स मृत्युमवाप्नोति सद्य एव न संशयः ॥
इति कालगतिं बुद्धा बाह्याभ्यन्तरलक्षणैः ।
कुर्य्यान्निःश्रेयसे यत्नं यावदेव परिक्षयं ॥
सर्व्वं शरीरिणां साध्यं शरीरं खलु दुर्लभं ।
तत् कालवचनेनैव कृत्वा देहं प्रतिष्ठितं ॥ * ॥

Colophon. इति श्रीश्रीपामकरोपनामक-माधवकृते सामुद्रिकचिन्तामणौ तृतीयोऽध्यायः ॥ शुभमस्तु ॥

विषयः । स्त्रीपुंसामाङ्गिकशुभाशुभलक्षणादिकथनं । रिष्टारिष्टफलादिकथनं ॥

No. 341. सापिण्ड्यकल्पलतिका By अपरोदेवापरनामकश्रीसदाशिवदेव. Substance, country-made paper, 9×3 inches. Folia, 3. Lines, 7 on a page. Extent, 40 slokas. Character, Nāgara. Date, Samvat 1943. Place of deposit, Bibihāṭi, Benares City, Paṇḍit Vāmanācārya. Appearance, new. Verse. Correct.

Beginning. श्रीगणेशाय नमः ।
श्रीमद्गजाननषडाननयुक्शिवौ च
श्रीविठ्ठलं निजगुरुं गुरुमेव नत्वा,
सापिण्ड्यकल्पलतिकां तनुते विचित्रां
देवः सदाशिव इमां शिशुबोधनाय ॥

End. पद्यप्रसूनैः षष्टिसंख्यकैः
अलंकृता कल्पलता मदीया ।

अध्यापकाध्येतृजनाय नित्यं
दद्यादभीष्टानि परःशतानि ॥

Colophon. इति श्रीमद्देवालयपुरवासि-श्रीनीलकण्ठसूरिसूनुश्रीश्रीपतिसूनु × × अपीदेवापरनामधेयेन श्रीसदाशिवदेवेन रचिता सापिण्ड्यकल्पलतिका समाप्ता । संवत् १९४१ ।

विषयः । सापिण्ड्यव्यवस्था ।

No. 342. सामविधानब्राह्मणभाष्यम् By माधव. Substance, country-made paper, 16×6 inches. Folia, 41. Lines, 11 on a page. Extent, 1640 slokas. Character, Nāgara. Date ? Place of deposit, Benares, Govinda Bhaṭṭa. Appearance, new. Verse. Correct.

Beginning. वागीशाद्याः सुमनसः सर्व्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्, ।
निर्ममे तमहं वन्दे विद्यातीर्थम् महेश्वरं ॥

End. इदं शिष्येण प्रयोक्तव्यं । य एतानि दातुं न शक्नुयात् स शुश्रूषया अल्पधनप्रदानेन च उपाध्यायं तोषयित्वा तेनानुज्ञातः सन् उक्तविधानेन सामानि प्रयुञ्जानो यं कामं कामयितव्यफलविशेषं कामयते तमाप्नोति । अभ्यासः खण्डः इति तृतीयाध्याये नवमः खण्डः ।

Colophon. इति श्रीमत् सायनाचार्य्यविरचिते माधवीये वेदार्थप्रकाशे तृतीये सामविधानाख्ये ब्राह्मणे तृतीयोऽध्यायः समाप्तश्चायं ग्रन्थः ।

विषयः । सामवेदान्तर्गतसामविधानब्राह्मणव्याख्या ।

No. 343. सारसंग्रहदीपिका By रामप्रसाददेवशर्म्मा. Substance, country-made paper, 16×4 inches. Folia, 62. Lines, 8 on a page. Extent, 1500 slokas. Character, Bengali. Date, S.K. 1741. Place of deposit, Zilla Midnapur, Post Candrakonā, Ayodhyā Raghunathvāṭi, Babu Cakrapāṇi Rāya. Appearance, tolerable. Verse. Generally correct.

Beginning. ॐ नमो गोपीजनवल्लभाय ।

वन्दे गुरुपदद्वन्द्वं सद्दसारस्थितं परं ।
यस्य विज्ञानमात्रेण मूकमावर्त्तयेच्छ्रुतिं ॥
बर्हापीडाभिरामं मृगमदतिलकं कुण्डलाक्रान्तगण्डं ।
कञ्जाचं कम्बुकण्ठं स्मितसुभगमुखं स्वाधरे न्यस्तवेणुम् ।
श्यामं शान्तं त्रिभङ्गं रविकरवसनं भूषितं वैजयन्त्या
वन्दे वृन्दावनस्थं युवतिशतवृतं ब्रह्म गोपालवेशम् ॥
प्रह्लादनारदपराशरपुण्डरीक
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ।
रुक्माङ्गद × × × फाल्गुणादीन्
पुण्यानिमान् परमभागवतान् नमामि ॥
ब्राह्मणेभ्योनमो नित्यं वैष्णवेभ्यश्च सादरं ।
येषां पादरजो नित्यं वाञ्छन्ति विबुधाः सदा ॥
वाञ्छाकल्पतरुभ्यश्च कृपासिन्धुभ्य एव च ।
पतितानां पावनेभ्यो वैष्णवेभ्यो नमो नमः ॥
इदं सारसंग्रहस्य दीपिकां दीपरूपिकां ।
अज्ञानानां हितार्थाय तन्यते रामशर्म्मणा ॥
दीचाद्यनन्यभक्तिश्च निरूप्यन्ते यथामति ।
सुकवीनां पदद्वन्द्वे प्रणम्य च मुहुर्मुहुः ॥ इत्यादि

End. श्रीमद् गोविन्दमूर्त्तेस्तु सद्दीचाक्रमतोऽर्च्चनं ।
कुरु ब्राह्ममुहूर्त्तादिनिशान्तं पादसेवनं ।
विहाय सर्व्वान् देवादीन् कुरु नारायणार्च्चनं ॥
सख्यं कुरु जगन्नाथे श्रीकृष्णे परमात्मनि ।
अहं ममेति सन्त्यज्य तस्मिन्नात्मनिवेदनमिति । ११३० ।
श्रीगीतायां ।
सर्व्वधर्म्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वां सर्व्वपापेभ्यो मोचयिष्यामि मा शुच ॥ ११३१ ।
श्रीएकादशे च ।
आज्ञायैवं गुणान् दोषान् मयादिष्टानपि स्वकान् ।
धर्म्मान् सन्त्यज्य यः सर्व्वान् मां भजेत् स च सत्तमः ॥

Colophon. इति श्रीमद्गोकुलानन्दपदारविन्दमधुप-श्रीलश्रीरामप्रसादद्देवशर्म्मणा विरचिता सारसंग्रहदीपिका समाप्ता ॥

ॐ हरये नमः ।

पतितः स्खलितो वार्त्तः क्षुत्वा वा विवशो रटयन् ।
हरये नमः इत्युच्चैर्मुच्यते घोरकिल्विषात् ॥

अयं ग्रन्थः श्रीकृष्णचरणेऽर्पितोऽस्तु शकाब्दाः १७४१ । ७ । २६ ।

मार्गशीर्षेऽसिते पक्षे द्वादश्याञ्च कुजेऽहनि ।
समाप्तोऽभूच्च ग्रन्थोऽयं राधाकृष्णप्रसादतः ॥

विषयः । आदौ श्रीगुर्व्वादिवन्दना । दीक्षाविधिः । गुरुलक्षणं । दीक्षामाहात्म्यं । देवतान्तरदीक्षा । श्रीकृष्णोपासनामाहात्म्यं । प्रकृतिमाहात्म्यं । विष्णुमन्त्रोपासकमाहात्म्यं । सन्न्यासिलक्षणं । श्रीकृष्णगुणकीर्त्तनं । महाप्रलयादिवर्णनं । विष्णुमन्त्रमाहात्म्यं । भक्तलक्षणं । नामभजनं । वैष्णवमाहात्म्यं । कृष्णनामव्युत्पत्तिः । ब्रह्मलक्षणं । ललितादिश्रीदामाद्यन्तावरणपूजाविधिः । बलदेवध्यानं । महाप्रसादमाहात्म्यं । प्रदक्षिणविधिः । प्रणामप्रार्थनाविधिः । कृष्णार्चनप्रसिद्धपुष्पनिर्णयः । तुलसीपत्रमाहात्म्यं । तुलसीचयनकालनिरूपणं । तुलसीचयनमन्त्राः । तुलसीरोपणमाहात्म्यं । तुलसीवनपूजनविधिः । करवीरपुष्पमाहात्म्यं । राधा-लक्ष्मी-सावित्री-दुर्गा-सरस्वती-प्रभृतिप्रकृत्युत्पत्तिः । विभूति-गोलोक-वृन्दावनवर्णनं । प्रणवमाहात्म्यं । ध्यान-श्राद्धपात्रदान-नामाङ्कधारणमाहात्म्यादिकथनं । वैष्णवश्राद्धविधिकथनं । श्राद्धपूर्व्वदिनकृत्यनिरूपणं । पात्रदानविधिकथनं । शालग्राममाहात्म्यकीर्त्तनं । एकादशीव्रतकथनं । अनन्यभक्तिलक्षणनिरूपणम् ॥

No. 344. सारस्वतभाष्यम् By रामनारायणशर्म्मा. Substance, country-made paper, 18×4 inches. Folia, 113. Lines, 5 on a page. Extent, 2,250 slokas. Character, Bengali. Date S.K. 1741. Place of deposit, Bhānderpur, District Bogudā, Paṇḍit Kālīsaraṇa Cakravarti. Appearance, tolerable. Prose. Generally correct.

Beginning. ॐ नमो गणेशाय ॥

